B.A. Sanskrit C. C - 12

# VEDA, VEDIC GRAMMAR & HISTORY OF VEDIC LITERATURE

## निर्देशकः दूर निरन्तर शिक्षा निर्देशालयः

UTKAL UNIVERSITY
NAAC ACCREDITED A+

D.D.C.E.

Education for All

ଦୂରନିରନ୍ତର ଶିକ୍ଷା ନିର୍ଦ୍ଦେଶାଳୟ, ଉତ୍କଳ ବିଶ୍ୱବିଦ୍ୟାଳୟ
DIRECTORATE OF DISTANCE & CONTINUING EDUCATION
UTKAL UNIVERSITY

# सूचिपत्रम्

**विषयक्रमः**

**Unit-I वैदिक सूक्तस**

**Unit-II वैदिक सूक्तस**

**Unit- III वैदिक व्याकरण**

**Unit- IV वैदिक साहित्यर इतिहास**

**DIRECTORATE OF DISTANCE & CONTINUING EDUCATION**
**UTKAL UNIVERSITY : VANI VIHAR**
**BHUBANESWAR-751007**

## From the Director's Desk

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

**DIRECTOR**

NOTES

सहभावमात्रप्रतीतेः पानक्रियान्वयित्वाभावाद् अदेवतात्वाद् भक्षणमन्त्रे नोपलक्षणीयत्वमिति।। **अपि च हे वसोष्पते वासकस्य ग्रामपश्वादिरूपस्य धनस्य स्वामिन्।** ॾअन्तर्भावितण्यथाद् वस निवासे इत्यस्मात् शृस्वृस्त्रिहित्रप्य-सिवसिहनिक्लिदिबन्धिमनिभ्यश्च (उ. पा. १. १०) इति उप्रत्ययः। अनित्यम् आगमशासनम् इति नुमभावे घेर्ङिति इति गुणे ङसिङसोश्च इति पूर्वरूपता। षष्ठयाः पतिपुत्रेति विसर्जनीयस्य सत्वम्। पूर्ववत् पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य पाष्ठिकम् आद्युदान्तत्वॾ। यद्वा वसोः वासकस्य प्राणस्य पते स्वामिन् प्रजापते **निरमय अभिमतग्रामादिलक्षणफलप्रदानेन** नितराम् अस्मान् क्रीडय। यतस्त्वं वसुपतिः अतस्तव **ग्रामादिवि-विधफलप्रदानशक्तिरस्ति। तस्माद् अस्मदपेक्षितानां** विविधफलानां साकल्येन प्रदानात् निरन्तरं सुखयेत्यर्थः।। अस्मादेवलिङ्गात् ग्रामसांपदादिषु कर्मसु विनियोग उपपन्नः। ॾरमुक्रीडायाम्। अस्मात् हेतुमति णिचि उपधावृद्धौ जनीजृष्क्नसुरञ्जोमन्ताश्चेति मित्त्वात् मितां ह्रस्वः इत्युपधाह्स्वत्वम्ॾ। **इदानीं** ग्रामादिविविधसंपत्त्या सर्वोत्कृष्टताम् आत्मनः प्रार्थयते। **मय्येवास्तु त्वया दत्तं ग्रामादिकम् अनन्यसाधारण्येन मय्येव वर्तताम्। अन्ययोगव्यवच्छेदार्थोयम् एवकारः।** यत **एवकारस्ततोन्यत्रावधारणम् इति न्यायेन अस्मच्छब्दात् परतो** वर्तमानेन एवकारेण ग्रामादीनां नियम्यमानत्वात्।। **मेधाजननस्य प्राधान्यं दर्शयितुं विप्रपरिव्राजकन्यायेन पार्थक्येन निर्दिशति मयि श्रुतमिति।** श्रुतम् उपाध्यायाद् विधितोधीतं **वेदशास्त्रादिकमपि मय्येव। अस्तु इत्यनुषङ्गः। सम्यगधीतस्यापि वेदादेः प्रायेण विस्मरणसंभवाद्** अधीतस्य धारणार्थं मह्यं मेधां प्रयच्छेत्यर्थः।।

## तृतीया।।

**इहैवाभि वि तनूभे आर्त्नी इव ज्यया।**
**वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम्।। ३।।**

इह। एव। अभि। वि। तनु। उभे इति। आर्त्नी इवेत्यार्त्नीऽइव। ज्यया।
वाचः। पतिः। नि। यच्छतु। मयि। एव। अस्तु। मयि श्रुतम्।। ३।।

**हे वाचस्पते** इहैव अस्मिन्नेव साधके जने। ॾ**इदमो हःइति सप्तम्यर्थे हप्रत्यये इदम इश् इति इशादेशः**ॾ। **उभे श्रुतधारणलक्षणां मेधां विविधभोगहेतुभूतां ग्रामादिसंपदं च। अनयोः ऐहिकामुष्मिकफलसाधनेन व्यवस्थितत्वात् कोटिद्वयेन** निर्देशः। **ते उभे अपि फले अभि वि तनु अभितो विस्तीर्णे कुरु। सर्वजनेभ्योपि मय्येव प्रभूते कुर्वित्यर्थः।** ॾ**तनु**

NOTES

विस्तारे तनादिकृञ्भ्य उः इति उप्रत्ययः। उतश्च प्रत्ययादसंयोगपूर्वात् इति हेर्लुक्⧖। तत्र दृष्टान्तः। ज्यया मौर्व्या धनुषि आरोपितया आर्त्नीं इव अटन्याविव। ते यथा अभिवितन्येते तथेत्यर्थः। अनेन स्वरसतः अप्राप्तयोरपि बलात् प्रापणम् उक्तम् इति द्रष्टव्यम्। यद्वा इहैव अभि वि तनु। अभिमतं फलम् इति शेषः। उभे आर्त्नी इवेति उभशब्दस्य उत्तरत्र संबन्धः। ⧖ईदूदेद्विवचनमिति प्रगृह्यसंज्ञा। प्लुतप्रगृह्या अचि इति प्रकृतिभावः। आर्त्नीं इवेति।

इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् इति समासः⧖। इदानीं प्राप्तस्य फलस्य स्थैर्यं प्रार्थयते। ⧖वाचस्पतिः विधाता नि यच्छतु स्वात्मने दत्तं निखिलं फलं नियमयतु। यथा मां न जहाति तथा स्थिरीकरोतु इत्यर्थः। ⧖निपूर्वाद् यमेः शपि इषगमियमां छः इति छत्वम्। तिङ्तिङः इति सर्वानुदात्तत्वम्⧖ अभिमतस्य फलस्य अयोगव्यवच्छेदम् उक्त्वा अन्ययोगव्यवच्छेदम् आह। मय्येवास्तु मयि श्रुतमिति। व्याख्यातमेतत्॥

## चतुर्थी॥

**उपहूतो वाचस्पतिरुपास्मान् वाचस्पतिर्ह्वयताम्।**
**सं श्रुतेन गमेमहिः। मा श्रुतेन वि। राधिषि॥ ४॥**

उपऽहूतः। वाचः। पतिः। उप। अस्मान्। वाचः। पतिः। ह्वयताम्।
सम्। श्रुतेन गमेमहि। मा। श्रुतेन। वि। राधिषि॥ ४॥

वाचस्पतिः वाचः पालयिता देवः उपहूतः समीपम् आहूतः। सत्स्वपि अन्येषु देवेषु असावेव मम अभिलषितफलप्रदातेति अस्माभिः प्रार्थित इत्यर्थः। ⧖उपपूर्वात् ह्वयतेः कर्मणि निष्ठा। वचिस्वपीत्यादिना संप्रसारणम्। गतिरनन्तरः इति गतेः प्रकृतिस्वरत्वम्। उपसर्गाश्चाभिवर्जम् (फि. ४. १३.) इत्युपशब्द आद्युदात्तः⧖। यतो मयोपहूतः ततो हेतोर्वाचस्पतिः स देवः अस्मान् मेधाजननादिफलकामान् उप ह्वयतां तत्तत् फलं प्रदातु स्वसमीपम् आह्वयतु। यद्वा। तत्तत्फलप्राप्तिम् अभ्यनुजानातु। ⧖उपपूर्वो ह्वयतिः अभ्यनुज्ञानेपि वर्तते। यथा "उपहूत उपह्वयस्व" इति सोमभक्षणानुज्ञानानुज्ञापनमन्त्रो⧖ तेन उपहूताः सन्तो वयं श्रुतेन विधितोधीतेन वेदशास्त्रादिना सं गमेमहि संगच्छेमहि। वाचस्पतिप्रसादप्राप्तया मेधया कृत्स्नं वेदशास्त्रं प्राप्तवामेति भावः। ⧖व्यवहिताश्च इति समः क्रियापदेन संबन्धः। समोगम्बन्यृच्छीति गमेरात्मनेपदम्। अस्माद् आशीर्लिङि लिङ्याशिष्यङ् इति अङ् प्रत्ययः



Scanned with CamScanner

NOTES

शपोपवादः। लिङः सीयुट् इति सीयुट्। छन्दस्युभयथा इति सार्वधातुकसंज्ञायां लिङः सलोपोनन्त्यस्य इति सलोपे गुणे वलि लोपः। **अधीतस्य वेदशास्त्रस्य स्वस्मिन् सर्वदावस्थानं मार्थयते मा श्रुतेनेति। श्रुतेन उक्तलक्षणेन मा वि राधिषि विराद्धो वियुक्तो मा भूवम्। सर्वदा वेदशास्त्रादिसहितो भूयासम् इत्यर्थः।** **राध साध संसिद्धौ।** अस्मात् माङि लुङि व्यत्ययेन आत्मनेपदम् इडागमश्च।

**[ इति ] प्रथमकाण्डे प्रथमेनुवाके प्रथमं सूक्तम्॥**

विद्या शरस्येत्याद्यनुवाकशेषस्य उपाकर्मणि जपे विनियोगः। तथा च सूत्रम्। "**अभिजिति शिष्यानुपनीय**" इत्युपाकर्म प्रक्रम्य "त्रिषप्तीयं पच्छो वाचयेच्छेषमनुवाकस्य जपन्ति" इति (कौ. १४. ३)। तत्र विद्या शरस्येति **प्रथमेन** सूक्तेन तस्मिन्नेव उपाकर्मणि आज्यहोमः। कर्तव्यः। अपराजितगणे अस्य पठितत्वात् "अभयैरपराजितैराज्यं जुहुयात्" (कौ. १४. ३) इत्यादिषु विनियोगः।

एतेनैव संग्रामजयकर्माणि कुर्यात्। तानि च। आज्यहोमः सक्तुहोमः। धनुरिध्मेग्नौ धनुःसमिदाधानम् शरेध्मे शरसमिदाधानम् संपातिताभिमन्त्रितधनुःप्रदानं च प्रत्येतव्यानि। एतेषु कर्मस्वनुष्ठितेषु संग्रामे दृष्टमात्रेण शत्रवः पलायन्ते। तद् उक्तं संहिताविधौ। "विद्या शरस्य (१. २.) मा नो विदन्" (१. १९) अदारसृत् (१. २०) स्वस्तिदाः (१. २१) अव मन्युः (६. ६५) "निर्हस्तः (६. ६६) परि वर्त्मानि (६. ६७) अभिभूः (६. ९७.) इन्द्रो "जयाति।" (६. ९६) अभि त्वेन्द्र (६.९९) इति सांग्रामिकाणि। आज्यसक्तून् "जुहोति" इत्यादि (कौ. २. ४)। अयमेव अपराजितगण इत्युच्यते। तथा अनेनैव सूक्तेन संपातयुक्ताभिमन्त्रितद्रुघ्न्यार्त्नीज्यापाशबन्धनं तद्वद्दूर्वादितृणवन्धनं च इषुनिवारणकामः कुर्यात्। सूत्रितं हि। "प्रथमस्येषुपर्ययणानि" इत्यादि (कौ. २. ४)॥

तथा ज्वरातिसारातिमूत्रनाडीव्रणेषु तदुपशमनकामस्य अनेनैव सूक्तेन मुखशिरोनिर्मितरज्जुबन्धनम् क्षेत्रमृत्तिकाया वल्मीकमृत्तिकाया वा पायनम् सर्पिर्लेपनम् चर्मखल्वामुखेन अपानशिश्ननाडीव्रणमुखानां धमनं च कार्यम्। आह च सूत्रकारः। "विद्या शरस्य (१. २) अदो यद् (२. ३) इति मुञ्जशिरोरज्ज्वा बध्नाति" इत्यादि "धमति" इत्यन्तम् (कौ. ४. १.)॥ "अपराजितां विजयकामस्य" इति (न. क. १७) विहितायाम् अपराजिताख्यायां महाशान्तावपि अस्य विनियोगः। तद् उक्तं नक्षत्रकल्पे। "अपराजितगणोपराजितायाम्" इति (न. क. १७.)॥



Scanned with CamScanner

NOTES

पुष्पाभिषेकेपि एतत् सूक्तम्। तद् उक्तं परिशिष्टे।
शर्मवर्मगणश्चैव तथा स्याद् अपराजितः।
आयुष्यश्चाभयश्चैव तथा स्वस्त्ययनो गणः।
एतान् पञ्च गणान् हुत्वा। इति [ प. ४. ४ ]॥

## तत्र प्रथमा॥

विद्मा शरस्य पितरं पर्जन्यं भूरिधायसम्।
विद्मो ष्वस्य मातरं पृथिवीं भूरिवर्पसम्॥ १॥

विद्म। शरस्य। पितरम्। पर्जन्यम्। भूरिऽधायसम्।
विद्मोइति। सु। अस्य। मातरम्। पृथिवीम्। भूरिऽवर्पसम्॥ १॥

संग्रामजये शरस्यैव मुख्यसाधनत्वेन प्रसिद्धत्वात् तज्जयसामर्थ्यं विशिष्टकारणजन्यत्वेन उपपादयति। शरस्य हिंसकस्य बाणस्य शत्रुजयार्थं धनुषि संधीयमानस्य पितरम् उत्पादकं विद्मा जानीमः। ⧗विद ज्ञाने अस्मात् लटि विदो लटो वा इति मतो मादेशः। अदादित्वात् शपो लुक्। प्रत्ययस्वरेण अन्तोदात्तत्वम्। तिङतिङः इत्यत्र अनुदात्तं सर्वमपादादौ इत्यधिकारात् अस्य च पादादित्वात् निघाताभावः। द्व्यचोतस्तिङः। इति सांहितिको दीर्घः⧗। किंसंज्ञकोयं पिता इत्याह पर्जन्यमिति। तर्पयिता चासौ जन्यश्चेति पर्जन्यः। ⧗तृपेर्विचि आद्यन्तयोर्वर्णयोर्विपर्ययः। ⧗जनेभ्यो हितो जन्यः। कालेकाले प्रवर्षणेन तर्पयिता सन् जनानां हितकारी भवतीत्यर्थः। यद्वा काले प्रवर्षणार्थे रसान् मार्जयतीति पर्जन्यः। ⧗तथा च यास्कः। पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः प्रार्जयिता वा रसानाम् इति (नि. १०. १०.)⧗। तस्य सर्वस्माद् अतिशयम् आह। भूरिधायसं भूरि बहुलं दधाति प्रवर्पणेन कृत्स्नं जगत् पोपयतीति भूरिधायाः। यद्वा। भूरीणि स्थावरजङ्गमात्मकानि वस्तूनि यथोचितकाले वृष्टिप्रदानेन दधाति धारयतीति भूरिधायाः। कारणस्य अतिशयितवीर्यत्वप्रतिपादनेन तज्जन्यस्यापि शरस्य अमोघवीर्यत्वम् उक्तं वेदितव्यम्। ⧗डुधाञ् धारणपोपणयोः वहिहाधाञ्भ्यश्छन्दसि। (उ. ४. २२०) इति कर्तरि असुन्। तत्र णिदित्यनुवृत्तेः आतो युक् चिण्कृतोः इति युक्। असुनो नित्त्वात् तदन्तस्य आद्युदात्तत्वम्। समासेपि गतिकारकोपपदात्कृत् इति कुदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते असुनि गतिकारकयोरपि पूर्व (पद) प्रकृतिस्वत्वं च (उ. ४. २२६) इति स्मरणात् पूर्वपदप्रकृतिस्वरत्वम्। तञ्च अदिशदिभूशुभिभ्यः किन् (उ. ४. ६४) इति भूरिशब्दस्य क्रिन्प्रत्ययान्तत्वात् ञ्नित्यादिर्नित्यम् इति आद्युदात्तत्वम्⧗। तथा अस्य शरस्य मातरं जननीम् सु सुष्ठु विद्मो। उशब्दः एवकारार्थे। विद्मैव



Scanned with CamScanner

NOTES

तदसाधारणरूपं जानीम एव। ताम् आह। पृथिवीं प्रथितां विस्तीर्णां भूमिम्। श्रूयते हि। ''तत् पुष्करपर्णेऽप्रथयत्। यद् अप्रथयत् तत् पृथिव्यै पृथिवित्वम्'' (तै. ब्रा. १. १. ३. ७) इति। ॾप्रथ विस्तारे। अस्मात् प्रथेः षिवन् संप्रसारणं च (उ. १. १८९) इति पिवन् प्रत्ययः। तत्संनियोगेन रेफस्य संप्रसारणम्। पिद्गौरादिभ्यश्च इति ङीप्। प्रत्ययस्वरेण अन्तोदात्तत्वम्ॾ।। तां विशिनष्टि। भूरिवर्पसं भूरीणि बहुविधानि वर्पांसि। रूपनामैतत्। रूपाणि चराचरात्मकानि यस्यां सा तथोक्ता। जनन्याः सर्वरूपोपादानत्वात् कारणगुणानां कार्ये अनुगमदर्शनात् तज्जन्यः शरोपि नानाकारः सन् साधकाभिमतं फलं साधयितुं शक्नोतीत्यर्थः। ॾवृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुक्च (उ. ४. २००) इति वृङोऽसुन् प्रत्ययः तत्संनियोगेन पुगागमश्च। बहुव्रीहौ प्रकृत्या पूर्वपदम् इति प्रकृतिस्वरत्वम्ॾ।

ननु अत्र शरादिशब्दानाम् अनित्यवाणाद्यर्थविशेषवाचकता प्रतीयते। ततेश्च अस्य अर्थविशेषस्य अयं वाचकः शब्द इति पदार्थोत्पत्तिसमनन्तरं तद्वाचकं शब्दं निश्चित्य अनन्तरं पदस्य प्रयोक्तव्यत्वाद् वेदस्य पौरुषेयत्येन अप्रामाण्यम् अनित्यत्वं च प्राप्नोतीति।। नायं दोषः। शब्दानाम् अनित्यार्थवाचकत्वानभ्युपगमात्। तर्हि कोसौ वाच्योर्थः।। आकृतिरिति वदामः। यद् असूत्रयात् जैमिनिः। ''आकृतिस्तु क्रियार्थत्वात्'' (जै. १. ३. ३३) इति। तथा हि व्रीहीन अवहन्ति पशुम् आलभेत गाम् आनय ब्राह्मणो न हन्तव्यः इत्यादिप्रयोगेषु किं व्यक्तिः शब्दार्थः उत आकृतिरिति। व्यक्तिरिति तावत् प्राप्तम्। कुतः। अवहननादिक्रियाभिः व्यक्तेरन्वेतुं योग्यत्वात्। न हि आकृतिः अवहन्तुम् आलब्धुम् आनेतुम् हन्तुं वा योग्या। ननु आनन्त्यव्यभिचाराभ्यां न व्यक्तौ व्युत्पत्तिः संभवति। अनन्ता हि गोव्यक्तयः। अतीतानागतानाम् अनेकदेशवर्तिनां गवाम् इयत्ताया अभावात्। किं च शुक्लव्यक्तौ व्युत्पन्नो गोशब्दः कृष्णव्यक्तौ प्रयुज्यमानः स्वार्थे व्यभिचरेत् तत्र कथं व्युत्पत्तिरिति चेत्। एवं तर्हि व्युत्पत्तिकाले सा व्यक्तिः आकृत्या उपलक्ष्यताम् इति प्राप्ते।

ब्रूमः। अन्वयव्यतिरेकाभ्यान् आकृतेः शक्तिग्रहणनिमित्तत्वात् शब्दार्थत्वं तस्या एवोचितम्। किं च गोशब्दे उच्चरिते व्यक्तिवादिनः संशयो भवेत्। तस्माद् आकृतेरेव अभिधेयत्वम्। यदि आकृतौ अवहननादिक्रिया न पर्यवस्येत् तर्हि व्यक्तिस्तत्रोपलक्षणीया। किं च ''श्येनचितं चिन्वीत'' (तै. सं. ५. ४. ११. १) इत्यादौ आकृतेरेव सादृश्यप्रतियोगितया कार्यान्वयो दृश्यते। तस्माद् आकृतिः शब्दार्थः।। एवं प्रकृतेपि शरादिशब्दानां नित्य एव आकृतिलक्षणोर्थो वाच्यः। ततः शब्दार्थतत्संबन्धानां नित्यत्वेन अपौरुषेयत्वात् पुरुषबुद्धिप्रभवदोषानुप्रवेशाभावेन वेदानां स्वतःसिद्धं प्रामाण्यं पुरुषप्रयत्नानिर्वर्त्यत्वेन नित्यत्वं चेति।।



Scanned with CamScanner

NOTES

## द्वितीया॥

ज्या꣡के परि णो नमाश्मानं तन्वं꣡ कृधि।
वीडुर्वरीयोरातीरप द्वेपांस्या कृधि॥ २॥

ज्या꣡के। परि। नः। नम। अश्मानम्। तन्व꣡म्। कृधि।
वीडुः। वरीयः। अरातीः। अप। द्वेपांसि। आ। कृधि॥ २॥

हे ज्याके। कुत्सिता ज्या ज्याका। ॐकुत्सिते इति कुत्सायां कप्रत्ययः॥। स्वस्य उपद्रवहेतुत्वात् ज्यां कुत्सितत्वेन निर्दिशति। यद्वा अज्ञाता ज्या ज्याका। ॐअज्ञातार्थे कप्रत्ययः॥। शत्रुहस्तगतत्वेन तस्या अज्ञातत्वम्॥। आमन्त्रितस्य च इति पाष्ठिकम् आद्युदात्तत्वम्॥। हे ईदृशि मौर्विः नः अस्मान् परि णम परिहृत्य प्रह्वीभव। आज्यसक्तुहोमादिभिः इन्द्रप्रसादविशिष्टे मयि त्वदीयस्य शरसंधानार्थै नमनस्य निष्फलत्वात् मां विहाय अन्यत्र शरं प्रेरयेत्यर्थः॥ अस्य सूक्तस्य इन्द्रदेवताकत्वात् जयकर्मणः इन्द्रायत्तत्वाञ्च अत्र अश्रुतोपि इन्द्र एव संबोध्यः। हे इन्द्र तन्वं तनुम्। ॐतन्वादीनां छन्दसि बहुलम् इति यण्। उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य इति विभक्तेः स्वरितत्वम्॥। अस्माकं शरीरम् अश्मानम् अश्मवदृढावयवं शस्त्रामेद्यं कृधि कुरु॥

यद्यपि अत्र सामानाधिकरण्येन शरीरस्य अश्मकरणप्रार्थना प्रतीयते तथापि पाट्कौशिकस्य शरीरस्य अत्यन्तविरुद्धपाषाणात्मकत्वानुपपत्त्या "यजमानः प्रस्तरः" (ऐ. ब्रा. २. ३) इतिवत् तत्संवद्धगुणलक्षणा आश्रीयते। तथाहि ''यजमानः प्रस्तरः'' इत्यस्मिन् वाक्ये उद्भिदा यागेन इतिवत् सामानाधिकरण्याद् अन्यतरस्य अन्यत् नाम इत्येकः पूर्वः पक्षः। गुणविधिरेप इत्यपरः। तत्रापि यजमानकार्ये जपादौ प्रस्तरस्य अचेतनस्य सामर्थ्याभावात् प्रस्तरकार्ये तु स्रुग्धारणादौ यजमानस्य शक्तवात् यजमानरूपो गुणो विधीयते। एवं सति पश्चाच्छ्रुतस्य प्रस्तरशब्दस्य कार्यलक्षकत्वेपि प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्भविष्यति। न चात्र "पूर्वन्तो विधानार्थास्तत्सामर्थ्ये समाम्नाये" (जे. १. ४. १७) इति द्वादशकपालन्यायेन स्तुतिः संभवति। अष्टाकपालद्वा- दशकपालयोरिव प्रस्तरयजमानयोः अंशांशित्वानुपपत्तेः। तस्मात् नामगुणयोरन्यतरत्वम् इति प्राप्ते अभिधीयते। उद्भिदादिशब्दानां हि अप्रसिद्धार्थत्वाद् यजिसामानाधिकरण्येन नामत्वं निर्णीतम्। अत्र तु गोमहिपयोरिव यजमानप्रस्तरशब्दयोः अर्थभेदस्य अत्यन्तप्रसिद्धत्वात् नामत्वं न युक्तम्। गुणविधिपक्षे तु सूक्तवाकेन प्रस्तरं प्रहरति इत्यग्नौ प्रहरणस्यापि प्रस्तरकार्यत्वाद् यजमाने प्रहृते सति कर्मलोपः स्यात्। तस्माद् विधेयः प्रस्तरो यजमानशब्देन स्तूयते। यथा सिंहो देवदत्त इत्यत्र



Scanned with CamScanner

NOTES

सिंहगुणेन शौर्यादिना उपेतो देवदत्तः सिंहशब्देन स्तूयते तथा यजमानः प्रस्तर इत्यत्रापि यजमानगुणेन यागसाधकत्वेन युक्तः प्रस्तरो यजमानशब्देन लक्षणया प्रतिपाद्यते। एवं प्रकृते अश्मशब्दोपि स्वार्थसहचरितान् दृढावयवत्वशस्त्राभेद्यत्वा-दिगुणन् लक्षयित्वा प्रार्थ्यमानतद्गुणयोगिनि शरीरे वर्तत इति वोद्धव्यम्।।

मयि त्वदीयं निरवधिकम् अनुग्रहम् अजानानः शत्रुर्माम् उद्दिश्य यद्यपि शरं प्रहिणुयात् तथापि स शरः अस्मच्छरीरं यथा न विदारयति तथा कुर्वित्यर्थः। ॾडुकृञ् करणे। अस्माल्लोटि बहुलं छन्दसीति विकरणस्य लुक्। श्रुशृणुपृकृवृभ्यश्छन्दसि इति हेर्धिरादेशः। तस्य अपित्त्वेन गुणाभावःॾ। किंच हे इन्द्र वीलुः सेनायाः संस्तम्भकस्त्वम्। ॾवीलयतिश्च व्रीलयतिश्च संस्तम्भकर्माणौ इति हि यास्कः (नि. ५. १६)ॾ। आरातीः अरातीन् अस्मच्छत्रून् द्वेषांसि। ॾद्विप अप्रीतौ। भावे असुन्ॾ। तत्कृतान्यप्रियाणि च वरीयः। क्रियाविशेषणम् एतत्। उरुतरम् अपा कृधि अपाकुरु अपगमय। यथा पुनः पुनरागत्य अस्मान् नापकुर्वन्ति तथा प्रक्षीणवलान् कुर्वित्यर्थः। ॾवरीय इति। उरुशब्दाद् ईयसुनि प्रियस्थिरेत्यादिना उरुशब्दस्य वरादेशः क्रियाविशेषणानां कर्मत्वं नपुंसकत्वं चेति नपुंसकलिङ्गता। अरातीरिति। रादाने। क्तिच्क्तौ च संज्ञायाम् इति तिक्तप्रत्ययः। न रातयः अरातयः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। तस्माच्छसो नः पुंसि इति नत्वाभावश्छान्दसःॾ ।।

## तृतीया।।

**वृक्षं यद्गवः परिपस्वजाना अनुस्फुरं शरमर्चन्त्यृभुम्।**
**शरुमस्मद्यावय दिद्युमिन्द्र।। ३।।**

वृक्षम्। यत्। गावः। परिऽसस्वजानाः। अनुऽस्फुरम्। शरम्। अर्चन्ति ऋभुम्। शरुम्। अस्मत्। यवय। दिद्युम्। इन्द्र।।३।।

वृक्षम्। विकारे प्रकृतिशब्दः। वृक्षविकारं धनुर्दण्डम्। ॾवृश्चयत इति वृक्षः। ओवश्चू छेदने इत्यस्मात् व्रश्चिकृतीत्यादिना (३. ३. ६६) क्सप्रत्ययः कित्त्वात् ग्रहिज्यादिना संप्रसारणम्। स्कोः संयोगाद्योरिति उपधासकारलोपः। वश्चभ्रस्जेत्यादिना पत्वे पढोः कः सि इति कत्वम्ॾ। गावः। गोविकारत्वाद् वा गमयति इपूनिति वा गावो मौर्व्यः। ॾआद्ये तद्धितस्य लुक्। तद् उक्तं यास्केन। ज्यापि गौरुच्यते गव्या चेत् ताद्धितम् अथ चेन्न गव्या गमयतीपूनिति। वृक्षेवृक्षे नियता मीमयद्गौः। वृक्षेवृक्षे धनुषिधनुषीति (नि. २.६.)। ॾपरिषस्वजानां धनुर्दण्डम् आश्लिप्य धनुष्कोटौ आरोपिताः सत्य इत्यर्थः। ॾष्वञ्ज परिष्वङ्गे।



Scanned with CamScanner

अस्मात् छन्दसि लिट् इति लिट्। लिटः कानज्वा इति कानजादेशः। उपधानकारलोपे द्विर्वचनम्। चितः इत्यन्तोदात्तत्वम्⧗। अत्र परिष्वङ्गकथनेन स्त्रीपुंसयोरिव ज्याधनुर्दण्डयोरपि अन्योन्यसंसक्तयोरेव यथोचितकार्यकरत्वं सूचितम् इति मन्तव्यम्। ईदृश्यो ज्या यद् यदा अनुस्फुरं प्रतिस्फुरणम्। ⧗स्फुर संचलने। अस्माद् घञर्थे कविधानम्। स्थासागापाव्यधिहनियुध्यर्थम् इति परिगणनस्य उपलक्षणार्थत्वात् कप्रत्ययः⧗। ऋभुम् उरु भासमानम्। शाणोल्लीढत्वात् निशितमित्यर्थः। ईदृशं शरुं हिंसकं शरम् अर्चन्ति। अर्चतिः अत्र गतिकर्मा। अस्मान् अभिलक्ष्य प्रेरयन्ति। ⧗शॄ हिंसायाम्। शॄस्वृस्निहित्रप्यसिवसिहनि-क्लिदिबन्धिमनिभ्यश्च (उ. १. १०) इति उप्रत्ययः⧗। तदा हे इन्द्र अस्माभिर्दत्तेन हविषा प्रीतस्त्वं दिद्युं द्योतमानं शरुं शरम् अस्मन्निकटम् उपसर्पन्तम् अस्मत् अस्मत्तः सकाशात् यावय पृथक् कुरु। यथा स शरो मां न स्पृशति तथा अन्यत्र अपसारयेत्यर्थः।। यद्वा शरुं हिंसकं दिद्युम्। वज्रनामैतत्। वज्रवद्भासमानं शस्त्रजातम्। अन्यत् पूर्ववत्।। ⧗यावयेति। यु मिश्रणामिश्रणयोः। अस्मात् णिचि वृद्धिः। षट्कारास्तु संज्ञापूर्वको विधिरनित्यः इति वृद्धेरनित्यत्वाद् यवयेति पदं छिन्दन्ति। दिद्युमिति। द्युत दीप्तौ। अस्माद् द्युतिगमिजुहोतीनां द्वे चेति वक्तव्यम् इति क्विप् प्रत्ययः। तत्संनियोगेन द्विर्वचनम्। द्युतिस्वाप्योः संप्रसारणम् इति अभ्यासस्य संप्रसारणम्। अन्त्यलोपश्छान्दसः।। इन्द्रेति। इति परमैश्वर्ये। ऋज्रेन्द्राग्रवज्रविप्रेत्यादिना (उ॰ २. २८) इन्द्रशब्दो रन्प्रत्ययान्तो निपातितः। नित्त्वाद् आद्युदात्तत्वे प्राप्ते आमन्त्रितत्वाद् आष्टमिकं सर्वानुदात्तत्वम्। यास्कस्तु बहुधा इन्द्रशब्दं निरवोचत्। इन्द्रं इरां दृणातीति वा इरां ददातीति वा इरां दधातीति वा इरां दारयतीति वा इन्दवे द्रवत इति वा इन्दौ रमत इति वा इन्धे भूतानीति वा तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायते इदंकरणादित्याग्रायणः इदंदर्शनादित्यौपमन्यवः इन्द्रतेर्वा ऐश्वर्यकर्मणः (नि. १०. ७) इत्यादि⧗।। यद्वा वृक्षं बहुच्छायं वटादिकं गावः निदाघपीडिताः पशवः यद् यथा आश्लिष्यन्ति तथा तत्तदुचितजीविकाप्रदानेन उपकारकं शत्रुं परिपस्वजानाः परितः सेवमानाः तदीया भटाः अनुस्फुरं स्वामिनः हस्तनेत्रादिव्यापारमात्रम् अनुलक्ष्य। शरुम् अर्चन्तीत्यादि पूर्ववत्।।

## चतुर्थी।।

**यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम्।**
**एवा रोगं चास्रावं चान्तस्तिष्ठतु मुञ्ज इत्।। ४।।**

यथा। द्याम्। च। पृथिवीम्। च। अन्तः। तिष्ठति। तेजनम्।

NOTES

एव। रोगम्। च। आऽस्रावम्। च। अन्तः। तिष्ठतु। मुञ्जः। इत्।। ४।।

यथा येन प्रकारेण द्यां दिवम् आकाशं पृथिवीं भुवम्। परस्परसमुच्चयार्थौ चकारौ। उभयत्रापि व्यत्ययेन द्वितीया। दिवश्च पृथिव्याश्च अन्तः मध्ये अवस्थितं तेजनम् तेजनो वेणुः। ॾ लिङ्गव्यत्ययः। वेणुमस्करतेजना इत्यभिधानात्ॾ। तिष्ठति स्वकीयेन औन्नत्येन ते उभे अपि अधःकृत्य वर्तते एव एवम्। ॾ अन्त्यलोपश्छान्दसः। निपातस्य च इति सांहितोको दीर्घःॾ। रोगं रुज्यते भज्यते पुरुषः अनेनेति रोगः ज्वरातीसारादिरूपः। ॾ हलश्च इति करणे घञ्। चजोः कु घिण्ण्यतोः इति कुत्वम्। ञ्नित्यादिर्नित्यम् इत्यादिरुदात्तःॾ। तम् आस्रावम् आ समन्तात् स्रवति अङ्प्रत्यङ्गेभ्य इत्यास्रावो मूत्रातीसारः। ॾ स्रु गतौ इत्यस्माद् आङ्पूर्वात् श्याव्द्यधास्रुसंस्रुइत्यादिना णप्रत्ययः। अचो ञ्णिति इति वृद्धिः। पूर्ववत् षठ्यर्थे द्वितीया। अत्रापि परस्परसमुच्चयार्थौ चकारौॾ। ज्वरातीसारादिरोगस्य आस्रावस्य च अन्तः मध्ये मुञ्ज इत् मुञ्ज एव। मुञ्जेषीकानिर्मिता रज्जुरित्यर्थः। तिष्ठतु। तौ उभावपि रोगौ अधःकृत्य वर्ततामित्यर्थः।। यद्यपि अत्र रोगशब्देन व्याधिसामान्यवाचिना आस्रावोपि गृहीतः तथापि एतन्मन्त्रसाध्या क्रिया आस्रावस्य विशेषतो निवर्तिकेति दर्शयितुम् आस्रावस्य पृथगभिधानम्।।

[इति] प्रथमकाण्डे प्रथमेनुवाके द्वितीयं सूक्तम्।।

विद्या शरस्येति तृतीयसूक्तेन मूत्रपुरीपनिरोधे प्रमेहणसाधनहरीतकीकर्पूरवन्धनम्। मूषिकामृत्तिकापूतीकतृणदधिमथितजरत्प्रमन्ददारुतक्षणशकलानाम् अन्यतमस्य पायनम् हस्त्यश्वादियानारोहणम् शरविसर्जनम् शरेण मूत्रनालविदारणम् लोहशकलस्य मूत्रद्वारे प्रवेशनम् इत्येवमादीन्यपि सूत्रोक्तप्रकारेण व्याधितस्य कुर्यात्। "विपितं ते वस्तिबिलम्" इति व्यृचेन मूषिकामृत्तिकाद्युक्तद्रव्येषु निरुद्धमूत्रपुरीपं पुरुपम् आस्थापयेत्। ''विद्या शरस्येति प्रमेहणं वन्धाति'' इत्यादि ''फाण्टं पाययतीत्युदावर्तिने च'' इत्येतदन्तं सूत्रं द्रष्टव्यम् (कौ. ४१)।।

**तत्र प्रथमा।।**

**विद्या शरस्य पितरं पर्जन्यं शतवृष्ण्यम्।**
**तेना ते तन्वे ३ शं करं पृथिव्यां ते निषेचनं वहिष्टे अस्तु बालिति।। १।।**

विद्य। शरस्य। पितरम्। पर्जन्यम्। शतऽवृष्ण्यम्।

तेन। ते। तन्वे ʃ। शम्। करम्। पृथिव्याम्। ते। निऽसेचनम्। वहिः। ते। अस्तु। बाल्। इति।। १।।



Scanned with CamScanner

NOTES

शरस्य हिंसकस्य बाणस्य पितरं पालकम् उत्पादकं वा विद्म यथावज्जानीमः। कीदृशम्। शतवृष्ण्यम् अपरिमितवीर्योपेतम्। विचित्रस्य तरुगुल्मादिरूपस्य स्थावरस्य पशुमृगनरादिरूपस्य जङ्गमस्य च उत्पादने पोषणे च समर्थम् इत्यर्थः। ईदृशं पर्जन्यं वृष्टिमदं देवम्। पितृत्वेन जानीम इति पूर्वेण संबन्धः। वर्षतीति वृषा। वृष सेचने। कनिन् युवृषितक्षीत्यादिना (उ. १. १५४) कनिन् प्रत्ययः। वृष्णि भवं वष्ण्यम्। भवे छन्दसि इति यत्। अल्लोपोऽनः इत्युपधालोपः। ये चाभावकर्मणोः इति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्⧗। तेन उक्तलक्षणेन शरेण। अन्येपामयि दृश्यते इति साहितिको दीर्घः⧗। हे मूत्रनिरोधादिव्याधिग्रस्त ते तव तन्वे। ⧗आडभावश्छान्दसः। षष्ठ्यर्थे चतुर्थी। तनुशब्दात् ऊङ् उतः इत्यूङ्। उदात्तयणो हल्पूर्वात् इति विभक्तयुदात्तत्वस्य नोङ्धात्वोः इति प्रतिषेधे उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य इति विभक्तिः स्वर्यते⧗। तन्वाः शरीरस्यशं रोगाणाम् उपशमनम्। ⧗आह च यास्कः। शमनं च रोगाणां यावनं च भयानामिति (नि. ४. २९)⧗। करं करोमि। ⧗शमिति। शमु उपशमने। अस्मात् भावे विच्। करम् डुकृञ् करणे। छन्दसि लुङ्लङ्लिटः इति वर्तमाने लुङ्। कृमृदृरुहिभ्यश्छन्दसि इति च्लेरङादेशः। बहुलं छन्दस्यमाङ्योगेपि इति अडभावः। आशंसायां भूतवञ्च इति प्रार्थनायां वा लुङ्⧗। शमनप्रकारमेव दर्शयति। ते तव मूत्ररोगार्तस्य पृथिव्यां भूमौ। ⧗पृथिवीशब्दो ङीपन्तः अन्तोदात्तः। उदात्तयणो हल्पूर्वात् इति विभक्तेरुदात्तत्वम्⧗। निषेचनं नितरां सेकः प्रस्त्रावः। अस्त्विति संबन्धः। ⧗निपूर्वात् सिञ्चतेर्भावे ल्युट्। उपसर्गात्सुनोतीत्यादिना षत्वम्। लिति इति प्रत्ययात् पूर्वस्य उदात्तत्वम्। समासेपि कृदुत्तरपदप्रकृतिस्वरत्वेन स एव अवशिष्यते⧗। निषेचनप्रकारम् आह। ते तव शरीरान्तर्निरुद्धं मूत्रं बाल्। अनुकरणशब्दोयम्। इति अनेन प्रकारेण शब्दं कुर्वत् वहिरस्तु बाह्यप्रदेशे भवतु। मन्त्रसामर्थ्याद् विधं शब्दं कुर्वत त्वरया शरीरात् निर्गच्छन्तु इत्यर्थः। यद्वा बाल्। ⧗बल प्राणने। अस्मात् ण्यन्तात् क्विप्⧗। इतिर्हेतौ। अस्य रोगार्तस्य जीवनहेतोः मूत्रं वहिरस्विति॥

## द्वितीया॥

**विद्मा शरस्य पितरं मित्रं शतवृष्ण्यम्।**
**तेना ते तन्वे३ शंकरं पृथिव्यां ते निषेचनं वहिष्टे अस्तु वालिति॥ २॥**



Scanned with CamScanner

# वरुणः १.२

## तत्र प्रथमा॥

**वृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति।**
**यस्तायन्मन्यते चरन्त्सर्वं देवा इदं विदुः॥ १॥**

वृहन्। एषाम्। अधिऽस्थाता। अन्तिकात्ऽइव। पश्यति।
यः। तायत्। मन्यते। चरन्। सर्वम्। देवाः। इदम्। विदुः॥ १॥

वृहन् महान् परिवृढो वा वरुणः एषाम् दुरात्मनां शत्रूणाम् अधिष्ठाता नियन्ता सन् तैः कृतं सर्वम् अन्याय्यम् अन्तिकादिव पश्यति समीपदेशादिव जानाति। न तस्य व्यवधायकं किंचिद् अस्तीत्यर्थः। यो वरुणः तायत् सांतत्येन वर्तमानं स्थिरवस्तु चरत् चरणशीलं नश्वरं च वस्तु मन्यते। स्थावरजङ्गमात्मकं सर्वं जगज्जानातीत्यर्थः। स वृहन् इति संबन्धः। ≬तायत् इति। तायृ संतानपालनयोः। अस्मात् लटः शत्रादेशः≬। ईदृग्विधज्ञानसद्भावं वरुणस्य उपपादयति सर्वम् इति। व्यवहितं विप्रकृष्टं स्थिरं नश्वरं स्थूलं सूक्ष्मम् इति एतादृग् इदं सर्वम् अतिरोहितज्ञानत्वाद् देवाः विदुः जानन्ति। ≬विद ज्ञाने। "विदो लटो वा" इति झेः उस् आदेशः≬॥

## द्वितीया॥

**यस्तिष्ठति चरति यश्च वञ्चति यो निलायं चरति यः प्रतङ्कम्।**
**द्वौ संनिपद्य यन्मन्त्रयेते राजा तद् वेद वरुणस्तृतीयः॥ २॥**

यः। तिष्ठति। चरति। यः। च। वञ्चति। यः। निऽलायम्। चरति। यः। प्रऽतङ्कम्।
द्वौ। सम्ऽनिपद्य। यत्। मन्त्रयेते इति। राजा। तत्। वेद। वरुणः तृतीयः॥ २॥

पूर्वस्याम् ऋचि एषाम् इत्युक्तम्। तत्र इदमा के पुनः प्रतिनिर्दिश्यन्त इति तान् निर्दिशति यस्तिष्ठतीति पूर्वार्धेन। यः शत्रुस्तिष्ठति अभिमुखम् अवतिष्ठते यश्चरति गच्छति यश्च वञ्चति कौटिल्येन प्रतारयति यः शत्रुः निलायम् निलयनेन अनिर्गमनेन चरति। यद्वा निलीनः अदृश्यः सन् चरति। ≬अयतेर्निस्पूर्वात् णमुल्। निपूर्वात् लीयतेर्वा। उभयथापि। समानोर्थः। "उपसर्गस्यातते" इति लत्वम्≬। यः शत्रुः प्रतङ्कम् प्रकर्षेण कृच्छ्रजीवनं प्राप्य चरति वर्तते। ≬ताकि कृच्छ्रजीवने। अस्मात् प्रपूर्वात् णमुल्≬। एषां शत्रूणाम् इति पूर्वेण



Scanned with CamScanner

NOTES

संबन्धः।। अन्तिकादिव पश्यतीति यद् उक्तं तदपि समर्थयते द्वौ संनिषद्येत्युत्तरार्धेन। द्वौ पुरुषौ रहसि संनिषद्य उपविश्य यत् कार्यं मन्त्रयेते गुप्तं भाषेते। ‹मत्रि गुप्तभाषणे इति धातुः›। तयोर्गुप्तं भाषमाणयोः तृतीयः त्रित्वसंख्यापूरकः सन् राजा ईश्वरो वरुणः स्वसार्वरयेन तत् सर्वं वेद। जानातीत्यर्थः। ततश्च अकार्यचिन्तावसर एव तान् निग्रहीतुं वरुणः शक्नोतीत्यर्थः। ‹"त्रेः संप्रसारणं च" इति पूरणार्थे तीयप्रत्ययः संप्रसारणं च ›।।

## तृतीया।।

**उतेयं भूमिर्वरुणस्य राज्ञ उतासौ द्यौर्बृहती दूरेअन्ता।**
**उतो समुद्रौ वरुणस्य कुक्षी उतास्मिन्नल्प उदके निलीनः।। ३।।**

उत। इयम्। भूमिः। वरुणस्य। राज्ञः। उत। असौ। द्यौः। बृहती। दूरेऽअन्ता। उतो इति। समुद्रौ। वरुणस्य। कुक्षी इति। उत। अस्मिन्। अल्पे। उदके निऽलीनः।। ३।।

उतशब्दः अप्यर्थे। इयं सर्वाधिष्ठानत्वेन निहिता भूमिरपि राज्ञः ईश्वरस्य दुष्टनिग्रहे अधिकृतस्य वरुणस्य वशे वर्तते।। उत अपि च असौ विप्रकृष्टा बृहती महती दूरेअन्ता दूरे विप्रकृष्टे देशे अन्ते अन्तिके च भवतीति दूरेअन्ता। यत एवं व्याप्य वर्तते अतो बृहतीति भावः। एवंरूपा द्यौश्च वरुणस्य राज्ञो वशे वर्तते। बृहती दूरेअन्तेति विशेषणद्वयं भूम्या अपि योज्यम्। अत एव दूरेअन्ते इति द्यावापृथिव्योर्नामसु पठितम् (निघ. ३. ३०)।। उतो अपि च समुद्रौ पूर्वपश्चिमौ वरुणस्य राज्ञः कुक्षी दक्षिणोत्तरपार्श्वभेदेन अवस्थिते द्वे उदरे। एवं भूम्यादिकं कृत्स्नं जगद् व्याप्य वर्तमानोपि अस्मिन् अल्पेपि उदके तटाकह्रदादिगते निलीनः अन्तर्हितो भवति।।

## चतुर्थी।।

**उत यो द्यामतिसर्पात् परस्तान्न स मुच्यातै वरुणस्य राज्ञः।**
**दिव स्पशः प्र चरन्तीदमस्य सहस्राक्षा अति पश्यन्ति भूमिम्।। ४।।**

उत। यः। द्याम्। अतिऽसर्पात्। परस्तात्। न। सः। मुच्यातै। वरुणस्य राज्ञः। दिवः। स्पशः। प्र। चरन्ति। इदम्। अस्य। सहस्रऽअक्षाः। अति। पश्यन्ति। भूमिम्।। ४।।

उत अपि च यः शत्रुः अनर्थकारी अस्माकं पुरस्तात् द्याम् अन्तरिक्षप्रदेशम् अतिसर्पात् अतिक्रम्य सर्पेद् गच्छेत्। यद्वा सुकृतप्राप्यं द्यांस्वर्गम् अतिक्रम्य



Scanned with CamScanner

NOTES

अपथे प्रवर्तेतेत्यर्थः। स शत्रुः वरुणस्य राज्ञः पाशेभ्यो न मुच्यातै न मुच्येत। तैर्बद्ध एव वर्तताम् इत्यर्थः। ᳲमुचेः कर्मणि लेटि आडागमः। "वैतोन्यत्र" इति ऐकारःᳲ।। कथं द्युलोकस्थो वरुणः मनुष्यकृतम् अपराधं जानातीति तत्राह् दिवः स्पश इति। दिवः द्युलोकान्तिर्गताः अस्य वरुणस्य स्पशः चारा इदं पार्थिवं स्थानं प्र चरन्ति प्राप्य संचरन्ति। ते च सहस्राक्षाः सहस्रसंख्या नोपायैर्युक्ताः सन्तः भूमिम् अति पश्यन्ति। भूलोकवृत्तान्तं स तिशयेन साक्षात्कुर्वन्तीत्यर्थः।।

## पञ्चमी।।

**सर्वं तद् राजा वरुणो वि चष्टे यदन्तरा रोदसी यत् परस्तात्।**
**संख्याता अस्य निमिषो जनानामक्षानिव श्वघ्नी नि मिनोति तानि।। ५।।**

सर्वम्। तत्। राजा। वरुणः। वि। चष्टे। यत्। अन्तरा। रोदसी इति। यत्। परस्तात्।

सम्ऽख्याताः। अस्य। निऽमिषः। जनानाम्। अक्षान्ऽइव। श्वऽन्घी नि। मिनोति। तानि।। ५।।

रोदसी अन्तरा द्यावापृथिव्योर्मध्ये यत् प्राणिजातं वर्तते तथा पुरस्तात् स्वस्य पुरोभागे यत् प्राणिजातम् अस्ति तत् सर्वं वरुणो राजा वि चष्टे विशेषेण पश्यति।। तस्मात् तेषां जनानाम् प्राणिनां निमिषः निमेषणव्यापारस्य। उपलक्षणम् एतत्। अक्षिपरिस्पन्दोपलक्षितस्य अस्य साध्वसाधुकर्मणः संख्याता परिमाणयिता वरुणः तानि पापिनां शिक्षाकर्माणि तत्पापानुसारेण नि मिनोति निक्षिपति। ᳲडुमिञ् प्रक्षेपणेᳲ। तत्र दृष्टान्तः। अक्षानिवेति। स्वन्घी स्वम् आत्मानं स्वकीयं धनं च हन्तीति कितवः स्वघ्नी। ᳲतथा च यास्कः। श्वघ्नी कितवो भवति स्वं हन्ति। (नि. ५. २२) इतिᳲ। यथा कितवः अक्षान् आत्मनो जयार्थे निक्षिपति तद्वद् इत्यर्थः।।

## षष्ठी।।

**ये ते पाशा वरुण सप्तसप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः।**
**छिनन्तु सर्वे अनृतं वदन्तं यः सत्यवाद्यति तं सृजन्तु।। ६।।**

ये ते। पाशाः। वरुण। सप्तऽसप्त। त्रेधा। तिष्ठन्ति। विऽसिताः। रुशन्तः।
छिनन्तु। सर्वे। अनृतम्। वदन्तम्। यः सत्यऽवादी। अति। तम्। सृजन्तु।। ६।।



Scanned with CamScanner

NOTES

# अथर्ववेदः

## राष्ट्रसभासूक्तम् १.३

### ( काण्डं–७ सूक्तम्–१२ )

### ( १ )

**सभा च मा समितिश्चावतां 'प्रजापतेर्दुहितरौ। संविदाने'।**
**'येना संगच्छा' उप मा स शिक्षाञ्चारु 'वदानि पितरः संगतेषु'॥ १॥**

सभा। च। मा। सम्ऽइतिः। च। अवताम्। प्रजाऽपतेः। दुहितरौ। संविदाने इति सम्ऽविदाने।

येन। सम्ऽगच्छै। उप। मा। सः। शिक्षात्। चारु। वदानि। पितरः। सम्ऽगतेषु।। १।।

सभा पिदुषां समाजः। समितिः संयन्ति संगच्छन्ते युद्धाय अप्रेति समितिः संग्रामः। सांग्रामीणजनसभेत्यर्थः। यद्वा संग्रामनामानि यज्ञनामानि भवन्तीति यास्केनोक्त्वात् समितिशब्देन यज्ञ उच्यते। परस्परसमुञ्चयार्थो चकारौ। ते उभे अपि मा मां यादिनम् अवताम् रक्षताम्। कीदृश्यौ। प्रजापतेः सर्वजगत्स्रप्टुर्दृहितरौ पुत्र्यौ।

**'चत्वारो वेदधर्मज्ञाः पर्वत् प्रैवित्मेव या।**
**सा व्रैत यै स धर्मः स्थान्॥' ( वास्तु १. ९ ) इति।**

'यद् आर्याः प्रग्रंसन्ति स धर्मः' (आइप १, २०, ७) इति च स्मृतेपिद्वत्संघस्य सभात्वात् तदुकेश्च सर्वशास्त्रनिर्णीतधर्मरूपत्वात् प्रजापति-पुत्रीत्वत्रयपदेशः। ते च सभे संविदाने अस्मद्रक्षणविषयम् ऐकमर्त्य प्राप्ते। पिदेः संपूर्वात् 'समो यथादिपु दिपिइप्रन्जि' (फा १, २, २९) इति आत्मनेपदम्। किं च देन वादिना तुगच्छ वस्तुं सगतो भवानि। पूर्वपद् आत्मनेपदिनो गमेर्लोटि रूपम्। स विद्वान् मा मां संगतम् डा शिक्षात् उपेत्य शिक्षयतु। समीचीनं यादयात्वित्पर्थः। शिक्ष विद्योपादाने। ण्यन्तात् लेटि आद्धागमः। यदा शिक्षात् मां यक्तुं शक्तं समर्थम् इच्छतु। शफेः सन्नन्तात् पञ्चमलकारे रूपम्। अयम् अर्थः–येन सह अहं विपदे स स्वयं मडुक्तवचनविघटनपटूनि वाक्यानि अभापमाणः प्रत्युत मार्मय स्ववचनतिरस्कारकवाक्यवादिनं करोत्विति। अपि च हे पितरः पालकाः मदुक्तं वाक्यं साधु साध्विनि अनुमोदमानाः पितृभूता या द्वे सभासदो जनाः संगतेषु मया सह वक्तुं मिलितेषु वादिषु चाह न्यायोपेतं सदुत्तरं वदामि। यथा सम्यग् वदामि तथा अनुगृहीतेत्यर्थः।



Scanned with CamScanner

NOTES

## (२)

**विद्य तें सभे नाम नरिष्टा नाम वा असि।**
**'ये ते के च' समासदस्ते मे सन्तु सवाचसः॥ २॥**

विद्य। ते। सभे। नाम। नरिष्टा नाम। वै। असि।
ये। ते। के। च। समाऽसदः। ते मे। सन्तु। सऽवाचसः॥ २॥

हे सभे ते तय नाम नामधेयं विप्र जानीमः। 'वेदा वदो वा' (पा ३, ४, ८३)' इति मसो मादेशः। तन्नाम दर्शयति–हे समे नान। नाम्नेति यावत्। नारिथ। रिपिणा कान्तेन नऽसमासः। अहिंसिता परैरनभिभाव्या। पतन्नारिक्ता असि वे **भयसि** खलु। एकस्य वचनम् अन्यैराद्रियते तिरस्क्रियतेऽपि। वहवः संभूप यद्येकं वाक्यं वदेयुस्तद्धि न परैरतिलङ्घ्यम्। अतः अनतिलङ्घ्यवाक्यत्वाद् **नरिष्टेति** नाम सभाया युज्यते। अतस्ते सघ संबन्धिनः ये के च सभासदः सभायां सोदन्तो विद्वांसस्त्रे सर्वे मे मम स्वाधतः सम्मानवाक्याः सन्तु भवन्तु। न हि सभा सर्वा संभूप एकं प्रति ब्रूते अपि तु तप्रत्याः कतिपये। तेऽपि मद्रिपये अनुकूलवाक्या भवन्तु इति प्रार्थ्यते।

## (३)

**एषामहं समासीनानां वचौ विज्ञानमा ददे।**
**अभ्पाः सर्वस्याः संसदो 'मामिन्द्र भगिनं कृणु'॥ ३॥**

एषाम्। अहम। सम्ऽत्रासीनानाम् वचैः। विऽज्ञानम्। आ। ददे।
अभ्पा। सर्वस्याः। समऽसदः। माम्। इन्द्र। भगिनम्। कृणु॥ ३॥

समासीनानाम् सभायाम् अवतिष्ठमानानाम् एषाम् पुरोवर्तिनां वादिनां वर्क तेजो वैदुभ्यजनितप्रभावविशेषम् विज्ञानम् वेदशास्त्रार्थविषयं प्राप्तं च। 'विज्ञानं पित्यासरयोः' (अरो १, ५. ६) इति तद्विदः। तद् भदम् आ ददे स्वीकरोमि। अपहरामीत्यर्थः। ददातेः? 'भागे दीऽनास्यविश्वणे' (या १ ३, २०) इति आत्मनेपदम्। किं यद्युना। हे इन्द्र। इन्द्रस्यैव। पागनुशासनर्तृत्वात् सभागयकर्मणि तर्स्पय प्रार्थनम्। तथा च तैत्तिरीयके। 'ते देवा इन्द्रम् अश्रुयन्मिना मो माचं व्याकुरु' इति प्रक्रम्य आम्नातम्–'ताम् इन्द्रो मध्यतोऽवकम्य ध्याकरोत् तस्माद् इयं व्याकृता धाग् उद्यते'। (तै ६, ४, ७, ३) इति। तादृशेन्द्र अस्याः पुरः स्थितायाः सर्वस्याः संसदः सभाया भगिनम्। भगो भाग्यं वैदुष्यलक्षणं जयलक्षणं वा। तद्वन्तं मा ऋणु कुरु। सर्वामपि सभां मदेकवाक्यधयणपरां



Scanned with CamScanner

NOTES

कुवित्यर्थः। अथवा भगो भागः। तद्वन्तं कुरु। सर्वस्याः सभाया यावती वैदुष्यकृता संभावना तावद्भागमाजं कुर्विति इन्द्रः प्रार्थ्यते।

(४)

**यद् वो मनः परागतं यद् बद्धमिह इह वा।**
**तद् व आ वर्तयामसि मयि वो रमतां मनः॥ ४॥**

यद्। वः। मनः। पराऽगतम्। यत्। बद्धम्। इह। वा। इह वा।
तत्। वः। आ। वर्तयामसि। मयि। वः। रमताम्। मनः॥ ४॥

हे सभासदः वः युष्माकं यन्मनः मानसं परागतम् अस्मत्तः परागत्य अन्यत्र गतम्। अस्मदनभिमुखम् इत्यर्थः। यत् च मनः इह या अस्मिन् या विषये बद्धं संसक्तम्। मनसो विषयानासङ्गेन अनयस्थानात् तत्संबन्धार्हान् सर्वान् पदार्थान् अभिनयेन दर्शयति–इह वा इह येति अस्मद्व्यतिरिक्तसर्वविषयेषु संसक्तं वर्तते। तत् तादृशं यः युष्माकं मनः आ वर्तयामसि अस्मद्भिमुखं कुर्मः। आवर्तितं च वो मनः मयि रमताम् मदनुफलार्थचिन्तापरं भयत्वित्यर्थः।

## पृथ्वी १.४

## अथर्वसंहितायां

तथा "पाथिंवी भूमिकामस्य" इति (न. क. १७) विहितायां पार्थिव्यां महाशान्ती अस्यानुवाकस्य विनियोगः। तद् उक्तं नक्षत्रकल्पे। "सत्यं बृहद् इत्लुवाकः पार्थिव्याम्" इति (न. क. १८)॥

**सत्यं बृहद्दुतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।**
**सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥ १॥**

सत्यम्। बृहत्। ऋतम्। उग्रम्। दीक्षा। तपः। ब्रह्म। यज्ञः। पृथिवीम्। धारयन्ति।

सा। नः। भूतस्य। भव्यस्य। पत्नी। उरुम्। लोकम्। पृथिवी। नः। कृणोतु॥ १॥

**असंबाधं बध्यतो मानवानां यस्या उद्वतः प्रवतं समं बहु।**
**नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः॥ २॥**



Scanned with CamScanner

असम्ऽबाधम्। मध्यतः मानवानाम्। यस्याः। उत्ऽवतः। प्रऽवतः। समम्। बहु।

नानाऽवीर्याः। ओषधीः। या। बिभर्ति। पृथिवी। नः। प्रथताम्। राध्यताम्। नः।। २।।

**यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः।**
**यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु।। ३।।**

यस्याम्। समुद्रः। उत। सिन्धुः। आपः। यस्याम्। अन्नम्। कृष्टयः। सम्ऽबभूवुः।

यस्याम्। इदम्। जिन्वति। प्राणत्। एजत्। सा। नः। भूमिः। पूर्वऽपेये। दधातु।। ३।।

**यस्याश्चतस्त्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः।**
**या बिभर्ति बहुधा प्राणदेजत् सा नो भूमिर्गोष्वप्यन्नै दधातु।। ४।।**

यस्याः। चतस्त्रः। प्रऽदिशः। पृथिव्याः। यस्याम्। अन्नम्। कृष्टयः। सम्ऽबभूवुः।

या बिभर्ति। बहुऽधा। प्राणत्। एजत्। सा। नः। भूमिः। गोषु। अपि। अन्नै। दधातु।। ४।।

**यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन्।**
**गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु।। ४।।**

यस्याम्। पूर्वे। पूर्वऽजनाः। विऽचक्रिरे। यस्याम्। देवाः। असुरान्। अभिऽअवर्तयन्।

गवाम्। अश्वानाम्। वयसः। च। विऽस्था। भगम्। वर्चः। पृथिवी। नः। दधातु।। ५।।

**विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।**
**वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु।। ६।।**

विश्वम्ऽभरा। वसुऽधानी। प्रतिऽस्था। हिरण्यऽवक्षाः। जगतः। निऽवेशनी।

वैश्वानरम्। बिभ्रती। भूमिः। अग्निम्। इन्द्रऽऋषभा द्रविणे। नः। दधातु।। ६।।

**यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम्।**
**सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा।। ७।।**

NOTES



Scanned with CamScanner

NOTES

याम्। रक्षन्ति। अस्वप्नाः। विश्वऽदानीम्। देवाः। भूमिम्। पृथिवीम्। अप्रऽमादम्।

सा। नः। मधु। प्रियम्। दुहाम्। अथो इति। उक्षतु। वर्चसा।। ७।।

**यार्णवेधि सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः।**
**यस्या हृदयं परमे व्योमिन्त्सत्येनावृतममृतं पृथिव्याः।**
**सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे।। ८।।**

या। अर्णवे। अधि। सलिलम्। अग्रे। आसीत्। याम्। मायाभिः। अनुऽअचरन्। मनीषिणः।

यस्याः। हृदयम्। परमे। विऽओमन्। सत्येन। आऽवृतम्। अमृतम्। पृथिव्याः।

सा। नः। भूमिः। त्विषिम्। बलम्। राष्ट्रे। दधातु। उत्ऽतमे।। ८।।

**यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।**
**सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा।। ९।।**

यस्याम्। आपः। परिऽचराः। समानीः। अहोरात्रे इति। अप्रऽमादम्। क्षरन्ति।

सा। नः। भूमिः। भूरिऽधारा। पयः। दुहाम्। अथो इति। उक्षतु। वर्चसा।। ९।।

**यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे।**
**इन्द्रो यां चक्र आत्मनेनमित्रां शचीपतिः।**
**सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः।। १०।। (१)**

याम्। अश्विनौ। अमिमाताम्। विष्णुः। यस्याम्। विऽचक्रमे।

इन्द्रः। याम्। चक्रे। आत्मने। अनमित्राम्। शचीऽपतिः।

सा। नः। भूमिः। वि। सृजताम्। माता। पुत्राय। मे। पयः।।१०।। (१)

**गिरयस्ते। पर्वता। हिमवन्तोरण्यं ते पृथिवि स्योनमस्तु।**
**बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।**
**अजीतोहतो अक्षतोध्यष्ठां पृथिवीमहम्।। ११।।**

गिरयः। ते। पर्वताः। हिमऽवन्तः। अरण्यम्। ते पृथिवि। स्योनम्। अस्तु।

बभ्रुम्। कृष्णाम्। रोहिणीम्। विश्वऽरूपाम्। ध्रुवाम्। भूमिम्। पृथिवीम्। इन्द्रऽगुप्ताम्।

अजीतः। अहतः। अक्षतः। अधि। अस्थाम्। पृथिवीम्। अहम्।। ११।।



Scanned with CamScanner

**यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः।**
**तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः।**
**पर्जन्यः पिता स उ नः पिपर्तु॥ १२॥**

यत्। ते। मध्यम्। पृथिवि। यत्। च। नभ्यम्। याः। ते। ऊर्जः तन्वः। सम्ऽबभूवुः।

तासु। नः। धेहि। अभि। नः। पवस्व। माता। भूमिः। पुत्रः। अहम् पृथिव्याः।

पर्जन्यः पिता सः। ऊं इति। नः। पिपर्तु॥ १२॥

**यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः।**
**यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः। पुरस्तात्।**
**सा नो भूमिर्वर्धयद् वर्धमाना॥ १३॥**

यस्याम्। वेदिम्। परिऽगृह्णन्ति। भूम्याम्। यस्याम्। यशम्। तन्वते। विश्वऽकर्माणः।

यस्याम्। मीयन्ते। स्वरवः। पृथिव्याम्। ऊर्ध्वाः। शुकाः। आऽहुत्याः। पुरस्तात्।

सा। नः। भूमिः। वर्धयत्। वर्धमाना॥ १३॥

**यो नो द्वेषत् पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन।**
**तं नो भूमे रन्धय पूर्वकृत्वरि॥ १४॥**

यः। नः। द्वेषत्। पृथिवि। यः पृतन्यात्। यः। अभिऽदासात्। मनसा। यः। वधेन।

तम् नः। भूमे। रन्धय। पूर्वऽकृत्वरि॥ १४॥

**त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः।**
**तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो**
**रश्मिभिरातनोति॥ १५॥**

त्वत्। जाताः। त्वयि। चरन्ति। मर्त्याः। त्वम्। विभर्षि। द्विऽपदः। त्वम्। चतुःऽपदः।

तव। इमे। पृथिवि। पञ्च। मानवाः। येभ्यः। ज्योतिः। अमृतम्। मर्त्येभ्यः। उत्ऽयन्।

सूर्यः। रश्मिऽभिः। आऽतनोति॥ १५॥

NOTES



Scanned with CamScanner

NOTES

**ता नः प्रजाः सं दुह्रतां समग्रा वाचो मधु पृथिवि धेहि मह्यम्॥ १६॥**

ताः नः। प्रऽजाः। सम्। दुह्रताम्। सम्ऽअग्राः। वाचः। मधु। पृथिवि। धेहि। मह्यम्॥ १६॥

**विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्।**
**शिवां स्योनामनु चरेम विश्वहा॥ १७॥**

विश्वऽस्वम्। मातरम्। ओषधीनाम्। ध्रुवाम्। भूमिम्। पृथिवीम्। धर्मणा। धृताम्। शिवाम्। स्योनाम्। अनु। चरेम। विश्वहा॥ १७॥

**महत् सधस्थं महती बभूविथ महान् वेग एजथुर्वेपथुष्टे।**
**महांस्त्वेन्द्रो रक्षत्यप्रमादम्।**

**सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन॥ १८॥**

महत्। सधऽस्थम्। महती। बभूविथ। महान्। वेगः। एजथुः। वेपथुः। ते।

महान्। त्वा। इन्द्रः। रक्षति। अप्रऽमादम्।

सा नः। भूमे। प्र रोचय। हिरण्यस्यऽइव। सम्ऽदृशि। मा। नः। द्विक्षत। कः। चन॥ १८॥

**अग्निर्भूम्यामोषधीष्वग्निमापो विभ्रत्यग्निरश्मसु।**
**अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः॥ १९॥**

अग्निः। भूम्याम्। ओषधीषु। अग्निम्। आपः। विभ्रति। अग्निः। अश्मऽसु।

अग्निः। अन्तः। पुरुषेषु गोषु। अश्वेषु। अग्नयः॥ १९॥

**अग्निर्दिव आ तपत्यग्नेर्देवस्योर्वन्तरिक्षम्।**

**अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम्॥ २०॥ (२)**

NOTES

# अथर्ववेदः

## कालः १.५

### तत्र प्रथमा।।

**कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः।**
**तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा।। १।।**

कालः। अश्वः। वहति। सप्तऽरश्मिः। सहस्रऽअक्षः। अजरः। भूरिऽरेताः।

तम्। आ। रोहन्ति। कवयः। विपःऽचितः। तस्य। चक्रा। भुवनानि। विश्वा।। १।।

अनेन सूक्तद्वयेन सर्वजगत्कारणभूतः कालरूपः परमात्मा स्तूयते। तत्र प्रथमया कालोऽश्वात्मना रूप्यते। सप्तरश्मिः (सप्त) संख्याका रश्मयो रज्जवो मुखग्रीवापादावबद्धा यस्य सः सहस्राक्षः सहस्रलोचनः अजरः जरारहितः नित्ययुवा भूरिरेताः। रेतः शुक्ररूपः सप्तमो धातुः। प्रभूतवीर्यः रेतःसेचनसमर्थः अपत्योत्पादनशक्तः कालः कलयिता अश्वो वहति स्वारोहकान् अभिमतं प्रदेशं प्रापयति। तम् अश्वं विपश्चितः अश्वारोहणावरोहणादिषु कुशला अश्वशास्त्रनिष्णाताः कवयो धीमन्तः आ रोहन्ति। तस्य अश्वस्य चक्रा चक्राणि। ᳲचङ्कमणाञ्चक्रम् इति यास्कः (नि. ४. २७)ᳲ। गन्तव्यानि स्थानानि विश्वा विश्वानि भुवनानि। इति अश्वपक्षेर्थः।। विवक्षितस्तु। अश्वः अश्नुते व्याप्नोति भूतभविष्यद्वर्तमानकालवर्तीनि वस्तूनीति अश्वः। कालः कलयिता सर्वस्य जगतः अनवच्छिन्नकालरूपः परमेश्वरः। सप्तरश्मिः। रश्मिशब्देन ऋतव उच्यन्ते। सप्तर्तुः एकैक ऋतुर्मासद्वयात्मकः सप्तमस्तु त्रयोदशो मासः। तथा च दाशतय्याम् आम्नायते। "साकंजाना सप्तथम् आहुरेकजं षळिद्यमा ऋषयो देवता इति" इति (ऋ॰ १. १६४. १४)। अत्रापि समाम्नातं प्राक् (९. १४. १६)। सहस्राक्षः। अत्र अक्षिशब्देन दिनानि रात्रयश्च उच्यन्ते। सहस्रसंख्याकाहोरात्रयुक्तः। अजरः जरारहितः सर्वदा एकरूपः। भूरिरेताः प्रभूतजगत्सर्जनसमर्थशक्तिसंपन्नः। एवंरूपः कालो वहति प्राणिजातं स्वस्वकर्मषु प्रापयति। तं कालं कवयः क्रान्तदर्शिनो विपश्चितः विद्वांसः आ रोहन्ति स्वाधीनं कुर्वन्ति। स्वाधीनकाला भवन्तीत्यर्थः। तस्य कालात्मकस्य रथस्य चक्रा चक्राणि विश्वा विश्वानि भुवनानि भूतजातानि। लोकान् अभिगच्छन्तीति शेषः।। अथ वा अश्वशब्देन आदित्य उच्यते। तथा च यास्कः। "एको अश्वो वहति सप्तनामा। आदित्यः। सप्तास्मै रश्मयो रसान् अभिसंनामयन्ति



Scanned with CamScanner

NOTES

सप्तैनम् ऋषय स्तुवन्तीति वा'' इति। (नि॰ ४. २७)। कालात्मकोश्वः सूर्यः सप्त रश्मयः प्रधानभूता यस्य। ते चैव सप्त सूर्या इत्युच्यन्ते। ''देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष नः'' इति निगमः (ऋ॰ ९. १४०. ३)। तेषां च नामानि तैत्तिरीया अधीयते। ''आरोगो'' भ्राजः पटरः पतङ्गः स्वर्णरो ज्योतिषीमान् विभासः'' इति (तै॰ आ॰ १. ७. १)। औ तु प्रधानभूतः कश्यपाख्य आदित्यः। ''कश्यपोष्टमः स महामेरुं न जहाति'' इति श्रुतेः (तै॰ आ॰ १. ७. १)। यद्वा रश्मिशब्देन च्छन्दांस्यभिधीयन्ते। गायत्र्यादीनि च्छन्दांसि यस्य। तथा च निगमः। ''ऋग्भिः पूर्वाह्णे दिवि देव ईयते। यजुर्वेदे तिष्ठति मध्ये अङः। सामवेदेनास्तमये महीयते। वेदैरशून्यस्त्रिभिरेति सूर्यः'' इति (तै॰ ब्रा॰ ३. १२. ९. १)। यद्वा रश्मिमन्तोऽश्वा रश्मिशब्देन उच्यन्ते। ⌛मत्वर्थीयस्य लोपः⌛। सप्ताश्वः। ''सप्त युञ्जन्ति रथम् एकचक्रम्'' इति निगमः (९. १४. २)। सहस्राक्षः अक्षिवद् अक्षीणि किरणाः सहस्रकिरणोपेतः अजरः अविनश्वरो नित्यः भूरिरेताः। उदकवाची रेतःशब्दः। ''यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेथ वर्षति'' इति श्रुतिः (तै॰ सं॰ २. ४. १०. २)। एवंरूप आदित्यो वहति कालचक्रं धारयति। तं कालात्मकं सूर्यं विद्वांसः अधिगतपरमार्थाः आ रोहन्ति सूर्यमण्डलं भित्त्वा उपगच्छन्ति।

**द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।**
**परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः॥**

इति स्मृतेः। यद्वा स्वात्मभावेन अधितिष्ठन्ति। अत एव आदित्यं पुरुषं प्रकृत्य श्रूयते। ''तद् योहं सोसौ योसौ सोहं तद् उक्तम् ऋषिणा सूर्य आत्मा जगतस्तस्थुषश्च'' इति (ऐ॰ आ॰ २. २. ४)। तस्य सूर्यस्य चक्रा चक्राणि चङ्कमणानि व्याप्तिस्थानानि सर्वाणि जगन्तीति॥

## द्वितीया॥

**सप्त चक्रान् वहति काल एष सप्तास्य नाभीरमृतं न्वक्षः।**
**स इमा विश्वा भुवनान्यञ्जत् कालः स ईयते प्रथमो न देवः॥ २॥**

सप्त। चक्रान्। वहति। कालः। एषः। सप्त। अस्य। नाभीः। अमृतम्। नु अक्षः।

सः। इमा। विश्वा। भुवनानि। अञ्जत्। कालः। सः। ईयते। प्रथमः। नु। देवः॥ २॥

अनया संवत्सररूपकालचक्रं वर्ण्यते। तस्य संवत्सरकालस्य चक्राणि एकं



Scanned with CamScanner

NOTES

त्रीणि पञ्च षट् सप्त द्वादशेति तत्रतत्र आम्नायते। "सप्त युञ्जन्ति रथम् एकचक्रम्" (९. १४. २) "त्रिनाभि चक्रम्" (९. १४. २) "सप्तचक्रे षडरे" (९.१४.१२) "द्वादशारम्" (९. १४. १३) इत्यादिषु। तथा च शौनकोप्याह।

**त्रिधा द्वादशधा षोढा पञ्चधा सप्तधा तथा।**
**संवत्सरं चक्रवञ्च पराभिः कीर्तयत्यृषिः।**

इति (बृ॰ ४. ३२)।। एष सर्वजगत्कारणत्वेन अनुभूयमानः कालः परमात्मा सप्त चक्रा। चक्राणि सप्त ऋतून् अनु अनुक्रमेण वहति धारयति। अस्य संवत्सरस्य सप्त नाभीः नाभयः। नह्यते नाभिः। अक्षबन्धकानि मध्यच्छिद्राणि सप्त ऋतुसंधिकालाः। अस्य अक्षः तनुं* संततं सूक्ष्मम् अमृतम् अमरणधर्मकम् अविनश्वरं तत्त्वम्। सप्तचक्रच्छिद्रेषु। प्रोतः अनुस्यूतोऽक्षः सत्यम् अबाध्यं तत्त्वम्। सः पूर्वोक्तसंवत्सररूपः प्रथमः सर्वस्य आदिभूतो देवः द्योतमानः नित्यज्ञानरूपः कालः परमात्मा इमा इमानि नामरूपात्मना व्याकृतानि विश्वा विश्वानि भुवनानि भवनवन्ति चराचरात्मकानि जगन्ति अञ्जत् अञ्जन्। ॾ अनक्तेः शतरि "अनित्यम् आगमशासनम्" इति नुमभावः ॾ। व्यक्तीकुर्वन् स्वेन कालेन अवच्छिन्नानि कुर्वन् उत्पादयम् सः स्यति संहरतीति सः। ॾ षो अन्तकर्मणि। कर्तरि कप्रत्ययः। आतो लोपः ॾ। संहरंश्च ईयते गच्छति व्याप्नोति सर्वम् आवृत्य वर्तते। ॾ ईङ् गतौ। देवादिकः ॾ। नुशब्दः प्रसिद्धौ।। यद्वा अध्यात्मपरत्वेन योज्यः। कालः कलयिता सर्वेन्द्रियव्यापारकर्ता शरीराभिमानी देवः। बन्धकाः विषया रूपादयः। तनुं सूक्ष्मं दुर्दर्शम्। अमृतम् चैतन्यम्। अक्षः सर्वेन्द्रियेषु तद्विषयेषु च अनुगतः। एवं सर्वाणि प्राणिजातानि अञ्जत् प्रेरयन् ईयते। सः उपसंहरंश्च स कालः ईयते तत्त्वज्ञैर्ज्ञायते। ॾ इण् गतौ। कर्मणि यक् प्रत्ययः ॾ ।।

## तृतीया।।

**पूर्णः कुम्भोधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः।**
**स इमा विश्वा भुवनानि प्रत्यङ् कालं तमाहुः परमे व्योमन्।। ३।।**

पूर्णः। कुम्भः। अधि। काले। आऽहितः। तम्। वै। पश्यामः। बहुऽधा। नु सन्तः।

सः। इमा। विश्वा। भुवनानि। प्रत्यङ्। कालम्। तम्। आहुः। परमे। विऽओमन्।। ३।।



Scanned with CamScanner

NOTES

काले सर्वजगत्कारणभूते नित्ये अनवच्छिन्ने परमात्मनि स्वस्वरूपे। ॥अधिशब्दः सप्तम्यर्थानुवादी॥। पूर्णः सर्वत्र व्याप्तः कुम्भः कुम्भवत् कुम्भः अहोरात्रमासर्तुसंवत्सरादिरूपः अवच्छिन्नो जन्यः कालः आहितः निहितो वर्तते। सर्वस्य कार्यस्य स्वकारणेऽवस्थानात्। अत्र विद्वदनुभवश्रुतिं प्रमाणयति। तं जन्यं कालं सन्तः सत्पुरुषा बहुधा नानाप्रकारम् अहोरात्रादिभेदेन पश्यामो नु अनुभवामः खलु। अथवा तं जन्यकालाधारं परमात्मानं बहुधा बहुभिः श्रवणमनननिदिध्यासनैः पश्यामः साक्षात्कुर्मः। सन्तः सद्रूपब्रह्मोपासका वयम्। "अस्ति ब्रह्मेति चेद् वेद सन्तम् एनं ततो विदुः" इति हि श्रुतिः (तै. आ. ८. ६)। वैनुशब्दौ प्रसिद्धर्थौ। स कालः इमा इमानि परिदृश्यमानानि विश्वा विश्वानि व्याप्तानि भुवनानि भूतजातानि प्रत्यङ् प्रत्यञ्चनः अभिमुखाञ्चनः आव्याभुवन् भवति। तं कालं परमे उत्कृष्टे सांसारिकसुखदुःखा दिद्वन्द्वदोषरहिते व्योमन् व्योमनि आकाशवन्निर्लेपे सर्वगते विविधं रक्षके परमानन्दप्रदायके स्वस्वरूपे वर्तमानम् आहुः विद्वांसः। ॥व्योमन्निति। "सुपां सुलुक्°" इति सप्तभ्या लुक्। "न ङिसंबुद्ध्योः" इति नलोपप्रतिषेधः॥॥

## चतुर्थी॥

**स एव सं भुवनान्याभरत् स एव सं भुवनानि पर्यैत्।**
**पिता सन्नभवत् पुत्र एषां तस्माद् वै नान्यत् परमस्ति तेजः॥ ४॥**

सः। एव। सम्। भुवनानि। आ। अभरत्। सः। एव। सम्। भुवनानि। परि। ऐत्। पिता। सन्। अभवत्। पुत्रः। एषाम्। तस्मात्। वै। न। अन्यत्। परम्। अस्ति। तेजः॥ ४॥

स एव कालः भुवनानि भूतजातानि [सम्] आ अभरत् आहरत् आहरति उत्पादयति। ॥"हृग्रहोर्भः°"॥। यद्वा। ॥[भुञ्] भरणे। भौवादिकः॥। स्वेनोत्पादितानि भुवनानि समन्तात् पुष्णाति। स एव कालः भुवनानि सं पर्यैत् सम्यक् परिगच्छति व्याप्नोति। ॥इण् गतौ। छान्दसे लङि "आडजादीनाम्" इति आडागमः। "आटश्च" इति वृद्धिः॥। स एव पिता एषां भुवनानां जनकः सन् एषां पुत्रोभवत् भवति। काल एव पितृत्वेन पुत्रत्वेन च व्यवह्रियते। यः पूर्वजन्मनि पितृत्वेन जातः स एव अस्मिन् जन्मनि पुत्रत्वेन व्यवह्रियते अवच्छेदककालाधीनत्वात् सर्वस्य। अथ वा एकस्मिन् जन्मन्येव पितुः पुत्रत्वम् आम्नायते। "अङ्गाद् अङ्गात् संभ- "वसि हृदयाद् अधि जायसे। आत्मा वै पुत्रनामासि स जीव शरदः "शतम्" इति (कौ° उ° २. ११)। तस्मात्



Scanned with CamScanner

सर्वोत्पादकात् सर्वगतात् पुत्रादिरूपेण भविष्यतश्च तस्मात् कालाद् अन्यत् परम् उत्कृष्टं तेजो नास्ति। वैशब्दः प्रसिद्धौ। तेजो नास्तीति निषेधात् स्वस्यापि तेजोरूपत्वम् अर्थसिद्धम्। "तस्य भासा सर्वम् इदं विभाति" इति श्रुतेः। (क॰ व॰ ४. १५)।।

NOTES

## पञ्चमी।।

**कालोमूं दिवमजनयत् काल इमाः पृथिवीरुत।**
**काले ह भूतं भव्यं चेषितं ह वि तिष्ठते।। ४।।**

कालः। अमूम। दिवम्। अजनयात्। कालः। इमाः। पृथिवीः। उत।

काले। ह। भूतम्। भव्यम्। च। इषितम्। ह। वि। तिष्ठते।। ४।।

कालः परमात्मा अमूं विप्रकृष्टां दिवम् द्युलोकम् अजनयत् उत्पादितवान्। उत अपि च इमाः परिदृश्यमानाः सर्वप्राण्याधारभूताः पृथिवीः। व्यत्ययेन बहुवचनं कक्ष्याभेदेन वा। तथा च मन्त्रवर्णः। "यद् इन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्याम् उत स्थः" इति (ऋ॰ १. १०८. ९) तथा। हशब्दः एवार्थे। काल एव भूतम् भूतकाले आधारे अवच्छिन्नं भव्यम् भविष्यच्च इषितम् इष्टम् इष्यमाणं वर्तमानकालावच्छिन्नं च जगद् वि तिष्ठते विशेषेण आश्रितं वर्तते। ॥"समवप्रविभ्यः स्थः" इत्यात्मनेपदम्॥ ।।

## षष्ठी।

**कालो भूतिमसृजत काले तपति सूर्यः।**
**काले ह विश्वा भूतानि काले चक्षुर्वि पश्यति।। ६।।**

कालः। भूतिम्। असृजत्। काले। तपति। सूर्यः।

काले। ह। विश्वा। भूतानि। काले। चक्षुः। वि। पश्यति।। ६।।

कालः कालरूपः परमात्मा भूतिम् भवनवज्जगद् असृजत। ॥सृजविसर्गे। तौदादिकः। व्यत्ययेन आत्मनेपदम्। दैवादिकाद् वा आत्मनेपदिनो व्यत्ययेन शः॥। काले प्रेरके सति सूर्यः आदित्यः तपति जगत् प्रकाशयति। काल एव आश्रये (विश्वा) विश्वानि भूतानि वर्तन्ते। काले चक्षुः। उपलक्षणम् एतत्। चक्षुरादीन्द्रियाणि वि पश्यति। इदमपि उपलक्षणम्। दर्शनादिकर्माणि कुर्वन्ति। यद्वा चक्षुः। चक्षुःशब्दो लुप्तमत्वर्थीयः। चक्षुष्मान् सर्वेन्द्रियाधिष्ठाता वि पश्यति स्वस्वेन्द्रियव्यापारं करोति।।



Scanned with CamScanner

NOTES

## सप्तमी॥

**काले मनः काले प्राणः काले नाम समाहितम्।**
**कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः॥ ७॥**

काले। मनः। काले। प्राणः। काले। नाम। सम्ऽआहितम्।

कालेन। सर्वाः। नन्दन्ति। आऽगतेन। प्रऽजाः। इमाः॥ ७॥

काले परमात्मनि मनः जगत्सिसृक्षानिमित्तभूतं मनो वर्तते। तस्मिन्नेव प्राणः सूत्रात्मा सर्वजगदन्तर्यामी वर्तते। अन्तर्यमनोपाधिकत्वेन काले वर्तत इति आधारव्यपदेशः। यद्वा मनः। जात्येकवचनम्। सर्वेषां प्राणिनां मनांसि। प्राणः पञ्चवृत्तिकं प्राणा अपि परमात्मन्येव वर्तन्ते। तथा नाम नामधेयं सर्वेषां वस्तूनां संज्ञा अपि तत्रैव समाहितम्। स्त्रीपुरुषादिसंज्ञाभिः काल एवं उच्यत इत्यर्थः। यद्वा सर्वेषां रूपाणि कृत्वा तेषां नामान्यपि स्वयमेव व्यवहरतीत्येतदभिप्रायेण काले नाम समाहितम् इत्युक्तम्। "(सर्वाणि रूपाणि) विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते" इति हि श्रुतिः (तै. आ. ३. १२. ७)।

कालेन वसन्तादिरूपेण आगतेन सर्वा इमाः प्रजाः नन्दन्ति संतुष्यन्ति स्वस्वकार्यसिद्धेः॥

## अष्टमी॥

**काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम्।**
**कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः॥ ७॥**

काले। तपः। काले। ज्येष्ठम् काले। ब्रह्म। सम्ऽआहितम्।

कालः। ह। सर्वस्य। ईश्वरः। यः। पिता। आसीत्। प्रजाऽपतेः॥ ७॥

काले परमात्मनि तपः जगत्सर्जनविषयं पर्यालोचनम्। ॐतप पर्यालोचने। अस्माद् असन्ॐ। "तपसा चीयते ब्रह्म" (मु° १. १. ७) इत्यादौ तपःशब्दः पर्यालोचनार्थत्वेन व्याख्यातः। तथा ज्येष्ठम् सर्वस्य आदिभूतं हिरण्यगर्भाख्यं तत्त्वं वर्तते। तथा ब्रह्म साङ्गो वेदस्तत्प्रतिपादकः समाहितम् सम्यगाहितः। यद्वा तपः कृच्छ्रचान्द्रायणादिकम्। तत्फलप्रदातृत्वात् तत्रैव वर्तनम्। एकः कालशब्दो यौगिकः कलयितरि काले ज्येष्ठं ब्रह्म हिरण्याख्यम्। "ज्येष्ठं ब्रह्म श्रेष्ठं ब्रह्म" इति हि श्रुत्यन्तरम्। हशब्दः अवधारणे। कालः सर्वस्य जगत ईश्वरः स्वामी। यः कालः प्रजापतेः प्रजानां स्रष्टुश्चतुर्मुखस्य ब्रह्मणः पिता जनक आसीत्।



Scanned with CamScanner

NOTES

## नवमी॥

**तेनेषितं तेन जातं तदु तस्मिन् प्रतिष्ठितम्।**
**कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम्॥ ९॥**

तेन। इषितम्। तेन। जातम्। तत्। ऊं इति। तस्मिन्। प्रतिऽस्थितम्।

कालः। ह। ब्रह्म। भूत्वा। बिभर्ति। परमेऽस्थिनम्॥ ९॥

तेन कालेन इषितम् इष्टं सर्वं स्त्रष्टव्यं जगत्। कामितम् इत्यर्थः। ["तीषुमह" इति इडागमः]। तेनैव जातम् उत्पादितं जगत्। तत् तज्जगत्। उशब्दः अवधारणे। तस्मिन्नेव काले प्रतिष्ठितम्। कालो ह एव ब्रह्म देशकालावच्छिन्नं सच्चित्सुखैयितृरसम् अबाध्यं परमार्थतत्त्वं भूत्वा परमेष्ठिनम् परमे स्थाने सत्यलोके तिष्ठन्तं चतुर्मुखब्रह्मणं (बिभर्ति)॥

## दशमी॥

**कालः प्रजा असृजत कालो अग्रे प्रजापतिम्।**
**स्वयंभूः कश्यपः कालात् तपः कालादजायत॥ १०॥**

कालः। प्रऽजाः। असृजत। कालः। अग्रे। प्रजाऽपतिम्।

स्वयम्ऽभूः। कश्यपः। कालात् तपः कालात्। अजायत॥ १०॥

कालः अग्रे सृष्ट्यादौ प्रजापतिम् ब्रह्माणम् असृजत उदपादयत्। कालः। प्रजाश्च असृजत। स्वयंभूः स्वयम् आत्मनान भवतीति स्वयंभूः। कालव्यतिरिक्तकालान्तरनिषेधकः स्वयंशब्दः। कश्यपः आरोगभ्राजादि-सप्तसूर्यापेक्षया अष्टमः सूर्यः। "कश्यपोष्टमः स महामेरुं न जहाति" इति श्रुत्यन्तरम् (तै॰ आ॰ १. ७. ९) उदाहृतम् (१)। [कश्यपशब्दनिर्वचनं यास्केन एवं कृतम्। कश्यपः पश्यको भवति यत् सर्वं परिपश्यतीति सौक्ष्म्यात् इति (तै॰ आ॰ १. ८. ८)]। तादृशः सर्वस्य द्रष्टा सूर्यः तपः संतापकं तेजश्च कालाद् अजायत॥

**[ इति ] षष्ठेनुवाके अष्टमं सूक्तम्।**

"कालादापः" इति सूक्तं कालप्रतिपादकत्वात् कालसूक्तम् इत्युच्यते। तस्य पूर्वसूक्तेन सह उक्तो विनियोगः॥

**तत्र प्रथमा॥**

**कालादापः समभवन् कालाद् ब्रह्म तपो दिशः।**
**कालेनोदेति सूर्यः काले नि विशते पुनः॥ १॥**



Scanned with CamScanner

NOTES

**UNIT–III**

# इकाई–तृतीय

॥ श्रीः ॥

ऐतरेयब्राह्मणान्तर्गतं

# हरिश्चन्द्रोपाख्यानम्

## ( त्रयस्त्रिंशोऽध्यायः )

### सायणभाष्यसहितं 'प्रकाश'-हिन्दी-व्याख्योपेतम्

### प्रथम खण्डः

आहिताग्नेर्मृतावग्निहोत्राङ्गे विकले तथा।
प्रायश्चित्तमपत्नीकहोम इत्यादि वर्णितम्॥

उक्तं द्वात्रिंशदध्यायैः कर्म वर्णत्रयान्वितम्।
अथ त्वष्टभिरध्यायैर्वर्ण्यते राजकर्तृकम्॥

तत्र क्रतौ राजसूये बह्विष्टिपशुसोमके।
मध्येऽभिषेचनीयेऽह्नि शौनः शेपं श्रुतं श्रुतौ॥

त्रयस्त्रिंशोऽयमध्यायः शौनः शेपेतिनामवान्।
हरिश्चन्द्रकथा तत्र कथिता बहुपुत्रदा॥

**तदेतदुपाख्यानं दर्शयति–**

हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आस। तस्य ह शतं जाया बभूवुः। तासु पुत्रं न लेभे। तस्य ह पर्वतानारदौ गृह ऊषतुः। स ह नारदं पप्रच्छ।

सा०–हरिश्चन्द्रो नाम राजर्षिः, 'प्रस्कण्वहरिश्चन्द्रावृषी' (६. १. १५३) इति पाणिनिना सूत्रितत्वात्। स च वेधसो नृपतेः पुत्रः, इक्ष्वाकुवंशोद्भवो राजा, पुत्रहीन आस। स च शतसङ्ख्यासां जायानां मध्ये कस्याश्चदपि जायायां पुत्रं न



Scanned with CamScanner

NOTES

लेभे। तस्य राज्ञो गृहे पर्वतनारदमानौ यावृषी, तौ निवासं चक्रतु:। तयोर्मध्ये नारदमृषिमेतया गाथया राजा पप्रच्छ।

**तां गाथां दर्शयति–**

**यं न्विमं पुत्रमिच्छन्ति ये विज्ञानन्ति ये च न।**
**किंस्वित्पुत्रेण विन्दते तन्म आचक्ष्व नारद! ॥इति॥**

सा०–ये देवमनुष्यादयो विजानन्ति–विवेकज्ञानयुक्ता:–ये च पश्वादयो न विजानन्ति = विवेकज्ञानरहिता:। ते सर्वेऽपि नु = क्षिप्रं यमिमं पुत्रमिच्छन्ति तेन पुत्रेण किंस्विद् विन्दते = किं नाम फलं पिता लभते? हे नारद! ये मह्यं तत्फलमाचक्ष्वेति राज्ञः प्रश्नः।

**तस्योत्तरमवतारयति–**

**स एकया पृष्टो दशभिः प्रत्युवाच, इति।**

स नारद एकया गाथया पृष्टः सन् दशभिर्गाथाभिः प्रत्युत्तरमुक्तवान्। तत्र प्रथमां गाथामाह–

**ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति।**
**पिता पुत्रस्य जातस्य पश्येच्चेज्जीवता मुखम्॥ १॥**

सा०–उत्पन्नस्य, सुखेनं जीवतः पुत्रस्य मुखं पिता यदि पश्येत्तदानीमस्मिन्पुत्रे स्वकीयमृणं लौकिकं वैदिकं च, संनयति = सम्यगवस्थापयति। लौकिकस्यावस्थापनात् 'पुत्रपौत्रादिभिर्ऋणं प्रत्यर्पणीयमिति' स्मृतिकारा आहु:। वैदिकं तु 'त्रिभिर्ऋणवा जायत' इत्यादि श्रुत्युक्तं पूर्वमेवोदाहृतम्। तस्य च पुत्रावस्थापनं सम्पत्तिनामकेन कर्मणा सम्पद्यते। तच्च कर्म वाजसनेयिभिराम्नातम्–"अथात: सम्पत्ति:। यदा प्रैष्यन्मन्यते, अथ पुत्रमाह–'त्वं ब्रह्म, त्वं यज्ञ:, त्वं लोक इति'। स पुत्रः प्रत्याह–'अहं ब्रह्माहं यज्ञोऽहं लोक इति' ब्रह्म = मया कर्त्तव्यं वेदाध्ययनं, मयाऽनुष्ठेया यज्ञाश्च, मया सम्पाद्या उत्तमा लोकाश्च–इत्येतत् सर्वं पुत्रेण त्वयैव सम्पादनीयमिति पितृवाक्यस्यार्थ:। 'सर्वमहं सम्पादयिष्यामि' इति पुत्रवाक्यस्यार्थ:। अत्राप्यारण्यककाण्डे सङ्क्षिप्य संदर्शयिष्यते–'सोऽस्यायमात्मा पुण्येभ्य: कर्मभ्य: प्रतिधीयते' इति। एवमृणं पुत्रे समर्पयति। तथैवामृतत्वं मरणरहितं मुक्तिपदं च गच्छति। पुत्रार्पितलौकिकवैदिकभारस्याविघ्नेन तत्त्वज्ञानसम्पादनात्।



Scanned with CamScanner

NOTES

( २ )

**द्वितीयां गाथामाह–**

**यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि।**
**यावन्तो अप्सु प्राणिनां भूयान्पुत्रे पितुस्ततः॥ २॥**

सा०–पृथिव्यां भोगाः = सस्यनिवासादयः। जातवेदस्यग्नौ भोगाः = दहनपचनादयः। अप्सु भोगाः = स्नानपानादयः। प्राणिनामेते सर्वे भोगा यावन्तः सन्ति ततस्तावद्भ्यः सर्वेभ्यो भोगेभ्यो भूयानधिकः पितुः पुत्रे भोगो विद्यते, अत्यन्तसुखहेतुत्वात्। तथा चाहुः–

**'पुत्रोत्पत्तिविपत्तिभ्यां नापदं सुखदुःखयोः' इति।**

( ३ )

**तृतीयां गाथामाह–**

**शश्वत्पुत्रेण पितरोऽत्यायन्बहुलं तमः।**
**आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी॥ ३॥**

सा०–पितरो जनका उत्पन्नेन पुत्रेण शश्वत्सर्वदा, लोकोद्वयेऽपि बहुलमभ्यधिकं तम ऐहिकमामुष्मिकं च दुःखमत्यायन् = अतिक्रामन्ति। तथा च बौधायन आह–

**पुदिति नरकस्याख्या दुःखं न नरकं विदुः।**
**पुत्तस्त्राणात्ततः पुत्रमिहेच्छन्ति परत्र च ॥ इति॥**

किञ्च हि = यस्मात्कारणात्पितुः 'पुत्र उत्पन्न' इत्युक्ते सति, पिता स्वस्मात्स्वयमेव जज्ञे = उत्पन्नः इत्युक्तं भवति। ततः पिता यथा स्वयं स्वकीयं दुःखं विनाशयति तथा पुत्रोऽप्येतद् दुःखं विनाशयतीति द्रष्टव्यम्। तस्मात्स पुत्र इरावती = अन्नयुक्ता, अतितारिणी = नदीसमुद्रादेरतितरणहेतुः, नौरिति शेषः। यथा नोर्दुर्घटं नद्यादिकं तारयत्येवं पुत्रोऽप्यैहिकमामुष्मिकं च दुःखं तारयतीत्यर्थः।

( ४ )

**चतुर्थी गाथामाह–**

**किं नु मलं किमजिनं किमु श्मश्रूणि किं तपः।**
**पुत्रं ब्रह्माण इच्छध्वं स वै लोकोऽवदावदः॥ ४॥**



Scanned with CamScanner

NOTES

सा०—अत्र मलाजिनश्मश्रुतप:शब्दैराश्रमचतुष्टयं विवक्षितम्। मलरूपाभ्यां शुक्रशोणिताभ्यां संयोगान्मलशब्देन गार्हस्थ्यं विवक्षितम्। कृष्णाजिन-संयोगादजिनशब्देन ब्रह्मचर्य विवक्षितम्। क्षौरकर्मराहित्यात् श्मश्रुशब्देन वानप्रस्थ्यं विवक्षितम्। इन्द्रियनियमसद्भवात्तप: शब्देन पारिव्रज्यं विवक्षितम्। मलं गार्हस्थ्यं किन्तु किं नाम सुखं करिष्यति, न किञ्चिदित्यर्थ:। एवमुत्तरत्रापि योज्यम्। हे ब्राह्मण:, विप्रा विप्रक्षत्रियाद्या: सर्वे यूयं सुखहेतुत्वात् पुत्रमिच्छध्वम्। स वै स एव पुत्रोऽवदावदो लोक:। वदितुमयोग्यानि निन्दावाक्यानि अवदा:, तैर्वाक्यै:, न उद्यते = न कथ्यत इत्यवदावद:, अवदावदो दोषराहित्यान्निन्दानर्ह इत्यर्थ:। तादृशो लोको भोगहेतु: पुत्र:। तस्मादाश्रमेभ्योऽप्याधिक्येन पुत्रेच्छा कर्तव्या। यद्यपि हरिश्चन्द्र एवात्र प्रष्टा, तथापि तेन सह ऋषीणां बहूनां सभायामवस्थानाद् ब्रह्माण इति सम्बोधनम्।

## (५)

**पञ्चमीं गाथामाह–**

**अन्नं ह प्राण: शरणं ह वासो रूपं हिरण्यं पशवो विवाहा:।**
**सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्र: परमे व्योमन्॥ ५॥**

सा०—अन्नादयो लोके सुखहेतुत्वेन प्रसिद्धा:। तथा हि शरीरे प्राणावस्थिति-हेतुत्वादन्नमेव प्राण:। वास: शीतोपद्रवाद्रक्षकत्वेन शरणं गृहसमानम्। हिरण्यं कर्णाभरणादिकं दृष्टिप्रियत्वाद्रूपसम्पादकम्। पशवो गवाश्वादयो विवाहविशेषेण निर्वाहका:। जाया भोगे सहकारित्वात्सखा ह सखिस्वरूपैव। एवमेते सुखहेतुत्वेन प्रसिद्धां अपि तात्कालिकमल्पमेव सुखं प्रयच्छन्ति। दुहिता ह पुत्रीति कृपणं दु:खकारित्वाद् दैन्यहेतु:। तथा च स्मर्यते–

**सम्भवे स्वजनदु:खकारिका सम्प्रदानसमयेऽर्थहारिका।**
**यौवनेऽपि बहुदोषकारिका दारिका हृदयदारिका पितु:॥ इति॥**

पुत्रो ह पुत्रस्तु ज्योति स्वरूपं तमोनिवारकत्वेन स हि पितरं परमे व्योमन्नुत्कृष्ट आकाशे परब्रह्मस्वरूपेऽवस्थापयति। आकाशस्तल्लिङ्गादित्यनेन व्याससूत्रेण (१. १. १२ ब्र. सू.) आकाश-व्योमादिशब्दानां ब्रह्मपरत्वं निर्णीतम्। पुत्रस्य च ब्रह्मज्ञानहेतुत्वं पूर्वमेवामृतत्वं च गच्छतीत्यत्र प्रतिपादितम्।



Scanned with CamScanner

## ( ६ )

**षष्ठीं गाथामाह–**

**पतिर्जायां प्रवशति गर्भो भूत्वा स मातरम्।**
**तस्यां पुनर्नवो भूत्वा दशमे मासि जायते॥ ६॥**

सा०–पत्युराकारद्वयमस्ति। वर्तमानपुरुषाकार एको, रेतोरूपेण गर्भाकारा द्वितीयः। जायाया अप्याकारद्वयमस्ति। पतिरूपमाकारं प्रति जाया भवति। गर्भरूपमाकारं प्रति माता भवति। अतः स तादृशः पतिः स्वयं रेतोरूपेण गर्भो भूत्वा पूर्वमवस्थितां जायां भविष्यदाकारेण मातरं सतीं प्रविशति। तस्यां मातरि पुनर्नवो भूत्वा पूर्वमन्यस्यां मातुर्युत्पन्नो जरठः इदानीं पुनर्नूतनबालो भूत्वा यस्यामिदानींतन्यामस्यां मातरि गर्भवासे सति दशमे मास्तुत्पद्यते। तस्मात्पुत्रः स्वस्मादन्यो न भवति।

## ( ७ )

**सप्तमीं गाथामाह–**

**तज्जाया जाया भवति यदस्यां जायते पुनः।**
**आभूतिरेषा भूतिर्बीजमेतन्निधीयते॥ ७॥**

सा०–यद् यस्मात्कारणात् अस्यां गर्भधारिण्यामयं पिता पुत्ररूपेण पुनर्जायते, तत् तस्मात्कारणात् लोकप्रसिद्धा या जायाऽस्ति सा 'जायतेऽस्यामिति' व्युत्पत्त्या जायाशब्दवाच्या भवति। किं चैषा भूत्याभूतिशब्दाभ्यामभिधीयते। भवत्यस्यां पुत्ररूपेण पतिरित्येषा भूतिशब्दवाच्या। रेतोरूपेणाऽऽगत्य, अस्यां पुत्ररूपेण भवतीत्याभूतिशब्दवाच्या। एतदेतस्यां स्त्रियां बीजं रेतोरूपं निधीयते = प्रक्षिप्यते तस्मादुक्ताः शब्दा उपद्यन्ते।

## ( ८ )

**अष्टमीं गाथामाह–**

**देवाश्चैतामृषयश्च तेजः समभरन्महत्।**
**देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः॥ ८॥**

सा०–एतामेतस्यां योषिति देवाश्च महर्षयश्च स्वकीयं महत्तेजो रेतोरूपं सारं समभरन् = पुत्रोत्पादनाय सम्पादितवन्तः। स्वमेव सम्पाद्य ततो

NOTES

मनुष्यानित्यब्रुवन्—हे मनुष्याः! येयमिदानीं जायारूपेण वर्तते सेयं पुनर्वो युष्माथ पुत्ररूपे जन्मनि जननी भवति।

## ( ९ )

**नवमीं गाथामाह—**

**नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः।**
**तस्मात्तु पुत्रो मातरं स्वसारं चाधिरोहति॥ १॥**

सा०—लोको=लोकजन्यं सुखमपुत्रस्य नास्ति। न हि पुत्रदर्शनेन यत्सुखं तदन्यदर्शनेन क्वचिदपि दृश्यत इति यदस्ति, तत्सर्वे गोमहिष्यादयो जानन्ति यस्मात् तस्यादेव कारणात्पशुजातौ जातः पुत्रो = वत्सः, स्वकीयां मातरं भगिनीं वा पुत्रोत्पादनार्थमधिरोहति।

## ( १० )

**दशमीं गाथामाह—**

**एष पन्था उरुगायः सुशेवो, यं पुत्रिण आक्रमन्ते विशोकाः।**
**तं पश्यन्ति पशवो वयांसि च, तस्मात्ते मात्रापि मिथुनीभवन्ति॥ ११॥**

सा०—पुत्रिणः पुत्रवन्तो देवमनुष्यादयो विशोकाः=शोकरहिताः सन्तो, यं पन्थानं सुखानुभवरूपं मार्गमाक्रमन्ते प्राप्नुवन्त्येष पन्थाः = पुत्रसुखानुभवरूपो मार्गः, उरुगायः = उरुभिर्महद्भिः शास्त्रज्ञै राजामात्यादिभिश्च गीयते। तथा सुशेवः = सुष्ठु सेवितुं योग्यः, सुखाधिक्यस्य विद्यमानत्वात्। तं पुत्रसुखानुभवरूपं पशवो गवादयो वयांसि पक्षिणः संपश्यन्ति जानन्ति। तस्मात्ते पशुपक्ष्यादयः पुत्रसुखार्थं मात्रा सह मिथुनीभवन्ति, किमुतान्यया स्त्रिया सहेत्यर्थः।

**नारदेनोक्तां दशमीं गाथां निगमयति—**

**इति हास्मा आख्याय॥ १३॥**

सा०—हानेनैव प्रकारेणास्मै=तस्मै हरिश्चन्द्राय आख्याय उत्तरमभिधायावस्थित इति शेषः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये प्रथमः खण्डः



Scanned with CamScanner

NOTES

# हरिश्चन्द्रोपाख्यानम्

## द्वितीयः खण्डः

पुत्रनिमित्तलाभप्रतिपादिका नारदोक्ता दश गाथा उदाहृत्य पुत्र जन्मोपायोपदेशपरं नारदवाक्यमवतारयति–

**अथैनमुवाच–"वरुणं राजानमुपधाव, पुत्रो मे जायतां, तेन त्वा यजा इति॥"**

सा०–अथ पुत्रेच्छानिमित्तकथनानन्तरमेनं पुत्रार्थिनं हरिश्चन्द्रं नारद उवाच–हे हरिश्चन्द्र! वरुणं राजानमुपधाव = प्रार्थयस्व। येन प्रकारेण निश्चयः सोऽभिधीयते–हे वरुण! त्वत्प्रसादान्मे पुत्रो जायतां, ततस्तेन पुत्रेण त्वां यजै त्वामुद्दिश्य यज्ञं करवाणीति।

*प्रार्थनाप्रकारं नारदोपदेशमुक्त्वा हरिश्चन्द्रवृत्तान्तं दर्शयति–*

**'तथेति' स वरुणं राजानमुपससार–'पुत्रो मे जायतां, तेन त्वा यजा इति'। 'तथेति' तस्य पुत्रो जज्ञे रोहितो नाम।**

सा०–नारदोपदेशमङ्गीकृत्य हरिश्चन्द्रो वरुणमुपससार = प्रार्थयामास। स वरुणोऽपि तथास्त्विति तदीयपुत्रोत्पत्त्यै वरं दत्तवान्। तेन च वरेणोत्पन्नस्य रोहित इत्येतन्नामाभूत।

अथ बहुभिः पर्यायैर्वरुणस्योक्तिर्हरिश्चन्द्रस्य प्रत्युक्तिश्चेत्युभय प्रतिपाद्यते। तत्र प्रथमं पर्यायं दर्शयति–

**तं होवाच–'अजनि वै ते पुत्रो' यजस्व माऽनेनेति' स होवाच–'यदा वै पशुनिर्दशो भवत्यथ स मेध्यो भवति, निर्दशो न्वस्त्वथ त्वा यजा इति'। 'तथेति'।**

सा०–तं हरिश्चन्द्रं वरुण उवाच–हे हरिश्चन्द्र ते पुत्रोऽजनि वै = उत्पन्न एव, अनेन पुत्रेण मामुद्दिश्य यागं कुर्विति। एवं वरुणेनोक्ते हरिश्चन्द्रः पुनः प्रत्युवाच–यागार्थः पशुर्यदा निर्दशो भवति, तदा स मेध्यो यागयोग्यो भवति। निर्गतान्यशौचदिनानि दशसंख्याकानि यस्मात्पशोः सोऽयं निर्दशः। तस्मादयं नु क्षिप्रं निर्दशोऽस्तु। अथानन्तरं त्वा प्रत्यहं यजा इत्येतद्वाक्यं वरुणस्तथास्त्वित्यङ्गीचकार।

*द्वितीयमुक्तिप्रत्युक्तिपर्यायं दर्शयति–*



Scanned with CamScanner

**स ह निर्दश आस। तं होवाच–'निर्दशोऽन्वभूद्, यजस्व माऽनेनेति।' स होवाच–'यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति। दन्तान्वस्य जायन्तामथ त्वा यजा इति'। 'तथेति'।**

सा०–दशदिनशौचापगमे शुद्धात्वाद्यथा यागयोग्यत्वं, तथा दन्तोत्पन्नत्वादवयवसम्पूर्त्या यागयोग्यत्वमित्यभिप्राय:। स्पष्टमन्यत्।

*तृतीयं पर्यायं दर्शयति–*

**तस्य ह दन्ता जज्ञिरे। तं होवाच–'अज्ञत वा अस्य दन्ता:, यजस्व माऽनेनेति।' स होवाच–'यदा वै पशोर्दन्ता: पद्यन्तेऽथ स मेध्यो भवति। दन्ता न्वस्य पद्यन्तामथ त्वा यजा इति।' 'तथेति'।**

सा०–अज्ञत वै = जाता एव। पद्यन्ते = पतन्ति। प्रथमोत्पन्नानां दन्तानामस्थायित्वेन मुख्यपशवयवत्वाभावात्तत्पाते सति पशोर्मेध्यत्वम्।

*चतुर्थं पर्यायं दर्शयति–*

**तस्य ह दन्ता: पेदिरे। तं होवाच–'अपत्सत वा अस्य दन्ता:, यजस्व माऽनेनेति।' स होवाच–'यदा वै पशोर्दन्ता: पुनर्जान्तेऽथ स मेध्यो भवति। दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति'। 'तथेति'।**

सा०–अपत्सत वै = पतिता:। पुनरुत्पन्नानां दन्तानां स्थिरत्वेन संपूर्णावयवत्वात्पशोर्मेध्यत्वम्।

*पञ्चमं पर्यायं दर्शयति–*

**तस्य ह दन्ता: पुनर्जज्ञिरे। तं होवाच–'अज्ञत वा अस्य पुनर्दन्ता:, यजस्व माऽनेनेति।' स होवाच–'यदा वै क्षत्रिय: सांनाहुको भवत्यथ स मेध्यो भवति। संनाहं नु प्राप्नोत्वथ त्वा यजा इति।' 'तथेति'।**

सा०–अज्ञत वै = जाता एव। पश्वन्तरस्य पुनर्दन्तोत्पत्तिमात्रेण मेध्यत्वेऽप्यस्य पशो: क्षत्रियत्वात्स्वजात्यु चितधनुर्बाणकवचादिसंनाहशीलित्वे सति जात्युचितव्यापारसम्पूर्तौ मेध्यत्वम्। तस्मान्नु क्षिप्रमेवासौ संनाहं प्राप्नोत्यनन्तरमेव यजा इत्युत्तरं वरुणोऽङ्गीचकार।

*षष्ठं पर्यायं दर्शयति–*

**स ह संनाहं प्रापत्। तं होवाच–'संनाहं नु प्राप्नोद्यजस्व माऽनेनेति।' स 'तथेति' उक्त्वा पुत्रमामन्त्रयामास–'तत, अयं व मह्यं त्वामददाद्, हन्त त्वाऽहमिमं यजा इति।'**



Scanned with CamScanner

NOTES

सा०—संनाहप्राप्तेरूर्ध्वं स हरिश्चन्द्रो वरुणोक्तिमङ्गीकृत्य पुत्रमामन्त्र्यैव-मुवाच। उपलालनार्थं पुत्रे पितृवाचितशब्दप्रयोगः। हे तत, हे पुत्र, अयमेव वरुणो मह्यं त्वां पुत्रवरेण दत्तवान्। हन्त, दुष्टोऽहमिमं वरुणं यत्त्वया पुत्रेण यजै यागरूपां पूजां करवाणीति हरिश्चन्द्रस्योक्तिः।

*अथ रोहितनाम्नः पुत्रस्य कृत्यं दर्शयति—*

**स ह नेत्युक्त्वा धनुरादायारण्यमुपातस्थौ। स संवत्सरमरण्ये चचार॥ १४॥**

सा०—स ह स खलु रोहिताख्यः पुत्रः पितुर्वाक्य निषिध्य स्वरक्षणार्थं धनुः स्वीकृत्यारण्यं प्रत्युपगतोऽभूत्। कस्मिंश्चिदरण्ये नैरन्तर्येण स रोहितसंवत्सरं चचारेति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेयब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये द्वितीयः
खण्डः ॥ २॥ (१४) (१३७)

# हरिश्चन्द्रोपाख्यानम्

## तृतीयः खण्डः

*रोहितस्यारण्ये संवत्सरचरणानन्तरं भाविनं हरिश्चन्द्रादीनां वृत्तान्तं दर्शयति—*

**अथ हैक्ष्वाकं वरुणो जग्राह। तस्य होदरं जज्ञे। तदु ह रोहितः शुश्राव। सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच—**

**'नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम।**
**पापो नृषद्वरो जन इन्द्र इच्चरतः सखा॥ १॥**

**चरैवेति।'**

सा०—अथ रोहितस्यारण्ये संवत्सरवासानन्तरमेवैक्ष्वाकमिक्ष्वाकुवंशोत्पन्नं हरिश्चन्द्रं वरुणो देवो रोगरूपेण जग्राह। वरुणेन गृहीतस्य हरिश्चन्द्रस्योदरं जज्ञे। जलेन पूरितमुच्छूनं महोदरनामकं रोगस्वरूपमुत्पन्नम्। तदु ह तदपि सर्वमरण्ये स्थितो रोहितः पुत्रो मनुष्यमुखाच्छुश्राव। श्रुत्वा च स रोहितः पितरं द्रष्टुमरण्याद् ग्रामं प्रत्याजगाम। आगच्छतं रोहितं मार्गमध्ये इन्द्रः केनचिद् ब्राह्मणपुरुषरूपेण प्राप्य इदमुक्तवान्। आ = समन्तात् श्रान्तः आश्रान्तः, सर्वत्र



Scanned with CamScanner

NOTES

पर्यटनेन श्रान्ति प्राप्तः, तद्विपरीतोऽनाश्रान्तः = एकत्रैव निवासशीलः–तादृशाय। तथाविधस्य पुरुषस्य श्रीः बहुविधा सम्पत् नास्ति। यद्वा, नानेति पदच्छेदः। श्रान्ताय = सर्वत्र पर्यटनेन श्रान्तस्य, नाना श्रीर्बहुविधा सम्पदस्तीत्यनेन प्रकारेण, रोहित! वयं नीतिकुशलानां पुरुषाणां मुखाच्छुश्रुम। वरो जनो विद्यादिभिः श्रेष्ठोऽपि पुरुषो नृषत्पापो, नृषु मनुष्येषु सीदतीति नृषत्। श्रेष्ठोऽपि बन्धुगृहेषु सर्वदावस्थितः, तैरवज्ञातः पापस्तुच्छो भवेत्। अतस्तव पितृगृहे वासो न युक्तः। न चारण्ये चरतो मम सहायो नास्तीति शङ्कनीयम्। इन्द्र एव, परमेवश्वर एव चरतस्तव सखा भविष्यति। तस्माच्चरैव सर्वथाऽरण्ये चरस्वेत्येवमुवाच। एवं बहुष्वपि पर्यायेषु द्रष्टव्यम्।

*तत्रेन्द्र-रोहितसंवादे प्रथमं पर्यायं दर्शयित्वा द्वितीयं पर्यायं दर्शयति–*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह द्वितीयं संवत्सरमरण्ये चचार। सोऽरण्याद् ग्राममेयाय तमिन्द्रः पुरुषरूपेण पर्येत्योवाच–**

**'पुष्पिण्यौ चरतो जङ्घे भूष्णुरात्मा फलग्रहिः।**
**शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः॥ १॥'**

**चरैवेति।'**

सा०–ब्राह्मणरूपस्येन्द्रस्य वाक्यं श्रुत्वा ब्राह्मणोऽयमरण्ये चरैवेत्येवं मामुक्तवानिति मनसि ब्राह्मणवाक्ये महान्तमादरं कृत्वा पुनरप्येकं संवत्सरमरण्ये चरित्वा पश्चात्पितरं द्रष्टुं ग्रामं तमागच्छन्तं पुनरपीन्द्रो ब्राह्मणरूपेणागत्यैवमुवाच। चरतः = पर्यटनं कुर्वतः पुरुषस्य, जङ्घे पुष्पिण्यौ भवतः। यथा पुष्पयुक्तो वृक्षः शाखा लता वाऽथवा सुगन्धोपेता सेव्या भवत्येवं चरतो जङ्घे श्रमजयेन सेव्ये भवतः। तथैवात्मा मध्यदेहो भूष्णुर्वर्धिष्णुः फलग्रहिरारोग्यरूपफलयुक्तो भवति। यथा–वर्धमानो वृक्षः कालेन फलानि गृह्णात्येवं चरतः पुरुषस्य बीजादिदीपनादिपाटवेन मध्यदेह आरोग्यरूपं फलं गृह्णाति। तथैवास्य चरतः पुरुषस्य सर्वे पाप्मानः सर्वपापानि प्रपथे प्रकृष्टे तीर्थक्षेत्रादिमार्गे श्रमेण तत्तद् देवतादिदर्शने तीर्थयात्रादिप्रयासेन हता विनाशिताः सन्तः शेरे शेरते, शयाना इव भवन्ति। यथा–शयानाः पुरुषाः स्वकार्यं कृषिवाणिज्यादिकं कर्त्तुमशक्ता एवं पुण्येन विनष्टाः पात्मानो नरकं दातुमसमर्था इत्यर्थः। तस्मात्सर्वथाऽरण्ये चर, न पितुर्गृहेऽवतिष्ठस्व।

*तृतीयं पर्यायं दर्शयति–*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह तृतीयं संवत्सरमरण्ये चचार। सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच–**



Scanned with CamScanner

NOTES

'आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।
शेते निपद्यमानस्य चराति चरतो भगः॥ ३॥'

**चरैवेति।'**

सा०—भगः = सौभाग्यमासीनस्य = उपविष्टस्य, आस्ते = तथैव तिष्ठति, न तु वर्धते। अभिवृद्धिहेतोरुद्योगस्याभावात्। तिष्ठतः = उपवेशनं परित्यज्योत्थापनं कुर्वतः पुरुषस्य, भगः = ऊर्ध्वोऽभिवृद्धेरुन्मुखस्तिष्ठति। कृषिवाणिज्याद्युद्योगस्य सम्भावितत्वात् निपद्यमानस्य। भूमौ शयानस्य भागः शेते = निद्रां करोति। विद्यमानधनरक्षादिचिन्ताया अप्यभावात् सर्वथैव विनश्यति। चरतस्तेषु तेषु देशेष्वर्जनार्थं पर्यटनं कुर्वतः पुरुषस्य भगः सौभाग्यं चरति = दिने दिने वर्धते। तस्मात्त्वं चरैवेति, न तु एकत्र तिष्ठ।

*चतुर्थं पर्यायं दर्शयति–*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह चतुर्थं संवत्सरमरण्ये चचार। सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच–**

**'कलिः शयानो भवति संजिहानस्तु द्वापरः।**
**उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन्॥ ४॥**

**चरैवेति।'**

सा०—चतस्त्रः पुरुषस्यावस्थाः। निद्रा, तत्परित्यागः, उत्थानं, सञ्चरणं चेति, ताश्चोत्तरश्रेष्ठत्वात्कलिद्वापरत्रेताकृतयुगैः समानाः। ततश्चरणस्य सर्वोत्तमत्वाच्चरैवेति।

*पञ्चमं पर्यायं दर्शयति–*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह पञ्चमं संवत्सरमरण्ये चचार सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच–**

**चरन्वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।**
**सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्॥ ४॥**

**चरैवेति'–**

सा०—चरन्नेव पुरुषः क्वचिद् वृक्षाग्रे मधु-माक्षिकं लभते। क्वचित्स्वादु मधुरमुदुम्बरादिफलविशेषं लभते। एतदुभयमुपलक्षणम्। तत्र तत्र विद्यमानं भोगविशेषं लभते। तत्र सूर्यो दृष्टान्तः। यः सूर्यः सर्वत्र चरन्नपि न तन्द्रयते = कदाचिदप्यलसो न भवति, तस्य सूर्यस्य श्रेमाणं श्रेष्ठत्वं जगद्वन्द्यत्वं पश्य। तस्माच्चरैव।



Scanned with CamScanner

NOTES

*इत्थमिन्द्रकृतेन रोहितोपदेशेन चरतो रोहितस्य स्वजीवने पितुरारोग्ये च कारणभूतं श्रेयोलाभं दर्शयति–*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह षष्ठं संवत्सरमरण्ये चचार। सोऽजीगर्त सौयवसिमृषिमशनया परीतमरण्य उपेयाय।**

*अथाजीगर्तरोहितयोः संवादं दर्शयति–*

**तस्य ह त्रयः पुत्रा आसुः–शुनःपुच्छः, शुनः शेपः, शुनोलाङ्गूल इति। तं होवाच–'ऋषेऽहं ते शतं ददाम्यहम्, एषामेकेनात्मानं निष्क्रीणा इति।' स ज्येष्ठं पुत्रं निगृह्णान उवाच 'न न्विममिति।' नो एवेममिति' 'इति कनिष्ठं माता। तौ ह मध्यमे संपादयांचक्रतुः शुनःशेपे। तस्य ह शतं दत्त्वा स तमादाय सोऽरण्याद् ग्राममेयाय।**

सा०–तस्याजीगर्तस्य शुनःपुच्छादिनामकास्त्रयः पुत्रा आसुः। पुत्रवन्तमृर्षि रोहित उवाच–हे ऋषे! ते तुभ्यमहं गवां शतं ददामि। (दत्त्वा चाहमेषां पुत्राणां मध्य एकेन केनचित्पुत्रेणात्मानं मद्देहं वरुणान्निष्क्रीणे मूल्यं दत्त्वाऽऽत्मानं मोचयामीति। एवमुक्तः सोऽजीगर्तो) ज्येष्ठं पुत्रं शुनःपुच्छनामकं हस्तेन निगृह्णानः स्वसमीपे समाकर्षन् रोहितं प्रत्येवमुवाच। तुभ्यमेकः पुत्रो दीयत, इमं तु शुनः पुच्छं तु न ददामि, मम प्रियत्वादिति। ततो माता कनिष्ठं हस्तेन गृहीत्वैवमुवाच–इमं शुनोलाङ्गूलं मम प्रियं नो एव सर्वथा न ददामीति। ततस्तावुभौ मातापितरौ मध्यमे पुत्रे शुनःशेपे दानं सम्पादयाश्चक्रतुरङ्गी-कृतवन्तौ। ततस्तस्याजीगर्तस्य स रोहितो गवां शतं दत्त्वां तं शुनः शेपमादायावस्थितः। ततः स रोहितस्तेन शुनःशेपेन सहारण्यात्स्वकीयं ग्रामं प्रत्याजगाम।

*तदागमनादूर्ध्वकालीनं (? कालिकं) वृत्तान्तं दर्शयति–*

**स पितरमेत्योवाच–'तत, हन्त, अहमनेनात्मानं निष्क्रीणा इति।' स वरुणं राजानमुपससार–'अनेन त्वा यजा इति'। 'तथेति' 'भूयान्वै ब्राह्मणः क्षत्रियादिति' वरुण उवाच। तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच। तमेतमभिषेचनीये पुरुषं पशुमालेभे॥ १५॥**

सा०–स रोहितः पितरमागत्यैवमुवाच–हे तत पितः, हन्त आवयोर्हर्षः सम्पन्नः। अहमनेन शुनःशेपरूपेण मूल्येन आत्मानं मद्देहं वरुणान्निष्क्रीणं मूल्यं दत्त्वात्मानं मोचयामीत्यर्थः। तथोक्ते स हरिश्चन्द्रो वरुणमुपेत्यानेन शुनःशेपेन ब्राह्मणेन त्वा त्वां यक्ष्यामीति उक्तवान्। स वरुणोऽपि 'तथेति' अङ्गीकृत्यैव-मुवाच–क्षत्रियात्त्व पुत्राद्रोहितादप्ययं ब्राह्मणो भूयानभ्यधिक एव, मम प्रिय इति। उक्त्वा तस्मै हरिश्चन्द्राय कर्तव्यत्वे राजसूयमुपदिदेश च। स हरिश्चन्द्रो



Scanned with CamScanner

राजसूयं प्रक्रम्य तस्य मध्ये योऽयमभिषेचनीयाख्यं एकाह:सोमयागस्तस्मिंस्तमेतं शून: शेपं पुरुषं पशुमालेभे। सवनीयपशुत्वेनालब्धुं निश्चितवान्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेयब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये तृतीय:
खण्ड: ॥३॥ (१५) (१३८)

# हरिश्चन्द्रोपाख्यानम्

## चतुर्थ: खण्ड:

*हरिश्चन्द्रस्य राजसूयानुष्ठानं दर्शयति–*

**तस्य ह विश्वामित्रो होताऽऽसीत्, जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मा, अयास्य उद्गाता। तस्मा उपाकृताय नियोक्तारं न विविदु: स होवा-चाजीगर्त्त: सौयवसि:–'मह्यमपरं शतं दत्त अहमेनं नियोक्ष्यामीति'। तस्मा अपरं शतं ददु:। तं निनियोज।**

सा०–विश्वामित्रादयो महर्षयस्तस्य हरिश्चन्द्रस्य यागे राजसूये होत्रादयश्चत्वारो महर्त्विज आसन्। तत्र जमदग्निरध्वर्यु: अभिषेचनीये सोमयागे तं शुन:शेपं सवनीयपशुत्वेन उपाकृतवान्। बहिर्युक्तया प्लक्षशाखया मन्त्रपुर:सरं समुपस्पृश्य स्वीकार उपाकरणम्। तत ऊर्ध्वे यूपबन्धनं नियोजनम्। तस्य क्रूरकर्मत्वाद-ध्वर्युनं नियोजने प्रवृत्त:। तत उपाकृतायास्मै उपाकरणेन संस्कृतस्य शौ (शु.) न:शेपस्य नियोक्तारं यूपे बन्धनकर्तारं क्रूरं कश्चिदपि पुरुषं न विविदु: न लोभिरे। तदानीं सूयवसस्य पुत्र: शुन: शेषस्य पिता सोऽजीगर्त्त (उवाच) मह्यं पूर्वस्माच्छतादपर गोशतं (हे यजमानर्त्विज:) दत्त। ततोऽहमेनं शुन: शेपं यूपे नियोक्ष्यामि रशनया कटयां शिरसि पादयोर्बद्ध्वा रशनाग्रस्य यूपे बन्धनं नियोजनं तदहं करिष्यामीति। तस्मा अजीगर्ताय अपरं गोशतं दहु:। तं च शुन: शेपं सोऽजीगर्तो निनियोज। धातोर्द्विर्भावं परित्यज्योपसर्गस्य द्विर्भावश्छान्दस:।

*अथ विशवनप्रवृत्तिं दर्शयति–*

**तस्मा उपाकृताय नियुक्तायाऽऽप्रीताय पर्यग्निकृताय विशसितारं न विविदु:। स होवा चाजीगर्त: सौयबसि:–'मह्यमपरं शतं दत्त, अहमेनं विशसिष्यामीति।' तस्मा अपरं शतं दद:। सोऽसि नि:शान एयाय।**



Scanned with CamScanner

NOTES

सा०—उपाकरणनियोजने पूर्वमुक्ते। आप्रीसंज्ञिताभिरेकादशभि: प्रयाजयाज्याभिर्यद्यजनं तदाप्रीणनम्। दर्भरूपेणोल्मुकेन त्रिःप्रदक्षिणीकरणं तत् पर्यग्निकरणम्। तथाविधसंस्कारचतुष्टययुक्ताय तस्मै तस्य शुनःशेपस्य विशसितारं हिंसितारं पुरुषं क्रूरात्मानं कञ्चिदपि पुरुषं न लेभिरे। ततोऽजीगर्तः पूर्ववदपरं गोशतं गृहीत्वा मारयितुमसि खड्गं निःशानो निशितं तीक्ष्णं कुर्वन्नेवेयाय जगाम।

*पितुरजीगर्तस्य (शुनः शेपस्य?) वृत्तान्तं दर्शयति—*

**अथ ह शुनःशेप ईक्षांचक्रे—'अमानुषमिव वै मा विशसिष्यन्ति। हन्ताहं देवता उपधावामीति।' स प्रजापतिमेव प्रथमं देवतानामुपससार—'कस्य नूनं कतमस्यामृतानाम्' इत्येतयर्चा।**

सा०—अथ पितुः पुत्रमारणोद्योगानन्तरं शुनःशेपः पुत्रो मनस्येवमीक्षांचक्रे विचारितवान्। अन्यत्र पर्यग्निकृतं पुरुषमारण्यांश्चोत्सृजन्ति। अहिंसाया इति श्रुतेः। पर्यग्निकरणदूर्ध्वं मनुष्यं परित्यजन्ति। एते तु माममानुषमिव मनुष्यव्यतिरिक्तमजादिपशुमिव विशसिष्यन्ति मारयिष्यन्ति। हन्त हा कष्ट-मेतत्सम्पन्नम्। अहमितः परं रक्षार्थं देवता उपाधावामि भजामीति विचार्य देवानां मध्ये प्रथमं मुख्यं प्रजापतिमेव कस्य नूनमित्यृचा उपससार सेवितवान्।

*तस्य प्रजापतेः सहकारित्वेनाग्नेः सेवां दर्शयति—*

**तं प्रजापतिरुवाच—'अग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति।' सोऽग्निमुपससार—अग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चा।**

सा०—तं सेवकं शुनः शेपं प्रजापतिरेवमुक्तवान्। अग्निः सर्वेषां देवानां नेदिष्ठो हविर्वहनेनातिसमीपवर्ती। अतस्तमेवोपास्स्वेत्युक्तः शुनःशेपोऽग्नेर्वयमित्मृ-चाऽग्निमुपासितवान्।

*तस्य चाग्नेः सहकारित्वेन सवितुरुपासनं दर्शयति—*

**समग्निरुवाच—'सविता वै प्रसवानामीशे, तमेवोपधावेति।' स सवितारमुपससार—'अभित्वा देव सवितः' इत्येतेन तृचेन।**

सा०—प्रसवानां सर्वेषु कार्येषु प्रेरणारूपाणामनुज्ञानात्सवितेशः स्वामी भवति। तस्मात्तमेवोपधावेति अग्निनोपदिष्टोऽभित्वेति तृचेन सवितारमुपा सितवान्।

*तस्य च सवितुः सहकारित्वेन वरुणस्योपासनं दर्शयति—*



Scanned with CamScanner

NOTES

**तं सवितोवाच–'वरुणाय व राज्ञे नियुक्तोऽसि, तमेवोपधावेति।' स वरुणं राजानमुपससारात उत्तराभिरेकत्रिंशता।**

सा०–हे शुनःशेप, वरुणार्थं त्वं यूपे बद्धोऽस्यतो वरुणमुपास्स्वेति सवित्रोक्तः पूर्वस्मात्सवितृविषयातृचादुत्तराभिरेकत्रिंशत्सङ्ख्याकाभिर्ऋग्भिर्वरुणमुपासितवान्। 'न हि ते क्षत्रम्।' (ऋ. सं. १. २४. ६) इत्याद्याः सूक्तशेषभूता दशर्चो, 'यच्चिद्धि ते विशः' (१. २५. १) इत्यादिकमेकविंशत्यृचं सूक्तमित्येवमेकत्रिंशत्सङ्ख्या दष्टव्या।

*तस्य च वरुणस्य सहकारित्वेन पुनरप्यग्नेरुपासनं दर्शयति–*

**तं वरुण उवाच–'अग्निर्वै देवानां मुखं सुहृदयतमः, तं नु स्तुह्यथ त्वोत्स्त्रक्ष्याम इति।' सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्या।**

सा०–अयमग्निः सर्वेषां देवानां मुखं मुखस्थानीयः। अग्निद्वारेणैव सर्वैर्देवैर्हविःस्वीकारात्। अत एव प्रीत्या हविर्वहनादतिशयेन सुहृदयः। सुहृदयतमं तमग्निं नु क्षिप्रं स्तुहीति वरुणेनोक्तः पूर्वोक्ताभ्य ऋग्भ्य उत्तराभिर्द्वाविंशतिसङ्ख्याकाभिर्ऋग्भिरग्निं तुष्टाव। 'वसिष्वाही' त्यादिकं (१. २६. १–१०) दशर्चं सूक्तम्। 'अश्वं नत्वा' (१. २७. १-१३) इत्यादिकं त्रयोदशर्चं सूक्तम्। तत्रान्त्यां पारित्यज्य शसिष्वसूक्तद्वयगता ऋचौ द्वाविंशतिसङ्ख्याकाः।

*अग्नेः सहकारित्वेन विश्वेषां देवानामुपासनं दर्शयति–*

**तमग्निरुवाच–'विश्वान्नु देवान्स्तुह्यथ त्वोत्स्त्रक्ष्याम' इति। स विश्वान्देवांस्तुष्टाव 'नमो महद्भ्यो नमो अर्भकेभ्य' इत्येतयर्चा।**

सा०–यद्यपि वरुणपाशेन बद्धत्वाद्वरुण एव शुनःशेपमुत्स्रष्टुं समर्थस्तथापि अग्न्यादीनां सहकारित्ववचनं दार्ढ्यार्थं द्रष्टव्यम्। विश्वेदेवा गणरूपा न भवन्ति, किन्तु सर्वे देवाः। तान्नमो महद्भ्य इत्येतया ऋचोपासितवान्।

*तेषां न विश्वेषां देवानां सहकारित्वेनेन्द्रस्योपासनं दर्शयति–*

**तं विश्वेदेवा ऊचुः 'इन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमः, तं नु स्तुह्यथ त्वोत्स्त्रक्ष्याम' इति। स इन्द्रं तुष्टाव 'यच्चिद्धि सत्य सोमपा' इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिः।'**

*सा०–ओजोबलादिशब्दाः पूर्वाचार्यैरेवं व्याख्याताः–*

**ओजो दीप्तिर्बलं दाक्ष्यं प्रसह्यकरणं सहः।**
**सुजनः सम्पारयिष्णुरुपक्रान्तसमाप्तिकृत्॥ इति॥**



Scanned with CamScanner

NOTES

इष्ठप्रत्ययतमप्प्रत्याभ्यां तत्र तत्रातिशय उच्यते। तादृशमिन्द्रं 'यच्चिद्धि सत्यं सोमपा' इत्यनेन सप्तर्चेन सूक्तेनोत्तरस्मिन्नपि 'आव इन्द्रम्' इत्यादिके द्वाविंशत्यृचे सूक्ते पञ्चदशभिर्ऋग्भिश्च तुष्टाव। पूर्वमप्यनुग्रहेण चरैवेत्येवमिन्द्रो रोहितं प्रत्युपदिदेश।

*तस्योपदेशस्य फलपर्यवसायित्वमनुस्मरतस्तस्येन्द्रस्य शुनःशेपस्तुतौ प्रीत्यतिशयं दर्शयति–*

**तस्मा इन्द्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ तमेतया प्रतीयाय 'शश्वदिन्द्र' इति।**

सा०–शुनःशेपेनेन्द्रः स्तूयमानः प्रीतो भूत्वा। तस्मै शुनः शेपाय सुवर्णमयं दिव्यं रथमारोहणार्थं स्वकीयेन मनसैव ददौ। शुनःशेपोऽपि तदीयमनुग्रहमवगत्य पूर्वोक्ताभ्यः पश्चदशभ्य उत्तरया 'शश्वदिन्द्र इत्येतयर्चा तं रथं प्रतीयाय मनसैव प्रतिजगाम।'

*इन्द्रस्य सहकारित्वेनाश्विनोरुपासानं दर्शयति–*

**तमिन्द्र उवाच–अश्विनौ नु स्तुह्यथ त्वात्त्रक्ष्याम इति। सोऽश्विनौ तुष्टावात उत्तरेण तृचेन।**

सा०–पूर्वोक्तायाः 'शश्वदिन्द्र' इत्यस्या उत्तरेण 'अश्विनावश्वावत्या' (१. ३०. १७) इति तृचेनाश्विनो स्तुतवान्।

*अश्विनोः सहकारित्वेनोषसः उपास्ति दर्शयति–*

**तमश्विना ऊचतुः–'उषसं नु स्तुह्यथ त्वोत्त्रक्ष्याम इति।' स उषसं तुष्टावात उत्तरेण तृचेन।**

सा०–'कस्त उष' (१. ३०. २०) इत्यादिक उत्तरस्तृचः।

*अथोक्तानां सर्वासां देवतानामनुग्रहेण शुनःशेपस्य बन्धमोक्ष हरिश्चन्द्रस्यारोग्यं च दर्शयति–*

**तस्य ह स्मर्च्यृच्युक्तायां (स्म ऋषि उक्तायां) वि पाशो मुमुचे, कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्यामेव ऋच्युक्तायां विपाशो मुमुचेऽगद ऐक्ष्वाक आस॥ १६॥**

सा०–तस्य पूर्वोक्तस्य तृचस्त सम्बन्धिन्यामृचि ऋषि एकैकस्यामृच्युक्तायां क्रमेण शुनःशेपस्य पाशो विमुमुचे = विशेषेण मुक्तोऽभूत्। ऐक्ष्वाकस्य हरिश्चन्द्रस्य यन्महोदरं तदपि क्रमेण कनीयोऽत्यल्पं भवति। उत्तमस्यामृच्युक्तायां।



Scanned with CamScanner

NOTES

पाशो विमुमुच एव सर्वात्मना मुक्तोऽभूत्। ऐक्ष्वाकोऽप्यगदो विशेषेण रोगरहित आस।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेयब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये चतुर्थः
खण्डः ॥४॥ (१६) (१३९)

# हरिश्चन्द्रोपाख्यानम्

## पञ्चमः खण्डः

*बन्धनान्मुक्तभ्य शुनःशेपस्योत्तरकालीनं वृत्तान्तं दर्शयति–*

**तमृत्विज ऊचुः–'त्वमेव नोऽस्याह्नः संस्थामधिगच्छे'ति। अथ हैतं शुनःशेपोऽञ्जः सवं ददर्श। तमेताभिश्चतसृभिरभिसुषाव–'यच्चिद्धि त्वं गृहे गृहे' इति। अथैनं द्रोणकलशमभ्यवनिनाय–'उच्छिष्टं चम्बोर्भर' इत्येतया ऋचा। अथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः स स्वाहाकाराभिः जुहवाञ्चकार। अथैनमवभृथमभ्यवनिनाय–'त्वं नो अग्ने वरुणस्य विद्वान्' इत्येताभ्याम्। अथैनमत ऊर्ध्वमग्निमाहवनीयमुपस्थापयाञ्चकार–'शुनश्चिच्छेपं निदितं सहस्रात्' इति।**

सा०–देवतानुग्रहयुक्तं तं शुनःशेपं विश्वामित्रादयः सर्वं ऋत्विज एवमूचुः, हे शुनःशेप! त्वमेव नोऽस्माकमस्याह्नोऽभिषेचनीयाख्यस्य संस्थां समाप्तिमधिगच्छ = प्राप्नुहि। अनुष्ठापयेत्यर्थः। तैरेवमुक्ते सत्यनन्तरं शुनःशेप एतमभिषेचनीयाख्यं सोमयागमञ्जःसवं ददर्श। अञ्जसर्जुमार्गेण सवः सोमाभिषवो यस्मिन्यागे सोऽञ्चःसवस्तादृशं प्रयोगकारं निश्चितवान्। निश्चित्य च तं सोमं यच्चिद्धीत्यादिभिश्चतसृभिर्ऋग्भिरभिषुतं कृतवान्। अथैनमभिषुतं सोममेतयोच्छिष्टं चम्वोरित्यृचा द्रोणकलशमभिलक्ष्यावनिनाय द्रोणकलशे प्रक्षिप्तवान्।

अथानन्तरमस्मिन्हरिश्चन्द्रेऽन्वारब्धे शुनः शेपदेहमुपस्पृष्टवति सत्युक्ताभ्य ऋग्भ्यः पूर्वाभिर्यत्र ग्रावेत्यादिभिश्चतसृभिऋग्भिः स्वाहाकारसहिताभिः सोमं जुहवाञ्चकार। यत्र ग्रावेत्यादिकं सूक्तं नवर्च तत्र यच्चिद्धीति पञ्चमी तागारभ्य चतसृभिर्ऋग्भिरभिषवः। उच्छिष्टमित्यादिका नवमी तथा द्रोणकलशे प्रक्षेपः। यत्र ग्रावेत्यादिभिश्चतसृभिर्होम इत्येवं कृत्स्नस्य सूक्तस्य विनियोगः।



Scanned with CamScanner

NOTES

अथ होमानन्तरमेव कर्तव्यमवभृथमभिलक्ष्यावनिनाय सर्वमवभृथसाधनं तद्देशे नीत्वा त्वं नो अग्न इत्यादिकाभ्यामृग्भ्यामवभृथयागं कृतवान्। अथ तथा कृत्वा तत ऊर्ध्वमेनमाहवनीयमग्नि शुनश्चिदित्यादिनोपस्थापयाञ्चकार हरिश्चन्द्रमुपस्थाने प्रेरयामास। सोऽयमञ्जःसवः। इष्टिपशुसाङ्कर्यमन्तरेणाञ्जसर्जुमार्गेणानुष्ठितत्वात्।

*विश्वामित्राजीगर्तयोः कञ्चित्संवादं दर्शयति–*

**अथ ह शुनःशेपो विश्वामित्रस्याङ्कमाससाद। स होवाचाजीगर्त्तः सौयवसिः–'ऋषे, पुनर्मे पुत्रं देही'ति। 'नेति' होवाच विश्वामित्रो, 'देवा वा इमं मह्यमरासते'ति। स ह देवरातो वैश्वामित्र आस। तस्यते कापिलेयबाभ्रवाः।**

सा०–अथाभिषेचनीयसमाप्तेरनन्तरं हरिश्चन्द्रसहितेष्वृत्विक्षु विस्मितेषु स शुनःशेप इत ऊर्ध्वं कस्य पुत्रोऽस्त्विति विचारे सति, तदीयेच्छैव नियामिकेति महर्षीणां वचनं श्रुत्वा शुनःशेपः स्वेच्छया विश्वामित्रपुत्रत्वमङ्गीकृत्य सहसा तदीयमङ्कमाससाद। पुत्रो हि सर्वत्र पितुरङ्के निषीदति। तदानीं सूयवसपुत्रोऽजीगर्त्तो विश्वामित्रं प्रत्येवमुवाच। हे महर्षे, मदीयपुत्रमेनं पुनरपि मह्यं देहीति। स विश्वामित्रो नेति निराकृत्यैवमुवाच–प्रजापत्यादयो देवो एवेमं शुनःशेपं महयमरासत = दत्तवन्तः, तस्मात्तुभ्यं न दास्यामीति। स च शुनःशेपो देवैः दत्तत्वाद् देवरात इति नामधारी विश्वामित्रपुत्र एवास। तस्य च देवरातस्यैते कपिलगोत्रोत्पन्ना बभ्रुगोत्रोत्पन्नाश्च बन्धवोऽभवन्।

*अथ शुनःशेपाजीगर्तयोः संवादं दर्शयति–*

**स होवाचाजीगर्तः सौयवसिः–'त्वं वेहि, विह्वयावहा' इति। स होवाच अजीगर्तः सौयवसिः–**

> **'आङ्गिरसो जन्मनास्याजीगर्तिः श्रुतः कविः।**
> **ऋषे पैतामहात्तन्तोर्मापगाः पुनरेहि माम्'॥ १॥ इति।**

*स होवाच शुनः शेपः–*

> **'आदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत।**
> **गवां त्रीणि शतानि त्वमवृणीथा मदङ्गिरः'॥२॥ इति।**

सा०–विश्वामित्रेण निराकृतः सोऽजीगर्तः शुनःशेपं प्रत्येवमुवाच। हे पुत्र त्वं वा त्वमेव विश्वामित्रादपगतः सन्निह्यस्मद्गृहे गच्छ। त्वदीयमाता चाहं चोभावावां विह्वयावहै = विशेषेण तवाऽऽह्वानं करवावहै। इत्युक्त्वा तूष्णीमवस्थितं तं शुनःशेपं प्रति पुनरपि कयाचिद् गाथयैवमुवाच। हे शुनःशेप, त्वं

NOTES

जन्मनाऽऽङ्गिरसोऽङ्गिरोगोत्रोत्पन्न आजीगर्तिरजीगर्तस्य पुत्रः कविर्विद्वाञ्श्रुत। इत्येवं सर्वत्र प्रसिद्ध। अतो हे महर्षे शुनःशेप, पैतामहात्पितामहेन प्रजापतिना सम्पादितात्तन्तो सन्तानादङ्गिरोवंशान्माऽपगा = अपगतो मा भव। तस्मात्पुनरपि मामेहि मद्‌गृहे समागच्छेत्युक्तः शुनः शेपः स्वयमपि गाथया प्रत्युत्तरं ददौ। शासो विशसनहेतुः खड्‌गः। हेऽजीगर्त, मद्‌वधाय शासहस्तं खड्‌गहस्तं त्वां सर्वेऽप्यदशुर्दृष्टवन्तः। यत्क्रूरं कर्म शूद्रेष्वत्यन्तनीचेष्वपि नालप्सत न लब्धवन्तो लौकिका जनास्तादृशं क्रौर्यं त्वया कृतम्। हेऽङ्गिरः। आङ्गिरस गोत्रोत्पन्नाजीगर्त, मन्मां निमित्तीकृत्य त्वं गवां शतानि त्रीण्यवृणीथा वृतवानसि। तदिदमत्यन्तकष्टमित्युक्तवान्।

*पुनरप्यजीगर्तशुनःशेपयोरुक्तिप्रत्युक्ती दर्शयति–*

**स होवाचाजीगर्तः सौयवसिः–**

**'तद्वै मा तात तपति पापं कर्म मया कृतम्।**
**तदहं निह्नवे तुभ्यं प्रतियन्तु शता गवाम्।'॥ ३॥ इति।**

**स होवाच शुनःशेपः–**

**'यः सकृत्पापकं कुर्यात्कुर्यादेनत्ततोऽपरम्।**
**नापागाः शौद्रान्न्यायादसंधेयं त्वया कृतम्'॥४॥ इति।**

सा०–शुनःशेपेनोपालब्धोऽजीगर्तः स्वकीयमनुतापं दर्शयितुं काञ्चिद् गाथामेवमुवाच–हे तात, पितृवदुपलालनीया शुनःशेप, मया यत्पापं कृतं तद्वै मा तपति = तदेव मां मनसि सन्तप्तं करोति, अहं तत्पापं निह्नवे = परिहरामि। गवां शतानि पूर्वं मया गृहीतानि त्रीणि यानि, तानि तुभ्यं त्वदर्थं प्रतियन्तु = प्रत्येकमेव प्राप्नुवन्तु। इतरयोः पुत्रयोर्गावो मा भूवँस्तवैव सर्वाः सन्त्विति। ततः स शुनःशेपो गाथया प्रत्युत्तरं ददौ। यः पुमान्धर्मशास्त्रभीतिरहितः सकृत्पापकं कुर्यात्स पुमांस्ततः पापादन्यदेनत्पापं तदभ्यासवशात्कुर्यादेव। त्वं तु शौद्रान्न्यायान्नीचजातिसम्बन्धिनः क्रूरादाचरणान्नापागाः = अपगतो न भवसि। असन्धेयं = प्रतिसन्धानरहितं पापं त्वया कृतमित्येषा शुनःशेपस्य प्रत्युक्तिः।

*अथ विश्वामित्रकृत्यं दर्शयति–*

**'असंधेयमिति' ह विश्वामित्र उपपपाद। स होवाच विश्वामित्रः–**

**'भीम एव सौयवसिः शासेन विशिशासिषुः।**
**अस्थान्मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रताम्'॥ ५॥ इति।**

सा०–असन्धेयमप्रतिसमाधेयं पापमिति शुनःशेपेन यदीरितं तदेतदप्रति

NOTES

समाघेयत्वं विश्वामित्र उपपपाद = युक्तिभिरुपपादितवान्। तदुपपादनार्थमेव विश्वामित्र इमां गाथामुवाच–सूयवसस्य पुत्रोऽजीगर्तो भीम एव भयहेतुरेव सञ्शासेन हस्तगतखड्गेन स विशिशासिषुरस्थात् = विशसनकर्तुमिच्छुरवस्थितवान्। अतो हे शुन:शेप! एतस्य पापिष्ठस्य पुत्रो मा भू: किन्तु ममैव पुत्र तामुपेहि।

*अथ शुन:शेपविश्वामित्रयोरुक्तिप्रत्युक्ती दर्शयति–*

**स होवाच शुनः शेपः–**

**'स वै यथा नो ज्ञपया राजपुत्र तथा वद।**
**यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम्'॥ ६॥ इति।**

**स होवाच विश्वामित्रः–**

**'ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्रजा स्यात्।**
**उपेया दैवं मे दायं तेन वै त्वोपमन्त्रय'॥ ७॥ इति।**

सा०–विश्वामित्रेणैवं बोधितः शुन:शेपः पुनरपि गाथया विश्वामित्रं प्रत्येकमुवाच–अयं विश्वामित्रो जन्मना क्षत्यित्रयः सन्स्वकीयेन तपोमहिम्ना ब्राह्मण्यं प्राप्तवान्, इत्येवं तद्वृत्तान्तं सूचयितु हे राजपुत्रेति सम्बोधितवान्। स वै तथाविधो राजजातीय एव सन् यथा येन प्रकारेण नरोऽस्माभिः सर्वेरा = समन्ताज्ज्ञपय ब्राह्मणत्वेन ज्ञायसे, तथैवास्मद्विषयेऽपि त्वं वद। कथं वदितव्यमिति तदुच्यते। अहमिदानीमङ्गिरोगोत्रः संस्तत्परित्यागेन तव पुत्रत्वं येनेव प्रकारेणोपेयां तथैवानुगृहाणेति शेषः। एतद्वाक्याभिप्रायः पूर्वैः सङ्क्षिप्य दर्शितः–

**पुरात्मानं नृपं विप्र (प्रं) तपसा कृतवानसि।**
**एवमाङ्गिरसं मा त्वं वैश्वामित्रमृषे कुरु॥ इति॥**

ततो विश्वामित्रो गाथया प्रत्युत्तरमुक्तवान्। हे शुन:शेप, त्वं मे पुत्राणां मध्ये ज्येष्ठः स्याः = ज्येष्ठो भव। तव पुत्रादिरूपा प्रजापीतरस्याः श्रेष्ठा स्यात्। मे मह्यं विश्वामित्राय, दैवंदेवैः प्रसन्नैर्दत्तं दायं पुत्रत्वरूपं लाभमुपेयाः प्राप्नुहि। तेन वै = तेनैव प्रकारेण त्वोपमन्त्रये त्वां पुत्रत्वेन व्यवहरामि।

*पुनरपि शुन:शेपविश्वामित्रयोर्वृत्तान्तं दर्शयति–*

**स होवाच शुनः शेपः–**

**'संज्ञानानेषु वै ब्रूयात्सौहार्द्याय मे श्रिये।**
**यथाहं भरतऋषभोपेयां तव पुत्रताम्'॥ ८॥ इति।**

**अथ ह विश्वामित्रः पुत्रानामन्त्रयामास–**



Scanned with CamScanner

NOTES

**'मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः।**
**ये के च भ्रातरः स्थ नास्मै ज्यैष्ठ्याय कल्पध्वम्'॥ ९॥ इति।**

सा०–विश्वामित्रेण प्रलोभितः शुनःशेप स्वकार्यदार्ढ्यार्थं गाथयेवमुवाच। संज्ञानानेषु = मद्विषयैकमत्यं प्राप्तेषु त्वदीयपुत्रेषु (स) र्वोऽपि मां ब्रूयात्, ज्येष्ठ भातृत्वेन व्यवहरतु। तच्च मे मम सौहार्द्याय भ्रातृभिरितरै स्नेहातिशयाय श्रियै धनलाभाय च सम्पद्यते। हे भरतऋषभ, भरवंशश्रेष्ठ, विश्वामित्र! अहं तव पुत्रतां यथोपेयां तथैवैतेषां पुत्राणामग्रेऽनुगृहाणेति शेषः। ततो विश्वामित्र इतरान् पुत्रान् आहूय गाथयैवमाज्ञापितवान्। यो मधुच्छन्दा नाम यश्चर्षभो योऽपि रेणुर्योऽपि अष्टक एते मुख्या हे पुत्रकाः शृणोतन मदीयामाज्ञां शृणुत। केचिद्यूयं सर्वे भ्रातरः स्थ ते सर्वेऽपि अस्मै शुनःशेपादस्मादपि ज्यैष्ठ्याय न कल्पध्वं = ज्येष्ठत्वाभिमानं मा कुरुत। किन्त्वसावेव युष्माकं मध्ये ज्यैष्ठो भूत्वाऽवतिष्ठतामिति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेय ब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये पञ्चमः
खण्डः ॥५॥ (१६) (१४०)।

# हरिश्चन्द्रोपाख्यानम्

## षष्ठः खण्डः

*अथ विश्वामित्रपुत्राणां वृत्तान्तमाह–*

**तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः। पञ्चाशदेव ज्यायांसो मधुच्छन्दसः, पञ्चाशत्कनीयांसः।**

सा०– मधुच्छन्दोनामकः कश्चित्पुत्रो मध्यमस्ततोऽपि ज्येष्ठाः कनिष्ठाश्च प्रत्येकं पञ्चाशत्सङ्ख्याका इत्येवमेकशतं तस्य पुत्राः।

*तेषां मध्ये ज्येष्ठानां वृत्तान्तमाह–*

**तद्ये ज्यायांसो, न ते कुशलं मेनिरे।ताननु व्याजहार–'अन्तान्वः प्रज्ञा भक्षीष्टे'ति। त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या बहवः। वैश्वामित्रा दस्यूनां भूयिष्ठाः।**

सा०–तत्तेष्वेकशतसङ्ख्याकेषु पुत्रेषु मध्ये ये मधुच्छन्दसो ज्येष्ठाः



Scanned with CamScanner

पञ्चाशत्सङ्ख्याकाः सन्ति, शुनःशेपस्य विश्वामित्रपुत्रत्वं कुशलं न मेनिरे = इदं समीचीनमित्येवं नाङ्गीकृतवन्तः। ताञ्ज्यैष्ठान् पञ्चाशत्सङ्ख्याकाननुलक्ष्य विश्वामित्रो व्याजहार = व्याहरणं शापरूपं वाक्यमुक्तवान्–हे ज्येष्ठपुत्राः, युष्माकं मदीयाज्ञातिलङ्घिनां प्रजाः पुत्रादिका अन्तान्भक्षीष्ट = चाण्डालादिरूपान्नीचजाति विशेषान्भजतामिति। त एते शप्ताः सन्तोऽन्ध्रत्वादिपञ्चविधनीचजातिविशेषा भवन्ति। इतिशब्दस्य तत्प्रदर्शनार्थत्वादन्येऽपि नीचजातिविशेषाः सर्वे विदक्षिताः। उद्गतोऽन्त उदन्तोऽत्यन्तनीचजातिस्तत्र भवा उदन्त्याः। ते बहवोऽनेकविधा वैश्वामित्राः– विश्वामित्रसंततिजाः, दस्यूनां तस्कराणां मध्ये भूयिष्ठाः अत्यधिकाः।

*ज्येष्ठानां वृत्तान्तमुक्त्वा मधुच्छन्दसः तत्कनिष्ठानां च वृत्तान्तं गाथया दर्शयति–*

**स होवाच मधुच्छन्दाः पञ्चाशता सार्धम्–**

**'यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम्।**
**पुरस्त्वा सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसि'।। १।। इति।**

सा०–कनिष्ठपुत्राणां पञ्चाशता सह मधुच्छन्दोनामकः स मध्यमः पुत्रः शुनःशेपं प्रत्येवमुवाच–हे शुनःशेप! नोऽस्माकं पिता विश्वामित्रो यत्कार्यं त्वदीयज्येष्ठपुत्रत्वरूपं सञ्जानीते = सम्यग्जानाति, अङ्गीकरोति; तस्मिन्कार्ये वयं तिष्ठामहे–तत्कार्यमङ्गीकुर्मः। सर्वे वयं त्वा शुनःशेपनामानं त्वां पुरस्कुर्महे पुरस्कृत्य ज्येष्ठं कृत्वा वर्तामहे त्वामन्वञ्चः शुनःशेपमनुगच्छन्तः स्मसि भवाम इत्युक्तवान्।

*विश्वामित्रवृत्तान्तं दर्शयति–*

**अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव।**

सा०–अथ मधुच्छन्दःसहितानां पञ्चाशत्कनिष्ठपुत्राणां शुनःशेपविषय ज्येष्ठपुत्रत्वाङ्गीकारानन्तरं स विश्वामित्रः प्रतीतस्तेषु प्रत्ययं मदनुकूला इति विश्वासं प्राप्तः प्रीत्या पुत्रान् गाथाभिस्तुष्टाव।

*तत्र प्रथमा गाथामाह–*

**ते वै पुत्राः पशुमन्तो वीरवन्तो भविष्यथ।**
**ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मा।। २।।**

सा०–हे मधुच्छन्दः प्रमुखाः कनिष्ठपुत्राः, ये यूयं मे मानं मदीयं मतमनुगृह्णन्त आनुकूल्येन स्वीकुर्वन्तो मां विश्वामित्रं वीरवन्तं स्वधर्मशूरपुत्रयुक्तम–

NOTES



Scanned with CamScanner

NOTES

कर्तकृतवन्तस्ते वै तादृशा यूयं बहुविधपुत्रयुक्ता बहुविधानुकूलपुत्रयुक्ताश्च भविष्यथ।

*द्वितीयां गाथामाह–*

**पुर एत्रा वीरवन्तो देवरातेन गाथिनाः।**
**सर्वे राध्याः स्थ पुत्रा एष वः सद्विवाचनम्।। ३।।**

सा०–गाथिनशब्दो विश्वामित्रस्य पितरमाचष्टे। हे गाथिना, गाथिपौत्राः, पुरः एत्रा = युष्माकं पुरतो गन्त्रा, मुख्येन देवरातेन सह यूयं सर्वे वीरवन्तः श्रेष्ठ पुत्रयुक्ता राध्याः स्थ सर्वैः पुरुषैराराधनीयाः पूज्या भवथ। हे पुत्राः, मधुच्छन्दःप्रभृतयः, एष देवरातो वो युष्माकं सद्विवाचनं सन्मार्गस्य विशेषतोऽध्यापनं करिष्यतीति शेषः।

*तृतीयां गाथामह–*

**एष वः कुशिका वीरो देवरातस्तमन्वित।**
**युष्मांश्च दायं म उपेता विद्यां यामु च विद्मसि।। ४।।**

सा०–हे कुशिकाः = कुशिकनाम्नो मत्पितामहस्य सम्बन्धिनो मधुच्छन्दःप्रभृतयः! एष देवरातो वो युष्माकं ज्येष्ठभ्रातेति शेषः। तं देवरातं यूयमन्वितानुगता भवत। मे मदीयं दायं धनं युष्मांश्चोपेता = प्राप्स्यति। चकराद् देवरातं च। यामु च यामपि कञ्चिद्वेदशास्त्रादिरूपां विद्यां विद्मसि = वयं जानीमः, सापि युष्मानुपेता प्राप्स्यति।

*चतुर्थीं गाथामाह–*

**हे सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः।**
**देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः।। ५।।**

सा०–हे वैश्वामित्राः = विश्वामित्रस्य मम पुत्राः, ये गाथिनाः = गाथिपौत्रास्ते यूयं सर्वेऽपि सम्यञ्चः = समीचीनबुद्धयो ये साकं देवरातेन सार्धं सरातयो = रातिर्धनसम्पत्तिः तथा युक्ताः सन्तो, देवराताय = मदीयश्रेष्ठपुत्रस्य देवरातस्य, धृत्यै = धारणं युष्मत्पोषणं, श्रैष्ठ्याय = युष्माकं मध्ये श्रेष्ठत्वं च तस्थिरेऽङ्गीकृतवन्तः।

*पञ्चमीं गाथामाह–*

**अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः।**
**जह्नूनां चाधिपत्ये दैवे वेदे च गाथिनाम्।। ६।।**



Scanned with CamScanner

NOTES

सा०—'इक् स्मरणे' इति धातुः। अधीयत स्मृतिकारैर्महर्षिभिः स्मर्यते। कथमिति तदुच्यते। अयं देवरातो द्व्यामुष्यायणत्वादुभयोरजीगर्तविश्वामित्रयोः सम्बन्धिनी ये रिक्थे धने, तयोर्ऋषिर्द्रष्टा। तदुभयमर्हतीत्यर्थः। अजीगर्तस्य कूटस्थ ऋषिर्जह्नुसंज्ञकस्य वंशे जाताः सर्वे जह्नवस्तेषां चाधिपत्ये स्वामित्वे देवरातो योग्यः। तथा दैवे = देवसम्बन्धिनी यागादिकर्मणि वेदे च मन्त्ररूपे समर्थः। गाथिनामस्मत्पितृवंशोत्पन्नानां च सर्वेषामाधिपत्ये योग्यः।

*उक्तमुपाख्यानमुपसंहरति—*

**तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानम्।**

सा०—'कस्य नूनं', 'निधारय' इत्यन्ताः सप्ताधिकनवतिसङ्ख्याका ऋचः। 'त्वं नः स त्वम्' इत्यादिकास्तिस्रः ऋच एवमृचां शतम्। परःशब्दोऽधिकवाची। पूर्वोक्तादृक्शतात् परोऽधिका एकत्रिंशत्सङ्ख्याका 'यं न्वियम्' इत्याद्या गाथा यस्मिन्नाख्याने तदेतत्परऋक्शतगाथम्। शुनःशेपेन दृष्टाः सप्ताधिकनवति–(९७) सङ्ख्यायुक्ता ऋचो याः सन्त्यन्येन दृष्टास्तिस्र ऋचो या सन्ति ब्राह्मणे प्रोक्ता एकत्रिंशद्गाथाविशेषा ये सन्ति, तैः सर्वैरुपेतं 'हरिचन्द्रोहि वैधस' इत्यादिकं सर्व शुनःशेपविषयमाख्यानम्।

*तस्याख्यानस्य राजसूयक्रतौ विनियोगं दर्शयति—*

**तद्धोता राज्ञेऽभिषिक्ताय आचष्टे।**

सा०—राजसूयक्रतावभिषेचनीयाख्ये कर्मणि यदा राजाभिषिक्तो भवति तदानीं तस्मै राज्ञे तदाख्यानं होता कथयेत्।

*तत्रेतिकर्तव्यं (Procedure) दर्शयति—*

**हिरण्यकशिपावासीन आचष्टे। हिरण्यकशिपावासीनः प्रतिगृणाति। यशो वै हिरण्यं, यशसैवैनं तत्समर्धयति।**

सा०—होता यदोपाख्यानं कथयति, तदानीं हिरण्यकशिपौ सुवर्णनिर्मित-सूत्रैर्निष्पादिते कशिपौ स होतोपविशेत्। तदाख्यानमध्येऽध्वर्युश्च हिरण्यकशिपा-वासीनो वक्ष्यमाणं प्रतिसरं ब्रूयात्। हिरण्यस्य यशोहेतुत्वाद् यमस्त्वम्। तथा सत्येन राजानं यशसैव समृद्धं करोति।

*अध्वर्युणा प्रयोक्तव्यं प्रतिगरविशेषं दर्शयति—*

**'ओम्' इत्यृचः प्रतिगरः, एवं तथा इति गाथायाः। ओमिति वै दैवं, तथेति मानुषम्। दैवेन चैवैनं तन्मानषेण च पापादेनसः प्रमुञ्चति।**



Scanned with CamScanner

सा०—होत्रा प्रयुक्ताया एकैकस्या ऋचोऽन्तेध्वर्योरोमित्येतादृशः प्रतिगरो भवति। ...............। ओमित्येतच्छन्दोरूपं दैवं देवैरङ्गीकारार्थे प्रयुज्यते। तत्तथेत्यन्तं (तथेति) मानुषं, मनुष्या अङ्गीकारे तथेति शब्दं प्रयुञ्जते। तत्तेन प्रतिगरेण दैवेन मानुषेण चाध्वर्युरेनं राजानं पापाद् दैहिकादपकीर्तिरूपादेनसो नरकहेतोश्च प्रमुञ्चति = प्रयुक्तं करोति।

*क्रत्वर्थत्वेनोपाख्यानं विधाय क्रतुनिरपेक्षपुरुषार्थत्वेन विधत्ते–*

**तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेत एवैतच्छौनः शेपमाख्यानं, न हास्मिन्नल्पं च नैनः परिशिष्यते।**

सा०—यस्मादुपाख्यानं पापप्रशमनहेतुः तस्मादयजमानोऽपि राजसूयक्रतुरहितोऽपि राजा विजिती यदि विजयोपेतः स्यात्तदानीमेतच्छौनः शेपमाख्यानमाख्यापयेत। तस्य राज्ञोः यः कश्चिद् ब्राह्मण उपाख्यानं ब्रूयात्। तथा सति तस्मिन्राजनि अल्पं च न किञ्चिदप्येनः पापं न ह वै परिशिष्यते। सर्व पापं नश्यततीत्यर्थः।

*आख्यानप्रयुक्तां दक्षिणां विधत्ते–*

**सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्रे। एते चैवासने। श्वेतश्चाश्वतरीरथो होतुः।**

सा०—योऽयमाख्याता होता, तस्मै क्रत्वर्थदक्षिणामन्तरेण (besides) उपाख्यानप्रयुक्तां दक्षिणां गोसहस्ररूपां दद्यात्। प्रतिगरित्रेऽध्वर्यवे गोशतं दद्यात्। ये हिरण्यकशिपुरूपे द्वे आसने स्तः, एते अपि ताभ्यामेव दद्यात्। अश्वतरीभ्यां सङ्कीर्णज्ञातियुक्ताभ्यामधिकशक्तिभ्यां युक्तो रथोऽश्वतरीरथः। स च रजतेनालङ्कृतत्वाच्छ्वेतः सोऽपि तादृशो होतुर्देयः।

*पूर्वमेवयज्ञसंयुक्तः कल्पो विजयिनो राज्ञाऽभिहितः। इदानीं पुत्रकामानामपि (सर्वेषामपि?) विधत्ते–*

**पुत्रकामा हाप्याख्यापयेरँल्लभन्ते ह पुत्राँल्लभन्ते ह पुत्रान्॥ १८॥**

सा०—ये पुत्रकामाः सन्ति, ते ह प्रसिद्धमेतदुपाख्यानमाख्यापयेरन्ब्राह्मणमुखात् शृणुयुरित्यर्थः। ते पुत्रांल्लभन्ते। अभ्यासोऽध्यायसमाप्त्यर्थः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेयब्रह्मणभाष्ये त्रयस्त्रिंशाध्याये षष्ठः
खण्डः॥ ६॥ (१८) (१४१)

❑❑❑



Scanned with CamScanner

# UNIT–IV

# इकाई–चतुर्थ
# ईशावास्योपनिषद्

## शान्तिपाठ

**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्तिः शान्तिः शान्तिः।।**

**शाङ्करभाष्य**–पूर्णमदः पूर्णम् न कुतश्चिद् व्यावृत्तं व्यापीत्येतत्। निष्ठा च कर्तरि द्रष्टव्या। अदः इति परोक्षाभिधायि सर्वनाम, तत् परं ब्रह्मेत्यर्थः। तत् सम्पूर्णम् आकाशवद् व्यापि निरन्तरं निरुपाधिकं च। तदेव इदं सोपाधिकं नामरूपस्थं व्यवहारापन्नं पूर्णम् स्वेन रूपेण परमात्मना व्याप्येव, न उपाधिपरिच्छिन्नेन विशेषात्मना। तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात् कारणात्मनः उदच्यते उद्रिच्यते उद्गच्छतीत्येतत्। यद्यपि कार्यात्मना उद्रिच्यते तथापि यत् स्वरूपं पूर्णत्वं परमात्मभावः, तन्न जहाति, पूर्णमेवोद्रिच्यते। पूर्णस्य कार्यात्मनो ब्रह्मणः पूर्णम् पूर्णत्वम् आदाय गृहीत्वा आत्मस्वरूपैकरसत्वमापाद्य, विद्ययाऽविद्याकृतं भूतमात्रोपाधिसंसर्गजमन्यत्वावभासं तिरस्कृत्य पूर्णमेव अनन्तरमबाह्यं प्रज्ञानधनैकरसस्वभावं केवलं ब्रह्म अवशिष्यते।।

ईशा वास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्ताः; तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वा-शरीरत्वसर्वंगतत्वादि वक्ष्यमाणम्। तच्च कर्मणा विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः।

न ह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्। सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैव उपक्षयात्, गीतानां मोक्षधर्माणां चैवंपरत्वात्। तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि



Scanned with CamScanner

NOTES

चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि। यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनादृष्टेन स्वर्गादिना च द्विजातिरहं न काणत्वकुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति। तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेन आत्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादि-विज्ञानमुत्पादयन्ति। इत्येवमुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनान् मन्त्रान्संक्षेपतो व्याख्यास्यामः।

**ॐ ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथामागृधः कस्य स्विद्धनम्॥ १॥**

**शाङ्करभाष्य**–ईशा वास्यमित्यादि। ईशा ईष्ट ईतीट् तेनेशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन्प्रत्यगात्मतया, तेन स्वेन रूपेणात्मनेशा वास्यमाच्छादनीयम्। किम्? इदं सर्वं यत्किञ्च यत्किञ्चिज्जगत्यां पृथिव्यां जगत्तत्सर्वं स्वेनात्मना ईशेन प्रत्यगात्मतयाऽहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना। यथा चन्दनागुर्वादेरुदकादिसम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेन आच्छाद्यते स्वेन पारमार्थिकेन गन्धेन। तद्वदेव हि स्वात्मनि अध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं जगत्यां पृथिव्याम्, जगत्यामिति उपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्।

एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतःपुत्रो वा भृत्यो वा आत्मसम्बन्धिताया अभावात् आत्मानं पालयति, अतस्त्यागेन इत्ययमेव वेदार्थः–भुञ्जीथाः पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः गृधिमाकाङ्क्षां मा कार्षीर्धनविषयाम्। कस्य स्विद्धनं कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा मा गृधः। कस्मात्? कस्यस्विद्धनमित्याक्षेपार्थो न कस्यचिद्धनमस्ति यद् गृध्येत। आत्मैवदं सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः॥ १॥

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतंसमाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥ २॥**



Scanned with CamScanner

NOTES

**शाङ्करभाष्य**—एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतयात्मा रक्षितव्य इत्येष वेदार्थः। अथ इतरस्यानात्मज्ञतया आत्मग्रहणाय अशक्तस्येदमुपदिशति मन्त्रः—कुर्वन्नेवेति। कुर्वन्नेव निर्वर्तयन्नेव इह कर्माण्यग्निहोत्रादीनि जिजीविषेज्जीवितुमिच्छेच्छतं शतसङ्ख्याकाः समाः संवत्सरान्। तावद्धि पुरुषस्य परमायुर्निरूपितम्। तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत् कुर्वन्नेव कर्माणीत्येतद्विधीयते। एवमेवम्प्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनि इतः एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात् प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्मं न लिप्यते कर्मणा न लिप्यते इत्यर्थः। अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेन जिजीविषेत्।

कथं पुनरिदमवगम्यते—पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति? उच्यते; ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम्? इहाप्युक्तं यो हि जिजीविषेत् स कर्म कुर्वन्', 'ईशावास्यमिदं सर्वम्', 'तेन त्यक्तेन भुञ्जीथाः', 'मा गृधः कस्यस्विद्धनम्' इति च। 'न जीविते, मरणे वा गृधिं कुर्वीतारण्यमियादि'ति च पदम्; 'ततो न पुनरियात्' इति संन्यासशासनात्। उभयोः फलभेदं च वक्ष्यति।

इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः। क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण। निवृत्तिमार्गेण एषणात्रयस्य त्यागः। तयोः संन्यासपथ एवातिरेचयति। "न्यास एवात्यरेचयत्" इति च तैत्तिरीयके (तै. आ. १०।६२, १०।७८)। "द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः। प्रवृतिलक्षणो धर्मो निवृत्तिश्च विभावितः।।" (महा. शा. २४१।६) इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता। विभागञ्चानयोः दर्शयिष्यामः।। २।।

**असुर्या नाम ते लोका अन्धेन तमसावृताः।**
**तांस्ते प्रेत्याभिगच्छन्ति से के चात्महनोजनाः।। ३।।**

**शाङ्करभाष्य**—अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते—असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषाञ्च स्वभूता लोका असुर्या नाम। नामशब्दोऽनर्थको निपातः। ते लोकाः कर्मफलानि। लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि। अन्धेनादर्शनात्मकेनाज्ञानेन तमसावृता आच्छादिताः तान्स्थावरान्तान्प्रेत्य त्यक्त्वेमं देहमभिगच्छन्ति 'यथाकर्म यथाश्रुतम्' (क. उ. २।२।७)।

ये के चात्महनः। आत्मानं घ्नन्तीत्यात्महनः। के ते जनाः? येऽविद्वांसः। कथं त आत्मानं नित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्यात्मनः तिरस्करणात्। विद्यमानस्य आत्मनो यत्कार्यं फलमजरामरत्वादि संवेदनलक्षण तद्धतस्येव



Scanned with CamScanner

NOTES

तिरोभूतं भवतीति प्राकृताविद्वांसो जना आत्महन उच्यन्ते। तेन ह्यात्महननदोषेण संसरन्ति ते।। ३।।

**अनेजदेकं मनसो जवीयो**
**नैनद्देवा आप्नुवन्पूर्वमर्षत्।**
**तद्धावतोऽन्यानत्येति तिष्ठत्**
**तस्मिन्नपो मातरिश्वा दधाति।। ४।।**

**शाङ्करभाष्य**–यस्यात्मनो हननादविद्वांसः संसरन्ति तद्विपर्ययेण विद्वांसो जना मुच्यन्ते ते नात्महनः तत् कीदृशमात्मतत्त्वमित्युच्यते–अनेजदिति। अनेजत् न एजत्। एजृ कम्पने, कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपमित्यर्थः। तच्चैकं सर्वभूतेषु मनसः सङ्कल्पादिलक्षणाद् जवीयो जववत्तरम्। कथं विरुद्धमुच्यते–ध्रुवं निश्चलमिदं मनसो जवीय इति च? नैष दोषः। निरुपाध्युपाधिमत्त्वेनोपपत्तेः। तत्र निरुपाधिकेन स्वेन रूपेणोच्यते। अनेजदेकमिति। मनसोऽन्तःकरणस्य सङ्कल्पविकल्पलक्षणस्योपाधेरनुवर्त्तनाद् इह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं सङ्कल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन् मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवात्मचैतन्यावभासो गृह्यतेऽतो मनसो जवीय इत्याह। नैनद्देवा द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्त्वं नाप्नुवन्न प्राप्तवन्तः। तेभ्यो मनो जवीयः मनोव्यापारव्यवहितत्वाद् आभासमात्रमपि आत्मनो नैव देवानां विषयीभवति। यस्माज्जवनान्मनसोऽपि पूर्वमर्षत् पूर्वमेव गतं व्योमवद्व्यापित्वात्। सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीत्यविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह। तद्धावतो द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनो-वागिन्द्रियप्रभुतीनत्येति अतीत्य गच्छति इव। इवार्थं स्वयमेव दर्शयति–तिष्ठदिति। स्वयमविक्रियमेव सदित्यर्थः।

तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत् क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा; अपः कर्माणि प्राणिनां चेष्टालक्षणानि, अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि दधाति विभजति इत्यर्थः। धारयतीति वा "भीषास्माद्वातः पवते" (तै. उ. २।८।१) इत्यादिश्रुतिभ्यः। सर्वा हि कार्यकरणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः।। ४।।



Scanned with CamScanner

**तदेजति तन्नैजति तद्दूरे तद्वन्तिके।**
**तदनारस्य सर्वस्य तदु सर्वस्यास्य वाह्यत:॥ ५॥**

**शाङ्करभाष्य–**न मन्त्राणां जामितास्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह–तदेजतीति। तदात्मतत्त्वं यत्प्रकृतं तदेजति चलति तदेव च नैजति स्वतो नैव चलति स्वतोऽचलमेव सत् चलतीवेत्यर्थः। किञ्च तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद् दूर इव। तद् उ अन्तिके इति च्छेदः। तद्वन्तिके समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरेऽन्तिके च। तदन्तरभ्यन्तरेऽस्य सर्वस्य "य आत्मा सर्वान्तर:" (बृ. आ. उ. ३।४।१) इति श्रुतेः। अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदु अपि सर्वस्य अस्य बाह्यतो व्यापकत्वादाकाशवन्निरतिशयसूक्ष्मत्वाद् अन्तः। "प्रज्ञानघन एव" (बृ. आ. उ. ४।५।१३) इति च शासनान्निरन्तरं च॥ ५॥

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥ ६॥**

**शाङ्करभाष्य–**यः परिव्राड् मुपुक्षुः सर्वाणि भूतान्यव्यक्तादीनि स्थावरान्तानि आत्मन्येवानुपश्यत्यात्मव्यतिरिक्तानि न पश्यतीत्यर्थः, सर्वभूतेषु च तेष्वेव चात्मानं तेषाम् अपि भूतानां स्वमात्मानमात्मत्वेन। यथास्य देहस्य कार्यकरणसङ्घातस्यात्मा अहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता केवलो निर्गणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवात्मेति सर्वभूतेषु चात्मानं निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न विजुगुप्सते विजुगुप्सां घृणां न करोति। प्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणात्मनोऽन्यद्दुष्टं पश्यतो भवति, आत्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तम् अर्थान्तरमस्तीति प्राप्तमेव। ततो न विजुगुप्सत इति॥ ६॥

**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ ७॥**

**शाङ्करभाष्य–**इममेवार्थमन्योऽपि मन्त्र आह–यस्मिन् सर्वाणि भूतानि। यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूद् आत्मैव संवृतः परमार्थवस्तु विजानतः तत्र तस्मिन्काले तत्रात्मनि वा को मोहः कः शोकः? शोकश्च मोहश्च कामकर्मबीजम् अजानतो भवति। न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः।

को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेण असम्भवप्रदर्शनात् सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति॥ ७॥

NOTES

NOTES

**स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं**
**शुद्धमपापविद्धम्।**
**कविर्मनीषी परिभूः स्वयम्भूर्याथा-**
**तथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥ ८॥**

**शाङ्करभाष्य**—योऽयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण इत्याहायं मन्त्रः—स पर्यगात्। स यथोक्त आत्मा पर्यगात्परि समन्तादगादगत वानाकाशवद्व्यापी इत्यर्थः। शुक्रं शुद्धं ज्योतिष्मद्दीप्तिमानित्यर्थः। अकायमशरीरो लिङ्गशरीरवर्जित इत्यर्थः। अव्रणम् अक्षतम्। अस्नाविरं स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम्। अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः। शुद्धं निर्मलमविद्यामलरहितमितिकारणशरीरप्रतिषेधः। अपापविद्धं धर्माधर्मादिपापवर्जितम्। शुक्रमित्यादीनि वचांसि पुंल्लिङ्गत्वेन परिणेयानि। स पर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना पुंल्लिङ्गत्वेनोपसंहारात्। कविः क्रान्तदर्शी सर्वदृक्। "नान्योऽतोऽस्ति द्रष्टा" (बृ. आ. उ. ३।८।११) इत्यादिश्रुतेः। मनीषी मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः। परिभूः सर्वेषां पर्युपरि भवतीति परिभूः। स्वयम्भूः स्वयमेव भवतीति। येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयम्भूः। स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वाद्यथातथाभावो याथातथ्यं तस्माद्यथाभूतकर्मफलसाधनतोऽर्थान् कर्त्तव्यपदार्थान् व्यदधाद्विहितवान् यथानुरूप व्यभजदित्यर्थः, शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः॥ ८॥

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**
**ततो भूय इव ते तमो य उ विद्यायां रताः॥ ९॥**

**शाङ्करभाष्य**—अत्राद्येन मन्त्रेण सर्वेषणापरित्यागेन ज्ञाननिष्ठोक्ता—प्रथमो वेदार्थः "ईशा वास्यमिदं सर्वं" "मा गृधः कस्यस्विद्धनम् इति।" अज्ञानां जिजीविषूणां ज्ञाननिष्ठासम्भवे "कुर्वन्नेवेह कर्माणि जिजीविषेत्" इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः। अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः—"सोऽकामंयत जाया मे स्यात्" (बृ. आ. उ. १।४।१७) इत्यादिना अज्ञस्य कामिनः कर्माणीति। 'मन एवास्यात्मा वाग्जाया' (बृ. आ. उ. १।४।१७) इत्यादिवचनाद् अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते। तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानम्। जायाद्येषणात्रय-संन्यासेन च आत्मविदां कर्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता 'किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' (बृ. आ. उ. ४।४।२२)



Scanned with CamScanner

इत्यादिना। ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसुर्या नाम ते इत्यादिना अविद्वन्निन्दाद्वारेण आत्मनो याथात्म्यं स पर्यगात्' इत्येतदन्तैर्मन्त्रैरुपदिष्टम्। ते ह्यत्राधिकृता न कामिन इति। तथा च श्वेताश्वतराणां मन्त्रोपनिषदि "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्" (श्वे. उ. ६।२१) इत्यादि विभज्योक्तम्।

ये तु कर्मिणः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते–'अन्धं तमः' इत्यादि। कथं पुनरेवमवगम्यते–न तु सर्वेषाम् इति? उच्यते–अकामिनः साध्यसाधनभेदोपमर्देन 'यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति यदात्मैकत्वविज्ञानम् [उक्तम्] तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति। इह तु समुच्चिचीषयाऽविद्वदादिनिन्दा क्रियते। तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते। यद्दैवं वित्तं देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानम्। "विद्यया देवलोकः" (बृ. आ. उ. १।५।१६) इति पृथक्फलश्रवणात्। तयोर्ज्ञानकर्मणोरिह एकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैव, एकैकस्य पृथक्फलश्रवणात् "विद्यया तदारोहन्ति" (श. ब्रा. १०।५।४।१६), "विद्यया देवलोकः" (बृ. आ. उ. १।५।१६), "न तत्र दक्षिणा यन्ति" (श.ब्रा. १०।५।४।१६), "कर्मणा पितृलोकः" (बृ. आ. उ. १।५।१६) इति। न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात्।

तत्र अन्धं तमः अदर्शनात्मकं तमः प्रविशन्ति। के? येऽविद्यां विद्याया अन्या अविद्या तां कर्म इत्यर्थः, कर्मणो विद्याविरोधित्वात्, तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः। ततस्तस्मादन्धात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति। के? कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एव रताः अभिरताः। तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह; अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितैव स्याद् इत्यर्थः॥ ९॥

**अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया।**
**इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥ १०॥**

**शाङ्करभाष्य**–अन्यदेवेत्यादि। अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति। "विद्यया देवलोकः" (बृ.आ.उ. १।५।१६) "विद्यया तदारोहन्ति" (श.ब्रा. १०।५।४।१६) इति श्रुतेः। अन्यदाहुरविद्यया कर्मणा क्रियते "कर्मणा पितृलोकः" (बृ.आ.उ. १।५।१६) इति श्रुतेः। इत्येवं शुश्रुम

NOTES

NOTES

श्रुतवन्तो वयं धीराणां धीमतां वचनम्। ये आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः।। १०।।

**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।। ११।।**

**शाङ्करभाष्य**—यत एवमतो विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः। यस्तदेतदुभयं सहैकेन पुरुषेण अनुष्ठेयं वेद तस्यैवं समुच्चयकारिण एव एकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते। अविद्यया कर्मणा अग्निहोत्रादिना मृत्यु स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वा अतिक्रम्य विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति। तद्ध्यमृतमुच्यते यद्देवतात्मगमनम्।। ११।।

**अन्धं तमः प्रतिशन्ति येऽसम्भूतिमुपासते।**
**ततो भूय इव ते तमो य उ सम्भूत्यां रताः।। १२।।**

**शाङ्करभाष्य**—अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीथया प्रत्येकं निन्दोच्यते। अन्धं तमः प्रविशन्ति ये असम्भूतिं सम्भवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिः तस्या अन्या असम्भूतिः प्रकृतिः कारणमविद्या अव्याकृताख्या तामसम्भूतिम-व्याकृताख्यां प्रकृतिं कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति। ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशन्ति य उ सम्भूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः।। १२।।

**अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्।**
**इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे।। १३।।**

**शाङ्करभाष्य**—अधुनोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह अन्यदेवेति। अन्यदेव पृथगेवाहुः फलं सम्भवात्सम्भूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त इत्यर्थः। तथा चान्यदाहुः असम्भवादसम्भूतेरव्याकृताद् अव्याकृतोपासनात्। यदुक्तमन्धन्तमः प्रविशन्तीति प्रकृतिलय इति च पौराणिकैरुच्यत इत्येवं शुश्रुम धीराणां वचनं ये नस्तद्विचचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः।। १३।।

**सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह।**
**विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते।। १४।।**

**शाङ्करभाष्य**—यत एवमतः समुच्चयः सम्भूत्यसम्भूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्चेत्याह—सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन



Scanned with CamScanner

विनाशो धर्मो यस्य कार्यस्य सः, तेन धर्मिणा अभेदेन उच्यते विनाश इति। तेन तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च मृत्युं तीर्त्वा, हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलम्, तेनानैश्वर्यादिमृत्युमतीत्य असम्भूत्या अव्याकृतोपासनया अमृतं प्रकृतिलयलक्षणमश्नुते। सम्भूतिं च विनाशं चेत्यत्रावर्णलोपेन निर्देशो द्रष्टव्यः प्रकृतिलयफलश्रुत्यनुरोधात्।। १४।।

NOTES

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।। १५।।**

**शाङ्करभाष्य**—मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम्। एतावती संसारगतिः। अतः परं पूर्वोक्तमात्मैवाभूद्विजानत इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम्। एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः। तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम्। निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकमुपयुक्तम्।

तत्र निषेकादिश्मशानान्तं कर्म कुर्वन् जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया तदुक्तं 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इति। तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते। तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः (बृ.आ.उ. ५।५।२) एतदुभयं सत्यम्। ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्रापितद्वारं याचते 'हिरण्मयेन पात्रेण.' इति।

हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत्। तेन पात्रेणेव अपिधानभूतेन सत्यस्यैवादित्यमण्डलस्थस्य ब्रह्मणोऽपिहितम् आच्छादितं मुखं द्वारम्। तत्त्वं हे पूषन्नपावृण्वपसारय। सत्यधर्माय तव सत्यस्य उपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यमथवा यथाभूतस्य धर्मस्यानुष्ठात्रे दृष्टये तव सत्यात्मन उपलब्धये।। १५।।

**पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि। योऽसावसौ पुरुषः सोऽहमस्मि।। १६।।**

**शाङ्करभाष्य**—पुषन्निति। हे पूषन्! जगतः पोषणात्पूषा रविस्तथैक एव ऋषति गच्छति इत्येकर्षिः—हे एकर्षे! तथा सर्वस्य संयमनाद्यमः—हे यम! तथा रश्मीनां प्राणानां रसानाञ्च स्वीकरणात् सूर्यः—हे सूर्य! प्रजापतेरपत्यं प्राजापत्यः—हे प्राजापत्य! व्यूह विगमय रश्मीन्स्वान्। समूह एकीकुरु उपसंहर ते तेजस्तापकं



Scanned with CamScanner

NOTES

ज्योतिः। यत्ते तव रूपं कल्याणतमम् अत्यन्तशोभनं तत्ते तवात्मन प्रसादात् पश्यामि। किञ्चाहं न तु त्वां भृत्यवद्याचे। योऽसावादित्यमण्डलस्थो व्याहृत्यवयवः पुरुषः पुरुषाकारत्वात्पूर्णं वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः परि शयनाद्वा पुरुषः सोऽहमस्मि भवामि।। १६।।

**वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।**
**ॐक्रतो स्मर कृतं स्मर कतो स्मर कृतं स्मर।। १७।।**

**शाङ्करभाष्य**—वायुरिति। अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः। लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम्, मार्गयाचनसामर्थ्यात्। अथेदं शरीरमग्नो हुतं भस्मान्तं भूयात्। ओमितिं यथोपासनमों प्रतीकात्मकत्वात्सत्यात्मक-मग्न्याख्यं ब्रह्माभेदेनोच्यते। हे क्रतो सङ्कल्पात्मक स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मर। एतावन्तं कालं भावितं कृतमग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर। क्रतो स्मर कृतं स्मरेति पुनर्वचन-मादरार्थम्।। १७।।

**अग्ने नय सुपथा राये अस्मान्**
**विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो**
**भूयिष्ठां ते नमउक्तिं विधेम।। १८।।**

**शाङ्करभाष्य**—पुनरन्येन मन्त्रेण मार्गं याचते—अग्ने नयेति। हे अग्ने! नय गमय सुपथा शोभनेन मार्गेण। सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम्। निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय। राये धनाय कर्मफलभोगायेत्यथं, अस्मान्यथोवतधर्मफलविशिष्टान् विश्वानि सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानानि वा विद्वाञ्जानन्। किञ्च युयोधि वियोजय विनाशय अस्मदमत्तो जुहुराणं कुटिलं वञ्चनात्मकमेनः पापम्। ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्यभिप्रायः। किन्तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुम्। भूयिष्ठां बहुतरां ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेम इत्यर्थः।

## श्रीमच्छङ्कराचार्यकृत उपसंहारभाष्य

'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' (ई.उ. ११), विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते' (ई.उ. १४) इति श्रुत्वा केचित्संशयं कुर्वन्ति।



Scanned with CamScanner

अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः। तत्र तावत्किन्निमित्तः संशय इत्युच्यते। विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्वञ्च। ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः। सत्यम्। विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणकत्वात्। यथाऽविद्यानुष्ठानं विद्योपासनञ्च शास्त्रप्रमाणकं तथा तद्विरोधाविरोधवपि। यथा च न हिंस्यात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते'ऽध्वरे पशुं हिंस्यादि'ति। एवं विद्याविद्ययोरपि स्यात्। विद्याकर्मणोश्च समुच्चयः। न "दूरमेते विपरीते विषूची अविद्या या च विद्या" (क.उ. १।२।४) इति श्रुतेः। विद्यां चाविद्यां चेति वचनादविरोध इति चेत्? न; हेतुस्वरूपफलविरोधात्। विद्याविद्याविरोधाविरोधयो-र्विकल्पासम्भवात्समुच्चयविधानादविरोध एवेति चेत्? न; सहसम्भवानुपपत्तेः। क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेत्?

न; विद्योत्पत्तौ अविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः। न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा। "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्-विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति शोकमोहाद्य-सम्भवश्रुतेः। अविद्यासम्भवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिम् अवोचाम। अमृतमश्नुत इत्यापेक्षिकम् अमृतम्। विद्याशब्देन परमात्मविद्याग्रहणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात्। तस्मादुपासनया समुच्चयो न परमात्मविज्ञानेनेति यथास्माभिर्व्याख्यात एव मन्त्राणामर्थं इत्युपरम्यते।। इति श्रीगोविन्दभगवत्- पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ वाजसनेय- संहितोपनिषद्भाष्यं सम्पूर्णम्।

❑❑❑

NOTES

UNIT–V

# इकाई–पञ्चम

॥ॐ तत्सद्ब्रह्मणे नमः॥

# केनोपनिषद्

## प्रथमः खण्डः

**ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।**
**केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति॥ १॥**

## भावार्थदीपिका

**अन्वयः**–ॐ मनः केन इषितं प्रेषितं पतति? प्रथमः प्राणः केन युक्तः प्रैति? (जनाः) केन इषितां इमां वाचं वदन्ति? क उ देवः चक्षुः श्रोत्रं (च) युनक्ति?

## पदभाष्यम्

*इषित–प्रेषितयोः शब्दार्थः*–केन इषितं केन कर्त्रा इषितम् इष्टमभिप्रेतं सत् मनः पतति गच्छति स्वविषयं प्रतीति सम्बध्यते। इषेराभीक्ष्ण्यार्थस्य गत्यर्थस्य चेहासम्भवादिच्छार्थस्यैवेतद् रूपमिति गम्यते। इषितमिति इट्प्रयोगस्तु च्छान्दसः। तस्यैव प्रपूर्वस्य नियोगार्थे प्रेषितमित्येतत् तत्र प्रेषितमित्येवमेवोक्ते प्रेषथितृप्रेषणविशेषविषयाकाङ्क्षा स्यात्–केन प्रेषयितृविशेषेण कीदृशं वा प्रेषणम्? इति। इषितमिति तु विशेषणे सति तदुभयं निवर्तते, कस्येच्छामात्रेण प्रेषितमित्यर्थविशेषनिर्धारणात्।

## पदभाष्यम्

*मन्त्रार्थविमर्शः*–यद्येषोऽर्थोऽभिप्रेतः स्यात् 'केनेषितम्' इत्येतावतैव सिद्धतया प्रेषितमिति न वक्तव्यम्। [१]अपि च शब्दाधिक्यादर्थाधिक्यं युक्तमिति इच्छया



Scanned with CamScanner

कर्मणा वाचा वा केन प्रेषितमित्यर्थविशेषोऽवगन्तुं युक्तः।

न प्रश्नसामर्थ्यात्, देहादिसङ्घातादनित्यात् कर्मकार्याद् विरक्तः, अतोऽन्यत् कूटस्थं नित्यं वस्तु बुभुत्समानः पृच्छतीति सामर्थ्यादुपपद्यते। इतरथा इच्छावाक्कर्मभिर्देहादिसङ्घातस्य प्रेरयितृत्वं प्रसिद्धमिति प्रश्नोऽनर्थक एव स्यात्। एवमपि प्रेषित-शब्दस्याऽर्थो न प्रदर्शित एव।

न, संशयवतोऽयं प्रश्न इति प्रेषितशब्दस्याऽर्थविशेष उपपद्यते। किं यथाप्रसिद्धमेव कार्यकारणसङ्घातस्य प्रेषयियतृत्वम्, किं वा सङ्घातआतिरिक्तस्य स्वन्त्रस्य इच्छामात्रेणैव मनआदिप्रेषयितृत्वम्, इत्यस्याऽर्थस्य प्रदर्शनार्थं 'केनेषितं पतति प्रेषितं मन' इति विशेषणद्वयमुपपद्यते।

## पदभाष्यम्

*मनः प्रभृतीनां पारतन्त्र्यम्*—ननु स्वतन्त्रं मनः स्वविषये स्वयं पततीति प्रसिद्धम्; तत्र कथं प्रश्न उपपद्यत इति, उच्यते-यदि स्वतंत्र मनः प्रवृत्तिनिवृत्तिविषयं स्यात् तर्हि सर्वस्य अनिष्टचिन्तनं न स्यात्। अनर्थं च जानन् सङ्कल्पयति। अभ्यग्रदुःखे च कार्ये वार्यमाणमपि प्रवर्तत एव भनः। तस्माद् युक्त एव 'केनेषितमि' त्यादिप्रश्नः।

## पदभाष्यम्

केन प्राणः युक्तः नियुक्तः प्रेरितः सन् प्रैति गच्छति स्वव्यापारं प्रति। प्रथमं इति प्राणविशेषणं स्यात्, तत्पूर्वकत्वात् सर्वेन्द्रियप्रवृत्तीनाम्।

केन इषितां वाचम् इमां शब्दलक्षणां वदन्ति लौकिकाः? तथा चक्षुः श्रोत्रं च स्वे स्वे विषये क उ देवः द्योतनवान् युनत्ति नियुङ्क्ते प्रेरयति?।। १।।

## वाक्यभाष्यम्

कैनेधितम् केनेष्टं कस्येच्छामात्रेण मनः पतति गच्छति स्वविषये नियमेन व्यप्रियत इत्यर्थः। मनुतेऽनेनेति विज्ञाननिमित्तमन्तःकरषां मनः प्रेषितमिवेत्युपमार्थः। न त्विषितप्रेषितशब्दयोरर्थाविह सम्भवतः। न हि शिष्यानिव मनआदीनि विषयेभ्यः प्रेरयत्यात्मा। विविक्तनित्यचित्-स्वरूपतया तु निमित्तमात्रं प्रवृत्तौ नित्यचिकित्साधिष्ठातृवत्।

NOTES

NOTES

## वाक्यभाष्यम्

प्राण इति नासिकाभवः, प्रकरणात्। प्रथमत्वं प्रचलनक्रियायाः प्राणनिमित्तत्वात् स्वतो विषयावभासमात्रं करणानां प्रवृत्तिः। चलिक्रिया तु प्राणस्यैव मनआदिषु। तस्मात् प्राथम्यं प्राणस्य। प्रैति = गच्छति, युक्तः = प्रयुक्त इत्येतत्। वाचो वदनं किंनिमित्तम्? प्राणिनां चक्षुःश्रोत्रयोश्च को देवः प्रयोक्ता? करणानाम् अधिष्ठाता चेतनवान् यः स किंविशेषण इत्यर्थः।। १।।

## पदभाष्यम्

*मंत्रावतरणम्*—एवं पृष्टवते योग्यायाऽऽह गुरुः—'शृणु यत् त्वं पृच्छसि, मनआदिकरणजातस्य को देवः स्वविषयं प्रति प्रेरयिता कथं वा प्रेरयतीति'?

**श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः।**
**चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति।। २।।**

## पदभाष्यम्

*श्रोत्रस्य श्रोत्रम्*— शृणोत्यनेनेति श्रोत्रम्, शब्दस्य श्रवणं प्रति करणं शब्दाभिव्यञ्जकं श्रोत्रमिन्द्रियम्, तस्य श्रोत्रम् यस्त्वया पृष्ठः 'चक्षुः श्रोत्रं क उ देवो युनक्ति?' इति।

असावेवंविशिष्टः श्रोत्रादीनि नियुङ्क्ते इति वक्तव्ये, नन्वेतदननुरूपं प्रतिवचनं श्रोत्रस्य श्रोत्रमिति। नैष दोषः, तस्याऽन्यथाविशेषाऽनवगमात्। यदि हि श्रोत्रादिव्यापारव्यतिरिक्तेन स्वव्यापारेण विशिष्टः श्रोत्रादिनियोक्ता अवगम्येत दात्रादिप्रयोक्तृवत्, तदेदमननुरूपं प्रतिवचनं स्यात्। न त्विह श्रोत्रादीनां प्रयोक्ता स्वव्यापारविशिष्टो लवित्रादिवदधिगम्यते। श्रोत्रादीनामेव तु संहतानां व्यापारेणाऽऽलोचन-सङ्कल्पाऽध्यवसायलक्षणेन फलावसान- लिङ्गेनाऽवगम्यते। अस्ति हि श्रोत्रादिभिरसंहतः, यत्प्रयोजनप्रयुक्तः श्रोत्रादिकलापः गृहादिवदिति। संहतानां परार्थत्वात् अवगम्यते श्रोत्रादीनां प्रयोक्ता। तस्मान् अनुरूपमेवेदं प्रतिवचनं 'श्रोत्रस्य श्रोत्रमि' त्यादि।

## पदभाष्यम्

*आत्मनः श्रोत्रादिप्रकाशकत्वम्*—कः पुनरत्र पदार्थः 'श्रोत्रस्य श्रोत्रमि' त्यादेः? नह्यत्र श्रोत्रस्य श्रोत्रान्तरेणाऽर्थः, यथा प्रकाशस्य प्रकाशान्तरेण।



Scanned with CamScanner

NOTES

नैष दोषः। अयमत्र पदार्थः—श्रोत्रं तावत् स्वविषयव्यञ्जनसमर्थं दृष्टम्। तत्तु स्वविषयव्यञ्जनसामर्थ्यं श्रोत्रस्य चैतन्ये ह्यात्मज्योतिषि नित्येऽसंहते सर्वान्तरे सति भवति, न असति इति। अतः 'श्रोत्रस्य श्रोत्रमि' त्याद्युपपद्यते।

## पदभाष्यम्

तथा च श्रुत्यन्तराणि—'आत्मनैवाऽयं ज्योतिषाऽऽस्ते' (बृ.उ. ४।३।६), 'तस्य भासा सर्वमिदं विभाति' (क.उ. २।२।१५, श्वे. ६।१४, मु. २।२।१०) 'येन सूर्यस्तपति तेजसेद्धः' (तै.ब्रा. ३।१२।९।७) इत्यादीनि।

'यदादित्यगतं तेजो जगद् भासयतेऽखिलम्' (गी. १५।१२)

'क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत!' (गी. १३।३३) इति च गीतासु। काठके च—

'नित्या नित्यानां चेतनश्चेतनानाम्' (२।२।१३) इति।

श्रोत्राद्येव सर्वस्याऽऽत्मभूतं चेतनमिति प्रसिद्धम्, तदिह निवर्त्यते। अस्ति किमपि विद्वद्बुद्धिगम्यं सर्वान्तरतमं कूटस्थमजमजरममृतमभयं श्रोत्रादेरपि श्रोत्रादि तत्सामर्थ्यनिमित्तमिति प्रतिवचनं शब्दार्थश्चोपपद्यत एव।

## पदभाष्यम्

मनसो मनः—तथा मनसः=अन्तःकरणस्य मनः। न ह्यन्तकरणम् अन्तःकरणेन चैतन्यज्योतिषो दीधितिं स्वविषयसङ्कल्पाध्यवसायादिसमर्थं स्यात् तस्मात् मनसोऽपि मन इति। इह बुद्धिमनसी एकीकृत्य निर्देशो मनस इति।

यद वाचोऽह वाचम्—यच्छब्दो यस्मादर्थे श्रोत्रादिभिः सर्वैः सम्बध्यते। यस्माच्छ्रोत्रस्य श्रोत्रम्, यस्मान्मनसो मन इत्येवम्। वाचो ह वाचमिति द्वितीया प्रथमात्वेन विपरिणम्यते, प्राणस्य प्राण इति दर्शनात्।

वाचो ह वाचमित्येतदनुरोधेन प्राणस्य प्राणमिति कस्माद् द्वितीयैव न क्रियते?

न, बहूनामनुरोधस्य युक्तत्वात्। वाचमित्यस्य वागित्येतावद् वक्तव्यम् 'स उ प्राणस्य प्राण' इति शब्दद्वयानुरोधेन। एवं हि बहूनामनुरोधो युक्तः कृतः स्यात्।



Scanned with CamScanner

## पदभाष्यम्

पृष्टं च वस्तु प्रथमतयैव निर्देष्टुं युक्तम्। स यस्त्वया पृष्टः प्राणस्य प्राणाख्यवृत्तिविशेषस्य प्राणः, तत्कृतं हि प्राणस्य प्राणनसामर्थ्यम्। न ह्यात्मनाऽनधिष्ठितस्य प्राणनमनुपपद्यते, 'को ह्येवाऽन्यात्, कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्' (तै.उ. २।७।१), 'ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति' (क.उ. २।२।३) इत्यादिश्रुतिभ्यः। इहापि च वक्ष्यते 'येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि' (१।८) इति।

**शङ्का**—श्रोत्रादीन्द्रियप्रस्तावे प्राणस्य ननु युक्तं ग्रहणम्?

**समाधानं**—सत्यमेवम्, प्राणग्रहणेनैव तु घ्राणस्य ग्रहणं कृतमेव मन्यते श्रुतिः। सर्वस्यैव करणकलापस्य यदर्थप्रयुक्ता प्रवृत्तिः, तद् ब्रह्मेति प्रकरणार्थो विवक्षितः।

तथा चक्षुष्श्चक्षूरूपप्रकाशस्य चक्षुषो यद् रूपग्रहणसामर्थ्यं, तदात्मचैतन्याधिष्ठितैव। अतः चक्षुषश्चक्षुः।

## पदभाष्यम्

*ब्रह्मवेत्तुः अमृतत्वप्राप्तिः*—प्रष्टुः पृष्टस्याऽर्थस्य ज्ञातुमिष्टत्वात् श्रोत्रादेः श्रोत्रादिलक्षणं यथोक्तं ब्रह्म 'ज्ञात्वा' इत्यध्याह्रियते; 'अमृता भवन्ति' इति फलश्रुतेश्च। ज्ञानाद्ध्यमृतत्वं प्राप्यते। 'ज्ञात्वा विमुच्यते' इति सामर्थ्यात् श्रोत्रादिकरणकलापमुज्झित्वा श्रोत्रादौ ह्यात्मभावं कृत्वा तदुपाधिः सन् तदात्मना जायते म्रियते संसरति च। अतः श्रोत्रादेः श्रोत्रादिलक्षणं ब्रह्म आत्मेति विदित्वा, अतिमुच्य = श्रोत्राद्यात्मभावं परित्यज्य, ये श्रोत्राद्यात्मभावं त्यजन्ति ते धीराः = धीमन्तः। न हि विशिष्टधीमत्वमन्तरेण श्रोत्राद्यात्मभावः शक्यः परित्यक्तुम्। प्रेत्य = व्यावृत्य, अस्माल्लोकात् = पुत्र-मित्र-कलत्र-बन्धुषु ममाहम्भावसंव्यवहारलक्षणात्, त्यक्तसर्वेषणाः भूत्वेत्यर्थः। अमृताः अमरणधर्माणो भवन्ति।

## पदभाष्यम्

**'न कर्मणा न प्रजया धनेन**<br>
**त्यागेनैके अमृतत्वमानशुः' (कैव.उ. १।२)**<br>
**'पराञ्चि खानि व्यतृणत् स्वयम्भू-**<br>
**स्तस्मात् पराङ् पश्यति नाऽन्तरात्मन्।**



Scanned with CamScanner

**कश्चिद् धीरः प्रत्यगात्मानमैक्ष-**

**दावृत्तचक्षुरमृतत्वमिच्छन्॥' (क.उ. २।१।१)**

**'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।**

**.................. अत्र ब्रह्म समश्नुते॥' (क.उ. २।३।१४)**

**इत्यादिश्रुतिभ्य।**

अथवा 'अतिमुच्ये'त्यनेनैव एषणात्यागस्य सिद्धत्वात् अस्माल्लोकात् प्रेत्य = अस्माच्छरीरादपेत्य, मृत्वेत्यर्थः॥ २॥

## वाक्यभाष्यम्

श्रोत्रस्य श्रोत्रम् इत्यादि प्रतिवचनं निर्विशेषस्य निमित्तत्वात्यर्थम्। विक्रियादिविशेषरहिततस्याऽऽत्मनो मनआदिप्रवृतौ निमित्तत्वमित्येतच्छ्रोत्रस्य श्रोत्रम् इत्यादिप्रतिवचनस्यार्थः, अनुगमात्। तदनुगतानि ह्यत्राऽस्मिन्नर्थेऽक्षराणि। कथम्? शृणोत्यनेनेति श्रोत्रम्, तस्य शब्दावभासकत्वं श्रोत्रत्वम्। शब्दोपलब्धृरूपतयाऽव-भासकत्वं न स्वतः, श्रोत्रस्याऽचिद्रूपत्वात् आत्मनश्च चिद्रूपत्वात्। यच्छ्रोत्रस्योप-लब्धृत्वेनाऽवभासकत्वं तदात्मनिमित्तत्वाच्छ्रोत्रस्य श्रोत्रमित्युच्यते; यथा क्षत्रस्य क्षत्रं, यथा वोदकस्यौष्ण्यमग्निनिमित्तमिति दग्धुरप्युदकस्य दग्धाग्निरित्युच्यते, उदकमपि ह्यग्निसंयोगादग्निरुच्यते, तद्वद् अनित्यं यत्संयोगादुपलब्धृत्वं तत्करणं श्रोत्रादि। उदकस्येव दग्धृत्वमनित्यं हि तत्र तत्। यत्र तु नित्यमुपलब्धृत्वमग्ना-विवौष्ण्यं स नित्योपलब्धिस्वरूपत्वाद् दग्धेवोपलब्धा उच्यते श्रोत्रादिषु श्रोतृत्वाद्युपलब्धिरनित्या नित्या चाऽऽत्मनि, अतः श्रोत्रस्य श्रोत्रमित्याद्यक्षराणाम-र्थानुगमाद् उपपद्यते निर्विशेषस्योपलब्धिस्वरूपस्याऽऽत्मनो मनआदिप्रवृत्ति निमित्तत्वामिति मनआदिष्वेवं यथोक्तम्।

## वाक्यभाष्यम्

'वाचो ह वाचम्' 'प्राणस्य प्राणः' इति विभक्तिद्वयं सर्वत्रैव द्रष्टव्यम्। कथम्? पृष्टत्वात् स्वरूपनिर्देशः प्रथमयैव च निर्देशः। तस्य च ज्ञेयत्वात् कर्मत्वमिति द्वितीया। अतो 'वाचो ह वाचम्' 'प्राणस्य प्राण' इत्यस्मात् सर्वत्रैव विभक्तिद्वयम्।

NOTES



Scanned with CamScanner

## वाक्यभाष्यम्

*आत्मज्ञानेन अमृतत्वम्*–यदेतत् श्रोत्राद्युपलब्धिनिमित्तं श्रोत्रमित्यादिलक्षणं नित्योपलब्धि स्वरूपं निर्विशेषमात्मतत्त्वम्, तद् बुद्ध्वा अतिमुच्य = अनवबोधनिमित्ताध्यारोपिताद् बुध्द्यादिलक्षणात् संसारात् मोक्षणं कृत्वा, धीराः = धीमन्तः, प्रेत्य अस्मात् लोकात् = शरीरात् प्रेत्य = वियुज्य, अन्य-स्मिन्नप्रतिसन्धीयमाने निर्निमित्तत्वादमृता भवन्ति।

सति ह्यज्ञाने कर्माणि शरीरान्तरं प्रतिसन्दधते। आत्मावबोधे तु सर्वकर्मारम्भ-निमित्ताऽज्ञानविपरीतविद्याग्निविप्लुष्टत्वात् कर्मणामनारम्भेऽमृता एव भवन्ति। शरीरादिसन्तानाविच्छेदप्रतिसन्धानाद्यपेक्षयाऽध्यारोपितमृत्युवियोगात् पूर्वमप्यमृताः सन्तो नित्यात्मस्वरूपत्वादमृता भवन्तीत्युपचर्यते।। २।।

न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यात्। अन्यदेव तद् विदितादथो अविदितादधि। इति शुश्रम पूर्वेषां ये नस्तद् व्याचचक्षिरे।। ३।।

## पदभाष्यम्

यस्माच्छ्रोत्रादेरपि श्रोत्राद्यात्मभूतं ब्रह्म, अतः न तत्र = तस्मिन् ब्रह्मणि चक्षुः गच्छति स्वात्मनि गमनासम्भवात्।

तथा न वाग् गच्छति–वाचा हि शब्द उच्चार्यमाणोऽभिधेयं प्रकाशयति यदा, तदाऽभिधेयं प्रति वाग् गच्छतीत्युच्यते। तस्य च शब्दस्य तन्निर्वर्तकस्य च करणस्याऽऽत्मा ब्रह्म। अतो न वाग् गच्छति।

यथाऽग्निर्दाहकः प्रकाशकश्चापि सन् न ह्यात्मानं प्रकाशयति दहति वा, तद्वत्।

नो मनः–मनश्चाऽन्यस्य सङ्कल्पयितृ अध्यवसायितृ च सत् नाऽऽत्मानं सङ्कल्पयत्यध्यवस्यति च, तस्याऽपि ब्रह्मात्मेति। इन्द्रियमनोभ्यां हि वस्तुनो विज्ञानम्। तदगोचरत्वात्र विद्मः तद् ब्रह्म ईदृशमिति।

अतो न विजानीयो यथा = येन प्रकारेण (तद्) एतद् ब्रह्म अनुशिष्यात् = उपदिशेत्, शिष्यायेत्यभिप्रायः। यद्धि करणगोचरं तदन्यस्मा (तदन्यस्मै) उपदेष्टुं शक्यं जाति-गुण-क्रियाविशेषणैः। न तज्जात्यादिविशेषणवद् ब्रह्म, तस्माद् विषमं शिष्यानुपदेशेन प्रत्याययितुमिति उपदेशे तदर्थग्रहणे च यत्नातिशयकर्तव्यतां दर्शयति।



Scanned with CamScanner

## पदभाष्यम्

'न विद्मो न विजानीमो यथैतदनुशिष्यात्' इति अत्यन्तमेव उपदेशप्रकारप्रत्याख्याने प्राप्ते पदपवादोऽयमुच्यते। सत्यमेवं प्रत्यक्षादिभिः प्रमाणैर्न परः प्रत्याययितुं शक्यः, आगमेन तु शक्यत एव प्रत्याययितुमिति तदुपदेशार्थमागममाह–'अन्यदेव तद् विदितादथो अविदितादधी'ति। अन्यदेव पृथगेव तद् यत् प्रकृतं श्रोत्रादीनां श्रोत्रादीत्युक्तम् अविषयश्च तेषाम्। तद् विदिताद् अन्यदेव हि। विदितं नाम यद् विदिक्रिययाऽतिशयेनाऽऽप्तं विदिक्रियाकर्मभूतं क्वचित् किञ्चित् कस्यचिद् विदितं स्यादिति। सर्वमेव व्याकृतं विदितमेव; तस्मादन्यदेवेत्यर्थः।

'अविदितमज्ञातं तर्ही' ति प्राप्ते आह–अर्था अपि अविदिताद् विदितविपरीता-दव्याकृताऽविद्यालक्षणाद् व्याकृतबीजात्, 'अधि' इति उपर्यर्थे, लक्षणया अन्यत् इत्यर्थः। यद्धि यस्मादधि उपरि भवति, तत् तस्मादन्यदिति प्रसिद्धम्।

## पदभाष्यम्

*ब्रह्मण आत्माभिन्नत्वम्*–यद् विदितं तदल्पं मर्त्यं दुःख'चेति हेयम्। तस्माद् विदितादन्यद् ब्रह्म इत्युक्ते तु अहेयत्वमुक्तं स्यात्। तथा अविदितादधि इत्यक्ते अनुपादेयत्वमुक्तं स्यात्। कार्यार्थं हि कारणमन्यदन्येन उपादीयते। अतश्च न वेदितुः अन्यस्मै प्रयोजनाय अन्यदुपादेयं भवतीति। एवं विदिताविदिताभ्यामन्यदिति हेयोपादेयप्रतिषेधेन स्वात्मनोऽनन्यत्वाद् ब्रह्मविषया जिज्ञासा शिष्यस्य निर्वर्तिता स्यात्। न ह्यन्यस्य स्वात्मनो विदिताविदिताभ्याम् अन्यत्वं वस्तुनः सम्भवतीत्यात्मा ब्रह्मेत्येष वाक्यार्थः; 'अयमात्मा ब्रह्म' (माण्डू. २) 'य आत्माऽपहतपाप्मा' (छा.उ. ८।७।१), 'यत् साक्षादपरोक्षाद् ब्रह्म' (बृ.उ. ३।४।१), 'य आत्मा सर्वान्तरः' (बृ.उ. ३।४।१) इत्यादिश्रुत्यन्तरेभ्यश्चेति।

एवं सर्वात्मनः सर्वविशेषरहितस्य चिन्मात्रज्योतिषो ब्रह्मत्वप्रतिपादकस्य वाक्यार्थस्य आचार्योपदेशपरम्परया प्राप्तत्वमाह–'इति शुश्रूमे'त्यादि। ब्रह्म च एवमाचार्योपदेशपरम्परया एव अधिगन्तव्यं न तर्कतः; प्रवचन-मेधा-वहुश्रुत-तपोयज्ञादिभ्यश्च, इत्येवं शुश्रुम श्रुतवन्तो वयं पूर्वेषाम् आचार्याणां वचनम्, ये आचार्याः नः अस्मभ्यं तद् ब्रह्म व्याचचक्षिरे व्याख्यातवन्तः विस्पष्टं कथितवन्तः तेषाम् इत्यर्थः।। ३।।

NOTES



Scanned with CamScanner

## वाक्यभाष्यम्

'न तत्र चक्षुर्गच्छति' इत्युक्तेऽपि पर्यनुयोगे हेतुरप्रतिपत्तेः। 'श्रोत्रस्य श्रोत्रमि' त्येवमादिना उक्तेऽप्यात्मतत्त्वेऽप्रतिपन्नत्वात् सूक्ष्मत्वहेतोर्वस्तुनः पुनः पुनः पर्यनुयुयुक्षाकारणमाह–'न तत्र चक्षुर्गच्छती'ति। तत्र श्रोत्राद्यात्मभूते चक्षुरादीनि वाक्‌चक्षुषोः सर्वेन्द्रियोपलक्षणार्थत्वान्न विज्ञानमुत्पादयान्ति।

सुखादिवत् तर्हि गृह्येताऽन्तःकरणेनाऽत आह–'नो मनः'–न सुखादिवन्मनसो विषयस्तत्, इन्द्रियाविषयत्वात्।

'न विद्मो न विजानीमः'-अन्तःकरणेन यथैतद् ब्रह्म मन-आदि करणजातमनुशिष्याद् अनुशासनं कुर्यात् प्रवृत्तिनिमित्तं भवेत् तथा विषयत्वान्न विद्मो न विजानीमः।

## वाक्यभाष्यम्

अथवा 'श्रोत्रादीनां श्रोत्रादिलक्षणं ब्रह्म विशेषेण दर्शय' इत्युक्त आचार्य आह–'न शक्यते दर्शयितुम्।' कस्मात्? 'न तत्र चक्षुर्गच्छति' इत्यादि पूर्ववत् सर्वम्। अत्र तु विशेषो यथैतदनुशिष्यादिति। यथैतदनुशिष्यात् प्रतिपादयेत् अन्योऽपि शिष्यानितोऽन्येन विधिनेत्यभिप्रायः।

## वाक्यभाष्यम्

'सर्वथापि ब्रह्म बोधय' इत्युक्त आचार्य आह–'अन्यदेव तद् विदितादथो अविदितादधि' इत्यागमम् = विदिताविदिताभ्यान्यत्वम्। यो हि ज्ञाता स एव सः, सर्वात्मकत्वात्। अतः सर्वात्मनो ज्ञातुर्ज्ञात्रन्तराभावाद् विदितादन्यत्वम्।

'स वेत्ति वेद्यं न च तस्यास्ति वेत्ता' (श्वे.उ. ३। १९) इति च मन्त्रवर्णात्। 'विज्ञातारमरे केन विजानीयात्' (बृ.उ. २। ४। १४) इति च वाजसनेयके। अपि च, व्यक्तमेव विदितं तस्मादन्यदित्यभिप्रायः। यद् विदितं व्यक्तं तदन्यविषयत्वादल्पं सविरोधं ततोऽनित्यमत एव तद्विलक्षणं ब्रह्मेति सिद्धम्।

## वाक्यभाष्यम्

अथो अविदितादधि-तर्हि अविदितम्, न, विज्ञानानपेक्षत्वात्। यद्धि अविदितं तद् विज्ञानापेक्षम्। अविदितविज्ञानाय हि लोकप्रवृत्तिः। इदं तु



Scanned with CamScanner

विज्ञानानपेक्षम्। कस्मात्? विज्ञानस्वरूपत्वात्। न हि यस्य यत् स्वरूपम्, तत् तेनाऽन्यतोऽपेक्ष्यते। न च स्वत एवाऽपेक्षा, अनपेक्षमेव सिद्धत्वात्। प्रदीपः स्वरूपाभिव्यक्तौ न प्रकाशान्तरमन्यतोऽपेक्षते स्वतो वा। यद्धि अनपेक्षम्, तत् स्वत एव सिद्धम्, प्रकाशात्मकत्वात्। प्रदीपस्याऽपेक्षितोऽप्यनर्थकः स्यात्, प्रकाशे विशेषाभावात्। न हि प्रदीपस्य स्वरूपाभिव्यक्तौ प्रदीपप्रकाशोऽर्थवान्। न चैवमात्मनोऽन्यत्र विज्ञानमस्ति, येन स्वरूपविज्ञानेऽप्यपेक्ष्येत। विरोध इति चेन्, अन्यत्वात्।

## वाक्यभाष्यम्

स्वरूपविज्ञाने विज्ञानस्वरूपत्वाद् विज्ञानान्तरं नाऽपेक्षत इत्येतदसत्। दृश्यते हि विपरीतज्ञानमात्मनि सम्यग् ज्ञानं च। न जानाम्यात्मानमिति। श्रुतेश्च 'तत् त्वमसि' (छा.उ. ६।८-१६), 'आत्मानमेवाऽवेत्' (बृ.उ. १।४।१०) 'एतं वै तमात्मानं विदित्वा' (बृ.उ. ६।५।१) इति च। सर्वत्र श्रुतिष्वात्मविज्ञाने विज्ञानान्तरापेक्षत्वं दृश्यते। तस्मात् प्रत्यक्षश्रुतिविरोध इति चेत्।

न; कस्मात्? अन्यो हि स आत्मा बुद्ध्यादिकार्यकरणसङ्घाताभिमानसन्तानाविच्छेदलक्षणोऽविवेकात्मको बुद्ध्यवभासप्रधानः चक्षुरादिकरणो नित्यचित्स्वरूपात्माऽन्तःसारो, यत्राऽनित्यं विज्ञानम् अवभासते बौद्धप्रत्ययानाम् आविर्भावतिरोभावधर्मकत्वात् तद्धर्मतयैव विलक्षणमपि चाऽवभासते।

अन्तःकरणस्य मनसोऽपि मनोऽन्तर्गतत्वात् सर्वान्तरश्रुतेः। अन्तर्गतेन नित्यविज्ञानस्वरूपेण आकाशवदप्रचालितात्मनाऽन्तर्गर्भभूतेन बाह्यो बुद्ध्यात्मा तद्विलक्षणः अर्चिभिरिवाऽग्निः प्रत्ययैराविर्भावतिरोभावधर्मकैर्विज्ञानाभासरूपैरनित्यविज्ञान आत्मा सुखी दुःखीत्यभ्युपगतो लौकिकैः। अतोऽन्यो नित्यविज्ञानस्वरूपादात्मनः। तत्र हि विज्ञानापेक्षा विपरीतज्ञानत्वं चोपपद्यते न पुनर्नित्यविज्ञाने।

## वाक्यभाष्यम्

'तत्वमसी'ति बोधोपदेशो न उपपद्यत इति चेत्। 'आत्मानमेवाऽवेत्' (बृ.उ. १।४।१०) इत्येवमादीनि च नित्यबोधात्मकत्वात्। न हि आदित्योऽन्येन प्रकाशते। अतस्तदर्थबोधोपदेशः अनर्थक इति चेत्।

NOTES

NOTES

## वाक्यभाष्यम्

न; लोकाध्यारोपापोहार्थत्वात्। सर्वात्मनि हि नित्यविज्ञाने सवितेति बुद्ध्याद्यनित्यधर्मा लोकैरध्यारोपिता आत्माऽविवेकतस्तदपोहार्थो बोधोपदेशो बोधात्मनः।

## वाक्यभाष्यम्

तत्र च बोधाबोधौ समञ्जसौ, अन्यनिमित्तत्वात्, उदक इवौष्ण्यम् अग्निनिमित्तम्, रात्र्यहनी इव आदित्यनिमित्ते। लोके नित्यौ औष्ण्यप्रकाशौ अग्न्यादित्ययोरन्यत्र भावाभावयोर्निमित्तत्वादनित्याविव उपचर्येते। धक्ष्यत्यग्निः, प्रकाशयति सवितेति तद्वत्। एवं च सुखदुःख-बन्धमोक्षाद्यध्यारोपो लोकस्य तदपेक्ष्य 'तत्वमसि' 'आत्मानमेवावेत्' इत्यात्मावबोधोपदेशेन श्रुतयः केवलमध्यारोपापोहार्थाः।

## वाक्यभाष्यम्

यथा सविताऽसौ प्रकाशयति आत्मानम् इति तद्वत्, बोधाबोधकर्तृत्वं च नित्यबोधात्मनि। तस्मादन्यदविदितात्। अधिशब्दश्च अन्यार्थे। यद्वा-यद्धि यस्याऽधि तत् ततोऽन्यत्सामर्थ्यात्। यथाऽधि भृत्यादीनां राजा। अव्यक्तमेव अविदितं ततोऽन्यदित्यर्थः।

विदितमविदितं च व्यक्ताव्यक्ते कार्यकारणत्वेन विकल्पिते, ताभ्यामन्यद् ब्रह्म विज्ञानस्वरूपं सर्वविशेषप्रत्यस्तमितम् इत्ययं समुदायार्थः। अत एव आत्मत्वान्न हेय उपादेयो वा। अन्यद्ध्यन्येन हेयमुपादेयं वा। न तेनैव तद् यस्य कस्यचिद् हेयमुपादेयं वा भवति। आत्मा च ब्रह्म सर्वान्तरात्मत्वादविषयम्, अतोऽन्यस्याऽपि न हेयमुपादेयं वा, अन्याभावाच्च।

'इति शुश्रुम पूर्वेषाम्' इत्यागमोपदेशः। 'व्याचचक्षिरे' इत्यस्वातन्त्र्यं तर्क-प्रतिषेधार्थम्। ये नः तद् ब्रह्म उक्तवन्तः, ते नित्यवेव आगमं ब्रह्मप्रतिपादकं व्याख्यातवन्तः, न पुनः स्वबुद्धिप्रभवेण तर्केण उक्तवन्तः इति आगमपारम्पर्याविच्छेदं दर्शयति विद्यास्तुतये। तर्कस्त्वनवस्थितो भ्रान्तोऽपि भवतीति।। ३।।



Scanned with CamScanner

NOTES

## पदभाष्यम्

*अवतरणम्*–'अन्यदेव तद् विदितादथो अविदितादधि' इत्यनेन वाक्येन आत्मा ब्रह्मेति प्रतिपादिते श्रोतुराशङ्का जाता–'कथं नु आत्मा ब्रह्म? आत्मा हि नाम अधिकृतः कर्मणि उपासने च संसारी कर्म उपासनं वा साधनमनुष्ठाय ब्रह्मादिदेवान् स्वर्गं वा प्राप्तुमिच्छति। तत् तस्मादन्य उपास्यो विष्णुरीश्वर इन्द्रः प्राणो वा ब्रह्म भवितुमर्हति, न त्वात्माः लोकप्रत्ययविरोधात्।' यथाऽन्ये तार्किका 'ईश्वरादन्य आत्मा' इत्याचक्षते, तथा कर्मिणः 'अमुं यज, अमुं यज' इत्यन्या एव देवता उपासते। तस्माद् युक्तं यद् विदितमुपास्यं तद् ब्रह्म भवेत्, ततोऽन्य उपासक' इति। तामेतामाशङ्कां शिष्यलिङ्गेन उपलक्ष्य तद्वाक्याद् वा आह–'मैवं शङ्किष्ठाः–'

**यद् वाचाऽनभ्युदिनं येन वागभ्युद्यते।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ ४॥**

## भावार्थदीपिका

**अन्वयः**–यद् वाचा अनभ्युदितम्, येन वाग् अभ्युद्यते, त्वं तत् एव ब्रह्म विद्धि, इदं (ब्रह्म) न विद्धि, यत् इदम् उपासते॥ ४॥

## पदभाष्यम्

चैतन्यमात्रस्वरूपम्-यत् = चैतन्यमात्रसत्ताकम्, वाचा = वागिति जिह्वामूलादिषु अष्टसु स्थानेषु विषक्तम् विभक्तम् आग्नेयं वर्णानाम् अभिव्यञ्जकम् करणम्, वर्णाश्च अर्थसङ्केतपरिच्छिन्ना एतावन्त एवं क्रमप्रयुक्ता इति; एवं तदभिव्यङ्ग्यः शब्दः पदं वागिति उच्यते; 'अकारो वै सर्वा वाक्, सैषा स्पर्शान्तस्थोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति' (ऐ.आ. २।३।७।१३) इति श्रुतेः। मितममितं स्वरः सत्याऽनृते एष विकारो यस्यास्तया वाचा पदत्वेन परिच्छिन्नया करणगुणवत्या–अनभ्युदितम् अप्रकाशितम् अनभ्युक्तम्।

## पदभाष्यम्

*येन वागभ्युद्यते*–येन ब्रह्मणा विवक्षितेऽर्थे सकरणा वाक् अभ्युद्यते चैतन्यज्योतिषा प्रकाश्यते, प्रयुज्यत इत्येतद्। 'यद् वाचो ह वाक्' (के.उ. १।२) इत्युक्तम्, 'वदन् वाक्' (बृ.उ. १।४।७), 'यो वाचमन्तरो यमयति'



Scanned with CamScanner

(बृ.उ. ३।७।१७) इत्यादि च वाजसनेयके। 'या वाक् पुरुषेषु, सा धोषेषु प्रतिष्ठिता, कश्चित् तां वेद ब्राह्मण:' इति प्रश्नमुत्याद्य प्रतिवचनमुक्तम्–'सा वाग् यया स्वप्ने भाषते' इति। सा हि वक्तुर्वक्तिर्नित्या वाक् चैतन्य-ज्योति:स्वरूपा, 'न हि वक्तुर्वक्तेर्विपरिलोपो विद्यते' (बृ.उ. ४।३।२६) इति श्रुते:।

## पदभाष्यम्

'तदेव ब्रह्म त्वं विद्धि' इत्यादि। तदेव = आत्मस्वरूपम्, ब्रह्म = निरतिशयं भूमाख्यं 'बृहत्वाद् ब्रह्मे'ति विद्धि = विजानीहि त्वम्। यैर्वागाद्युपाधिभि: 'वाचो ह वाक्, चक्षुषश्चक्षु: श्रोत्रस्य श्रोत्रं, मनसो मन:, कर्ता भोक्ता, विज्ञाता, नियन्ता, प्रशासिता, विज्ञानमानन्दं ब्रह्म' इत्येवमादय: संव्यवहारा असंव्यवहारे निर्विशेषे परे साम्ये ब्रह्मणि प्रवर्तन्ते, तान् व्युदस्य आत्मानमेव निर्विशेषं ब्रह्म विद्धीति एवशब्दार्थ:। 'नेदं ब्रह्म यदिदम्' इत्युपाधिविशिष्टमनात्मेश्वरादि उपासते = ध्यायन्ति। 'तदेव ब्रह्म त्वं विद्धि' इत्युक्तेऽपि 'नेदं ब्रह्म' इत्यनात्मनोऽब्रह्मत्वं पुनरुच्यते नियमार्थम्, अन्यब्रह्मबुद्धिपरिसंख्यानार्थं वा।। ४।।

## वाक्यभाष्यम्

'यद्वाचे'ति मन्त्रानुवादो दृढप्रतीते:। 'अन्यदेव तद्विदितादि'ति योऽयमागमार्थो ब्राह्मणोक्तोऽस्यैव द्रढिम्ने मन्त्रा 'यद्वाचा' इत्यादय: पठ्यन्ते। यद् = ब्रह्म, वाचा = शब्देन, अनभ्युदितम् = अनभ्युक्तम्, अप्रकाशितमित्येतत्। 'येन वागभ्युद्यत' इति वाक्प्रकाशहेतुत्वेनोक्ति:। येन प्रकाश्यत इति वाचोऽभिधानस्याऽभिधेय-प्रकाशकत्वस्य हेतुत्वमुच्यते ब्रह्मण:। उक्तं च–'केनेषितां वाचमिमां वदन्ति', 'यद् वाचो ह वाचिमि'ति। 'तदेव ब्रह्म त्वं विद्धी'त्यविषयत्वेन ब्रह्मण आत्मन्यवस्थापनार्थ आम्नाय:। यद् वाचाऽनभ्युदितं वाक्प्रकाशनिमित्तं चेति ब्रह्मणोऽविषयत्वेन वस्त्वन्तरजिघृक्षां निवर्त्य स्वात्मन्येवाऽवस्थापयति आम्नाय:, 'तदेव ब्रह्म त्वं विद्धी'ति यत्नत उपरमयति। 'नेदमि'त्युपास्यप्रतिषेधाच्च।। ४।।

**यन्मनसा न मनुते येनाऽऽहुर्मनो मतम्।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। ५।।**

## भावार्थदीपिका

**अन्वय:**–यत् मनसा न मनुते, मन: येन मतम् आहु: त्वं तदेव ब्रह्म विद्धि, न इदम्, यत् इदम् उपासते।। ५।।



Scanned with CamScanner

## पदभाष्यम्

'यन्मनसा न मनुते'–'मन' इत्यन्तःकरणं बुद्धिमनसोरेकत्वेन गृह्यते। 'मनुनेऽनेनेति मनः' सर्वकरणसाधारणम्, सर्वविषयव्यापकत्वात्। 'कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव' (बृ.उ. १।५।३) इति श्रुतेः कामादिवृत्तिमन्मनः। तेन मनसा, यत् = चैतन्यज्योतिर्मन- सोऽवभासकं न मनुते = न सङ्कल्पयति नाऽपि निश्चिनोति लोकः, मनसोऽवभासकत्वेन नियन्तृत्वात्। सर्वविषयं प्रति प्रत्यगेवेति, स्वात्मनि न प्रवर्ततेऽन्तःकरणम्। अन्तःस्थेन हि चैतन्यज्योतिषाऽवभासितस्य मनसो मननसामर्थ्यम्; तेन सवृत्तिकं मनो येन = ब्रह्मणा मतं = विषयीकृतं व्याप्तम्, आहुः = कथयन्ति ब्रह्मविदः। तस्मात् तदेव मनस आत्मानं प्रत्यक्चेतयितारं ब्रह्म विद्धि। 'नेदमि'त्यादि पूर्ववत्।। ५।।

NOTES

## वाक्यभाष्यम्

'यन्मनसा' इत्यादि समानम्। 'मनो मतमि'ति येन ब्रह्मणा मनोऽपि विषयीकृतं नित्यविज्ञानस्वरूपेण इत्येतत्। सर्वकरणानामविषयम्, तानि च सव्यापाराणि सविषयाणि नित्यविज्ञानस्वरूपावभासतया येनाऽवभास्यन्त इति श्लोकार्थः। 'क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति' (गीता १३।३३) इति स्मृतेः। 'तस्य भासा' (मु.उ. २।५।१०) इति चाऽथर्वणे।। ५।।

**यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। ६।।**

## भावार्थदीपिका

**अन्वयः**–यत् चक्षुषा न पश्यति, येन चक्षूंषि पश्यति, तदेव ब्रह्म त्वं विद्धि, नेदम्, यदिदम् उपासते।। ६।।

## पदभाष्यम्

'यच्चक्षुषा न पश्यति न विषयीकरोति अन्तःकरणवृत्तिसंयुक्तेन लोकः, येन चक्षूंषि अन्तःकरणवृत्तिभेदभिन्नाश्चक्षुर्वृत्तीः पश्यति चैतन्यात्मज्योतिषा विषयीकरोति व्याप्नोति, तदेवे'त्यादि पूर्ववत्।। ६।।



Scanned with CamScanner

NOTES

**यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। ७।।**

## भावार्थदीपिका

**अन्वयः**–यत् श्रोत्रेण न शृणोति, येन इदं श्रोत्रं श्रुतम्, तदेव ब्रह्म त्वं विद्धि, न इदम्, यत् इदम् उपासते।। ७।।

## पदभाष्यम्

'यच्छ्रोत्रेण न शृणोति'–दिग्देवताधिष्ठितेनाऽऽकाशकार्येण मनोवृत्तिसंयुक्तेन न विषयीकरोति लोकः। 'येन श्रोत्रमिदं श्रुतम्'–यत् प्रसिद्धं चैतन्यात्मज्योतिषा विषयीकृतम्, 'तदेवे'त्यादि पूर्ववत्।। ७।।

**यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। ८।।**

**।। इति केनोपनिषदि प्रथमः खण्डः।। १।।**

## पदभाष्यम्

यत्–'प्राणेन' = घ्राणेन पार्थिवेन नासिकापुटान्तरवस्थितेनाऽन्तः–करणप्राण–वृत्तिभ्यां सहितेन (न प्राणिति) गन्धवन्न विषयीकरोति, येन चैतन्यात्मज्योतिषाऽव–भास्यत्वेन स्वविषयं प्रति प्राणः प्रणीयते; 'दतेवे'त्यादि सर्वं समानम्।। ८।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषत्पदभाष्ये प्रथमः खण्डः।। १।।

## वाक्यभाष्यम्

**'येन प्राण' इति क्रियाशक्तिरपि आत्मविज्ञाननिमित्ता इत्येतत्।। ८।।**

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषत्वाक्यभाष्ये प्रथमः खण्डः।। १।।



Scanned with CamScanner

NOTES

## ॥ अथ द्वितीयः खण्डः॥

### पदभाष्यम्

ब्रह्मणोऽवेद्यत्वम्–एवं 'हेयोपादेयविपरीतस्त्वमात्मा ब्रह्मे'ति प्रत्यायितः शिष्यः 'अहमेव ब्रह्मे'ति, 'सुष्ठु वेदाऽहमि'ति मा गृह्णीयादित्याशयादाह आचार्यः शिष्यबुद्धिविचालनार्थम्–'यदी'त्यादि।

ननु इष्टैव 'सुवेदाऽहमि'ति निश्चिता प्रतिपत्तिः? सत्यम्, इष्टा निश्चिता प्रतिपत्तिः; नहि 'सु वेदाहमि'ति। यद्धि वेद्यं वस्तु विषयीभवति, तत् सुष्ठुवेदितुं शक्यम्, दाह्यमिव दग्धुम् अग्नेर्दग्धुः न तु अग्नेः स्वरूपमेव।

सर्वस्व हि वेदितुः स्वात्मा ब्रह्मे'ति सर्ववेदान्तानां सुनिश्चितोऽर्थः। इह च तदेव प्रतिपादितं प्रश्नपतिवचनोक्त्या 'श्रोत्रस्य श्रोत्रम्' इत्याद्यया। 'यद् वाचाऽनभ्युदितमि'ति विशेषतोऽवधारितम्। ब्रह्मवित्सम्प्रदायनिश्चयश्चोक्तः 'अन्यदेव तद् विदितादथो अविदितादधी'ति। उपन्यस्तमुपसंहरिष्यति च 'अविज्ञातं विज्ञानतां विज्ञातमविजानताम्' इति। तस्माद् युक्तमेव शिष्यस्य 'सु वेदे'ति बुद्धिं निराकर्तुम्।

न हि वेदिता वेदितुर्वेदितुं शक्यः अग्निर्दग्धुरिव दग्धमग्नेः। नर चाऽन्यो वेदिता ब्रह्मणोऽस्ति यस्य वेद्यमन्यत् स्याद् ब्रह्म। 'नाऽन्यदतोऽस्ति विज्ञातृ' (बृ. उ. ३. ८. ११) इत्यन्तो विज्ञाता प्रतिषिध्यते। तस्मात् 'सुष्ठुवेदाऽहं ब्रह्मे'ति प्रतिपत्तिर्मिथ्यैव। तस्माद् युक्तमेवाऽऽह आचार्यः 'यदी'त्यादि।

**यदि मन्यसे सुवेदिति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम्।**
**यदस्य त्वं यदस्य देवेष्वथ नु मीमाँस्यमेव ते मन्ये विदितम्॥ १॥**

### पदभाष्यम्

यदि = कदाचित् मन्यसे 'सुवेदि'ति = 'सुष्ठु वेदाऽहं ब्रह्मे'ति। कदाचिद् यथाश्रुतं दुर्विज्ञेयमपि क्षीणदोषः सुमेधाः कश्चित् प्रतिपद्यते, कश्चिन्न इति साशङ्कमाह 'यदी'त्यादि।

दृष्टं च 'य एषोऽक्षिणि पुरुषो दृश्यत एव आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म' (छा. उ. ८. ७. ४) इत्युक्ते प्राजापत्यः पण्डितोऽप्यसुरराड् विरोचनः स्वभावदोषवशादनुपपद्यमानमपि विपरीतमर्थं शरीरमात्मे'ति प्रतिपन्नः।



Scanned with CamScanner

NOTES

तथेन्द्रो देवराट् सकृद् द्विस्त्रिरुक्तं चाऽप्रतिपद्यमानः स्वभावदोषक्षयमपेक्ष्य चतुर्थे पर्याये प्रथमोक्तमेव ब्रह्म प्रतिपान्नवान्।

लोकेऽपि एकस्माद् गुरोः शृण्वतां कश्चिद् यथावत् प्रतिपद्यते, कश्चिदयथावत्, कश्चिद् विपरीतं, कश्चिन्न प्रतिपद्यते। किमु वक्तव्यमतीन्द्रियमात्मतत्त्वम्? अत्र हि विप्रतिपन्नाः सदसद्वादिनस्तार्किकाः सर्वे। तस्माद् विदितं ब्रह्मेति सुनिश्चितोक्तमपि विषमप्रतिपत्तित्वाद् 'यदि मन्यसे' इत्यादि साशङ्कं वचनं युक्तमेव आचार्यस्व। दहरम् अल्पमेवापि नूनं त्वं वेत्थ जानीषे ब्रह्मणो रूपम्।

## पदभाष्यम्

*ब्रह्मण औपाधिकभेदाः*–किमनेकानि ब्रह्मणो रूपाणि महान्त्यर्भकाणि च, येनाऽऽह 'दहरमेवे'त्यादि?

बाढम्; अनेकानि हि नामरूपोपाधिकृतानि ब्रह्मणो रूपाणि, न स्वतः। स्वतस्तु 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्' (क. उ. १।३।१५, नृसिंहोत्तर. ९, मुक्तिक. २।७२) इति शब्दादिभिः सह रूपाणि प्रतिषिध्यन्ते।

ननु येनैव धर्मेण यद् रूप्यते, तदेव तस्य स्वरूपमिति ब्रह्मणोऽपि येन विशेषेण निरूपणं तदेव तस्य स्वरूपं स्यात्। अत उच्यते–चैतन्यं पृथिव्यादीनामन्यतमस्य सर्वेषां विपरिणतानां वा धर्मो न भवति, तथा श्रोत्रादीनामन्तः करणस्य च धर्मो न भवतीति ब्रह्मणो रूपमिति ब्रह्म रूप्यते चैतन्येन।

तथा चोक्तम्–'विज्ञानमानन्दं ब्रह्म' (बृ. उ. ३।९।२८) 'विज्ञानघन एव' (बृ. उ. २।४।१२) सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उ. २।१।१) 'प्रज्ञानं ब्रह्म' (ऐ. उ. ५।३) इति च ब्रह्मणो रूपं निर्दिष्टं श्रुतिषु।

सत्यमेवम्; तथापि तदन्तःकरणदेहेन्द्रियोपाधिद्वारेणैव विज्ञानादिशब्दैर्निर्दिश्यते, तदनुकारित्वाद् देहादिवृद्धिसङ्कोचच्छेदादिषु नाशेषु च, न स्वतः। स्वतस्तु 'अविज्ञातं विजानतां विज्ञातमविजानताम्' (केन. उ. २।३) इति स्थितं भविष्यति।

## पदभाष्यम्

'यदस्य' 'ब्रह्मणो रूपमि'ति पूर्वेण सम्बन्धः। न केवलम् ['श्रोत्रस्य श्रोत्रम्' इत्यादि।] अध्यात्मोपाधिपरिच्छिन्नस्याऽस्य ब्रह्मणो रूपं तवमल्पं वेत्थ;



Scanned with CamScanner

NOTES

यदप्यधिदैवतोपाधिपरिच्छिन्नस्याऽस्य ब्रह्मणो रूपं देवेषु वेत्थ त्वम्, तदपि नूनं दहरमेव वेत्थ इति मन्येऽहम्। यदध्यात्मं यदपि देवेषु यदधिदैवं तदपि च उपाधिपरिच्छिन्त्वाद् दहरत्वान्न निवर्तते। यत् तु विध्वस्तसर्वोपाधिविशेषं शान्तमनन्तमेकमद्वैतं भूमाख्यं नित्यं ब्रह्म, न तत् सुवेद्यमित्याशयः।

यत एवम् 'अथ नु' तस्मात् मन्ये अद्याऽपि 'मीमांस्यं' विचार्यमेव 'ते' तव ब्रह्म। एवमाचार्योक्तः शिष्य एकान्त उपविष्टः समाहितः सन् यथोक्तमाचार्येण आगममर्थतो विचार्य, तर्कतश्च निर्धार्य, स्वानुभवं कृत्वा, आचार्यसकाशमुपगम्य उवाच–'मन्येऽहमथेदानीं विदितं (मया) ब्रह्मेति'।। १।।

## वाक्यभाष्यम्

'यदि मन्यसे सुवेद' इति शिष्यबुद्धिविचालना गृहीतस्थिरतायै। विदिताविदिताभ्यां निवर्त्य बुद्धिं शिष्यस्य स्वात्मनि अवस्थाप्य 'तदेव ब्रह्म त्वं विद्धी'ति स्वाराज्येऽभिषिच्य उपास्यप्रतिषेधेन अथास्य बुद्धिं विचालयति।

'यदि मन्यसे सुवेद अहं ब्रह्म' इति त्वं ततोऽल्पमेव ब्रह्मणो रूपं वेत्थ त्वमिति नूनं निश्चितं मन्यत इत्याचार्यः। 'सा पुनर्विचालना किमर्थे' त्युच्यते–पूर्वगृहीते वस्तुनि बुद्धेः स्थिरतायै। 'देवेष्वपि सुवेदाऽहमि'ति मन्यते यः, सोऽप्यस्य ब्रह्मणो रूपं दहरमेव वेत्ति नूनम्। कस्मात्? अविषयत्वात् कस्यचिद् ब्रह्मणः।

अथवाऽल्पमेवाऽस्याऽऽध्यात्मिकं मनुष्येषु देवेषु च। आधिदैविकमस्य ब्रह्मणो यद् रूपं तदिति सम्बन्धः। 'अथ न्वि'ति हेतुर्मीमांसायाः। यस्माद् दहरमेव सुविदितं ब्रह्मणो रूपम्, 'अन्यदेव तद् विदितादि' त्युक्तत्वात्। 'सुवेदे'ति च मन्यसे अतोऽल्पमेव वेत्थ त्वं ब्रह्मणो रूपं यस्मादथ नु मीमांस्यमेव अद्यापि ते तव ब्रह्म विचार्यमेव यावद् विदिताविदितप्रतिषेधागमार्थानुभव इत्यर्थः।

'मन्ये विदितमि'ति शिष्यस्य मीमांसानन्तरोक्तिः प्रत्ययत्रयसङ्गतेः। सम्यग्वस्तुविनिश्चयाय विचालितः शिष्य आचार्येण 'मीमांस्यमेव ते' इति चोक्त एकान्ते समाहितो भूत्वा विचार्य यथोक्तं सुपरिनिश्चितः सन्नाऽऽह आगमाऽऽचार्याऽऽत्मानुभव-प्रत्ययत्रयस्यैकविषयत्वेन सङ्गत्यर्थम्। एवं हि 'सुपरिनिष्ठा विद्या सफला स्यात्, न अनिश्चिता' इति न्यायः प्रदर्शितो भवति, 'मन्ये विदितामि'ति परिनिष्ठतनिश्चितविज्ञानप्रतिज्ञाहेतूक्तेः।। १।।



Scanned with CamScanner

NOTES

**नाहं मन्ये सुवेदेति नो न वेदेति वे च।**
**यो नस्तद् वेद तद् वेद नो न वेदेति वेद च॥ २॥**

**अन्वयः**—अहं (ब्रह्म) सुवेद इति न मन्ये, न वेद इति नो; वेद च (न वेद च); नः यः तद् वेद (सः) तद् वेद, न वेद इति नो, वेद च॥ २॥

## पदभाष्यम्

**(विदितं) कथमिति? शृणुत—**

'नाऽहं मन्ये सुवेदेति'—नेवाहं मन्ये सुवेद ब्रह्मेति। 'नैव तर्हि विदितं त्वया ब्रह्म' इत्युक्ते आह—'नो न वेदेति वे च।' 'वेद चे'ति च 'शब्दान्न' वेद च।' ननु विप्रतिषिद्धम्—'नाऽहं मन्ये सुवेदेति नो न वेदेति वेद च' इति। यदि न मन्यसे 'सुवेदे'ति कथं मन्यसे 'वेद चे'ति? अथ मन्यते वेदैवे'ति, कथं न मन्यसे 'सुवेदे'ति? एकं वस्तु येन ज्ञायते, तेनैव तदेव वस्तु सुविज्ञायत इति विप्रतिषिद्धं संशयविपययौ वर्जयित्वा। न च ब्रह्म संशयितत्वेन ज्ञेयं विपरीतत्वेन वेति नियन्तुं शक्यम्। संशयविपर्ययौ हि सर्वत्राऽनर्थकत्वेनैव प्रसिद्धौ।

एवमाचार्येण विचाल्यमानोऽपि शिष्यो न विचचाल, 'अन्यदेव तद् विदितादथो अविदितादधि' इत्याचार्योक्तागमसम्प्रदायबलात् उपपत्त्यनुभवबलाच्च; जगर्ज च ब्रह्मविद्यायां दृढ़निश्चयतां दर्शयन्नात्मनः। कथमित्युच्यते—'यो यः कश्चिद् नः अस्माकं सब्रह्मचारिणां मध्ये तन्मदुक्तं वचनं तत्त्वतो वेद, स तद् ब्रह्म वेद।'

**किं पुनस्तद्वचनमित्यत आह**—'नो न वेदेति वेद च' इति। यदेव 'अन्यदेव तद् विदितादथो अविदितादधि' **इत्युक्तम् तदेव वस्तु, अनुमानानुभवाभ्यां संयोज्य निश्चितं वाक्यान्तरेण 'नो न वेदेति वेद च' इत्यवोचत् आचार्यबुद्धिसंवादार्थं मन्दबुद्धिग्रहणव्यपोहार्थं च। तथा च गर्जितमुपपन्नं भवति—'यो नस्तद् वेद तद् वेद' इति॥ २॥**

## वाक्यभाष्यम्

परिनिष्ठितं सफलं विज्ञानं प्रतिजानीत आचार्यात्मनिश्चययोः तुल्यतायै यस्माद्धेतुमाह 'नाऽह मन्ये सुवेद' इति। 'अहे'त्ववधारणार्थो निपातः, 'नैव मन्य' इत्येतत्। 'यावदपरिनिष्ठितं विज्ञानम्, तावत् सुवेद = सुष्ठु वेदाऽहं ब्रह्म' इति विपरीतो मम निश्चय आसीत्। स उपजगाम भवद्भिः विचालितस्य; यथोक्तार्थमीमांसाफलभूतात् स्वात्मब्रह्मत्वनिश्चयरूपात् सम्यक्प्रत्ययाद् विरुद्धत्वात्।



Scanned with CamScanner

अतो 'नाऽह मन्ये सु वेदे'ति। यस्माच्चैतन्नैव न वेद 'नो न वेदे'ति, 'मन्य' इत्यनुवर्तते, अविदितब्रह्मप्रतिषेधात्। कथं तर्हि मन्यस इत्युक्त आह–'वेच च'। 'च'शब्दाद् 'वेद च न वेद चे'त्यभिप्रायः, विदिताविदिताभ्यामन्यत्वाद् ब्रह्मणः। तस्मा'न्मया विदितं ब्रह्मे'ति मन्य 'इति' वाक्यार्थः।

अथवा–'वेद चे'ति नित्यविज्ञानब्रह्मस्वरूपतया नो न वेद, वेदैव चाऽहम्, स्वरूपविक्रियाभावात्। विशेषविज्ञानं च पराध्यस्तं, न स्वत इति 'परमार्थतो न च वेदे'ति।

'यो नस्तद् वेद तद् वेदे'ति पक्षान्तरनिरासार्थमाम्नाय उक्तार्थानुवादात्। यो योऽस्माकं मध्ये स एव तद् ब्रह्म वेद नाऽन्यः, उपास्य–ब्रह्मवित्त्वादतोऽन्यस्य यथाऽहं वेदेति। 'वेद चे'ति पक्षान्तरे ब्रह्मवित्त्वं निरस्यते। कुतोऽयमर्थोऽवसीयत इत्युच्यते–उक्तानुवादात्। उक्तं हि अनवदति 'यो न वेदेति वेद चेति'।। २।।

**यस्माऽमतं तस्य मतं मतं यस्य न वेद सः।**
**अविज्ञातं विजानतां विज्ञातमविजानताम्।। ३।।**

## भावार्थदीपिका

**अन्वयः**–यस्य अमतम्, तस्य मतम्। यस्य मतम्, सः न वेद। (यतः तत्) विजानताम् अविज्ञातम् अविजानतां विज्ञातम्।। ३।।

## पदभाष्यम्

शिष्याचार्यसंवादात् प्रतिनिवृत्य स्वेन रूपेण श्रुतिः समस्तसंवाद–निर्वृत्तमर्थमेव बोधयति–'**यस्याऽमतमि**'त्यादिना। '**यस्य**' = ब्रह्मविदः, '**अमतम्**' = अविज्ञातम् अविदितं ब्रह्मेति, '**मतम्**' अभिप्रायः निश्चयः, '**तस्य मतं**' = ज्ञातं सम्यग् ब्रह्मेत्यभिप्रायः।

'**यस्य**' पुनः '**मतं**' = ज्ञातं विदितं ब्रह्मेति निश्चयः, '**न वेदैव सः**' = न ब्रह्म विजानाति सः। विद्वदविदुषोर्यथोक्तौ पक्षौ अवधारयति–'**अविज्ञातं विजानतामि**'ति। '**अविज्ञातम्**' = अमतम् अविदितमेव ब्रह्म, '**विजानताम्**' = सम्यग् विदितवताम् इत्येतत्।

'**विज्ञातं**' = विदितं ब्रह्म, '**अविजानताम्**' = असम्यग्दर्शिनाम् इन्द्रियमनोबुद्धिष्वेव आत्मदर्शिनामित्यर्थः। न त्वत्यन्तमेवाऽव्युत्पन्नबुद्धीनाम्। न हि तेषां विज्ञातम् अस्माभिः ब्रह्मेति मतिर्भवति। इन्द्रियमनोबुद्ध्युपाधिषु आत्मदर्शिनां तु ब्रह्मोपाधिविवेकानुपलम्भात्, बुद्ध्याद्युपाधेश्च विज्ञातत्वात्

NOTES



Scanned with CamScanner

NOTES

'विदितं ब्रह्मे'त्युपपद्यते भ्रान्तिरित्यतोऽसम्यग्दर्शनं पूर्वपक्षत्वेन उपन्यस्यते– 'विज्ञातमविजानतामि'ति। अथवा हेत्वर्थ उत्तरार्धोऽविज्ञातमि'त्यादि:।। ३।।

## वाक्यभाष्यम्

'यस्याऽमतम्' इति श्रौतम् आख्यायिकार्थोपसंहारार्थम्। शिष्याचार्योक्ति-प्रत्युक्तिलक्षणया अनुभूतियुक्तिप्रधानया आख्यायिकया योऽर्थः सिद्धः, स श्रौतेन वचनेनाऽऽगमप्रधानेन निगमनस्थानीयेन संक्षेपत उच्यते, सिद्धः, स श्रौतेन वचनेनाऽऽगमप्रधानेन निगमनस्थानीयेन संक्षेपत उच्यते, यदुक्तं विदितादन्यद् वागादीनामगोचरत्वात् मीमांसितं चाऽनुभवोपपत्तिभ्याम्, ब्रह्म तत् तथैव ज्ञातव्यम्।

कस्मात्? यस्याऽमतम्–यस्य = विविदिषाप्रयुक्तप्रवत साधकस्य, अमतम् = अविज्ञातम्, 'अविदितं ब्रह्म' इत्यात्मतत्त्वनिश्चयफलावसानावबोधतया विविदिषा निवृत्ता इत्यभिप्राय:, 'तस्य मतम्' = ज्ञातम्, तेन विदितं ब्रह्म। येनाऽविषयत्वेन आत्मत्वेन प्रतिबुद्धमित्यर्थ:। स सम्यग्दर्शी, यस्य विज्ञानानन्तरमेव ब्रह्मात्मभावस्याऽवसिततत्वात् सर्वतः कार्याभावो विपर्ययेण मिथ्याज्ञानी भवति।

कथम्? 'मतम्' = विदितं, 'ज्ञातं मया ब्रह्मे'ति यस्य विज्ञानम्, स: = मिथ्यादर्शी विपरीतविज्ञानी विदितादन्यत्वाद् ब्रह्मणो न वेद = स न विजानाति।

ततश्च सिद्धम् अवैदिकस्य विज्ञानस्य मिथ्यात्वम् अब्रह्मविषयतया निन्दितत्वात्। तथा कपिल–कणभुगादिसमयस्याऽपि विदितब्रह्मविषयत्वात् अनवस्थिततर्कजन्यत्वाद् विविदिषानिवृत्तेश्च मिथ्यात्वमिति। स्मृतेश्च–

**या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः।**
**सर्वास्ता निष्फलाः प्रोक्तास्तमोनिष्ठा हि ताः स्मृताः।।**

(मनु. स्मृ. १२/९५)

इति विपरीत–मिथ्याज्ञानयोर्नष्टत्वात्।

'अविज्ञातं विजानतां विज्ञातमविजानतामि'ति पूर्वहेतूक्तिः अनुवादस्य आनर्थक्यात्। अनुवादमात्रेऽनर्थकं वचनमिति, पूर्वोक्तयोः 'यस्याऽमतमि'त्यादिना ज्ञानाज्ञानयोः हेत्वर्थत्वेन इदमुच्यते।

'अविज्ञातम्' अविदितमात्मत्वेन अविषयातया ब्रह्म 'विजानतां' यस्मात् तस्मात् तदेव ज्ञानम्। यत् तेषां 'विज्ञातं' = विदितं व्यक्तमेव बुद्ध्यादिविषयं ब्रह्म 'अविजानताम्' = विदिताविदितव्यावृत्तम् आत्मभूतं नित्यविज्ञानस्वरूपम्



Scanned with CamScanner

NOTES

आत्मस्थम् अविक्रियम् अमृतम् अजरम् अभयम् अनन्यत्वादविषयम् इत्येवम् अविजानतां बुद्ध्यादिविषयात्मतयैव नित्यं विज्ञातं ब्रह्म। तस्माद् विदिताविदित-व्यक्ताव्यक्तधर्माध्यारोपेण कार्यकारणभावेन सविकल्पकम्, अयथार्थविषयत्वात्। शुक्तिकादौ रजताद्यध्यारोपणज्ञानवत् मिथ्याज्ञानं तेषाम्।। ३।।

**प्रतिबोधविदितं मतममृतत्वं हि विन्दते।**
**आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्।। ५।।**

## पदभाष्यम्

'अविज्ञातं विजानताम्' इति अवधृतम्। 'यदि ब्रह्म अत्यन्तमेव अविज्ञातम्' (तर्हि) लौकिकानां ब्रह्मविदां च अविशेषः प्राप्तः, 'अविज्ञातं विजानताम्' इति च परस्परविरुद्धम्। कथं नु तद् ब्रह्म सम्यग् विदितं भवति? इत्येवमर्थमाह-

'प्रतिबोधविदितमि'ति। 'प्रतिबोधविदितम्' = बोधं बोधं प्रति विदितम्। 'बोध' शब्देन बौद्धाः प्रत्यया उच्यन्ते। सर्व प्रत्यया विषयीभवन्ति यस्य स आत्मा सर्वबोधान् प्रति बुध्यते। सर्वप्रत्ययदर्शी चिच्छक्तिस्वरूपमात्रः प्रत्ययैरेव प्रत्ययेषु अविशिष्टतया लक्ष्यते, नाऽन्यद् द्वारमन्तरात्मनो विज्ञानाय। अतः बौद्धप्रत्ययप्रत्यगात्मतया विदितं ब्रह्म यदा, तदा तन्मतम्तत् सम्यग्दर्शनमित्यर्थः।

## पदभाष्यम्

*प्रत्ययसाक्षितया ब्रह्मणोऽभेदः*-सर्वप्रत्यदर्शित्वे च उपजननापाय-वर्जितदृक्स्वरूपता नित्यत्वं विशुद्धस्वरूपत्वम् आत्मत्वं निर्विशेषता एकत्वं च सर्वभूतेषु सिद्धं भवेत्; लक्षणभेदाभावाद् व्योम्न इव घट-गिरि-गुहादिषु। विदिताविदिताभ्याम् अन्यद् ब्रह्म इत्यागमवाक्यार्थ एवं परिशुद्ध एव उपसंहृतो भवति। 'दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्ता विज्ञातेर्विज्ञाता' इति हि श्रुत्यन्तरम्।

यदा पुनर्बोधक्रियाकर्तेति बोधक्रियालक्षणेन तत्कर्तारं विजानातीति बोधलक्षणेन विदितं प्रतिबोधविदितमिति व्याख्यायते, यथा यो वृक्षशाखाश्चालयति स वायुरिति तद्वत्; तदा बोधक्रियाशक्तिमान् आत्मा द्रव्यम्, न बोधस्वरूप एव। बोधस्तु जायते विनश्यति च। यदा बोधो जायते, तदा बोधक्रियया सविशेषः। यदा बोधो नश्यति, तदा नष्टबोधोद्रव्यमात्रं निर्विशेषः। तत्र एवं सति विक्रियात्मकः सावयवोऽनित्योऽशुद्ध इत्यादयो दोषा न परिहर्तुं शक्यन्ते।



Scanned with CamScanner

NOTES

## पदभाष्यम्

*ब्रह्मणः स्वपरसंवेद्यताया औपाधिकत्वम्*–**यत्पुनः** 'स्वसंवेद्यता प्रतिबोधविदितमि'त्यस्य वाक्यस्याऽर्थो वर्ण्यते, तत्र भवति सोपाधिकत्वे आत्मनो बुद्ध्युपाधिस्वरूपत्वेन भेदं परिकल्प्य आत्मना आत्मनां वेत्तीति संव्यवहारः–'आत्मन्येवात्मानं पश्यति' (बृ. उ. ४। ४। २३), 'स्वयमेवाऽऽत्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम' (गीता १०। १५) इति। न तु निरुपाधिकस्याऽऽत्मन एकत्वे स्वसंवेद्यता परसंवेद्यता वा सम्भवति। संवेदनस्वरूपत्वात् संवेदनान्तरापेक्षा च न सम्भवति, यथा प्रकाशस्य प्रकाशान्तरापेक्षाया न सम्भवः तद्वत्।

बौद्धपक्षे स्वसंवेद्यतायां तु क्षणभङ्गुरत्वं निरात्मकत्वं च विज्ञानस्य स्यात्।

'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्' (बृ. उ. ४। ३। ३०), 'नित्यं विभुं सर्वगतम्' (मु. उ. १। १। ६), 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयः' (बृ. उ. ४। ४। २५) इत्याद्याः श्रुतयो बाध्येरन्।

## पदभाष्यम्

*प्रतिबोधार्थविचारः*–'यत् पुनः प्रतिबोधशब्देन निर्निमित्तो बोधः प्रतिबोधः यथा सुप्तस्य' इत्यर्थं परिकल्पयन्ति, 'सकृद् विज्ञानं प्रतिबोध' इत्यपरे, निर्निमित्तः सनिमित्तः सकृद्वाऽसकृद्वा प्रतिबोध एव हि सः।

## पदभाष्यम्

*'अमृतत्वं हि विन्दते'*–''अमृतत्वम् अमरणभावं स्वात्मनि अवस्थानं मोक्षं हि यस्माद् 'विन्दते' लभते यथोक्तात्' 'प्रतिबोधात्' प्रतिबोधविदितात्मकात्, तस्मात् 'प्रतिबोधविदितमेव मतमि'त्यभिप्रायः। बोधस्य हि प्रत्यगात्मविषयत्वं च मतममृतत्वे हेतुः। न ह्यात्मनोऽनात्मत्वममृतत्वं भवति। आत्मत्वादात्मनोऽमृतत्वं निर्निमित्तमेव, एवं मर्त्यत्वमात्मनो यदविद्यया अनात्मप्रतिपत्तिः।''

## पदभाष्यम्

*ज्ञानेनाऽमृतत्वप्राप्तिप्रकारः*–कथं पुनर्यथोक्तयाऽऽत्मविद्ययाऽमृतत्वं विन्दत इत्यत आह–'आत्मना' = स्वेन रूपेण, 'विन्दते' = लभते, 'वीर्यम्' = बलं सामर्थ्यम्। धनसहायमन्त्रौषधितपोयोगकृतं वीर्यं मृत्युं न शक्नोत्यभिभवितुम् अनित्यवस्तुकृतत्वात्; आत्मविद्याकृतं तु वीर्यमात्मनैव विन्दते, नाऽन्येन



Scanned with CamScanner

इत्यतोऽनन्यसाधनत्वादात्मविद्यावीर्यस्य तदेव वीर्यं मृत्युं शक्नोत्यभिभवितुम्। यत एवमात्मविद्याकृतं वीर्यमात्मनैव विन्दते अतः 'विद्यया' आत्मविषयया 'विन्दतेऽमृतम्' अमृत्वम्। 'नायमात्मा बलहीनेन लभ्यः' (मु. उ. ३। २। ४) इत्याथर्वणे। अतः समर्थो हेतुः 'अमृतत्वं हि विन्दत' इति।।४।।

NOTES

## वाक्यभाष्यम्

'प्रतिबोधविदितं मतम् इति वीप्सा, प्रत्ययानाम् आत्मावबोधद्वारत्वात्। 'बोधं प्रति बोधं प्रती'ति वीप्सा सर्वप्रत्ययव्याप्त्यर्था। बौद्धा हि सर्वे प्रत्ययाः तप्तलोहवन्नित्यविज्ञानस्वरूपपातमव्याप्तत्वाद् विज्ञानस्वरूपावभासाः, तदन्यावभासश्च आत्मा तद्विलक्षणोऽग्निवदुपलभ्यत इति तेन ते द्वारीभवन्ति आत्मोपलब्धौ। तस्मात् प्रतिबोधावभासप्रत्यगात्मतया यद् विदितं तद् ब्रह्म, तदेव मतं ज्ञातं सम्यग् ज्ञानवत् प्रत्यगात्मविज्ञानम्, न विषयविज्ञानम्। ''आत्मत्वेन प्रत्यगात्मानमैक्षदि'ति च काठके।''

## वाक्यभाष्यम्

*आत्मज्ञानं अमृतत्वनिमित्तम्*–अमृतत्वं हि विन्दते' इति हेतुवचनम्, विपर्यये मृत्युप्राप्तेः। विषयात्मविज्ञाने हि मृत्युः प्रारभत इति आत्मविज्ञान-ममृतत्वनिमित्तम् इति युक्तं हेतुवचन 'ममृतत्वं हि विन्दत' इति।

आत्मज्ञानेन किममृतत्वमुत्पाद्यते? न, कथं तर्हि? 'आत्मना विन्दते' स्वेनैव नित्यात्मस्वभावेनाऽमृतत्वं विन्दते, नाऽऽलम्बनपूर्वकम्। 'विन्दत्' इति आत्मविज्ञानापेक्षम्। यदि हि विद्योत्पाद्यममृतत्वं स्यात्, अनित्यं भवेत् कर्मकार्यवत्। अतो न विद्योत्पाद्यम्।

## वाक्यभाष्यम्

यदि चाऽऽत्मनैवाऽमृतत्वं विन्दते, किं पुनर्विद्यया क्रियत इत्युच्यते। अनात्मविज्ञानं निवर्तयन्ती सा तन्निवृत्त्या स्वाभाविकस्याऽमृतत्वस्य निमित्तमिति कल्प्यते। यत आह– 'वीर्यं विद्यया विन्दते।' 'वीर्यं' सामर्थ्यमनात्माध्यारोप-मायास्वान्तध्वान्तानभिभाव्यलक्षणं बलं 'विद्यया विन्दते।' तच्च किंविशिष्टम्? 'अमृतम्' अविनाशि। अविद्याजं हि वीर्यं विनाशि। विद्ययाऽविद्याया बाध्यत्वात्, न तु विद्याया बाधकोऽस्तीति विद्याजममृतं वीर्यम्। अतो विद्याऽमृतत्वे निमित्तमात्रं भवति। 'नाऽयमात्मा बलहीनेन लभ्यः' (मु. उ. ३। २। ४) इति

NOTES

चाथर्वणे। लोकेऽपि विद्याजमेव बलमभिभवति न शरीरादिसामर्थ्यम्, यथा हस्त्यादेः।

अथवा 'प्रतिबोधविदितं मतमि'ति सकृदेवाऽशेषविपरीतनिरस्तसंस्कारेण स्वप्नप्रतिबोधवद् यद् 'विदितं' तदेव 'मतं' ज्ञातं भवतीति, अथवा गुरूपदेशः 'प्रतिबोधः', तेन वा विदितं मतमिति। उभयत्र 'प्रतिबोध' शब्दप्रयोगोऽस्ति सुप्तप्रतिबुद्धो गुरुणा प्रतिबोधित इति। पूर्वं तु यथार्थम्।। ४।।

## पदभाष्यम्

*अवतरणम्*–कष्टा खलु सुर-नर-तिर्यक्-प्रेतादिषु संसारदुःख-बहुलेषु प्राणिनिकायेषु जन्म-जरा-मरणरोगादिसम्प्राप्तिरज्ञानात्। अतः–

**इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।**
**भूतेषु भूतेषु विचित्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति।।५।।**

।। इति केनोपनिषदि द्वितीयः खण्डः।।२।।

## पदभाष्यम्

(अतः) 'इहैव चे'न्मनुष्योऽधिकृतः समर्थः सन् यदि 'अवेदीत्' आत्मानं यथोक्तलक्षणं विदितवान् यथोक्तेन प्रकारेण, 'अथ' तदा 'अस्ति सत्यम्', मनुष्यजन्मन्यस्मिन् अविनाशोऽर्थवत्ता वा सद्भावो वा परमार्थता वा सत्यं विद्यते।

'न चेदिहाऽवेदीदि'ति। न चेदिह जीवंश्चेत् अधिकृतोऽवेदीत् = न विदितवान्, तदा 'महती' दीर्घाऽनन्ता 'विनष्टि' र्विनाशनं जन्म-जरा-मरणादिप्रबन्धविच्छेदलक्षणा संसारगतिः।

तस्मादेवं गुणदोषौ विजानन्तो ब्राह्मणाः 'भूतेषु भूतेषु' सर्वभूतेषु स्थावरेषु चरेषु च एकमात्मतत्त्वं ब्रह्म 'विचित्य' विज्ञाय साक्षात्कृत्य 'धीराः' धीमन्तः 'प्रेत्य' व्यावृत्त्य ममाहंभावलक्षणात् अविद्यारूपादस्मात् लोकात् उपरम्य सर्वात्मैकभावमद्वैतमापन्नाः सन्तः 'अमृता भवन्ति' ब्रह्मैव भवन्तीत्यर्थः। 'स यो ह वैतत् परं ब्रह्म वेद ब्रह्मैव भवति' (मु. उ. ३। २। ९) इति श्रुतेः।। ५।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ केनोपनिषत्पदभाष्ये द्वितीयः खण्डः ।। २।।



Scanned with CamScanner

## वाक्यभाष्यम्

'इह चेदवेदीत्' इत्यवश्यकर्तव्यतोक्तिः, विपर्यये विनाशश्रुतेः। इह मनुष्यजन्मनि सति अवश्यमात्मा वेदितव्य इत्येतद् विधीयते। कथम्? 'इह चेदवेदीद्' विदितवान्? 'अथ सत्यं परमार्थतत्त्वम्' 'अस्ति' अवाप्तम्, तस्य जन्म सफलमित्यभिप्रायः। 'न चेदिहाऽवेदीत्' न विदितवान् वृथैव जन्म। अपि च 'महती विनष्टिः' महान् विनाशो जन्ममरणप्रबन्धाविच्छेदप्राप्तिलक्षणः स्याद् यतः, तस्मादवश्यं तद्विच्छेदाय ज्ञेय आत्मा।

ज्ञानेन तु किं स्यात्? इत्युच्यते–'भूतेषु भूतेषु' चराचरेषु सर्वेष्वित्यर्थः, 'विचित्य' पृथङ् निष्कृष्याऽऽत्मतत्त्वं संसारधर्मैरस्पृष्टमात्मभावेनोपलभ्येत्यर्थः। अनेकार्थत्वाद् धातूनाम्। न पुनश्चित्वेति सम्भवति, विरोधात्; 'धीराः' धीमन्तो विवेकिनो विनिवृत्तबाह्यविषयाभिलाषाः 'प्रेत्य' मृत्वा 'ऽस्माल्लोकात्' शरीराद्यनात्मलक्षणाद् व्यावृत्तममत्वाहंकाराः सन्त इत्यर्थः। 'अमृता' अमरणधर्माणो नित्यविज्ञानामृतत्वस्वभावा एव भवन्ति।। ५।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमच्छङ्करभगवत्पादकृतौ केनोपनिषत्वाक्यभाष्ये द्वितीयः खण्डः।। २।।



Scanned with CamScanner

NOTES

# केनोपनिषद्

## ॥ अथ तृतीयः खण्डः॥

## यक्षोपाख्यानम्

**ब्रह्म ह देवेभ्यो विजिग्ये।**
**तस्य ह ब्रह्मणो विजये देवा अमहीयन्त॥ १॥**

## भावार्थदीपिका

**अन्वयः**–ब्रह्म ह देवेभ्यः विजिग्ये। तस्य ह ब्रह्मणः विजये देवाः अमहीयन्त।

## पदभाष्यम्

**आख्यायिकाप्रयोजनम्**
**अविज्ञातं विजानतां विज्ञातमविजानताम्' ( २। ९ )**

इत्यादिश्रवणाद् यदस्ति तद् विज्ञातं प्रमाणैः यन्नाऽस्ति तत् अविज्ञातं शशविषाणकल्पमत्यन्तमेवाऽसद् दृष्टम्; तथेदं ब्रह्माऽविज्ञातत्वादसदेवेति मन्दबुद्धीनां व्यामोहो मा भूदिति तदर्था इयमाख्यायिका आरभ्यते।

तदेव हि ब्रह्म सर्वप्रकारेण प्रशास्तृ देवानामपि परो देवः, ईश्वराणामपि परमेश्वरः, दुर्विज्ञेयः, देवानां जयहेतुः, असुराणां पराजयहेतुः; तत्कथं नास्तीत्येतस्याऽर्थस्याऽनुकूलानि ह्युत्तराणि वचांसि दृश्यन्ते।

अथवा ब्रह्मविद्यायाः स्तुतये। कथम्? ब्रह्मविज्ञानाद्धि अग्न्यादयो देवा देवानां श्रेष्ठत्वं जग्मुः। ततोऽप्यतितराम् इन्द्र इति।

अथवा दुर्विज्ञेयं ब्रह्मेत्येतत् प्रदश्यर्ते। येनाऽग्न्यादयोऽतितेजसोऽपि क्लेशेनैव ब्रह्म विदितवन्तस्तथेन्द्रो देवानामीश्वरोऽपि सन्निति।

वक्ष्यमाणोपनिषद्विधिपरं वा सर्वम्, ब्रह्मविद्याव्यतिरेकेण प्राणिनां कर्तृव्य-भोक्तृत्वाद्यभिमानो मिथ्या इत्येतद्दर्शनार्थं वा आख्यायिका, यथा देवानां जयाद्यभिमानः तद्वदिति।

## पदभाष्यम्

'ब्रह्महे'ति। 'बह्म' यथोक्तलक्षणं परम्, 'ह' किल 'देवेभ्यः' अर्थाय



Scanned with CamScanner

'विजिग्ये' जयं लब्धवत्, देवानामसुराणां च संग्रामेऽसुरान् जित्वा जगदरातीन् ईश्वरसेतुभेत्तृन् देवेभ्यो जयं तत्फलं च प्रायच्छत् जगतः स्थेम्ने। तस्य ह किल ब्रह्मणो विजये 'देवाः' अग्न्यादयः 'अमहीयन्त' महिमानं प्राप्तवन्तः॥ १॥

NOTES

## वाक्यभाष्यम्

*यक्षोपाख्यानस्य प्रयोजने विकल्पाः*—'ब्रह्म ह देवेभ्य' इति ब्रह्मणो दुर्विज्ञेयतोक्तिर्यत्नाधिक्यार्था। समाप्ता ब्रह्मविद्या, यदधीनः पुरुषार्थः। अत ऊर्ध्वमर्थवादेन ब्रह्मणो दुर्विज्ञेयतोच्यते। तद्विज्ञाने कथं नु नाम यत्नमधिकं कुर्यादिति।

शमाद्यर्थो वाऽऽम्नायोऽभिमानशातनात्। शमादि वा ब्रह्मविद्यासाधनं विधित्सितम्, तदर्थोऽयमर्थवादाम्नायः। न हि शमादिसाधनरहितस्याऽभिमानरागद्वेषयुक्तस्य ब्रह्मविज्ञाने सामर्थ्यमस्ति, व्यावृत्तबाह्यमिथ्याप्रत्ययग्राह्यत्वाद् ब्रह्मणः। यस्माच्च अग्न्यादीनां जयाभिमानं शातयति। ततश्च ब्रह्मविज्ञानं दर्शयत्यभिमानोपशमे। तस्माच्छमादिसाधनविधानार्थोऽयमर्थवाद इत्यवसीयते।

सगुणोपासनार्थो वाऽपोदितत्वात्। 'नेदं यदिदमुपासत' इत्युपास्यत्वं ब्रह्मणोऽपोदितमपोदितत्वादनुपास्यत्वे प्राप्ते तस्यैव ब्रह्मणः सगुणत्वेनाऽधिदैवत-मध्यात्मं चोपासनं विधातव्यमित्येवमर्थो वा। इत्यधिदैवतं 'तद्वनमुपासितव्यमि'ति हि वक्ष्यति।

## वाक्यभाष्यम्

'ब्रह्मे'ति परः, लिङ्गात्, न ह्यत्र परादीश्वरात् नित्यसर्वज्ञात् परिभूयाऽग्न्यादीस्तृणं वज्रीकर्तुं सामर्थ्यमस्ति। 'तन्न शशाक दग्धुम्' (३। ६) इत्यादिलिङ्गाद् 'ब्रह्म'शब्दवाच्य ईश्वर इत्यवसीयते। न ह्यन्यथाऽग्निस्तृणं दग्धुं नोत्सहते, वायुर्वाऽऽदातुम्। ईश्वरेच्छया तृणमपि वज्रीभवतीत्युपपद्यते। तत्सिद्धिर्जगतो नियतप्रवृत्तेः।

श्रुतिस्मृतिप्रसिद्धिभिर्नित्यसर्वविज्ञान ईश्वरे सर्वात्मनि सर्वशक्तौ सिद्धेऽपि शास्त्रार्थनिश्चयार्थमुच्यते। तस्येश्वरस्य सद्भावसिद्धिः कुतो भवतीत्युच्यते।

## वाक्यभाष्यम्

यदिदं जगद् देव-गन्धर्व-यक्ष-रक्षः-पितृ-पिशाचादिलक्षणं द्युवियत्-पृथिव्यादित्य-चन्द्र-ग्रह-नक्षत्रविचित्रं विविधप्राण्युपभोगयोग्यस्थानसाधनसंबंधि तत् अत्यन्तकुशलशिल्पिभिरपि अत्यन्तं दुर्निर्माणं देशकालनिमित्तानुरूप-



Scanned with CamScanner

NOTES

नियतप्रवृत्तिनृवृत्तिक्रममेतद् भोक्तृकर्मविभागज्ञप्रयत्नपूर्वकं भवितुमर्हति; कार्यत्वे सति यथोक्तलक्षणत्वात्, गृहप्रासाद रथशयनासनादिवत् विपक्ष आत्मादिवत्।

## वाक्यभाष्यम्

कर्मण एवेति चेत्, न; परतन्त्रस्य निमित्तमात्रत्वात्। यदिदमुपभोगवैचित्र्यं प्राणिनां तत्साधनवैचित्र्यं च देशकालनिमित्तानुरूपनियतप्रवृत्तिनिवृत्तिक्रमं च, तन्न नित्यसर्वज्ञकर्तृकम्। किं तर्हि? कर्मण एव तस्याऽचिन्त्यप्रभावत्वात् सर्वैश्च फलहेतुत्वाभ्युपगमात्। सति कर्मणः फलहेतुत्वे किमीश्वराधिककल्पनयेति न नित्यस्येश्वरस्य नित्यसर्वज्ञशक्तेः फलहेतुत्वं चेति चेत्।

## वाक्यभाष्यम्

न कर्मण एवोपभोगवैचित्र्यादि उपपद्येत। कस्मात्? कर्तृतन्त्रत्वात् कर्मणः। चितिमत् प्रयत्ननिर्वृतं हि कर्म तत्प्रयत्नोपरमादुपरतं सद् देशान्तरे कालान्तरे वा नियतनिमित्तविशेषापेक्षं कर्तुः फलं जनयिष्यतीति न युक्तमनपेक्ष्यान्यदात्मनः प्रयोक्तृ। कर्तैव फलकाले प्रयोक्तेति चेन्मया निर्वर्तितोऽसि त्वां प्रयोक्ष्ये फलाय यदात्मानुरूपं फलमिति।

## वाक्यभाष्यम्

न, देशकालनिमित्तविशेषानभिज्ञत्वात्। यदि हि कर्ता देशविशेषाभिज्ञः सन् स्वातन्त्र्येण कर्म नियुञ्ज्यात्, ततोऽनिष्टफलस्याऽप्रयोक्ता स्यात्। न च निर्निमित्तं तदनिच्छयाऽऽत्मसमवेतं तच्चमेवद् विकरोति कर्म।

न चाऽऽत्मकृतमकर्तृसमवेतमयस्कान्तमणिवदाक्रष्टृ भवति, प्रधानकर्तृसमवेतत्वात्कर्मणः।

## वाक्यभाष्यम्

भूताश्रयमिति चेत् न; साधनत्वात्। कर्तृक्रियायाः साधनभूतानि भूतानि क्रियाकालेऽनुभूतव्यापाराणि समाप्तौ च हलादिवत्कर्त्रा परित्यक्तानि न फलं कालान्तरे कर्तुमुत्सहन्ते। न हि हलं क्षेत्राद् व्रीहीन् गृहं प्रवेशयति। भूतकर्मणोश्चाऽचेतनत्वात् स्वतःप्रवृत्यनुपपत्तिः। वायुवदिति चेन्नाऽसिद्धत्वात्। न हि वायोरचितिमतः स्वतः प्रवृत्तिः सिद्धा, रथादिष्वदर्शनात्।



Scanned with CamScanner

## वाक्यभाष्यम्

NOTES

शास्त्रात् कर्मण एवेति चेच्छास्त्रं हि क्रियातः फलसिद्धिमाह नेश्वरादेः 'स्वर्गकामो यजेते'त्यादि। न च प्रमाणाधिगतत्वादानर्थक्यं युक्तम्, न चेश्वरास्तित्वे प्रमाणान्तरमस्तीति चेत्।

न; दृष्टन्यायहानानुपपत्तेः। क्रिया हि द्विविधा दृष्टफला अदृष्टफला च। दृष्टफलाऽपि द्विविधा-अनन्तरफला आगामिफला च। अनन्तरफला गतिभुजिलक्षणा। कालान्तरफला च कृषिसेवादिलक्षणा। तत्राऽनन्तरफला फलापवर्गिण्येव, कालान्तरफला तूत्पन्नप्रध्वंसिनी।

आत्मसेव्याद्यधीनं हि कृषिसेवादेः फलं यतः। न चोभयन्यायव्यतिरेकेण स्वतन्त्रं कर्म ततो वा फलं दृष्टम्। तथा च कर्मफलप्राप्तौ न दृष्टन्यायहानमुपपद्यते। तस्माच्छान्ते यागादिकर्मणि नित्यः कर्तृकर्मफलविभागज्ञः ईश्वरः सेव्यादिवद् यागाद्यनुरूपफलदातोपपद्यते। स चाऽऽत्मभूतः सर्वस्य सर्वक्रियाफलप्रत्ययसाक्षी नित्यविज्ञानस्वभावः संसारधर्मैरसंस्पृष्टः।

## वाक्यभाष्यम्

श्रुतेश्च–'न लिप्यते लोकदुःखेन बाह्यः' (क. उ. २। २। ११), 'जरां मृत्युमत्येति' (बृ. उ. ३। ५। १), 'विजरो विमृत्युः' (छा. उ. ८। ७। १), 'सत्यकामः सत्यसङ्कल्पः' (छा. उ. ८। ७। १), 'एष सर्वेश्वरः' (मा. उ. ६) 'साधु कर्म कारयति' (कौषी. ३।९), 'अनश्नन्नन्यो अभिचाकशीति' (श्वे उ. ४।६) 'एतस्य वा अक्षरस्य प्रशासने' (बृ. उ. ३। ८।९), इत्याद्या असंसारिण एकस्याऽऽत्मनो नित्यमुक्तस्य सिद्धौ श्रुतयः। स्मृतयश्च सहस्रशो विद्यन्ते। न चाऽर्थवादाः शक्यन्ते कल्पयितुम्। अनन्ययोगित्वे सति विज्ञानोत्पादकत्वात्। न चोत्पन्नं विज्ञानं बाध्यते।

## वाक्यभाष्यम्

अप्रतिषेधाच्च। न बेधरो नास्तीति निषेधोऽस्ति। प्राप्त्यभावादिति चेत्, न; उक्तत्वात्। 'न हिंस्यादि' तिवत् प्राप्त्यभावात् प्रतिषेधो नाऽऽरभ्यत इति चेत्, न; ईश्वर-सद्भावे न्यायस्योक्तत्वात्। अथवाऽप्रतिषेधादिति कर्मणः फलदान ईश्वरकालादीनां न प्रतिषेधोऽस्ति। न च निमित्तान्तरनिरपेक्षं केवलेन कर्त्रैव प्रत्युक्तं फलदं दृष्टम्। न च विनष्टोऽपि यागः कालान्तरे फलदो भवति।



Scanned with CamScanner

NOTES

## वाक्यभाष्यम्

सेव्यबुद्धिवत् सेवकेन सर्वज्ञेश्वरबुद्धो तु संस्कृतायां यागादिकर्मणा विनष्टेऽपि कर्मणि सेव्यादिव ईश्वरात् फलं कर्तुर्भवतीति युक्तम्। न तु पुनः पदार्था वाक्यशतेनाऽपि देशान्तरे कालान्तरे वा स्वं स्वं स्वभावं जहति। न हि देशाकालान्तरेषु चाऽग्निरनुष्णो भवति।

## वाक्यभाष्यम्

एवं कर्मणोऽपि कालान्तरे फलं द्विप्रकारमेवोपलभ्यते। बीजक्षेत्रसंस्कार-परिरक्षाविज्ञानवत् कर्त्रपेक्षफलं कृष्यादि, विज्ञानवत्सेव्यबुद्धि संस्कारापेक्षफलं च सेवादि। यागादेः कर्मणस्तथाऽविज्ञानवत्कर्त्रपेक्षफलत्वानुपपत्तौ कालान्तर-फलत्वात् कर्मदेशकालनिमित्तविपाकविभागज्ञबुद्धिसंस्कारापेक्षं फलं भवितुमर्हति, सेवादिकर्मानुरूपफलज्ञसेव्यबुद्धिसंस्कारापेक्षफलस्येव। तस्मात् सिद्धः सर्वज्ञ ईश्वरः सर्वजन्तुबुद्धिकर्मफलविभागसाक्षी सर्वभूतान्तरात्मा। 'यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः' (बृ. उ. ३। ४। १) इति श्रुतेः।

## वाक्यभाष्यम्

स एव चाऽत्राऽऽत्मा जन्तूनाम्। "नाऽन्योऽतोऽस्ति द्रष्टा...श्रोता...मन्ता... विज्ञाता" (बृ. उ. ३। ७। २३), "नाऽन्यदतोऽस्ति विज्ञातृ" (बृ. उ. ३। ८। ११) इत्याद्यात्मान्तरप्रतिषेधश्रुतेः, "तत्त्वमसि" (छा. उ. ६। ८। ७) इति चात्मत्वोपदेशात्। न हि मृत्पिण्डः काञ्चनात्मत्वेनोपदिश्यते।

## वाक्यभाष्यम्

ज्ञान-शक्ति-कर्मोपास्योपासक-शुद्धाशुद्ध-मुक्तामुक्तभेदादात्मभेद एवेति चेत्, न; भेददृष्ट्यपवादात्।

यदुक्तं संसारिण ईश्वरादनन्या इति, तत्र। किं तर्हि? भेद एव संसार्यात्मनाम्। कस्मात्? लक्षणभेदात्, अश्वमहिषवत्। कथं लक्षणभेद इत्युच्यते।

ईश्वरस्य तावन्नित्यं सर्वविषयं ज्ञानं सवितृप्रकाशवत्। तद्विपरीतं संसारिणां खद्योतस्येव। तथैव शक्तिभेदोऽपि। नित्या सर्वविषया चेश्वरशक्तिः विपरीता इतरस्य। कर्म च चित्स्वरूपात्मसत्तामात्रनिमित्तमीश्वरस्य। औष्ण्यस्वरूपद्रव्य-सत्तामात्रनिमित्तदहनकर्मवत्, राजायस्कान्तप्रकाशकर्मवच्च स्वात्माविक्रियारूपम्, विपरीतमितरस्य।



Scanned with CamScanner

NOTES

'उपासीते'ति वचनादुपास्य ईश्वरो गुरुराजवत्। उपासकश्चेतरः शिष्यभृत्यवत्। अपहतपाप्मादिश्रवणान्नित्यशुद्ध ईश्वरः। 'पुण्यो वै पुण्येने'ति वचनाद् विपरीत इतरः। अत एव नित्यमुक्तेश्वरः, नित्यशुद्धियोगात्। संसारीतरः। अपि च यत्र ज्ञानादिलक्षणभेदोऽस्ति तत्र भेदो दृष्टः, यथाऽश्वमहिषयोः। तथा ज्ञानादिलक्षणभेदादीश्वरादात्मनां भेदोऽस्तीति चेत्, न।

## वाक्यभाष्यम्

**(इति चेत्, न।) कस्मात्?** 'अन्योऽसावन्योऽहमस्तीति न स वेद' (बृ. उ. १। ४। १०), 'ते क्षय्यलोका भवन्ति' (छा. उ. ७।२५।२), 'मृत्योः स मृत्युमाप्नोति' (क. उ. २।१।१०), इति भेददृष्टिर्ह्यपोह्यते। एकत्वप्रतिपादिन्यश्च श्रुतयः सहस्रशो विद्यन्ते।

ज्ञानादिभेदस्य औपाधिकत्वम्—यदुक्तं ज्ञानादिलक्षणभेदादित्यत्रोच्यते—(१) न, अनभ्युपगमात्। बुद्ध्यादिभ्यो व्यतिरिक्ता विलक्षणाश्चेश्वराद् भिन्नलक्षणा आत्मानो न सन्ति। एक एवेश्वरश्चात्मा सर्वभूतानां नित्यमुक्तोऽभ्युपगम्यते। बाह्यश्चक्षुर्बुद्ध्यादिसमाहारसन्तानाहङ्कारममत्वादिविपरीतप्रत्ययप्रबन्धाविच्छेद-लक्षणो नित्यशुद्धबुद्धमुक्तविज्ञानात्मेश्वरगर्भोनित्यविज्ञानाभासः चित्तचैत्यबीज-बीजिस्वभावः कल्पितोऽनित्यविज्ञान ईश्वरलक्षणविपरीतोऽभ्युगम्यते, यस्याऽविच्छेदे संसारव्यवहारः विच्छेदे च मोक्षव्यवहारः।

## वाक्यभाष्यम्

(२) अन्यश्च मृत्प्रलेपवत् प्रत्यक्षप्रध्वंसो देवपितृमनुष्यादिभूतविशेषसमाहारः, न पुनश्चतुर्थोऽन्यो भिन्नलक्षणा ईश्वरादभ्युपगम्यते।

(३) बुद्ध्यादिकल्पितात्मव्यतिरेकाभिप्रायेण तु लक्षणभेदात् इत्याश्रयासिद्धो हेतुः, ईश्वरादन्यस्याऽत्मनोऽसत्त्वात्।

## वाक्यभाष्यम्

ईश्वरस्यैव विरुद्धलक्षणत्वमयुक्तमिति चेत् सुखदुःखादियोगश्च।

न, निमित्तत्वे सति लोकविपर्ययाध्यारोपणात् सवितृवत्। यथा हि सविता नित्यप्रकाशरूपत्वात् लोकाभिव्यक्त्यनभिव्यक्तिनिमित्तत्वे सति लोकदृष्टि-विपर्ययेणोदयास्तमयाहोरात्रादिकर्तृत्वाध्यारोपभाग् भवत्येवमीश्वरे नित्यविज्ञानशक्ति-रूपे 'लोकज्ञानापोहसुखदुःखस्मृत्यादिनिमित्तत्वे सति लोकविपरीतबुद्ध्याध्यारोपितं विपरीतलक्षणत्वं सुखदुःखाश्रयत्वं च न स्वतः।



Scanned with CamScanner

NOTES

## वाक्यभाष्यम्

आत्मदृष्ट्यनुरूपाध्यारोपाच्च। यथा घनादिविप्रकीर्णेऽम्बरे येनैव सवितृप्रकाशो न दृश्यते स आत्मदृष्ट्यनुरूपमेवाऽध्यस्यति 'सवितेदानीमिह न प्रकाशयती'ति सत्येव प्रकाशेऽन्यत्र भ्रान्त्या। एवमिह बौद्धादिवृत्त्युद्भवाभिभवाकुलभ्रान्त्याध्यारोपितः सुखदुःखादियोग उपपद्यते।

तत्स्मरणाच्च। तस्यैवेश्वरस्यैव हि स्मरणम्—"मत्तः स्मृतिर्ज्ञानमपोहनं च" (गीता १५। १५) "नाऽदत्ते कस्यचित् पापम्" (गीता ९। १५) इत्यादि। अतो नित्युक्त एकस्मिन् सवितरीव लोकाविद्याध्यारोपितमीश्वरे संसारित्वम्। शास्त्रादिप्रामाण्यादभ्युपगतमसंसारित्वमित्यविरोध इति।

## वाक्यभाष्यम्

एतेन प्रत्येकं ज्ञानादिभेदः प्रत्युक्तः; सौक्ष्म्यचैतन्यसर्वगत्वाद्यविशेषे च भेदहेत्वभावात्, विक्रियावत्त्वे चाऽनित्यत्वात्, मोक्षे च विशेषानभ्युपगमात्, अभ्युपगमे चानित्यत्वप्रसङ्गात्, अविद्यावदुपलभ्यत्वाच्च भेदस्य तत्क्षयेऽनुपपत्तिरिति सिद्धम् एकत्वम्।

तस्मात् शरीरेन्द्रियमनोबुद्धिविषयवेदनासन्तानस्य अहङ्कारसम्बन्धादज्ञान-बीजस्य नित्यविज्ञानान्यनिमित्तस्याऽऽत्मतत्त्वयाथात्म्यविज्ञानाद् विनिवृत्तावज्ञानबीजस्य विच्छेद आत्मनो मोक्षसंज्ञा; विपर्यये च बन्धसंज्ञा, स्वरूपापेक्षत्वादुभयोः।

## वाक्यभाष्यम्

'ब्रह्म ह' इत्यैतिह्यार्थः। पुरा किल देवासुरसंग्रामे जगत् स्थितिपरिपि-पालयिषयाऽऽत्मानुशासनानुवर्तिभ्यो देवेभ्योऽर्थिभ्योऽर्थाय विजिग्येऽजैषीदसुरान्। ब्रह्मण इच्छानिमित्तो विजयो देवानां बभूवेत्यर्थः। तस्य ह ब्रह्मणो-विजये देवा अमहीयन्त। यज्ञादिलोकस्थित्यपहारिष्वसुरेषु पराजितेषु देवा वृद्धिं पूजां वा प्राप्तवन्तः।। १।।

**त ऐक्षन्ता 'ऽस्माकमेवायं विजयीऽस्माकमेवाऽयं महिमे'ति। तद्धैषां विजज्ञौ, तेभ्यो ह प्रादुर्बभूव, तन्न व्यजानत—'किमिदं यक्षामि'।। २।।**

## वाक्यभाष्यम्

तदा आत्मसंस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वज्ञस्य सर्वक्रियाफलसंयोजयितुः प्राणिनां सर्वशक्तेः जगतः स्थितिं चिकीर्षोः अयं जयो महिमा चेत्यजानन्तः ते



Scanned with CamScanner

देवाः ऐक्षन्त ईक्षितवन्तः अग्न्यादिस्वरूपपरिच्छिन्नात्मकृतः 'अस्माकमेवाऽयं विजयः, अस्माकमेवाऽयं महिमा अग्नि-वाय्विन्द्रत्वादिलक्षणो जयफलभूतोऽस्माभिरनुभूयते; नाऽस्मत्प्रत्यगात्मभूतेश्वरकृतः।'

इत्येवं मिथ्याभिमानेक्षणवतां तत् ह किल एषां मिथ्येक्षणं विजज्ञौ विज्ञातवद् ब्रह्म। सर्वेक्षितृ हि तत् सर्वभूतकरणप्रयोक्तृत्वात् देवानां च मिथ्याज्ञानमुपलभ्य 'मैवाऽसुरवद् देवा मिथ्याभिमानात् पराभवेयुरि'ति तदनुकम्पया 'देवान् मिथ्याभिमानापनोदनेनाऽनुगृह्णीयामि'ति तेभ्यः देवेभ्यः ह किल अर्थाय प्रादुर्वभूव स्वयोगमाहात्म्यनिर्मितेनाऽत्यद्भुतेन विस्मापनीयेन रूपेण देवानामिन्द्रियगोचरे प्रादुर्बभूव प्रादुर्भूतवत्। तत् प्रादुभृतं ब्रह्म न व्यजानत नैव विज्ञातवन्तः देवाः 'किमिदम्? यक्षं पूज्यं महद्भूतमि'ति।। २।।

## वाक्यभाष्यम्

'त एक्षन्त' इति मिथ्याप्रत्ययत्वाद्धेयत्वख्यापनार्थमान्नायः। ईश्वरनिमित्ते विजये स्वसामर्थ्यनिमित्तो 'ऽस्माकमेवाऽयं विजयोऽस्माकमेवाऽयं महिमे'त्यात्मनो ज्यादि श्रेयोनिमित्तं सर्वात्मानमात्मस्थं सर्वकल्याणास्पदमीश्वरमेवाऽत्मत्वेन बुद्धवा पिण्डमात्राभिमानाः सन्तो यं मिथ्याप्रत्ययं चक्रुः, तस्य पिण्डमात्रविषयत्वेन मिथ्याप्रत्ययत्वात् सर्वात्मेश्वरयाथात्म्यावबोधेन हातव्यताख्यापनार्थ 'स्तद्धैषामि' 'त्याद्याख्यायिकाम्नायः।'

तद् ब्रह्म ह किलैषां देवानामभिप्रायं मिथ्याहङ्काररूपं विजज्ञौ विज्ञातवत्। ज्ञात्वा च मिथ्याभिमानशातनेन तदनुजिघृक्षया देवेभ्योऽर्थाय तेषामेवेन्द्रियगोचरे नाऽतिदूरे प्रादुर्बभूव। महेश्वरशक्तिमायोपात्तेनाऽत्यन्ताद्भुतेन प्रादुर्भूतं किल केनचिद् रूपविशेषेण। तत् किलोपलभमाना अपि देवा न व्यजानत न विज्ञातवन्तः 'किमिदम् यदेतद् यक्षं पूज्यामि'ति।। २।।

**तेऽग्निमब्रुव'ञ्जातवेद एतद् विजानीहि किमिदं' 'यक्षमि'ति 'तथे'ति।। ३।।**

## भावार्थदीपिका

**अन्वयः**–ते अग्निम् अब्रुवन्–'जातवेदः! एतद् विजानीहि, किम् इदं 'यक्षम्' इति। 'तथा' इति।। ३।।





Scanned with CamScanner

NOTES

## पदभाष्यम्

ते तदजानन्तो देवा: सान्तर्भयास्तद्विजिज्ञासव: अग्निम् अग्रगामिनं जातवेदसं सर्वज्ञकल्पम् अब्रुवन् उक्तवन्त:–'हे जातवेद:! एतद् अस्मद्गोचरस्थं यक्षं विजानीहि विशेषतो बुध्यस्य त्वं नस्तेजस्वी किमेतद् यक्षमि'ति। 'तथास्तु' इति।। ३।।

## वाक्यभाष्यम्

**तदभ्यद्रवत् तमभ्यवदत्–'कोऽसी' 'त्यग्निर्वा जातवेदा व अहमस्मी'ति।। ४।।**

## भावार्थदीपिका

**अन्वय:–**तत् अभ्यद्रवत्, तम् अभ्यवदत्–'क: असि' इति, अग्नि: वा अस्मि, जातवेदा: वा अस्मि' इति अब्रवीत्।। ४।।

## पदभाष्यम्

'तत्' यक्षम् अभ्यद्रवत् = तत् प्रति गतवानग्नि:। तं च गतवन्तं पिपृच्छिषुं तत्समीपेऽप्रगल्भत्वात् तूष्णीभूतं तद् यक्षम् अभ्यवदत् = अग्निं प्रति अभाषत–'कोऽसी'ति। एवं ब्रह्मणा पृष्टोऽग्नि: अब्रवीत्–'अग्निर्वै = अग्निर्नामाऽहं प्रसिद्धो 'जातवेदा' इति च नामद्वयेन प्रसिद्धतयाऽऽत्मानं श्लाघयन्।। ४।।

**'तस्मिँस्त्वयि किं वीर्यमि'त्य त्यपीदँसर्वं दहेयं यदिदं पृथिव्यामि'ति।। ५।।**

## भावार्थदीपिका

**अन्वय:–**'तस्मिन् त्वयि किं वीर्यम्?' इति, 'यदिदं पृथिव्याम्, सर्वमपि इदं दहेयम्' इति।। ५।।

## पदभाष्यम्

इत्येवमुक्तवन्तं ब्रह्माऽवोचत्–'तस्मिन् एवं प्रसिद्धगुणनामवति त्वयि किं वीर्यं सामर्थ्यम्?' इति। सोऽब्रवीत्–इदं जगत् सर्वं दहेयं भस्मीकुर्याम्, यदिदं स्थावरादि पृथिव्याम्' इति। 'पृथिव्यामि'त्युप लक्षणार्थम् यतोऽन्तरिक्षस्थमपि दह्यत एवाऽग्निना।। ५।।



Scanned with CamScanner

तस्मै तृणं निदधा 'वेतद् दहे'ति; तदुपप्रेयाय, सर्वजवेन तन्न शशाक दग्धुम्, स तत एव निववृते–'नैतदशकं विज्ञातुं यदेतद् यक्षमि'ति॥ ६॥'

NOTES

## भावार्थदीपिका

**अन्वयः**–'एतद् दह' इति तस्मै तृणं निदधौ। तत् उपप्रेपाय। सर्वजवेन तत् दग्धुं न शशाक। सः तत एव निववृते, (अहम्) एतद् विज्ञातुं न अशकम्, यत् एतद् यक्षम्' इति॥ ६॥

## पद्भाष्यम्

तस्मै एवमभिमानवते ब्रह्म तृणं निदधौ पुराऽग्नेः स्थापितवत्। ब्रह्मणा 'एतत् तृणमात्रं ममाऽग्रतो दह। न चेदसि दग्धुं समर्थः, मुञ्च दग्धृत्वाभिमानं सर्वत्र' 'इत्युक्तस्तत् तृणमुपप्रेयाय = तृणसमीपं गतवान्। सर्वजवेन = सर्वोत्साहकृतेन वेगेन गत्वा तत् न शशाक = नाऽशकद् दग्धुम्। स जातवेदाः तृणं दग्धुमशक्तो व्रीडितो हतप्रतिज्ञः तत एव यक्षादेव तूष्णीं देवान् प्रति निववृते निवृतः प्रतिगतवान्। 'नैतद् यक्षमशकं = शक्तवानहं विज्ञातुम्, विशेषतो यदेतद् यक्षमि'ति॥ ६॥

**अथ वायुमब्रुवन्–'वायवेतद् विजानीहि, किमेतद् यक्षमि'ति। 'तथे'ति॥ ७॥**

## भावार्थदीपिका

**अन्वयः**–अथ वायुम् अब्रुवन्–'वायो! एतद् विजानीहि, एतद् यक्षं किम्' इति। 'तथा' इति॥ ७॥

## पदभाष्यम्

'अथ वायुमि'ति। अथ अनन्तरं वायुमब्रुवन्–हे वायो! एतद् विजानीही'त्यादि समानार्थं पूर्वेण॥ ७॥

**तदभ्यद्रवत् तमभ्यवदत्–'कोऽसी'ति, 'वायुर्वा अहमस्मी'त्यब्रवी'न्मातरिश्वा वा अहमस्मी'ति॥ ८॥**



Scanned with CamScanner

NOTES

## भावार्थदीपिका

**अन्वयः**–तत् अभ्यद्रवत्, तम् अभ्यवदत् 'कः असि?' इति। 'अहं वायुः वा अस्मि' इति, 'अहं मातारिश्वा वा अस्मि' इति अब्रवीत्।। ८।।

## पदभाष्यम्

'वायुर्वा' इति। वानाद् गमनाद् गन्धनाद् वायुः। मातरि अन्तरिक्षे श्वयतीति मातरिश्वा।। ८।।

**'तस्मिँस्त्वयि किं वीर्यमि' 'त्यपीद सर्वमाददीय यदिदं पृथिव्या-मि'ति।। ९।।**

## भावार्थदीपिका

**अन्वयः**–'तस्मिन् त्वयि किं वीर्यम्' इति, 'यदिदं पृथिव्यां सर्वमपीदम् आददीय' इति।। ९।।

## पदभाष्यम्

इदं सर्वमपि आददीय = गृह्णीयाम्, यदिदं पृथिव्यामित्यादि समानमेव।। ९।।

**तस्मै तृणं निदधा 'वेतदादत्स्वे'ति, तदुपप्रेयाय सर्वजवेन तन्न शशाकाऽऽदातुम्, स तत एव निववृते, 'नैतदशकं विज्ञातुं 'यदेतद् यक्षमि'ति।। १०।।**

## भावार्थदीपिका

**अन्वयः**–'एतद् आदत्स्व' इति तस्मै तृणं निदधौ। तत् उपप्रेयाय। सर्वजवेन तत् आदातुं न शशाक। सः तत एव निववृते। 'अहम् एतद् विज्ञातुं न अशकम् यत् एतद् यक्षम्' इति।। १०।।

## वाक्यभाष्यम्

तृणनिधानेऽयमभिप्रायोऽत्यन्तसम्भावितयोरग्निमारुतयोस्तृणदहनादानशक्त्याऽऽ-त्मसम्भावना शातिता भवेदिति।। १०।।

**अथेन्द्रमब्रुवन्–'मघवन्नेतद् विजानीहि, किमेतद् यक्षमि'ति। 'तथे'ति तदभ्यद्रवत्, तस्मात् तिरोदधे।। ११।।**



Scanned with CamScanner

NOTES

## भवार्थदीपिका

**अन्वयः**—अथ (देवाः) इन्द्रम् अब्रुवन्—'मघवन्! एतद् विजानीहि, एतद् यक्षं किम्?' तत् अभ्यद्रवत्, तस्मात् तिरोदधे इति।। ११।।

## पदभाष्यम्

'अथेन्द्रमि'ति। अथेन्द्रमब्रुवन्—'मघवन्! एतद् विजानीहि' इत्यादि पूर्ववत्। इन्द्रः परमेश्वरः मघवा बलवत्वात् 'तथे'ति तदभ्यद्रवत्। तस्मात् = इन्द्रादात्मसमीपं गतात् तद् ब्रह्म तिरोदधे = तिरोभूतम्। 'इन्द्रस्य' इन्द्रत्वाभिमानोऽतितरां निराकर्तव्यः इत्यतः संवादमात्रमपि नाऽदाद् ब्रह्म इन्द्राय।। ११।।

## वाक्यभाष्यम्

इन्द्र आदित्यो वज्रभृद् वा, अविरोधात्। इन्द्रोपसर्पणे ब्रह्म तिरोदधे इत्यत्राऽयमभिप्रायः—'इन्द्रोऽहमि'त्यधिकतमोऽभिमानोऽस्य 'सोऽहमग्न्यादिभिः प्राप्तं वाक्सम्भाषणमात्रमपि अनेन न प्राप्तोऽस्मी'त्यभिमानं कथं न नाम जह्यादि'ति तदनुग्रहायैवाऽन्तर्हितं तद् ब्रह्म बभूव।। ११।।

**स तस्मिन्नेवाऽऽकाशे स्त्रियमाजगाम बहुशोभमानामुमाँहैमवतीं ताँ होवाच 'किमेतद् यक्षमि'ति।। १२।।**

।। इति केनोपनिषदि तृतीयः खण्डः।। ३।।

## भावार्थदीपिका

**अन्वयः**—सः तस्मिन्ने आकाशे बहुशोभमानां स्त्रियं हैमवतीम् उमाम् आजगाम। तां ह उवाच—'एतद् यक्षं किम्?' इति।। १२।।

## पदभाष्यम्

तद् यक्षं यस्मिन्नाकाशे = आकाशप्रदेशे आत्मानं दर्शयित्वा तिरोभूतम्, इन्द्रश्च ब्रह्मणस्तिरोधानकाले यस्मिन्नाकाशे आसीत्, स इन्द्रः तस्मिन्नेवाऽऽकाशे तस्थौ 'किं तद् यक्षमि'ति ध्यायन्, न निववृते अग्न्यादिवत्।

तस्येन्द्रस्य यक्षे भक्तिं बुद्ध्वा विद्या उमारूपिणी प्रादुरभूत् स्त्रीरूपा। स इन्द्रः ताम् उमां बहुशोभमानां—सर्वेषां हि शोभमानानां शोभनतमा विद्या तदा 'बहुशोभमाने'ति विशेषणमुपपन्नं भवति; हैमवतीम् = हेमकृताभरणवतीमिव



Scanned with CamScanner

NOTES

बहुशोभमानामित्यर्थः; अथवा उमैव हिमवतो दुहिता हैमवती नित्यमेव सर्वज्ञेनेश्वरेण सह वर्तत इति ज्ञातुं समर्थेति कृत्वा ताम् उपजगाम।

इन्द्रस्तां ह उमां किल उवाच = पप्रच्छ–'ब्रूहि', 'किमेतद्', दर्शयित्वा तिरोभूतं यक्षमि'ति।। १२।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पाद-
कृतौ केनोपनिषत्पदभाष्ये तृतीयः खण्डः।।३।।

## वाक्यभाष्यम्

स शान्ताभिमान इन्द्रोऽत्यर्थं ब्रह्म विजिज्ञासुर्यस्मिन्नाकाशे ब्रह्मणः प्रादुर्भाव आसीत् तिरोधानं च तस्मिन्नेव स्त्रियमतिरूपिणीं विद्यामाजगाम। अभिप्रायोद्बोध-हेतुत्वाद् रुद्रपत्नी उमा हैमवतीव सा शोभमाना विद्यैव। विरूपोऽपि विद्यावान बहु शोभते।। १२।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषद्वाक्यभाष्ये तृतीयः खण्डः।।३।।

# केनोपनिषद्

## ।। अथ चतुर्थः खण्डः।।

**सा 'ब्रह्मे'ति होवाच, 'ब्रह्मणो वा एतद् विजये महीयध्वमि'ति, ततो हैव विदाञ्चकार 'ब्रह्मे'ति।। १।।**

## भावार्थदीपिका

**अन्वयः**–सा ह उवाच 'ब्रह्म' इति 'ब्रह्मणः वा विजये एतद् महीयध्वम्' इति ततः एव ह विदाञ्चकार–'ब्रह्म' इति।। १।।

## पदभाष्यम्

सा 'ब्रह्मे'ति होवाच–ह = किल ब्रह्मणो वा = ईश्वरस्यैव, विजये = 'ईश्वरेणैव जिताः असुराः, यूयं तत्र निमित्तमात्रम्, तस्यैव विजिये यूयं महीयध्वम् = महिमानं प्राप्नुथ।' 'एतदि'ति क्रियाविशेषणार्थम्। 'मिथ्याभिमानस्तु



Scanned with CamScanner

युष्माकम्–'अस्माकमेवाऽयं विजयोऽस्माकमेवाऽयं महिमे'ति। ततः तस्मादुमावाक्यात् ह एव विदाञ्चकार 'ब्रह्मे'ति इन्द्रः; अवधारणात् ततो हैव इति, न स्वातन्त्रेण।। १।।

NOTES

## वाक्यभाष्यम्

तां च पृष्ट्वा तस्या एव वचनाद् विदाञ्चकार विदितवान्। अतः इन्द्रस्य बोधहेतुत्वाद् विद्यैव उमा। 'विद्यासहायवान् ईश्वर' इति स्मृतिः।। १।।

**तस्माद् वा एते देवा अतितरामिवाऽन्यान् देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पृशुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति।। २।।**

**अन्वयः**–तस्माद् वा एते देवाः यत् अग्निः वायुः इन्द्रः; अन्यान् देवान् अतितरामिव हि ते एनत् नेदिष्ठं पस्पृशुः। ते हि एनत् प्रथमः विदाञ्चकार ब्रह्म इति।। २।।

## पदभाष्यम्

यस्मादग्निवाय्विन्द्रा एते देवा ब्रह्मणः संवाददर्शनादिना सामीप्यमुपगताः, तस्मात् स्वैर्गुणैः अतितरामिव शक्तिगुणादिमहाभाग्यैः अन्यान् देवान् अतितराम् अतिशेरत इव एते देवाः। 'इव' शब्दोऽनर्थकोऽवधारणार्थो वा। यद् अग्निः वायुः इन्द्रः, ते हि देवा यस्मात् एनत् ब्रह्म नेदिष्ठम् अन्तिकतमं प्रियतमं पस्पर्शुः स्पृष्टवन्तो यथोक्तैर्ब्रह्मणः संवादादिप्रकारैः, ते हि यस्माच्च हेतोः एनद् ब्रह्म प्रथमः प्रथमाः प्रधानाः सन्त इत्येतत्, विदाञ्चकार विदाञ्चक्रुरित्येतद् ब्रह्मेति।। २।।

## वाक्यभाष्यम्

यस्मादिन्द्रविज्ञानपूर्वकम् अग्निवाय्विन्द्रास्ते ह्येनन्नेदिष्ठमतिसमीपं ब्रह्मविद्यया ब्रह्म प्राप्ताः सन्तः पस्पृशुः स्पृष्टवन्तः, ते हि प्रथमः प्रथमं विदाञ्चकार विदाञ्चक्रुरित्येतत्।। २।।

**तस्माद् वा इन्द्रोऽतितरामिवाऽन्यान् देवान् स ह्येनन्नेदिष्ठं पस्पर्श। स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति।। ३।।**

## भावार्थदीपिका

**अन्वयः**–तस्माद् वा इन्द्रः अन्यान् देवान् अतितरामिव। स हि नेदिष्ठम् एनत् पस्पर्श, स ही एनत्। प्रथमाः विदाञ्चकार ब्रह्मेति।।३।।



Scanned with CamScanner

NOTES

## पदभाष्यम्

यस्मादग्निवायू अपि इन्द्रवाक्यादेव विदाञ्चक्रतुः, इन्द्रेण हि उमावाक्यात् प्रथमं श्रुतं 'ब्रह्मे'ति; तस्माद् 'वा' वै इन्द्रः अतितरामिव अतिशेरत इव अन्यान् देवान्। स ह्येनन्नेदिष्ठं पस्पर्श यस्मात् स ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेत्युक्तार्थं वाक्यम्।। ३।।

## वाक्यभाष्यम्

तस्मादतितराम् अतीत्याऽन्यानतिशयेन दीप्यन्ते अन्यान् देवान्। ततोऽपीन्द्रोऽतितरां दीप्यते, आदौ ब्रह्मविज्ञानात्।। ३।।

**तस्यैष आदेशो यदेतद् विद्युतो व्यद्युतदा ३, इतीन्न्यमीमिषदा ३, इत्यधिदैवतम्।। ४।।**

**अन्वयः**–तस्य एषः आदेशः। यत् एतत् विद्युतः व्यद्युतत् आ ३ इति। इत् न्यमीमिषत् आ ३। इति अधिदैवतम्।। ४।।

## पदभाष्यम्

तस्य प्रकृतस्य ब्रह्मण एष आदेश उपमोपदेशः। निरुपमस्य ब्रह्मणो येनोपमानेनोपदेशः सोऽयमादेश इत्युच्यते। किं तत्? यदेतत् प्रसिद्धं लोके विद्युतो व्यद्युतद् विद्योतनं कृतवदित्येनदनुपपन्नमिति विद्युतो विद्योतनमिति कल्प्यते। 'आ ३' इत्युपमार्थः। विद्युतो विद्योतनमिवेत्यर्थः। 'यथा सकृद् विद्युतम्' इति श्रुत्यन्तरे च दर्शनात्। विद्युदिव हि सकृदात्मानं दर्शयित्वा तिरोभूतं ब्रह्म देवेभ्यः।

अथवा विद्युतः 'तेजः' इत्यध्याहार्यम्। व्यद्युतद् विद्योतितवत् 'आ ३' इव। विद्युतस्तेजः सकृद् विद्योतितवदिवेत्यभिप्रायः। 'इति' शब्द आदेशप्रतिनिर्देशार्थः 'इत्ययमादेश' इति। इच्छब्दः समुच्चयार्थः।

अयं चाऽपरस्तस्याऽऽदेशः। कोऽसौ? न्यमीमिषद्, यथा चक्षुः न्यमीमिषद् निमेषं कृतवत्। स्वार्थे णिच्। उपमार्थ एवाऽऽकारः। चक्षुषो विषयं प्रति प्रकाशतिरोभाव इव चेत्यर्थः। इत्यधिदैवतं देवताविषयं ब्रह्मण उपमानदर्शनम्।। ४।।

## वाक्यभाष्यम्

तस्यैष आदेशः–तस्य ब्रह्मण एष वक्ष्यमाण आदेश उपासनोपदेश इत्यर्थः। यस्माद् देवेभ्यो विद्युदिव सहसैव प्रादुर्भूतं ब्रह्म द्युतिमत्। तस्माद् विद्युतो



Scanned with CamScanner

विद्योतनम्–यथा यदेतद् ब्रह्म व्यद्युतद् विद्योतितवद्। 'आ' इवेत्युपमार्थ 'आ' शब्दः। यथा घनान्धकारं विदार्य विद्युत् सर्वतः प्रकाशत, एवं तद् ब्रह्म देवानां पुरतः सर्वतः प्रकाशवद् व्यक्तीभूतम्। अतो व्यद्युतदिवेत्युपास्यम्। 'यथा सकृद् विद्युतमि'ति वाजसनेयके। यस्माच्चेन्द्रो पसर्पणकाले न्यमीमिषत्–यथा कश्चिच्चक्षुर्निमेषणं कृतवानिति। 'इतीदित्य'नर्थकौ निपातौ। निमिषितवदिव तिरोभूतमित्येवमधिदैवतं देवताया अधि यद् दर्शनमधिदैवतं तत्॥४॥

**अथाऽध्यात्मम्-यदेतद् गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णँ्-सङ्कल्पः॥५॥**

**अन्वयः**–अथ अध्यात्मम्। यत् मनः एतद् गच्छति इव। तथा च एतत् अनेन अभीक्ष्णम् उपस्मरति (इति) सङ्ल्पः॥५॥

## पदभाष्यम्

अथ अनन्तरम्, अध्यात्मम् = प्रत्यगात्मविषयः आदेश उच्यते। यदेतद् गच्छतीव च मनः। एतद् ब्रह्म ढौकत इव विषयीकरोतीव। यच्च अनेन = मनसा, एतद् = ब्रह्म, उपस्मरति = समीपतः स्मरति साधकः अभीक्ष्णम् = भृशम्। सङ्कल्पश्च मनसो ब्रह्मविषयः। मनउपाधिकत्वाद्धि मनसः सङ्कल्पस्मृत्यादिप्रत्ययैरभिव्यज्यते ब्रह्म, विषयीक्रियमाणमिव। अतः स एष ब्रह्मणोऽध्यात्ममादेशः।

विद्युन्निमेषणवदधिदैवतं द्रुतप्रकाशनधर्मि, अध्यात्मं च मनः प्रत्यय-समकालाभिव्यक्तिधर्मि इत्येष आदेशः। एवमादिश्यमानं हि ब्रह्म मन्दबुद्धिगम्यं भवतीति ब्रह्मण आदेश उपदेशः। न हि निरुपाधिकमेव ब्रह्म मन्दबुद्धिभिराकलयितुं शक्यम्॥५॥

## वाक्यभाष्यम्

अथ = अनन्तरम्, अध्यात्मम् = आत्मविषयमध्यात्मम्, उच्यत इति वाक्यशेषः। यदेतद् = यथोक्तलक्षणं ब्रह्म, गच्छतीव = प्राप्नोतीव, विषयीकरोतीवेत्यर्थः। न पुनर्विषयीकरोति, मनसोऽविषयत्वाद् ब्रह्मणः। अतः मनो न गच्छति। 'येनाऽऽहुर्मनो मतमि'ति हि चोक्तम्। तु गच्छतीवे' ति मनसोऽपि मनस्त्वात्। आत्मभूतत्वाच्च ब्रह्मणस्तत्समीपे मनो वर्तत इति। 'उपस्मरत्य'नेन मनसैव तद् ब्रह्म विद्वान् यस्मात्, तस्माद् ब्रह्म गच्छतीवेत्युच्यते। अभीक्ष्णं = पुनः पुनश्च सङ्कल्पो ब्रह्मप्रेषितस्य मनसः। अत उपस्मरणसङ्कल्पादिभिर्लिङ्गैर्ब्रह्म मनोऽध्यात्मभूतमुपास्यमित्यभिप्रायः॥५॥

NOTES



Scanned with CamScanner

**तद्ध तद् वनं नाम। तद् 'वनमि'त्युपासितव्यम्। स य एतदेवं वेदाऽभिहैन् सर्वाणि भूतानि संवाञ्छन्ति।। ६।।**

**अन्वयः**—तत् ह 'तद् वनं' नाम। तद् 'वनम्' इति उपासितव्यम्। सः यः एतद् एवं वेद। अभि ह एनं सर्वाणि भूतानि संवाञ्छन्ति।। ६।।

## पदभाष्यम्

किञ्च, तद् = ब्रह्म, ह = किल 'तद्वनं'नाम। 'तस्य वनं तद्वनम्।' तस्य प्राणिजातस्य प्रत्यगात्मभूतत्वाद्, 'वनम्' = वननीयम्, सम्भजनीयम्; अतः तद्वनं नाम। प्रख्यातं ब्रह्म 'तद्वनमि'ति यतः, तस्मात् तद्वनमित्यनेनैव गुणाभिधानेन उपासितव्यं चिन्तनीयम्।

अनेन नाम्नोपासनस्य फलमाह—स यः कश्चित् एतद् यथोक्तं ब्रह्म एवं = यथोक्तगुणं, वेद = उपास्ते। अभि ह एनं सर्वाणि भूतानि अभिसंवाञ्छन्ति ह प्रार्थयन्त एव यथा ब्रह्म।। ६।।

## वाक्यभाष्यम्

तस्य चाऽध्यात्ममुपासते गुणो विधीयते—'तद्ध तद्वनम्'—तदेतद् ब्रह्म तच्च तद्वनं च तत्परोक्षं वनं सम्भजनीयम्। वनतेस्तत्कर्मणस्तस्मात् तद्वनं नाम। ब्रह्मणो गौणं हीद नाम। तस्मादनेन गुणेन 'तद्वनमि'त्युपासितव्यम्। स यः कश्चिदेतद् यथोक्तमेवं यथोक्तेन गुणेन 'वनमि'त्यनेन नाम्नाऽभिधेयं ब्रह्म वेद उपास्ते, तस्यैतत, फलमुच्यते। सर्वाणि भूतान्येनमुपासकमभिसंवाञ्छन्ती-हाऽभिसम्भजन्ते सेवन्ते स्मेत्यर्थः। यथागुणोपासनं हि फलम्।। ६।।

**उपनिषदं भो! ब्रूही 'त्युक्ता त उपनिषद्। ब्राह्मीं वाव त उपनिषदमब्रूमे'ति।। ७।।**

## भावार्थदीपिका

**अन्वयः**—'भो! उपनिषदं ब्रूहि इति, 'उक्ता' ते उपनिषद्। ब्राह्मीं वाव उपनिषदं ते अब्रूम' इति।। ७।।

## पदभाष्यम्

एवमनुशिष्टः शिष्य आचार्यमुवाच—'उपनिषदं रहस्यं यच्चिन्त्यम्, भो भगवन्! ब्रूहि' इति।



Scanned with CamScanner

NOTES

एवमुक्तवति शिष्ये आहाऽऽचार्यः–'उक्ता = अभिहिता, ते = तव उपनिषत्।' का पुनः सेत्याह–'ब्राह्मीम् ब्रह्मणः = परमात्मन इयं ब्राह्मी ताम् परमात्मविषयत्वादतीतविज्ञानस्य, वाव = एव ते उपनिषदमब्रूमे'ति उक्तामेव परमात्मविषयामुपनिषदमब्रूमे' त्यवधारयत्युत्तरार्थम्।

परमात्मविषयामुपनिषदं श्रुतवतः 'उपनिषदं भो! ब्रूही'ति पृच्छतः शिष्यस्य कोऽभिप्रायः? यदि तावच्छ्रुतस्याऽर्थस्य प्रश्नः कृतः, ततः पिष्टपेषणवत् पुनरुक्तोऽनर्थकः प्रश्न स्यात्। अथ सावशेषोक्ता उपनिषत् स्यात्, ततस्तस्याः फलवचनेनोपसंहारो न युक्तः '*प्रेत्याऽस्माल्लोकादमृता भवन्ति*' (के. उ. २।५) इति। तस्मादुक्तोपनिषच्छेषविषयोऽपि प्रश्नोऽनुपपन्न एव, अनवशेषित्वात्। कस्तर्हि अभिप्रायः प्रष्टुः? इत्युच्यते–

## पदभाष्यम्

किं पूर्वोक्तोपनिषच्छेषतया तत्सहकारिसाधनान्तरापेक्षा, अथ निरपेक्षैव? सापेक्षा चेदपेक्षितविषयामुपनिषदं ब्रूहि। अथ निरपेक्षा चेत् अवधारय पिप्पलादवत् 'नातः परमस्ती'त्येवमभिप्रायः। एतदुपपन्नमाचार्यस्याऽवधारणवचनम्–'उक्ता त उपनिषत्' इति।

## पदभाष्यम्

ननु नाऽवधारणमिदम्, यतोऽन्यद् वक्तव्यमाह–'तस्यै तपो तद' (४।८) इत्यादि।

सत्यम्, वक्तव्यमुच्यते आचार्येण न तूक्तोपनिषच्छेषतया तत्सहकारि-साधनान्तराभिप्रायेण वा; किं तु ब्रह्मविद्याप्राप्त्युपायाभिप्रायेण वेदैस्तदङ्गैश्च सहपाठेन समीकरणात् तपःप्रभृतीनाम्।

## पदभाष्यम्

न हि वेदानां शिक्षाद्यङ्गानां च साक्षाद् ब्रह्मविद्याशेषत्वं तत्सहकारिसाधनत्वं वा सम्भवति, सहपठितानामपि यथायोगं विभज्य विनियोगः स्यादिति चेत्; यथा सूक्तवाकानुमन्त्रणमन्त्राणां यथादैवतं विभागः, तथा तपो–दम–कर्म–सत्यादीनामपि ब्रह्मविद्याशेषत्वं तत्सहकारिसाधनत्वं वेति कल्प्यते। वेदानां तदङ्गानां चाऽर्थप्रकाश- कत्वेन कर्मात्मज्ञानोपायत्वमित्येवं ह्ययं विभागो युज्यते। अर्थसम्बन्धोपपत्तिसामर्थ्यादिति चेत्।



Scanned with CamScanner

NOTES

न, अयुक्तेः। न ह्ययं विभागो घटनां प्राञ्चति। न हि सर्वक्रिया। कारकफलभेदबुद्धितिरस्कारिण्या ब्रह्मविद्यायाः शेषापेक्षा सहकारिसाधनसम्बन्धो वा युज्यते। सर्वविषयव्यावृत्तप्रत्यगात्मविषयनिष्ठत्वाच्च ब्रह्मविद्यायास्तत्फलस्य च निःश्रेयसस्य।

**''मोक्षमिच्छन् सदा कर्म त्यजेदेव ससाधनम्।**
**त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक् परं पदम्।।''इति।**

तस्मात् कर्मणां सहकारित्वं कर्मशेषापेक्षा वा न ज्ञानस्योपपद्यते। ततोऽसदेव सूक्तवाकानुमन्त्रवद्यथायोगं विभाग इति। तस्मादवधारणार्थतैव प्रश्नप्रतिवचनस्योपपद्यते। एतावत्येवेयम् उपनिषदुक्ताऽन्यनिरपेक्षाऽमृतत्वाय।। ७।।

## वाक्यभाष्यम्

'उपनिषदं भो ब्रूही'त्युक्तायामप्युपनिषदि शिष्येणोक्त आचार्य आह– 'उक्ता = कथिता, ते = तुभ्यम्, उपनिषत् = आत्मोपासनं च। अधुना ब्राह्मीं वाव ते तुभ्यं ब्रह्मणो ब्राह्मणजातेरुपनिषदमब्रूम वक्ष्याम इत्यर्थः। वक्ष्यति हि–ब्राह्मी नोक्ता उक्ता त्वात्मोपनिषत्। तस्मान्न भूताभिप्रायोऽब्रूमे'त्ययं शब्दः।। ७।।

**तस्यै तपो दमः कर्मेति प्रतिष्ठा। वेदाः सर्वाङ्गानि। सत्यमायतनम्।।८।।**

**अन्वयः**–तस्यै तपः दमः कर्म इति प्रतिष्ठा। वेदाः सर्वाङ्गानि सत्यम् आयतनम्।। ८।।

## पदभाष्यम्

यामिमां ब्राह्मीमुपनिषदं तवाग्रेऽब्रूमेति तस्यै तस्या उक्ताया उपनिषदः प्राप्त्युपायभूतानि तपआदीनि। 'तपः' = कायेन्द्रियमनसां समाधानम्। दमः = उपशमः। कर्म = अग्निहोत्रादि। एतैर्हि संस्कृतस्य सत्त्वशुद्धिद्वारा तत्वज्ञानोत्पत्तिर्दृष्टा दृष्टा। ह्यमृदितकल्मषस्योक्तेऽपि ब्रह्मण्यप्रतिपत्तिर्विपरीतप्रतिपत्तिश्च। यथा इन्द्रविरोचनप्रभृतीनाम्। तस्मादिह वाऽतीतेषु वा बहुषु जन्मान्तरेषु तपआदिभिः कृतसत्त्वशुद्धेर्ज्ञानं समुत्पद्यते यथाश्रुतम्;

**''यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।''** *(श्वे. उ. ६/२३)*
**इति मन्त्रवर्णात्।**



Scanned with CamScanner

NOTES

**"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः"** *(महा. शा. २०४।८)* **इति स्मृतेश्च।**

## पदभाष्यम्

'इति' शब्दः उपलक्षणत्वप्रदर्शनार्थः। इत्येवमादि अन्यदपि ज्ञानोत्पत्तेरुपकारकम् 'अमानित्वमदम्भित्वम्' (गीता १३।७) इत्यादि उपदर्शितं भवति। 'प्रतिष्ठा' पादौ पादाविवाऽस्याः, तेषु हि सत्सु प्रतितिष्ठति ब्रह्मविद्या प्रवर्तते, पद्भ्यामिव पुरुषः। 'वेदा' श्चत्वारः (सर्वाङ्गानि) सर्वाणि चाऽङ्गानि शिक्षादीनि षट्, कर्मज्ञानप्रकाशकत्वाद् वेदानाम्। तद्रक्षणार्थत्वादङ्गानां प्रतिष्ठात्वम्। अथवा 'प्रतिष्ठा' शब्दस्य पादरूपकल्पनार्थत्वाद् वेदास्तु इतराणि सर्वाङ्गानि शिरआदीनि। अस्मिन् पक्षे शिक्षादीनां वेदग्रहणेनैव ग्रहणं कृतं प्रत्येतव्यम्। अङ्गिनि हि गृहीतेऽङ्गानि गृहीतान्येव भवन्ति, तदायतनत्वादङ्गानाम्।

सत्यमायतनम्—यत्र तिष्ठत्युपनिषत् तदायतनम्। सत्यमिति अमायिताऽकौटिल्यं वाङ्मनः कायानाम्। तेषु ह्याश्रयति विद्या, ये अमायाविनः साधवः, न असुरप्रकृतिषु मायाविषु। 'न येषु जिह्ममनृतं न माया च' (प्र. उ. १।१६) इति श्रुतेः। तस्मात् 'सत्यमायतनमि'ति कल्प्यते। तपआदिष्वेव प्रतिष्ठात्वेन प्राप्तस्य सत्यस्य पुनरायतनत्वेन ग्रहणं साधनातिशयत्वज्ञापनार्थम्।

**"अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।**
**अश्वमेधसहस्राच्च सत्यमेकं विशिष्यते॥"** *(विष्णुस्मृ. ८)*
**इति स्मृतेः॥ ८॥**

## वाक्यभाष्यम्

तस्या वक्ष्यमाणाया उपनिषदस्तपो ब्रह्मचर्यादि, दम उपशमः कर्म अग्निहोत्रादीत्येतानि प्रतिष्ठाऽऽश्रयः। एतेषु हि सत्सु ब्राह्म्युपनिषत् प्रतिष्ठिता भवति। वेदाश्चत्वारोऽङ्गानि च सर्वाणि। प्रतिष्ठेत्यनुवर्तते। ब्रह्माश्रया हि विद्या। सत्यं यथाभूतवचनमपीडाकरम्, आयतनं निवासः। सत्यवत्सु हि सर्वं यथोक्तमायतनमिवाऽवस्थितम्।।८।।

**यो वा एतामेवं वेदाऽपहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति॥ ९॥**

।। इति केनोपनिषदि चतुर्थः खण्डः।। ४।।

।। इति सामवेदीयतलवकारोपनिषत् (केनोपनिषत्) समाप्ता।

NOTES

**अन्वयः**–यः वा एताम् एवं वेद, (सः) पाप्मानम् अपहत्य अनन्ते ज्येये स्वर्गे लोके प्रतितिष्ठति प्रतितिष्ठति।। ९।।

## पदभाष्यम्

'यो वै एताम्' ब्रह्मविद्यां 'केनेषितम्' (१।१) इत्यादिना यथोक्ताम् 'एवं' महाभागां 'ब्रह्म ह देवेभ्यः' (३।१) इत्यादिना स्तुतां सर्वविद्याप्रतिष्ठां 'वेद'–'अमृतत्वं हि विन्दते' '२।४' इत्युक्तमपि ब्रह्मविद्याफलमन्ते निगमयति–'अपहत्य पाप्मानम्' = अविद्याकामकर्मलक्षणं संसारबीजं विधूय, 'अनन्ते' = अपर्यन्ते स्वर्गे लोके = सुखात्मके ब्रह्मणीत्येतत्। 'अनन्ते' इति विशेषणान्न त्रिविष्टपे। अनन्तशब्द औपचारिकोऽपि स्याद् इत्यत आह–'ज्येये' इति। 'ज्येये' ज्यायसि सर्वमहत्तरे स्वात्मनि मुख्ये एव प्रतिष्ठिति। न पुनः संसारमापद्यत इत्यभिप्रायः।। ९।।

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषत्पदभाष्ये चतुर्थः खण्डः।। ४।।

समाप्तमिदं श्रीमच्छङ्कराचार्यविरचितं तलवकारोपनिषद् पदपर्यायकेनोपनिषत्पदभाष्यम्।

## वाक्यभाष्यम्

तामेतां तपआद्यङ्गां तत्प्रतिष्ठा ब्राह्मीमुपनिषदं सायतनाम् आत्मज्ञानहेतुभूतामेवं यथावद् यो वेद अनुवर्ततेऽनुतिष्ठति। तस्यैतत् फलमाह–अपहत्य पाप्मानम् अपक्षीय धर्माधर्मावित्यर्थः। अनन्तेऽपारेऽविद्यमानान्ते स्वर्गे लोके सुखप्राये निर्दुःखात्मनि परे ब्रह्मणि ज्येये महति सर्वमहत्तरे प्रतितिष्ठति सर्ववेदान्तवेद्यं ब्रह्माऽऽत्मत्वेनाऽवगम्य तदेव ब्रह्म प्रतिपद्यत इत्यर्थः।। ९।।

।। इति केनोपनिषदो वाक्यभाष्ये चतुर्थः खण्डः।। ४।।
।। इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्य–
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवतः कृतौ
तलवकारोपनिषदपरपर्यायकेनोपनिभाष्ये क्षुद्रगणवाक्यविवरणं समाप्तम्।।

□□□



Scanned with CamScanner

# Courses Offered Under CBCS at DDCE, Utkal University

Management Programme
- MBA (2 Yr.)
- IMBA/BBA (Distance)

P.G. DIPLOMA in
- Banking & Insurance Management
- Financial Management
- Marketing Management
- Human Resource Management
- Tour & Travel Management
- Dietetics & Nurition Management
- Production & Operation Management

COMPUTER SCIENCE & APPLICATION PROGRAMME
- MCA (3 Yr.)
- MCA (2 Yrs. Lateral)
- M.Sc. Computer Science & Application
- M.Sc. IT
- M.Sc. ITM

UNDER GRADUATE PROGRAMME:
- B.A. Hons.
  - Educational Hons.
  - Economics Hons.
  - History Hons.
  - Odia Hons.
  - Pol Sc. Hons.
  - Sanskrit Hons.
  - Sociology Hons.
  - Public Administration Hons.
  - Hindi Hons.
  - Urdu Hons.
- B.Com Hons.
  - Accounting Hons.
  - Management Hons.

POST GRADUATE (DISTANCE)
- M.A. Economics
- M.A. Education
- M.A. English
- M.A. Hindi
- M.A. History
- M.A. Odia
- M.A. Political Science
- M.A. Public Administration
- M.A. Sanskrit
- M.A. Sociology
- Master in Social Work (MSW)
- Master in Commerce (M.Com)

ISBN 978-93-5274-529-6

Scanned with CamScanner

DIRECTORATE OF DISTANCE & CONTINUING EDUCATION
UTKAL UNIVERSITY : VANI VIHAR
BHUBANESWAR-751007

## From the Director's Desk

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

**DIRECTOR**

Scanned with CamScanner

# अध्यायः१

# वैदिकसाहित्यम् इतिहासश्च –I

## १.० लक्ष्य

एतत् अध्याय उत्तर अध्यायिन् विद्यार्थिन् समर्थ

संहितानां परिचयः ;

संहितानां महत्त्वं

संहिताभाष्यकाराः

तैत्तिरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता, कपिष्ठलकठसंहिता

## १.१ प्रस्तावना

मन्त्राणां समूहः संहिता। वैदिकवाङ्.मयस्येतिहासे मन्त्रसमुदाय एवाऽत्र संहितापदेन व्यवहृतः। परः सन्निकर्षः संहिता इत्यनेन व्याकरण शास्त्रमतेन वर्णानाम् अत्यंतसन्निधिः संहिता संज्ञः स्यात्। पदपाठे मन्त्रस्यैकैकं पदं पृथक् क्रियते। व्याकरणदृष्ट्या योग्यपदसमूहानां संज्ञा संहिता अस्ति। मन्त्राणां समूहो वेदे प्राप्यते। वेदशब्दस्यार्थे मन्त्रब्राह्मणयोः वेदनामधेयमिति प्रसिद्धम्, इत्यनेन संहिता इत्यस्य भागद्वयं कर्तुं शक्यते मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्ररूपिणी संहिता ऋग्देवसंहिता, यजुर्वेदसंहिता, सामवेदसंहिता, अथर्ववेद संहिता इत्यादयस्सन्ति। ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य भाष्यरूपमेव। अयं ब्राह्मणभागः यागादीनां स्वरूपाणां व्याख्यां करोति। विधिविनियोगादीनां विधानानि ब्राह्मणेषु प्रतिपादितानि सन्ति। मन्त्राणामुपलब्धिः वेदेषु भवति। तेषां मन्त्राणां प्रयोगः कुत्र भव्यितीति निर्देशाः ब्राह्मण ग्रंथेषु प्राप्यन्ते। ब्राह्मणशब्दस्य नैके अर्थाः प्रतिपादितास्सन्ति। तेष्वर्थेषु एकोऽर्थः यज्ञ अस्ति। बृह् वर्धने धातोः निष्पन्नस्य ब्राह्मणमिति पदस्यार्थो विद्यते - वर्धनं, विस्तारो वितानो वा। ब्राह्मणग्रंथाः भागत्रये विभक्तास्सन्ति। प्रथमो भागः ब्राह्मणमिति, द्वितीयोभाग आरण्यकमिति तृतीयोभाग उपनिषदिति च।

## १.२ संहितानां परिचय

महाभारते प्रतिपादितमस्ति वेदान् विव्यास यस्मात् स वेदव्यास इति स्मृतः। वेदेषु मन्त्राणां संकलनमस्ति। मंत्रसंहितानां संकलनं चतुर्विधतया सम्पादितम्। इत्यस्मात्



Scanned with CamScanner

कारणात् चतस्र: संहितास्सन्ति। ऋक्संहिता, यजु:संहिता, सामसंहिता, अथर्वसंहिता च। बहवृक्प्राप्तिशाख्ये प्राप्यते विद्यते धर्मादय: पुरुषार्थां यैस्ते वेदा:। सायणेन उक्तम् अपौरुषेयं वाक्यं वेद इति। इष्ट प्राप्तस्यानिष्ट परिहारयोरलौकिकमुपायं यो वेदयति स वेद इति भाष्यभूमिकायामुक्तमस्ति। तस्य प्रमाणं प्राप्यते -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**

**एनं विदन्ति वेदने तस्माद्वेदस्य वेदता।**

सिद्धांतकौमुद्या प्राप्यते-

**सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारिणे।**

**विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेविष्वदं क्रमात्।।**

अत्र सत्तात्मकोऽर्थो विद्यते सत्तां गृह्णाति वस्तु अनेन इति वेदो: वेते:। ज्ञानात्मकोऽर्थ: विदन्त्येभि: धर्मब्रह्मणि क्रिया ज्ञानमयं ब्रह्म वा इति वेदो विद्यते। विचारात्मकोऽर्थ: विन्ते विचारयति धर्मब्रह्मणि क्रियाज्ञानमयं ब्रह्म वा इति वेदो विद्यते। लाभात्मकोऽर्थ विद्यन्ते स्वरूपं लभन्ते वस्तु अनेन इति वेदो विद्यते। स्वामीदयानन्देन प्रतिपादितम्-विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्ते विचारयति, विन्दन्ते लभन्ते सर्वे मनुष्या: सत्विद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति, ते वेदा:। वेद: इत्यनेन पदेन ऋग्यजुषादिपद्यगद्यगीतिनिबद्धस्य ग्रंथात्मकस्य पदार्थस्यावबोधो भवति। शतपथब्राह्मणे प्राप्यते यदेतन्मण्डलं तपति तन्महदुक्तम् ता ऋच: स ऋचां लोक:। यदेतदर्चिदीप्यते, तन्महाव्रतम्, तानि सामानि स साम्नां लोक:। अथ य एष एतिस्मन् मण्डले पुरुष: सोऽग्नि तानि यजूंषि, स यजुषां लोक:। सैषा त्रय्येव विद्या तपति। अत्र विद्यात्रयस्य वर्णने सति प्राप्यते अग्ने ऋग्वेद: वायो: यजुर्वेद:, सूर्यात्सामवेद:। वेदानां प्रयोगा: यज्ञेषु क्रियन्ते। चतुर्णां वेदानामनुसारेण यज्ञेषु चत्वारो प्रधानऋत्विज: भवन्ति। येषां नामानिक होता, अध्वर्यु:, उद्गाता ब्रह्मा च सन्ति। ऋग्वेदस्य ऋत्विक् होता भवति। यजुर्वेदस्य ऋत्विक् अध्वर्यु विद्यते। सामव-दस्य ऋत्विक् उद्गाता भवति। अथर्ववेदस्य ऋत्विक् ब्रह्मा अस्ति। एते सर्वे स्वीयेन वेदानुसोरण मन्त्राणां यथावसरे प्रयोगां कुर्वन्ति। अत्र प्रमुखसंहितानां नामानीत्थं वर्तन्ते।

## ऋक्संहिता

ऋग्वेदे दशमण्डलानि सन्ति। येषु मण्डलेषु अष्टाविंशत्योत्तरसहस्राणि सूक्तानि सन्ति। अत्र एकाशीत्युत्तरपंचशताधिकानिसहस्राणि ऋचस्सन्ति। अस्यां संहितायां समस्तमन्त्राणां रचना चतुर्दशषु छन्देषु अस्ति। शौनकस्य चरणव्यूहसूत्रानुसारेण ऋग्वेदस्य पंचशाखास्सन्ति। आसु शाखासु इदानीं शाकलशाखैव उपलब्धाऽस्ति। ऋग्वेदस्य दशसु मण्डलेषु द्वितीयत: षट्मण्डलेषु एक एव ऋषि एवं तेषां वंशजानां वर्णनं प्राप्यते। अष्टममण्डले



Scanned with CamScanner

महार्षि कण्वसहित तेषां परिवाराणां वर्णनमस्ति। प्रथमनवमदशममण्डलेषु प्रत्येकेषु सूक्तेषु भिन्नभिन्नऋषीणां तेषां वंशजानां च वर्णनं प्राप्यते। येषु ऋषिका अपि सन्ति।

### यजुस्संहिता

अस्यां संहितायां यागविधिविषयाणां संबंधितानां कर्मकाण्डीयप्रक्रियाणां वर्णनमस्ति। अस्याया: संहिताया: भेदद्वयं दृश्यते। शुक्लयजुर्वेदसंहिताकृष्णयजुर्वेदसंहिता च। शुक्लयजुस्संहिताया: शाखाद्वयं विद्यते। माध्यन्दिनीया काण्वीया च। माध्यन्दिनसंहिताया: प्रयोग: भारतवर्षस्योत्तरे प्रान्ते प्राप्यते, काण्वसंहिताया: प्रयोग: दक्षिणे भारते प्राप्यते। कृष्णयजुस्संहिताया: चतस्र: शाखासन्ति। तैत्तिरीयसंहिता, मैत्रायणीसंहिता, काण्वसंहिता कठसंहिता च। शुक्लयजुस्संहिता पद्यात्मिका। कृष्णयजुस्संहिता गद्यपद्यमिश्रिता।

### सामसंहिता

सामवेदीयमन्त्राणां प्रयोग: च यज्ञादीनामवसरे उद्‌गाता करोति। महाभाष्ये लिखितमस्ति सहस्रवर्त्मा सामवेद: अर्थात् सामसंहिताया: सहस्र: शाखा आसन्। परंचेदानीं तिस्र: शाखा: प्राप्यन्ते। कौथुमराणायनीयाजैमिनीया चेति। कौथुमशाखाया: भागद्वयं प्राप्यते। पूर्वार्चिकमुत्तरार्चिकंच। उभयो: मन्त्रा ऋग्वेदात् संगृहीतास्सन्ति। सामवेदे पंचसप्तति: पृथक्मन्त्रास्सन्ति। वस्तुत: सामवेदे मन्त्राणां गायनं भवति। ऋग्वेदस्य गीत्यात्मकानां ऋचा संग्रह: सामवेदेऽस्ति। अत्रोभयोरार्चिकयो: सम्मिलितानां मन्त्राणां संख्या पंचसप्तत्यधिकाष्टादशशतम् अस्ति।

### अथर्वसंहिता

अथर्ववेदे अभिचारादीनामुच्चारेनादीनाम् च मन्त्राणां संकलनमस्ति। मारणमोहनादिमन्त्रैस्सह औषधीनां प्रतिपादनमन्त्रा अप्यत्रसन्ति। अयं वेद: ऐहिकामुष्मिकयो: फलानां प्रदाता अस्ति। अस्य वेदस्य रचना यज्ञविधानार्थं नास्ति। यज्ञेषूत्पन्नानां विघ्नानां निवारणार्थमस्य वेदस्य प्रयोगो भवति। रचनादृष्ट्या ऋग्वेद इवास्ति अथर्ववेद: परंच प्रतिपाद्यदृष्ट्या उभयोर्मध्ये भेद अस्ति। अथर्ववेद: उपचारादीनां मन्त्रतंत्रादीनां च वेद: कथ्यते। वेदस्यास्य शाखाद्वयमुपलब्धमस्ति-शैनकशाखा पैप्लादशाखा च। अनयो: शौनकशाखा एव प्रसिद्धा अस्ति। अस्मिन् वेदे बहुसंख्यका: मन्त्रा ऋग्वेदात् संगृहतास्सन्ति।

एतदतिरिक्तं तैत्तिरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता, कपिष्ठलसंहिताश्चसन्ति।

## १.३ संहितानां महत्त्वं

संहितानां बहुबिधं महत्त्वं दृश्यते। सर्वेषां महत्त्वानां वर्णनमत्रोचितन्नास्ति। संक्षिप्ततत्वान्यत्र विवेचितानि सन्ति।



Scanned with CamScanner

## क - धार्मिकं महत्त्वम् -

मनुनोक्तम् - वेदोऽखिलो धर्ममूलम्। धर्मस्य मूलतत्वानां ज्ञानाय मात्रैकसाधनमस्ति वेदः। वैदिकसंहितासु सर्वप्रकारकारिण ज्ञानान्युपनिबद्धानि सन्ति। अत्र सर्वेषां मानवानां कृते कर्त्तव्यानां निर्देशोऽस्ति। मनुस्मृतौ लिख्यते -

**यः कश्चिद् कस्यचिद् धर्मो, मनुना परिकीर्तितः।**

**य सर्वोऽभिहितो वेदे, सर्वज्ञानमयो हि सः।।**

अर्थात् यत्किमपि धर्म मनुना प्रतिपादितः तत्सर्वं वेदात् एव प्राप्तः। पतंजलिना उक्तम्-**ब्राह्मणेन निष्कारणो षडंगो वेदोऽ ध्येयो ज्ञेयश्च**। अस्य कारणमस्ति यानि कर्माणि धर्मसंपृक्तानि भवन्ति तानि सम्यक्तया सम्पाद्यन्ते। कर्मसु प्रमादः मा भवेदेतदर्थं वेदे आदौ धर्मस्य प्रतिपादनं कृतमस्ति। लोकेऽपि दृश्यते धर्मः करणीयोऽस्ति एतावता तस्मिन् कर्मणि त्रुटिर्माभवेदिति जनाः चिन्तयन्ति। धार्मिकाः जना अनुचितं मा भवेदिति चिन्तयन्ति। अस्माकमाचारविचारव्यवहारादयः प्रतिकूलं मा भवेदित्यपि ते चिन्तयन्ति। स्वकीयकार्यक्षेत्रे प्राप्तकर्त्तव्यानां निर्वहनं सम्यक्तया कुर्वन्ति। वैदिकसंहितानां सदा अभ्यासः कुर्यादिति निर्देशेनैवं प्रतीयते स्वकर्त्तव्यानां विस्मरणं मा भवेदिति सर्वदा चिन्तनीयम्।

## ख- सांस्कृतिकं महत्वम्-

वैदिकसंहिताः भारतीयसंस्कृतेः मूलोद्गमस्थानानि प्रतिपादितानि सन्ति। भारतीयसंस्कृतेः यथार्थं ज्ञानं संहिताभिः प्राप्यते। मनुमतमस्ति प्राचीने काले वस्तूनां नामानि मानवीयकर्त्तव्यानां च निर्धारणं वेदैः सम्पादितमासीद्। लोकमान्यतिलकमहोदयानां मतेन वेदप्रामाण्यस्यानुगमनं हिन्दुत्वस्य मुख्यलक्षणमस्ति। यज्ञानां सम्पादनविधानम्, नैकेषां देवानां पूजनम्, निष्कामभावेन कर्मणां सम्पादनम्, ईश्वरस्य सर्वव्यापकता, ज्ञानकर्ममार्गयोः समन्वयः, भौतिकविचारेष्वनास्था, जन्मजन्मान्तरेषु विश्वासः, जीवनस्योद्देश्यं मोक्षस्य प्राप्ती इत्यादीनां याथार्थ्यं ज्ञानं वैदिकसंहिताभिरे प्राप्यते।

## ग- शास्त्रीयं महत्त्वम्-

वेदात् सर्वं प्रसिद्धयतीति वाक्येनेवमुक्तं सर्वासां विद्यानां स्रोतांसि वैदिकसंहितास्सन्ति। संहितासु दार्शनिकसिद्धांतानि, राजनीतिशास्त्रम्, समाजशास्त्रम्, मनोविज्ञानम्, आयुर्वेदशास्त्रम्, गणितभौतिकीरसायनशास्त्रम्, वनस्पतिशास्त्रम्, जन्तुविज्ञानम्, प्रौद्यौगिकीज्ञानम्, वृष्टिविज्ञानम्, भूगर्भविज्ञानम्, अर्थशास्त्रम्, नाट्यशास्त्रम्, काव्यशास्त्रम्, कामशास्त्रम् तथा विविधानां कलानां शतशः मन्त्राः वर्णितास्सन्ति।



Scanned with CamScanner

### घ- आचारादीनां ज्ञानम् -

समस्तानां मानवानां कर्त्तव्यबोधाय प्रामाणिका: ग्रंथास्सन्ति वेदा:। अत्र कर्त्तव्याकर्त्तव्यानां यथास्थानं विस्तृतं वर्णनं प्राप्यते। अत्र गुरुशिष्ययो: कर्त्तव्याकर्त्तव्यम्, मातापित्रो: कर्त्तव्याकर्त्तव्यम्, पतिपत्न्यो: कर्त्तव्याकर्त्तव्यम्, पितापुत्रयो:, कर्त्तव्याकर्त्तव्यम् विशदं विचारितमस्ति। एतदतिरिक्तं परोपकारिदिविषये, सत्कर्मादिविषये, ातिथिसत्कारादिविषये संहितासु विस्तृतं विवरणं प्राप्यते।

### ङ- सामाजिकं महत्त्वम्-

प्राचीनभातीयसभ्यतानां संस्कृतीनां च विशदं चित्रणं वैदिकसंहितासु प्राप्यते। प्रायश ऋक्संहितायाम् अथर्वसंहितायां च प्राचीनसमाजस्य सभ्यतायाश्च विस्तृतं विवरणं प्राप्यते। यजुस्संहितायां त्रिंशत्तमेऽध्याये पंचत: द्वाविंशतिमंत्राणां मध्ये पंचाशदाधिकानां व्यवसायानां विवरणानि प्राप्यन्ते। अपिच व्यवसायसंबंधिनां जातीनां तथा च तेषां कर्मणामपि वर्णनमस्ति। तत्र-ब्रह्मणे ब्राह्मणम्, क्षत्राय क्षत्रम्, मरुद्भ्यो वैश्यम्.........।

### च - आर्थिकं महत्त्वम्-

संहितासु प्राचीनार्थव्यवस्थानां विशदं चित्रणं प्राप्यते। तत्र कृषि, आदानप्रदानव्यवस्था, वाणिज्यानां रूपाणि, प्रचलिता: मुद्रा:, विविधानि शिल्पकर्माणि च प्रतिपादितानि सन्ति। व्यापारे सफलताया: प्राप्तये गुणद्वयस्य आवश्यकता संहितासु प्रतिपादिता अस्ति। चरितमुत्थितं च। चरितम्-चरित्रशुद्धि: व्यापारकुशलता च। उत्थितम्-श्रम:, दृ. ढनिश्चय उत्साहश्च।

### छ.राजनीतिकमहत्त्वम्-

संहितासु राजनीतिशास्त्रसंबंधिनां सामग्रीणामुपलब्धि: विशदतया प्राप्यते। अत्र राज्याणां स्वरूपाणि, उद्देश्यानि, कार्याणि, विविधान्यंगानि, राज्ञ: निर्वाचनम्, सैन्यव्यवस्था, दण्डविधानानि, करनिर्धारणानि इत्यादीनि प्रदत्तानि सन्ति।

### ज - ऐतिहासिकं महत्त्वम्-

संहितासु ऐतिहासिकमहत्त्वानां सामग्रीणामुपलब्धि: प्रचुरमात्रायामस्ति। यथा नदीनां नामानि, दाशराज्ञयुद्ध:, पंचजना:, तुर्वशं यदुम् इत्यादीनां जातीनां विवरणं प्राप्यते। एतदतिरिक्तं भाषावैज्ञानिकं महत्त्वम्, काव्यशास्त्रीयं महत्त्वम्, साहित्यिकं महत्त्वम्, वैज्ञानिकतत्वानां महत्त्वं च प्रतिपादितमस्ति।

## १.४ संहिताभाष्यकारा:

अस्मिन् संहिताभाष्यकाराणां विषये विवेचनं भविष्यति। संहितानां विविधा:

भाष्यकारास्सन्ति। यथा- ऋक्संहिताया: भाष्यकारा: विद्यन्ते स्कन्दस्वामिन:, नारायण-महोदया:, माधवभट्टमहोदया:, वेंकटमाधवमहोदया:, आचार्या: धानुष्कयज्वा महोदया:, आनन्दतीर्थमहोदया:, आत्मानन्दाचार्या:, सायणाचार्याश्च। सामसंहिताया: आचार्या: सन्ति माधवमहोदया:, गुणविष्णुमहोदया: भरतस्वामिमहोदयाश्च। शुक्लयजुस्संहिताया: माध्यंदिनसंहिताया: भाष्यकारास्सन्ति उव्वटमहोदया: महीधरमहोदयाश्च। काण्वसंहिताया: भाष्यकारास्सन्ति हलायुधमहोदया:, सायणाचार्या:, अनन्ताचार्या:, आनन्दबोधभट्टोपाध्यायमहोदयाशच। कृष्णयजुर्भाष्यकारास्सन्ति-कुण्डिनाचार्या:, आचार्यक्षुरा:, भट्टभास्कराचार्याश्च। अथर्वसंहिताया: भाष्यकारा: भवस्वामिमहोदया:, गुहदेवाचार्याश्च सन्ति। भाष्यकारेष्वेषु कतिपयानां भाष्याकाराणामत्र विशदं विवेचनं भविष्यति। अन्येषां भाष्यकाराणां विवरणं तासु-तासु संहितासु भविष्यन्ति।

### स्कन्दस्वामी

ऋक्संहिताया: स्कन्दस्वामिमहोदया: विलक्षणं भाष्यकारास्सन्ति। स्वामिमहोदयस्य भाष्ये प्रत्येकस्य सूक्तस्यारम्भे तस्य सूक्तस्य ऋषे: देवस्य चोल्लेखो विद्यते। अस्मिन् भाष्ये निघण्टुनिरुक्तसहितवैदिकार्थोपबोधकेभ्य: ग्रन्थेभ्य उपयुक्तप्रमाणान्यपि संकलितानि सन्ति। स्कन्दस्वामिमहोदयस्य भाष्यमतीवसरलं मिताक्षरञ्चास्ति। अत्र व्याकरणविषयकाणां तथ्यानामुल्लेख: संक्षिप्ततया प्राप्यते। स्कन्दस्वामिमहोदयानां भाष्यस्य प्रभाव आचार्यसायणस्य ऋक्भाष्योपरि दृष्यते। ऋक्संहिताया: चतुर्थाष्टकपर्यन्तमेव भाष्यं स्कन्दस्वामिमहोदयानां प्राप्यते। शेषार्द्धस्य भाष्यस्य सम्पूर्ति अन्येनाचार्यद्वयेन विहिता अस्ति।

### नारायण:

**स्कन्दस्वामी नारायण उद्गीथइति ते क्रमात्।**
**चक्रु सहैकंमृग्भाष्यं पदवाक्यार्थ गो चरम्।**

इत्यनेन श्लोकेन एवं प्रतिभाति नारायणोद्गीथौ स्कन्दस्वामिकालीनौ भाष्कारौ आस्ताम्। आचार्या: वेंकटमाधवमहोदया: वदन्ति नारायण: ऋग्भाष्ये स्कन्दस्वामिनं प्रति साहाय्यं चकार। नारायणमहोदयानां भाष्यशैली स्कन्दस्वामिमहोदयानां भाष्यशैलीव। श्लोकस्थक्रमेणैवं प्रतिभाति ऋग्वेदस्य मध्यभागे नारायणमहोदय: स्वकीयं भाष्यं लिखितवान्। कतिपयविद्वांस: सामभाष्यकारा: माधवस्य पितु: नारायणं तथा च ऋक्भाष्यकर्त्ता नारायणमेकमेव मन्यन्ते। किंचाद्यावधि सबलं प्रमाणं न प्राप्यते।

### उव्वटमहोदया:

उच्यन्ते उव्वटमहोदया: काश्मीरिको विद्वानासीत्। अनेन महोदयेन यजुस्संहि-



Scanned with CamScanner

तायामुपरि स्वकीयं भाष्यं विरचितम् । महोदयस्यास्य कृते यजुस्संहिताभाष्ये पद्यमेकं प्राप्यते-

**ऋष्यांदींश्च पुरस्कृत्य अवन्त्यामु वटो वसन्।**

**मन्त्रभाष्यमिदं चक्र भोजे राष्ट्रे प्र षासति।।**

**तस्यैवभाष्यस्य ग्रन्थान्तरेऽन्यदपि पद्यमेकमित्थमुपलभ्यते-**

**आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना।**

**मन्त्रभाष्यमिदं क्लृप्तं भोजे पृथ्वीं प्रशासति।।**

आभ्यां पद्याभ्यां स्पष्टं भवति उव्वटमहोदया: वज्रटमहोदयस्य पुत्रा आसन्। अस्यां महोदयानां काल: भोजराजस्य समकालीन् आसीत्। महाराज: भोजराज: धारानगरस्य शासक आसीत्। १०१८ ई. त: १०६३ ई. पर्यन्तं महाराज्ञ: भोज: स्वकीयं राज्यं कृतवान्। भोजस्य काल: एकादशशततमो वर्षस्य: काल: मन्यते। भोजराजसमकालिक उव्वट एकादशशतकस्य पूर्वाद्र्धे बभूव इति निश्चयन वक्तुं शक्यते। उव्वटभाष्ये नैकेषां मन्त्राणां आध्यात्मपरोऽर्थ: दर्षितो ऽस्ति। अनेन प्रतीतो भवति उव्वटमहोदया: तस्मिन्काले प्रौढवेदज्ञ आसन्।

### महीधरमहोदया:

आचार्यमहीधरमहोदयानां जन्म काश्यामभवत्। नागरब्राह्मणवंषीयोऽयं विद्वानासीत्। काश्यामेवाऽध्ययनं विधाय काशीराजस्याश्रये वेददीपस्य सामभाष्यस्य रचनां कृतवान्। यद्यपि भाष्यमिदं मौलिकन्नास्ति तथाप्यर्थतया नितान्तोपादेयमस्ति। अस्य भाष्यस्य पाण्डुलिपि: सरस्वतीभवनपुस्तकालये संगृहीता अस्ति। अस्य भाष्योपरि उव्वटमहोदयस्य प्रत्यक्षच्छाया दृष्यते। अनेन विदुषा निरुक्तश्रौतसूत्रादिग्रन्थेभ्य: उद्धरणानि दत्वा याज्ञिकक्रियाया: विधानं बोधगम्यञ्चाकरोत्। आचार्यमहीधरमहोदयस्य यजुस्संहितोपरिभाष्यमतिमहत्त्वपूर्णमस्ति।

### माधव:

माधव सामवेदस्य प्रथमो भाष्यकार: प्रतीयते। महोदयस्यास्य काल: षट्शताब्द्यां प्राप्यते। एतेषां भाष्यं सामसंहिताया उपरि प्राप्यते। आचार्यमाधवस्य पितुर्नाम नारायण आसीत्। माधवस्य भाष्यस्य नाम विवरणमिति प्राप्यते। छन्दार्चिकस्य भाष्यस्य नाम छन्दसिकाविवरणम् इति ख्यातमस्ति। सामसंहिता आर्चिकद्वयेन संपृक्ता अस्ति। अस्य



Scanned with CamScanner

नाम पूर्वार्चिकोत्तरार्चिकञ्चज्ञायते।उत्तरार्चिकस्य भाष्यस्य नाम उत्तरार्चिकविवरणम् इति ख्यातमस्ति। इदानीं पर्यन्तमिदं भाष्यम् अमुद्रितमस्ति। प्रसिद्धसामज्ञाः आचार्याः सत्यव्रतसामश्रमीमहोदयाः वदन्ति सायणभाष्यस्य संस्करणे अप्यस्य भाष्यस्यांशः प्राप्यते। तत्र टिप्पणीरूपेणापि प्राप्यते। माधवस्यायं भाष्यम् अतीवमहत्त्वपूर्णमस्ति।

### हलायुधः

लायुधमहोदयाः काण्वसंहितायाः भाष्यकारास्सन्ति। अस्याचार्यस्य भाष्यस्यनाम ब्राह्मणसर्वस्वमस्ति। भाष्यारम्भे एव हलायुधेन किञ्चित् वृत्तं लिखितमस्ति। हलायुधमहोदयः स्वकीये समये प्रसिद्धो वैदिको विद्वानासीत्। हलायुधः शैवदर्षनाचार्यः, वेदमीमांसामर्मज्ञः, आगमपारंगमश्चासीत्। अस्य कृतिषु ब्राह्मणसर्वस्वम्, मीमांसासर्वस्वम्, वैष्णवसर्वस्वम्, शैवसर्वस्वम्, पण्डितसर्वस्वञ्चेति पंचग्रन्थाः प्रसिद्धा आसन्।

### भवस्वामी

तैत्तिरीयसंहितायाः भाष्यकत्र्ता आसीत् भवस्वामी महोदयः। अस्य परिचयः स्वकृतबौधायनप्रयोगसारनामकग्रन्थस्यारम्भिके भागे केशवस्वामिना कृतः। अत्र केशवस्वामिना लिखितमस्ति भवस्वामिमतानुसारिणा मया तु उभयमप्यंगीकृत्य प्रयोगसारः क्रियते। अनेन प्रकारेणैवं प्रतिभाति भवस्वामिमहोदयाः भाष्यकारा आसन्।

## १.५ तैत्तिरीयसंहिता

तैत्तिरीयसंहितायाः प्रसारः दक्षिणे भारते दृष्यते। आंशिकरूपेण महाराष्ट्रप्रदेशः समग्ररूपेण चान्ध्रद्रविणदेषीया जना अस्याः शाखाया अनुवर्तिनस्सन्ति। अस्याः संहितायाः ब्राह्मण-आरण्यक-उपनिषद्-श्रौतसूत्र-गृह्यसूत्रादय अक्षुण्णास्सन्ति। भाष्यकर्तृणां सायणमहोदयानां तैत्तिरीयासंहिता स्वकीया शाखा अस्ति। ये विषयाः शुक्लयजुर्वेदे वर्णितास्सन्ति ते एव विषया अत्रापि वर्णितास्सन्ति। पौरोडाश-याजमान-वाजपेय-राजसूयप्रभृतिनानायागानुष्ठानानां विशदं वर्णनमत्रा-प्यस्ति। यज्ञमभिलक्ष्य अस्या संहिताया उपरि विद्वत्तापूर्णभाष्यं सर्वप्रथममाचार्यसायणेन विलिखितम्। परञ्च तस्मादपिपूर्वं भाष्यं भट्टभास्करमिश्रमहोदयस्यास्योपरि प्राप्यते। ज्ञानयज्ञनाम्ना भाष्यमिदं प्रसिद्धमस्ति।

## १.६ मैत्रायणीसंहिता

कृष्णयजुर्वेदस्यैका शाखा मैत्रायणी अस्ति। अस्या शाखायाः संहिता विद्यते मैत्रायणीसंहिता। मैत्रायणीसंहिता गद्यपद्यात्मिका अस्ति। अस्यां संहितायां चत्वारि काण्डानि-सन्ति। प्रथमं काण्डं एकादशष्वध्यायेषु विभक्तमस्ति। येषु प्रपाठकेषु दर्शपूर्णमास-अध्वर-आधान-पुनराधान-चातुर्मास्य-वाजपेयप्रभृतीनां यज्ञानां विवरणमस्ति। द्वितीयं काण्डं



Scanned with CamScanner

त्रयोदशप्रपाठकेषु विभाजितमस्ति। प्रपाठकेष्वेषु काम्य-इष्टि-राजसूय-अग्निचित्तिप्रभृतीनां यज्ञानां सविस्तृतं वर्णनमस्ति। तृतीये काण्डे षोडषप्रपाठकास्सन्ति। येषु अग्निचिति-अध्वरविधि-सौत्रामणी-अश्वमेधादीनां विषयाणां वर्णनमस्ति। चतुर्थं काण्डं खिलकाण्डनाम्ना विख्यातमस्ति। अस्मिन् प्रपाठके पूर्वप्रदत्तानां राजसूयादि यज्ञानां विषये आवश्यकवस्तूनां विषदतया संग्रहोऽस्ति। समग्रसंहितायां २१४४ मन्त्रास्सन्ति। एते सर्वे मन्त्रा ऋग्वेदस्य विभिन्नमण्डलेषु समुपलब्धास्सन्ति।

## १.७ कठसंहिता

यजुर्वेदस्य सप्तविंशतिशाखास्वेका शाखा कठशाखा विद्यते। महर्षिपतञ्जलिमतानुसारेण कठसंहितायाः प्रसारः पठनं पाठनञ्च प्रतिग्रामम् आसीत्। ग्रामे ग्रामे काठकं कालापकञ्च प्रोच्यते महाभाष्ये। अनेन अस्याः संहितायाः प्राचीने काले प्रभूतप्रचारः प्रसार आसीत्। परञ्च अधुना अस्याः शाखाया अध्येतृणाम् अतिन्यूनता दृष्यते।

कठसंहितायाः पञ्चखण्डानि सन्ति। तानि च क्रमशः इठिमिका, मध्यमिका, ओरिमिका, याज्यानुवाक्या, अश्वमेधाद्यनुवचननामभिः विख्यातानि सन्ति। ऐतेषां खण्डानामंशस्यनाम स्थानकमस्ति। अस्यां संहितायां स्थानकस्यसंख्या चत्वारिंशत् अनुवचनानां संख्या त्रयोदशश्च विद्यन्ते। अनुवाकानां संख्या त्रिश्चत्वारिंश्दधिकाष्टशतम्, मन्त्राणां संख्या एकनवत्यधिकत्रिसहस्रम्, मन्त्रब्राह्मणयोस्सम्मिलितासंख्या अष्टादशसहस्रपरिमितास्सन्ति।

इठिमिकायाः अष्टादशस्थानकेषु पुरोडाश-अध्वर-पशुबन्ध-वाजपेय-राजसूयादियागानां विशदं वर्णनमस्ति। मध्यमिकायाः द्वादशस्थानकेषु सावित्री-पंचचूड़-स्वर्ग-दीक्षित-आयुष्यादीनां विवेचनं विवेचितमस्ति। ओरिमिकायाः दशस्थानकेषु पुरोडाशुब्राह्मण-यजमानब्राह्मण-सत्रप्रायश्चित्ति- चातुर्मास्य- सव- सौत्रामण्यादीनां विवरणमस्ति। अन्तिमे काण्डे त्रयोदशानुवचनानि सन्ति। अत्र दर्शपौर्णमास- अग्निहोत्र- आधान-काम्यइष्टि- निरूढपशुबन्ध-वाजपेय- राजसूय- अग्निचयन-चातुर्मास्य- सौत्रामणी-अश्वमेधादियज्ञानां सविशिष्टं वर्णनमस्ति। कृष्णयजुर्वेदस्य चतसृषु संहितासु न केवलं स्वरूपतः एकरूपता अस्त्यपितु तासु वर्णितानुष्ठानेषु तथा तन्निष्पादकमन्त्रेष्वपि साम्यं वर्तते।

## १.८ कपिष्ठलकठसंहिता

चरणव्यूहसूत्रानुसारेण चरकशाखान्तर्गते कठानाम्, प्राच्यकठानाम् कपिष्ठलकठानाञ्चोल्लेखः प्राप्यते। येनोल्लेखेनास्या शाखायाः संबंधस्य पूर्णपरिचयो भवति। कपिष्ठल एकस्य ऋषिविशेषस्य नामासीत्। अस्योल्लेखं महावैयाकरणपाणिनीमहोदयः कपिष्ठलो गोत्रे इत्यस्मिन् सूत्रे कृतवान्। भाष्यकारेण दुर्गाचार्येणाऽपि स्वात्मनं कपिष्ठलो



Scanned with CamScanner

वाशिष्ठः इति गदितम्। यस्येतिहासकर्ता आचार्या जगदीशचन्द्रमिश्रमहोदयाः लिखन्ति एवमनुमानमस्ति कपिष्ठलग्रामस्य प्रतिनिधिः कैथलेत्याख्योग्राम इत्येवासीत्। ग्रामो ऽयं कुरुक्षेत्रे सरस्वतीनद्याः पूर्वक्षेत्रेऽवस्थित आसीत्।

अस्याः शाखाया एकैव प्रति विद्यते साऽप्यपूर्णा एवोपलब्धा अस्ति। काठकसंहितायाः स्वरांकनपद्धति ऋग्वेदेन सह मिलति। ऋग्वेद इव ग्रन्थोऽयमष्टकेष्वध्यायेषु च विभक्तोऽस्ति। इत्थं रूपेण कपिष्ठलसंहितायामुपरि ऋग्वेदस्यैव सातिशयः प्रभावः परिलक्ष्यते।

## १.९ उपसंहारः

वैदिकवाङ्.मयस्येतिहासे मन्त्रसमुदाय एवाऽत्र संहितापदेन व्यवहृतः। परः सन्निकर्षः संहिता इत्यनेन व्याकरण शास्त्रमतेन वर्णानाम् अत्यंतसन्निधिः संहिता संज्ञः स्यात्। पदपाठे मन्त्रस्यैकैकं पदं पृथक् क्रियते। व्याकरणदृष्ट्या योग्यपदसमूहानां संज्ञा संहिता अस्ति। मन्त्राणां समूहो वेदे प्राप्यते। वेदशब्दस्यार्थे मन्त्रब्राह्मणयोः वेदनामधेयमिति प्रसिद्धम्, इत्यनेन संहिता इत्यस्य भागद्वयं कर्तुं शक्यते मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्ररूपिणीसंहिता ऋग्देवसंहिता, यजुर्वेदसंहिता, सामवेदसंहिता, अथर्ववेद संहिता इत्यादयस्सन्ति। ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य भाष्यरूप्येव। ऋग्वेदे दशमण्डलानि सन्ति। येषु मण्डलेषु अष्टाविंशत्योत्तरसहस्राणि सूक्तानि सन्ति। अत्र एकाशीत्युत्तरपंचशताधिकानिसहस्राणि ऋचस्सन्ति। अस्यां संहितायां समस्तमन्त्राणां रचना चतुर्दशषु छन्देषु अस्ति। शौनकस्य चरणव्यूहसूत्रानुसारेण ऋग्वेदस्य पंचशाखास्सन्ति। अस्यां संहितायां यागविधिविषयाणां संबंधितानां कर्मकाण्डीयप्रक्रियाणां वर्णनमस्ति। अस्यायाः संहितायाः भेदद्वयं दृश्यते। शुक्लयजुर्वेदसंहिताकृष्णयजुर्वेदसंहिता च। शुक्लयजुस्संहितायाः शाखाद्वयं विद्यते। सामवेदीयमन्त्राणां प्रयोगः च यज्ञादीनामवसरे उद्गाता करोति। महाभाष्ये लिखितमस्ति सहस्रवर्त्मा सामवेदः अर्थात् सामसंहितायाः सहस्रः शाखा आसन्। परंचेदानीं तिस्रः शाखाः प्राप्यन्ते। कौथुमराणायनीयाजैमिनीया चेति। कौथुमशाखायाः भागद्वयं प्राप्यते। पूर्वार्चिकमुत्तरार्चिकंच। अथर्ववेदे अभिचारादनामुचारादीनां च मन्त्राणां संकलनमस्ति। मारणमोहनादिमन्त्रैस्सह औषधीनां प्रतिपादनमन्त्रा अप्यत्रसन्ति। अयं वेदः ऐहिकामुष्मिकयोः फलानां प्रदाता अस्ति। अस्य वेदस्य रचना यज्ञविधानार्थं नास्ति।

## ३.५ प्रश्न परीक्षते

१.संहितानां महत्त्वं व्याख्याति करोति



Scanned with CamScanner

२. संहितानां महत्त्वं विवृणोति करोति

३. तैत्तिरीयसंहिता, मैत्रायणीसंहिता परिभाषते करोति

४.कठसंहिता, कपिष्ठलकठसंहिता परिभाषते करोति

५. संहिताभाष्यकारा: आलोचयति करोति

❖❖❖



Scanned with CamScanner

# अध्याय:२

# वैदिकसाहित्यम् इतिहासश्च–II

## २.० लक्ष्य

एतत् अध्याय उत्तर अध्यायिन् विद्यार्थिन् समर्थ

ऋक्संहितायाः वर्ण्याविषयाः

यजुः संहितायाः

अथर्ववेदस्य

सामवेदस्य

ब्राह्मणः आरण्यकग्रंथाः

उपनिषदां, बृहदारण्यकोपनिषत्परिचय, वेदानां परिचय

## २.१ प्रस्तावना

ऋच्यते स्तूयते यया सा ऋक् तादृशीनामृचां समूह एव ऋग्वेदः। यत्रार्थवशेन पादव्यवस्था सा ऋगिति मीमांसकाः। चतुर्षु वेदेषु ऋग्वेदस्य महत्त्वमतितरामस्ति। ऋग्वेदो हि धार्मिकस्तोत्राणामेको विशालनिधिः। अत्र बहुभिर्ऋषिभिः विविधैः भावभव्यैः शब्दैः विभिन्नाः देवाः सादरं स्तुताः भवन्ति। पाश्चात्यानां मते भाषायाः भावस्य च विचारेण अन्येभ्यो वेदेभ्य अतीवप्राचीनोऽस्तययमृग्वेदः। भारतीयदृष्ट्या ऋक्संहितायाः अभ्यर्हितत्वं पूजनीयता च सर्वत्र स्वीकार्यमस्ति। तैत्तिरीयसंहितानुसारेण यज्ञस्य यद्विधानं क्रियते तत्तु शिथिलं भवति किंच ऋग्वेदेन विहितानुष्ठानं दृढम्भवति। यथा-

**यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तत्, यदृचा तत् दृढमिति।**

पुरुषसूक्तेऽपि यशोरूपी “सहस्रशीर्षा” मन्त्रः परमेश्वरात् सर्वप्रथमः ऋच्याविरभूत्। यथा-

**तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।**

**छन्दांसि जज्ञिरे तत्स्माद्यजुस्तस्मादजायत।।**

**अत्र ऋचः नाम ऋक्। सर्वप्रथमा संहिता ऋक्संहिताऽस्ति।**



Scanned with CamScanner

यजुर्यजते इति (निरुक्त 7.12) वचनेन यजुश्शब्दास्यार्थो भवति यज्ञसंबद्धिता: मन्त्रा:। इज्यतेऽनेनेति यजु इत्यनुसारेण यै: मन्त्रै: यज्ञा: क्रियन्ते तैरुच्यते यजु:। यजु: संहिताया: कर्मकाण्डेन सह प्रत्यक्षसंबधो विद्यते, एतदर्थमस्य वेदस्य नाम अध्वर्युवेदोऽप्यस्ति। यज्ञेष्वध्वर्युनाम्न ऋत्विज् प्रतिनिधित्वं करोत्यस्या: संहिताया:। अत: सायणस्य विचारो विद्यते अध्वर्युनाम्न एक ऋत्मिग्ज्ञस्य स्वरूपं निष्पादयति। ऋक्भाष्यभूमिकायामस्या: कृते प्राप्यते अध्वरं युनक्ति, अध्वरस्य नेता।

प्रसिद्धमस्ति अनियताक्षरावसानो यजु: अर्थात् यत्र अक्षराणां संख्या निश्चिता नास्ति तत्र यजु: भवति। पूर्वमीमांसाया: कथनं विद्यते शेषे यजु: शब्द:। पद्यात्मका: गीत्यात्मकाश्च रहिता: मंत्रा: यजु: संहितायां प्राप्यन्ते। एतादृशाणां मन्त्राणां समूह: यत्र प्राप्यते तत्र यजु: संहिता भवति।

## २.२ ऋक्संहिताया: वर्ण्यविषया:

संहितासु प्रथमा संहिता ऋक्संहिताऽस्ति। इयमृक्संहिता दशमण्डलेषु विभक्ता। अस्यां द्वितीयमण्डलादारभ्य सप्तममण्डलपर्यन्तम् एकस्यैव विशिष्टकुलस्य ऋषीणां प्रार्थना संकलिताऽस्ति। अष्टमे मण्डले प्रायश: मन्त्रा: कण्वऋषिणा सह सम्बद्धास्सन्ति। नवमे मण्डले पवमानस्य अर्थात् सोमस्य विषये मन्त्रा: संगृहीतास्सन्ति। ऋक्संहिताया द्वितीये मण्डले गृत्समद:, तृतीये विश्वामित्र:, चतुर्थे वामदेव:, पंचमे अत्रि:, षष्ठे भरद्वाज5 सप्तमे च मण्डले वसिष्ठादय ऋषयो वर्णितास्सन्ति। ऋक्संहिताया: प्रथमे मण्डले चतुर्दशवर्गास्सन्ति। प्रतिवर्गमेकैकस्य ऋषेर्वणनमस्ति। दशमे मण्डले सूक्तानां वैविध्यं दृश्यते।

ऋक्संहितायां नैके विषया: वर्णितास्सन्ति परंच प्रामुख्येन “यज्ञ” एव मुख्यप्रतिपाद्य:। लौगाक्षिभास्करेण “यागादिरेव धर्म:” इत्युक्त्वा पुरुषार्थचतुष्टयस्य प्रथमसाधनभूतधर्मस्य सम्पादने यज्ञमीमांसा कृता। संपूर्ण वैदिकं कलेवरं यज्ञविषयकमिति। ऋक्संहिताया: प्रथम ऋक् यज्ञाविद्याया: प्रतिपादनं करोति। तत्र अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम्। अनेन प्रकारेणात्र मुख्यप्रतिपाद्य: यज्ञ:।

### ऋक्संहितायां देवताविचार

ऋक्संहितायां त्रिविधा: देवता: विभक्तास्सन्ति। द्यौस्थानीय-देवता, अंतरिक्षस्थानीयदेवता: पृथ्वीस्थानीयदेवताशेच।

द्यौस्थानीयदेवतासु वरुण:, मित्र:, सूर्य:, सवितो, पूषन्, विष्णु:, उषस्, आश्विनादिप्रमुखास्सन्ति। यास्को वदति यत् देवतासु काचन पृथ्वीस्थानीया:, काचन अंतरिक्षस्थानीया:, काचन द्युस्थानीयास्सन्ति। पृथ्वीस्थानीयदेवतास्वग्निदेवता, अंतरिस-



Scanned with CamScanner

थानीयास्विन्द्रदेवता, द्यौस्थानीयासु सूर्यवरुणप्रभृतिदेवतास्सन्ति। तिस्र एव देवता इति नैरुक्ता:। अग्नि: पृथ्वीस्थानीय:, वायुर्वेन्द्रो वाऽन्तरिक्षस्थानीय: सूर्यो द्यौस्थानीय:। अग्नये सर्वाधिका ऋचस्सन्ति। सर्वाधिकैरोजस्विभि: तथा वीररसमण्डितैर्मन्त्रै इन्द्रस्य स्तुतिरस्ति। विशिष्टोदात्तभावनामण्डिताऋच: वरुणविषये समुपलब्धा: भवन्ति। देवीषु ऊषाया: स्थानमग्रगण्यमस्ति। सर्वाधिककवित्वमण्डिता:, प्रतिभाशालिन्य:, सौंदर्याभिव्यंजिका ऋच: ऊषादेव्या विषये समुपलभ्यन्ते। यथा-

**अभ्रावेव पुंस एति गत्रारुगिव सनये धानानाम्।**

**जायेव पत्य उशती सुवासा ह्रस्वेव निरीणीते अप्स:।।**

**कन्येव तन्वा शासदाना एषि देवि देवभिपक्षमाणम्।।**

**सरमयमाना युवतीपुरस्तादानिर्वशांसि कृणुष विभाति।।**

**ऋग्वेद: - १.२३.१०**

ऋग्वेदे मित्रस्य वर्णनम् एकस्मिन् सूक्ते प्राप्यते। सूर्य आत्मा जगतस्तस्थुषश्च इत्युक्तवा सूर्य: जगत आत्मा अस्तीति निर्दिष्टोऽस्ति। सौरमंडले सविताया: वर्णनमेकादशसु सूक्तेषु प्राप्यन्ते। सवितृदेवताया: वर्णनमत्र प्रेरकदेवतारूपेण प्राप्यते। पूषन् इत्यस्य देवस्य वर्णनमष्टसु सूक्तेषु प्राप्यते। तद्विष्णो: परमं पदम् इत्यनुसारेण सर्वेषु देवेषु विष्णुएव सर्वोच्चपदे विराजमानोरस्ति। अश्विनौयुगलदेवतारूपेण स्वीक्रियते। ऋग्वेदस्य पंचाशत्सूक्तेष्वस्य वर्णनमस्ति। ऊषादेवताया: वर्णनमृग्वेदस्य विंशतिषु सूक्तेषु प्राप्यते। रुद्रस्य कृते ऋग्वेदे त्रीणि सूक्तानि प्राप्यन्ते। मरुत: कृते त्रयस्त्रिंशत् सूक्तानि प्राप्यन्ते। पर्जन्यस्य कृते त्रयाणां सूक्तानां वर्णनं प्राप्नोति। अग्निदेवताया: कृते द्विशतं सूक्तानि प्राप्यन्ते। सोमस्य कृते विंशत्युत्तरैकशतं सूक्तानि ऋक्संहितायां प्राप्यन्ते। अन्येषां युगलदेवतानामपि विवरणं प्राप्यते। यथा - अग्नीषोमौ, इन्द्राविष्णु:, इन्द्राग्नी इत्यादय:।

## व्याख्यानपद्धतय

कस्यापि मंत्रस्य सूत्रस्य वा रहस्यात्मकं ज्ञानं व्याख्यानेनैव भवति परंच व्याख्यानस्य परंपरा भिन्ना: भिन्ना: भवन्ति। वैदिकसाहित्यस्यादिमे ग्रंथे ऋग्वेदे मन्त्रा: प्राप्यन्ते। यावन्मन्त्राणां व्याख्यानं न भविष्यति तावत्तस्मिन् मंत्रे व्याप्तानामर्थानां ज्ञानाभावो भवति। अत: ज्ञानपरम्पराया: विकासो भवेदेतदर्थं व्याख्यानमावश्यकम्। अत्र विविधानां व्याख्यानपद्धतीनां विचारा: क्रियन्ते।

## भारतीयपद्धति

अस्यां पद्धत्यां व्याख्यानार्थं निरुक्तस्याश्रयां नीयते। यास्कविरचितनिरुक्तादपि प्राचीनतर: निघण्टुग्रंथोऽस्ति। तत्र वैदिकशब्दानां विस्तृतव्याख्या: प्राप्यन्ते। निघण्टुशब-



Scanned with CamScanner

दस्यार्थो भवति शब्दानां सूची। निघण्टुग्रंथे संहितायाः क्लिष्टान् शब्दान् एकत्र संचयं कृत्वा तेषामर्थाः तत्र प्राप्यन्ते। समुपलबधेषु ग्रंथेषु निघण्टुरेव वेदार्थस्फुटीकरणस्य प्रथमः प्रयासः परिलक्षितः। प्रातिशाख्यानामपि रचना तत्कालिकं किं वा तत्पूर्ववर्ती नासीत्। ग्रंथेष्वेषु वैदिकभाषायाः विचित्रपदानां, स्वराणां संधिपदानांचैव विवेचनमस्ति। पुराऽनैकेषु ग्रंथेषु निरुक्तविषयिणी सत्ताऽसीत्। येषां सूचनाऽवान्तरग्रंथेषु यत्र तत्रोद्धरणरूपेण समुपलब्धास्सन्ति। अतः वेदार्थव्याख्यानस्य सर्वाधिकोपयुक्तः ग्रंथः यास्कविरचितं निरुक्तमस्ति।

### यास्कमहोदयस्य पक्ष

ब्राह्मणग्रंथेषु मन्त्राणां विनियोगविधानम् उदितानुवादमात्रमेवाऽस्ति। वैदिकमंत्राणामर्थोऽनुपपन्नो नास्ति। कस्यापि वृक्षस्य यथार्थं विधिपूर्वकं शाखाच्छेदनमनुग्रहणमेव न तु हिंसेति। यस्मिन् कर्मणि पुरुषो वेदेन नियुक्तो भवति तस्मिन् कर्मण्यहिंसा भवति। वैदिकी हिंसा हिंसा न भवतीति प्रसिद्धम्।

### पाश्चात्यपद्धतिः-

वेदार्थानुशीलने प्रधानतया त्रीणि मतानि सन्ति। एकं मतं पाश्चात्त्येयवैदिकार्थानुसंधित्सूनां मतम्, अन्ये द्वे भारतीयविदुषामेव स्तः। पाश्चात्त्यानां मतानुसारेण वेदार्थज्ञानाय तुलनात्मकभाषाशास्त्रस्य ऐतिह्यग्रंथस्य चाध्ययनस्यावश्यकतास्ति। भारतेतरदेशानामाचारव्यवहाराणामध्ययनस्यापेक्षा तद्वदेवास्ति। अनेन कारणेनेयं पद्धतिः Historical Method इति नाम्नाख्यापिताऽस्ति। भारतीयपरम्परां प्रति वैदेशिकाः विद्वांसः उदासीननास्सन्ति। ते वदन्ति भारतीयपरम्परायाः पक्षधरत्वेन तेषां वेदस्य मूलार्थपर्यन्तमभिगमनवमेव न भवति। पाश्चात्त्याः वदन्ति भारतीया वैदिकव्याख्यापद्धतिः जटामालादिपदक्रमपाठैः पुष्टास्ति। पाश्चोत्य-पद्धत्यां पाश्चात्त्याः वैदिकऋचां व्याख्याः कुर्वन्ति।

### आध्यात्मिकपद्धति-

वेदेषु देवतानां स्थानमतिमहत्त्वपूर्णमस्ति। मानवाः प्रतिदिवसं प्रकृतिदेव्याः विविधाः लीलाः पश्यन्ति। वैदिककालस्य महर्षयस्तस्यास्तत्तल्लीलायाअनुभवं कृत्वा लिखन्ति। महर्षयः विश्वसन्ति यदासां देवतानामनुकम्पयैव सर्वाणि कार्याणि सम्पाद्यन्ते। जगति घट्यमानानां सर्वासामपि घटनानां कारणभूताः देवता एव सन्ति।

**दैवाधीनं जगत्सर्वं मन्त्राधीना तु देवता।**

**ते मन्त्राः ब्राह्मणाधीना तस्मात् ब्राह्मणदेवता।।**

ऋग्वेदे देवता प्राणिशक्तिशालित्वात् असुरा इति प्रोक्ताः।

ऋग्वेदस्यादिमे युगे बहुदेवतानां सत्ताऽसीत्। गच्छता कालेन मानसिके विकासे सति



Scanned with CamScanner

देवतास्वेकैवाधिपति: कल्पितोऽभूत्। पुरुषसूक्तस्य सर्वेश्वरवादं स्पष्टतया दृश्यते। परं पाश्चात्त्यानामेषा देवता - विषये विचारो भौतिक एव।

## सायणाचार्यस्य पद्धति

सायणाचार्यस्य व्याख्यानपद्धति: षड्अंगाध्ययनपुरस्सरं दृश्यते। ऋक्संहिताया: प्रथमाष्टकस्य व्याख्यायां शब्दानां पर्यालोचने व्याकरणस्य नैपुण्येन निरूपणं कृतमनेन। प्राय: प्रतिमहत्त्वपूर्णं शब्दस्य व्युत्पत्ति:, सिद्धि:, स्वरादीनां च वर्णनं पाणिनीयसूत्राणां साहाय्येन प्रातिशाख्यसाहाय्येन च कृतम्। सायणभाष्ये निरुक्तयाप्युपयोग: दृश्यते। सायणमहोदय: ऋग्वेदस्य प्राचीनभाष्यकर्तृणां स्कंदस्वामीमाधवादीनामप्यर्थान् यथावकाशे ग्रहणमकरोत्। कल्पसूत्राणां प्रयोग: स्वभाष्ये सविस्तरं कृतवन्तस्सन्ति। यज्ञविधाने सायणस्य प्रगाढप्रतिभा दृश्यते। सायणेन कल्पसूत्रविषयगतानामावश्यकतत्त्वानां वर्णनं प्रामाणिकग्रंथानामुद्धरणपुर:सरमकरं। अनेन कारणेन सायण: वेदभाष्यस्य गौरवोऽस्ति।

## श्रीमदरविन्दस्य पद्धति

सम्प्रति तत्त्वचिन्तनेषु अध्यात्मसाधकेषु चारविन्दमहोदया: मान्यास्सन्ति। एतेषां महोदयानां मते येषां विदुषां वेदानां प्रति श्रद्धास्सन्ति तेषां सम्मुखे स्वत एव वैदिकशब्दानां अर्थ: स्फुटो भवति। वेदस्यार्थ: रहस्यात्मक: निगूढश्चास्ति। श्री अरविन्दमहोदयानामनुसारेण योगेन तपसा च विधूते पवित्रतमे हृदि एव स्फुरितो भवति वेदार्थ:। वैदिकशब्द: आध्यात्मिकतत्त्वस्यैव निश्चयेन प्रतीकोऽस्ति। यथा वेदे गौ शब्द: प्रकाशस्य प्रतीको भवति। श्रीमद्भागवतेऽपि प्रतिपादित: परोक्षवादो वेदोऽयम्। अर्थात् शाब्दिकोऽर्थ: भिन्न: तात्विकोऽर्थ: भिन्न:। यथा-वैदिकऋषि: कस्मिन्नपि मंत्रे अश्वाय प्रार्थनां करोति तदा तस्यार्थ: अश्वरूप: सामान्यघोटको न भवत्यपित्वश्वपदेन तत्रान्तर्बलस्य प्रस्फुरणं प्रति संकेतो भवति। घृतशब्द: यज्ञस्य साधनभूत: सामान्यस्यावबोधं करोति। अत्रारविन्दमते घृ-प्रकाशो भवति अत एव इन्द्रस्याश्व: यदा घृतस्नु पदेन बोधितो भवति तदा तस्यार्थ: घृतस्य क्षरणं न भवत्यपितु प्रकाशस्य सर्वस्य सर्वत्र विकीर्णकर्ता एवार्थ:। अग्निपदेन न केवलं बाह्यवहिन्नपदस्य बोधो भवत्यपित्वग्निशब्दादत्रान्त: करणस्य स्फुरितस्य चैतन्यस्यैव बोधो भवति। अनेन प्रकारणे अरविन्दमहोदयस्य पद्धति: अतीवाधुनिकी दृश्यते।

## वेदाविर्भाविकाललविचार :-

विश्वस्य सर्वप्रथमं साहित्यमस्ति ऋग्वेद:। अस्याविर्भावकालस्य प्रत्यक्षतया प्रमाणं न प्राप्यते। भारतीया: विद्वांस: वेदान् अपौरुषेयं वदन्त्येतावता अत्र ऋग्वेदस्याविर्भावकालस्य विचार: न संजात:। अस्मिन् विषये पाश्चात्यानां मध्ये मैक्समूलरमहोदया: वेदानां कालनिर्णेतुं श्लाघ्य: प्रयास: कृतवन्त:। अस्यानुसारेण (1150) पंचाशदुत्तरैकादशशततमे ई.पूर्वे ऋग्वेदस्य रचना जाता। सर्वेषां विदितमस्ति बौद्धधर्मस्योदयात्पूर्व



Scanned with CamScanner

वैदिको धर्म आसीत् यतोहि बुद्धेन वेदानां, ब्राह्मणानामुपनिषदानांच ग्रंथानां कृते स्वविचारा: कट्वी आलोचनाश्च कृतम्। बुद्धस्य काल: (500) पंचशतं ई.पू. मन्यते। वैदिक-साहित्ये चत्वारि युगानि सन्ति छंदोयुगम्, मन्त्रयुगम्, ब्राह्मणयुगम् सूत्रयुगंच। प्रतियुगं वर्षशतद्वयात्मक: काल: कल्पित:। अनुमानतयेदं कालं निर्धारितम्। परंच (1889) ऊननवत्युत्तराष्टादश शततमे खरूीष्टाब्दे भौतिकधर्मव्याख्यायां जिम्फोर्टव्याख्यानमालायां विदुषां मतामासीत् - नात्र भूतले काऽपि शक्तिरीदृशी या वैदिकरचनाया: कालो वक्तुं शक्नोति निश्चप्रचतया।

"ऋग्वैदिक इंडिया" इत्यस्मिन् पुस्तके अविनासचन्द्रस्य मतं भूगर्भशास्त्रीयतत्त्वानां घटनामवलम्ब्य सप्तविंशतिसहस्राब्दा अतिक्रांता इत्यस्ति। लोकमान्यबालगंगाधरतिल-कमहोदया: डा. याकोबीमहोदायाश्च ज्योतिषतत्त्वानामाधारीकृत्य ऋग्वेदस्य रचनाकाल: चतुर्विंशतिशतं वर्षाणि मन्यन्ते।

शंकरबालकृष्णदीक्षितस्य मतं विद्यते शतपथब्राह्मणस्याधारीकृत्य, त्रिसहस्रम् ई.पू. काले शतपथब्राह्मणस्य रचनाऽभवत्। शतपथब्राह्मणत: तैत्तिरीयासंहिता प्राचीनाऽस्ति। ऋग्वेद: तैत्तिरीयसंहिताया अपि प्राचीनोऽस्ति। ऋग्वेदस्य कालमनेन मतेन पंचाशतमुत्तरत्रिसहस्राणि वर्षाण्यकलितानि।

सप्तोत्तरेकोनविंशतिततमे शताब्यां डॉ. हूगोविन्कलरमहोदया "बोधाण् कोड" दति रूथाने वर्तमाने टर्कीदेशान्तर्गते एकं शिलालेखमवाप। तेनानुसारेण वेदानां काल: द्विसहस्रम् ई.पूर्वमध्ये सिद्ध्यति।

ऋग्वेदस्य प्रसिद्धनदीसूक्ते गंगाया अतिसंक्षिप्तवर्णनमस्ति। तत्र पंचनदप्रदेशे शी-तस्य प्राबल्यमासीदित्यपि प्रतीयते। भूतत्त्वज्ञानां विचारानुसारेणेयं वार्ता पूर्वपाषाणयुगस्य विद्यते। अस्य काल: ख्रीष्टात् पंचाशतसहस्रादारभ्य पंचविंशतिसहस्रमभिव्याप्य वर्तते।

## ऋक्संहिताया: शाखाविचार

भाष्यकारेण पतंजलिनोक्तम् - चत्वारो वेदा: सांगा: सरहस्या: बहुधा: भिन्ना:। एकशतमध्वर्युशाखा: सहस्रवर्त्मासामवेद:। एकविंशतिधावाहवृच्यम्। नवधाऽथर्वणो वेद:। अस्यानुसरेण ऋग्वेदस्यैकविंशति: शाखा: निर्दिष्टा:। परंचेदानीं केवलं पंचशा-खा: प्राप्यन्ते। आसां नामानि शाकलशाखा, वाष्कलशाखा, आश्वलायनशाखा, शाङ्. खायनशाखा मण्डूकायनशाखाश्च सन्ति।

### शाकलशाखा

ऋक्संहिताया: प्रचलिता शाखा विद्यते शाकलशाखा। सम्प्रति शाकलसंहिता एव ऋक्संहिता अस्ति। अत्र मण्डलक्रमानुसारेण दशमण्डलानि, पंचाशीत्यनुवाकानि, अष्टाविंशत्युत्तरसहस्राणिसूक्तानि च सन्ति। अत्र अशीत्युत्तरपंचशताधिकदशसहस्राणि



Scanned with CamScanner

(10580.5) मन्त्राः, षड्विंशदुत्तराष्टशताधिकं त्रिपंचाशदधिकैकलक्षं (153826) शब्दाः द्वात्रिंशत्सहस्राण्युत्तरचतुर्लक्षान्यक्षराणि (432000) च सन्ति। अष्टकक्रमानुसारेणाष्टाष्टकानि, चतुष्षष्ट्यध्यायाः षडाधिकद्विसहस्राणि (2006) वर्गाश्च सन्ति। मन्त्राणां समूहः वर्गोऽस्ति। शाकलसंहितायामन्ते ऋक्परिशिष्टनाम्नः षट्त्रिंशतसूक्तानि सङ्.गृहीतानि सन्ति। सूक्तेष्वेषु कतिपयानि सूक्तानि नितांतप्रसिद्धानि सन्ति। यथा श्रीसूक्तम्, मेधासूक्तम्, शिवसंकल्पसूक्तम् रात्रिसूक्तंच।

**वाष्कलशाखा -**

वर्तमाने वाष्कलशाखायास्संहिता उपलब्धा नास्ति परंचास्याः वर्णनं ग्रंथेषु प्राप्यते। शाकलयानुसारेण ऋग्वेदस्यान्तिमो मन्त्रः "समानी व आकूति" अस्ति किंचेवाष्कलसंहितानुसारेण "तच्छ्रेयोरावृणीमहे" इत्यन्तिमो मन्त्रो विद्यते। वाष्कलशाखायां सप्तदशाधिकसहस्रसंख्यकानि सूक्तानि सन्ति। कतिपयग्रंथानामनुसारेण वाष्कलशाखा अपूर्णाऽस्ति।

**आश्वलायनशाखा -**

सम्प्रत्याख्वालायनशाखा अनुपलब्धाऽस्ति। सप्तदशशताब्द्या आचार्या आसन् कवीन्द्राचार्यमहोदयाः। ऐतेषामाचार्याणां सूच्याम् आश्वलायनशाखा उल्लेखः स्पष्टरूपेण प्राप्यते। विद्वांसः वदन्ति सम्प्रति अस्याः शाखायाः गृह्यसूत्रश्रौतसूत्रादिकंच समुपलब्धास्सन्ति। आश्वलायनसंहितानां ब्राह्मणनांचोपलब्धिः कस्मिश्चित् समये अवश्यमेवासीदिति वैदिकवाङ्.मयस्येतिहासे लिखितमस्ति।

**शाङ्.खायनशाखा -**

शाङ्.खायनशाखायाः संहिता अनुपलब्धाऽस्ति। परंच ब्राह्मणारण्यकौ प्राप्येते। आलोचकानां मतानुसारेण शाङ्.खायनस्तथा कौषीतकि शाखा एकैवास्ति परंच भिन्ने स्तः। वैदिकवाङ्.मयस्येतिहासे लिखितमस्ति शाङ्.खायनसंहितायाः प्रकाशितशाकलशाखया सह भेदो नास्ति। केवलं मंत्राणां क्रमं भिन्नता वर्तते।

**माण्डूकायनशाखा -**

अस्याः शाखायाः ग्रंथा अनुपलब्धास्सन्ति। यस्मिन् कस्मिन्नपि ग्रंथेष्वस्याः शाखायाः नामोल्लेखने अस्तित्वस्यावबोधो भवति। अस्याः कृते पंचत्रिंशदुत्तरद्विशततमात् - त्रिपंचाशदुत्तरद्विशततमं यावत् पृष्ठं (235-253) द्रष्टुं शक्यते इति।



Scanned with CamScanner

## पाश्चात्यवैदिक विद्वांस

पाश्चात्यविदुषां वैदिकाध्ययनस्य प्रवृत्तिः सप्तदशशताब्द्या उत्तरद्धि प्राप्यते। चतुरशीत्युत्तरसेप्तदशशततमे (1784) ईस्वीये वर्षे सरविलियमजोन्समहोदयैः "बंगाल एशियाटिक - सोसायटी" इत्याख्यं शोधसंस्थानं प्रारभत्। तस्मादेवकालात् पाश्चात्त्येषु वैदिकवाङ्.मयं प्रति रुचिरुत्पन्नोऽभूत्। एकदा पहीब ऊप्दर्से ण्दतीददव महोदयैः "हिंदु-ओं के धार्मिक ग्रंथ वेद" इत्याख्यः शोधनिबंधः प्रस्तुतः। कोलब्रुकमहोदया इतः पूर्वं संस्कृतस्य विरोधिन आसन्। परंचानन्तरमेतेषां महोदयानां मानसं परिवर्तितंजातम्। संस्कृतवाङ्.मये विज्ञानस्यान्वेषणं कृतमेभिः।

### यूजिन वर्नफ

वर्नफमहोदयाः "पेरिस" इत्यस्य "कालेज द फ्रांस" इत्यस्मिन् संस्कृतस्य प्राध्यापका आसन्। अनेनैव यूरोपमध्ये वेदाध्ययनस्याधारशिलायाः स्थापनं कृतम्। डा. वर्नफमहोदयानां व्याख्यानं प्रायशः ऋग्वेदस्योपर्याधारितमासीत्। अस्यां कक्षायां उत्तमगुणैर्युक्ताः छात्रा अधीतवन्त आसन्। महोदयस्यास्य द्वौ शिष्यौ स्तः रुडल्फराथम-होदयाः मैक्समूलरमहोदयाश्च।

### रुडल्फराथ (१८३१-१८९५)

राथमहोदयाः वर्नफमहोदयानां शिष्यः आसन्। अष्टचत्वारिंशदुत्तराष्टादशशततमे (1848) खरूीष्टाब्दे "वैदिक साहित्य एवं इतिहास" इत नाम्ना महत्वपूर्णग्रंथस्य प्रणयनं कृत्या वेदाध्ययनस्यारम्भः जर्मनीदेशे कृतमनेन। संस्कृतमहाकोषस्यापि निर्माणमेभिः कृतम्। वेदानामर्थावबोधाय भाषावैज्ञानिकी एवं तुलनात्मकेतिहासपद्धतौ विशिष्टं महत्त्वं प्रदत्तम्।

### मैक्समूलरः -

वर्नफमहोदयस्य द्वितीयः शिष्य आसीत् मैक्समूलरमहोदयः। जर्मनदेशस्य डेंशो नामके स्थले (06 दिसंबर 1823) दिसंबरमासस्य षट्तारिकायां त्रयोविंशत्युत्तराष्टादश-शततमे खरूीष्टाब्दे मैक्समूलरमहोदयस्य जन्म अभवत्। गुरोः प्रेरणया सायणभाष्येन सह ऋग्वेदस्य प्रकाशनस्यायोजनमेभिः कृतम्। (1849-1875) एकोनपंचाशदुत्तराष्टादश-शततमात् पंचसप्तत्युत्तराष्टादशशततमम् ईस्वीं यावदस्य प्रकाशनं कार्यं पूरितंजातम्। (1890-92) नवत्युत्तराष्टादशशततमात् द्विनवत्युत्तराष्टादशशततमे ख्रीष्टाब्देऽस्य द्वितीयं संस्करणं प्रकाशितम्। एतदतिरिक्तं "प्राचीन संस्कृत साहित्य का इतिहास" एवं "भारत से हम क्या सीखें" इत्यनयोः प्रणयनमकरोत्। मैक्समूलरमहोदयाः (1850) पंचाशदुत्त-राष्टादशशततमे ख्रीष्टाब्दे आक्सफोर्डविश्वविद्यालये भाषाविज्ञानस्य प्राध्यापकोऽभवत्।



Scanned with CamScanner

**आफ्रेक्टमहोदया: -**

आफ्रेक्टमहोदया: ऋग्वेदस्य वैज्ञानिकं संस्करणं सम्पादितवन्त:। रोमनलिप्यामिदं सम्पादनं प्रथममासीत्। सम्पादनकाल एकषष्ट्युत्तराष्टादशशततमात् - त्रिषष्ट्युत्तराष्टादशशततमं यावदासीत्। (1869) एकोनसप्तत्युत्तराष्टादशशततमे ख्रीष्टाब्दे संस्कृतग्रंथानां सूची प्रकाशितम्। ऐतरेय ब्राह्मणस्यापि रोमनलिप्या विशुद्धं संस्करणं सम्पादितवन्त एते आचार्या:।

**बेवरमहोदया: (१८२५ - १९०१)**

बेवरमहोदया: जर्मनविद्वांस आसन्। "यजुर्वेदसंहिता" एवं "तैत्तिरीयसंहिता" इत्यनयो: सम्पादनमपि कृतवन्त:। "इनदिशे स्तूदियन्" नाम्न्येकाशोधपत्रिकाया: जर्मनभाषायां प्रकाशनं कृत्वा वैदिकनुसंधान्स्य कार्यं सम्पादितवन्त:। "संस्कृत साहित्य का इतिहास" इत्यस्मिन् ग्रंथे वैदिकवाङ्.मयस्य विवेचनं कृतवन्त: बेवर महोदया:। बर्लिनदेशस्य राजकीयपुस्तकालये वर्षे शतपथब्राह्मणस्य (1858) अष्टपंचाशदुत्तराष्टादशशततमे ई वर्षे अद्भुतब्राह्मणस्य वंशब्राह्मणस्य च बर्लिनदेशे सम्पादनं कृतम्।

**बूलरमहोदया: (१८३७ - १८९८)**

डा. बूलरमहोदय: "बंबईसंस्कृतसीरीज" नाम्न: ग्रंथमालाया: प्रकाशनं कृतवान्। (1866) षट्षष्ट्युत्तराष्टादशशततमे ई.वर्षे. बंबईमद्रासबंगालेषु च प्रांतेषु शोधसंस्थानि स्थापितानि। बूलरमहोदया: मुंबईशाखाया: अध्यक्षा आसन्।

**प्रो.एच.एच.विल्सनमहोदया: (१७८४ - १८६0)**

अनेनमहोदयेनैव सायणभाष्यानुसारेण ऋग्वेदसंहिताया: सर्वप्रथममांग्लभाषायामनुवाद: कृतम्। संपूर्णस्य ऋग्वेदस्य आंग्लभाषानुवादेन सह (1888) अष्टाशीत्युत्तराष्टादशशततमे ई.वर्षे प्रकाशनं कारितम्। विल्सनमहोदया: Institute of France मध्ये प्राध्यापक आसन्। (1833) त्रयस्त्रिंशदुत्तराष्टादशशततमे ख्रीष्टाशब्दे आक्सफोर्ड विश्वविद्यालय Boden Professor of Sanskrit इत्यस्य पदस्योपरि आसीनोऽभवन्। The Religious eand Philosophical System of the Hindus नाम्नि पुस्तके भारतीय- धर्मदर्शनस्य वैशिष्ट्यं प्रकाशितवान्।

**ऋक्भाष्यकारा: -**

पुरा काले यथा मानवमस्तिष्कमुर्वरमासीत् तथार्वाचीने काले नास्ति। एतावता यजुर्भाष्ये प्राप्यते मन्दमतीन् मनुष्यान् विचिन्त्य भगवता वेदव्यासेन वेदस्य विभाग: कृतम्। मानवानां कृते सुगमतनपूर्वकं वेदार्थावबोधाय ब्राह्मणग्रंथानां निर्माणमभवत्। वेदार्थनुशीलनाय यास्केन निरुक्तस्य रचना कृता। तद्वदेव वेदांगनां प्रातिशाख्यादीनांच रचना वेदार्थज्ञानाया सम्पादिता। पुनरपि सुखावबोधाय भाष्यस्यापि निर्माणं जातम्।



Scanned with CamScanner

वेदभाष्यकर्तृषु स्कंदस्वामी-आनंदतीर्थ वेंकटमाधव-सायण-महीधरेत्यादयः प्रमुखास्सन्ति।

**स्कंदस्वामी-**

ऋक्संहितायाः प्रथमं भाष्यं स्कंदस्वामीमहोदयस्यैव प्राप्यते। अस्य महोदयस्य भाष्ये सूक्तस्यारम्भे तस्य सूक्तस्य ऋषेः देवस्यचोल्लेखे वर्तते। निघण्टुनिरुक्तप्रभृतिवैदिकार्थोपबोधकेभ्यः ग्रंथेभ्यः उपयुक्तप्रमाणमपि तत्रैव संकलितमस्ति। भाष्यमिदमतीवसरलं सुगमं मिताक्षरंचास्ति। स्कंदस्वामिमहोदयस्य भाष्यमृक्संहितायाः चतुर्थाष्टकपर्यन्तमेव प्राप्यते। वेंकटमाधवस्य भाष्यानुसारेणैवं प्रतीयते ऋग्वेदस्यावशिष्टभागानां भाष्यं नारायणमहोदयै उद्गीथमहोदयैश्च सम्पादितम्। यथा-

**स्कंदस्वामी नारायण उद्गीथ इति ते क्रमात्।**

**चक्रुः सहैकमृग्भाष्यं मद्वाक्यार्थगोचरम्।।**

स्कंदस्वामिनः जन्म गुर्जरप्रदेशस्य बलभी इत्याख्यनगरेऽभवत्। अस्य पितुर्नाम भर्तृध्रुव आसीत्। ऋग्वेदभाष्यस्य प्रथमाष्टकस्यान्ते चर्चितम्-

**बलभीविनिवासस्येतामृगर्थागमसंहृतिम्।**

**भर्तृध्रुवसुतश्चक्रे स्कंदस्वामी यथास्मृतिः।।**

**नारायणः -**

नारायणमहोदयाः ऋग्भाष्ये स्कंदस्वामिमहोदयस्य साहाय्यं कृतवन्तः। प्राक्तने श्लोके स्कंदस्वामी नारायण उद्गीथ इति ते क्रमात् इत्यनेन स्पष्टं भवति ऋग्वेदस्य मध्यभागस्य भाष्यं नारायणेन जातम्। कतिपयविद्वांसः सामभाष्यकर्तुः माधवस्य पितरं नारायणं तथा ऋग्भाष्यकर्तृ नारायणमेकमेव। मन्यन्ते। किंच अद्यावधिपर्यन्तं सबलप्रमाणमुपलब्धं नास्ति।

**उद्गीथः -**

आचार्याः वेंकटमाधवस्यानुसारेण ऋग्वेदस्यान्तिमभागस्य भाष्यमुद्गीथेन कृतम्। प्रत्यध्यायस्य समाप्त्यवसरे-वनवासीविनिर्गताचार्यस्य उद्गीथस्य कृता ऋग्वेदभाष्ये अध्यायः समाप्तः इत्यनेन लेखनेन प्रमाणं दृढं भवति। आधुनिककर्णाटकस्य प्रतीच्यभूखंडे “वनवासीप्रांत” इत्याख्यातमासीत्। उद्गीथाचार्यः सम्भवत अस्यैव प्रांतस्य वासी आसीत्। अस्याचार्यस्योल्लेखः सायणेन आत्मानन्देन च स्वस्वभाष्ये कृतः। उद्गीथमहोदयाः सायणतः प्राक्तनभाष्कार आसन्। सायणेन ऋग्वेदस्यैकस्मिन् मन्त्रस्य भाष्ये व्याख्येयम् उद्गीथभाष्ये उपलब्धास्ति इत्युल्लेखः कृतः।



Scanned with CamScanner

**आनंदतीर्थ : -**

आचार्या: आनंदतीर्थमहोदया: ऋग्वेदस्य प्रथममण्डलस्य चत्वारिंशत् सूक्तेषु भाष्यं लिखितवन्त:। अस्य समय: (1255) पंचपंचाशदुत्तरद्वादशशततमात् ई.वर्षत: (1335) पंचत्रिंशदुत्तरत्रयोदशशततमम् ई.वर्षमासीत्। अस्यमहोदयस्यानुसारेण वेदस्य प्रतिपाद्य: नारायणोऽस्ति।

**आत्मानन्द : -**

आत्मानन्दमहोदय: ऋग्वेदस्य अस्यावायीयसूक्तोपरि भाष्यं लिखितवान्। अस्मिन् भाष्ये स्कंदस्वामी भास्करादीनां भाष्यकर्तृणांच नामानि प्राप्यन्ते परंच सायणस्य नाम नास्ति। सायणस्य पूर्ववर्तिन आचार्या आसन् आत्मानंदमहोदया:। आत्मानन्देन मिताक्षराकारस्य विज्ञानेश्वरस्य स्मृतिचन्द्रिकाकारस्य देवणभट्टस्य च वर्णनं कृतम्। विज्ञानेश्वरस्य काल एकादशशाताब्द्यां देवणभट्टस्य च काल: त्रयोदशशताब्द्यामासीत्। आत्मानंदस्यभाष्यम् आध्यात्मविषयकमस्ति।

**सायण : -**

भाष्यकर्तृणामाचार्याणां मध्ये बहुविश्रुता आचार्या: सन्ति सायणमहोदया:। सायणेन चतुर्षुवेदेषु महत्वपूर्ण भाष्यं लिखितम्। ऋग्वेदस्य शाकलसंहिताया: कृष्णयजुर्वेदस्य तैत्तिरीयसंहिताया: शुक्लयजुर्वेदस्य काण्वसंहिताया:, सामवेदस्य कौथुमसंहिताया:, अथर्ववेदस्य शौनकसंहितायाश्च भाष्यं कृतवन्त: सायणमहोदया:। अनन्तरं ब्राह्मणग्रन्थानामुपर्यस्य महोदयस्य भाष्यं प्राप्यते। एतरेयारण्यकोपरि सायणमहोदयस्य भाष्यं प्राप्यते। सायणस्य स्वकीयस्य वेदभाष्यस्य नाम वेदार्थप्रकाशो विद्यते। सायणस्यैका रचना "माधवीयाधातुवृत्ति:" इति नाम्नाख्यातमस्ति। एतदतिरिक्तं कतिपयेषु ग्रंथेषु "माधवीय" इत्यस्य शब्दस्य प्रयोग: दृश्यते। अस्याग्रजस्य नाम माधव आसीत्। सम्भाव्यते आदरार्थे "माधवीय" इत्यस्य पदस्य प्रयोगमेभि: कृतम्।

## २.२ यजु: संहिताया: परिचय:

वेदा हि यज्ञार्थमभिप्रवृता इत्यनुसारेण वेदानां मुख्यप्रतिपाद्य: यज्ञास्सन्ति। यज्ञानां सम्पादनाय यजुर्वेदे मन्त्रा: सङ्.कलितास्सन्ति। जानन्ति भवन्त: यज्ञानां सम्पादनाय चत्वारो ऋत्विजो भवन्ति येषां नामानि होता, अध्वर्यु, उद्गाता, ब्रह्मा च विद्यते। एतेषु ऋत्विजक्षु यज्ञस्य मुख्यं विधानमध्वर्यु: प्रतिपादयति। अध्वर्यु: यजुर्वेदस्य ऋत्विक् अस्ति। यज्ञविधिष्वतिसन्निकषं संबंधमस्ति यजुर्वेदस्य। यजुर्वेदस्यागमनं वायो: संजातम्। यजुर्वेदस्य विभाजनं द्विधा प्राप्यते। शुक्लयजुर्वेद: कृष्णयजुर्वेदश्च।

विषयेऽस्मिन् पुराणेष्वेका आख्यायिका विद्यते। भगवता वेदव्यासेन स्वशिष्यान्



Scanned with CamScanner

वेदस्य प्रचाराय प्रसाराय विचिन्त्य तत्कृपया चतुर्धा व्यस्य पैल-वैशम्पायन-जैमिनि-समन्तुभ्य: क्रमादुपदिदेश। अर्थात् ऋग्वेदस्याचार्या: पैलमहोदया:, यजुर्वेदस्याचार्या: वैशम्पायनमहोदया:, सामवेदस्याचार्या: जैमिनिमहोदया: अथर्ववेदस्याचार्या: सुमन्तुमहोदयाश्चाभवन्। व्यासशिष्य: वैशम्पयानमहोदया: याज्ञवल्यादि नैकान् शिष्यान् यजुर्वेदस्याध्यापनमकारयत्। कालान्तरे केनापि कारणेन वैशम्पायनाचार्या याज्ञवल्क्येन असंतुष्टो जात:। क्रोधावेशेन आचार्येणोक्तमस्माकं यजुषानां ग्रहणं मा कुर्वन्तु। तर्हि याज्ञवल्येन यजुषानां वमनम् कृतम्। तदा वैशम्पायनस्य शिष्या: त्तितिरस्वरूपं धारणं कृत्वा तेषां वान्तयजुषानां संग्रहणमकुर्वन्। अस्मात् कारणात् अस्या: संहिताया: नाम तैत्तिरीयसंहिता विद्यते। आख्यायिकाया एवं ज्ञायते तैत्तिरीयसंहिता वान्तयजुषानां संग्रहोऽस्ति। उच्छिष्टकारणादेव अस्या: संहिताया: स्थानं कृष्णयजुर्वेदसंहितायामाभवत्।

तदनन्तरं याज्ञवल्क्येन सूर्यस्याराधनं कृतम्। तेनानुग्रहेण यजुषानां प्राप्तम्। वाजिस्वरूपस्य धारणं कृत्वा दिनस्य मध्यकाले भगवता सूर्येण याज्ञवल्क्यमादिष्ट:। अस्मादेव कारणात् अस्या: संहिताया: नाम वाजसनेयी संहिता विद्यते। मध्ये दिवसे उपदिष्टत्वात् अस्यापर नाम माध्यन्दिनीया संहिता अभवत्। प्रकाशे अस्या: संहिताया उपदेश: जात: एतदर्थम् अस्य नाम शुक्लयजुर्वेदोऽभवत्।

विषयेऽस्मिन् मैकडानलमहोदयस्य कथनं विद्यते वाजसनेयीसंहितायां ते एव मंत्रा: संकलिता: सन्ति येषां प्रयोग: शुद्धयज्ञेन संबंधितोऽस्ति। अनेन कारणेन अस्या: संहिताया: नाम शुक्लयजुर्वेदसंहिता अभवत्। तैत्तिरीयसंहितायां मन्त्रसमुदायानां ब्राह्मणादिभागानांच संयुक्तंसंग्रह विद्यते। एतस्मात् संकीर्णरूपादस्या नाम कृष्णसंहितेति ख्यातम्। शुक्लयजुर्वेदसंहितायां केवलं मन्त्रा: प्राप्यन्ते। ब्राह्मणं पृथगस्ति यत्र विधिविनियोगादीनां वर्णनमस्ति।

### यजु:संहिताया: वर्ण्यविषया

यथापूर्वमकल्पयत् यजुर्वेद: शुक्लो कृष्णश्च। शुक्लयजुस्संहितायां मन्त्रसंहिता वाजसनेयीसंहितेति नाम्नाख्यातमस्ति। अस्यां संहितायां चत्वारिंशदध्याया: प्राप्यन्ते। प्रथमद्वितीयाध्यायो: दर्शपूर्णमासेष्टिसंबंधितानां मन्त्राणां वर्णनमस्ति। तृतीयेऽध्याये अग्निहोत्राय यज्ञाय ये मन्त्रा: प्रयुक्ता: भवन्ति ते संग्रहीतास्सन्ति। अत्र चतुर्षु मासेषु अनुष्ठेयत्वात् चातुर्मास्ययज्ञोपयोगिन: मन्त्रा: प्राप्यन्ते। अस्मिन् अग्निष्टोमस्य प्रकृतियागत्वेन वर्णनमपि प्रोप्यते। अग्निष्टोमे अग्निष्टोमविष्टुत्या अपि सामवेदिनो यजन्ति। अस्मिन् सोमस्योपलखण्डेन कुट्टनं कृत्या रसक्षरणं कार्यते। तेनैव प्रात: - मध्याह्नसायंकाले चाग्नौ हवनं क्रियते। अस्य नाम प्रापत: सवनम्, माध्यन्दिनसवनम्, सायं सवनादिकंच विद्यते। अस्मिन् राजसूययज्ञस्यापि विधानं प्राप्यते। अत्र द्यूतादिक्रीडा अस्त्रादिक्रीडा च



Scanned with CamScanner

वर्णितास्सन्ति। नवमदशमाध्याययोः अनेन यज्ञेन संबन्धितानां मन्त्राणां संकलरं प्राप्यते। एकादशाध्यायत अष्टादशाध्यायपर्यन्तम् अग्निचयनं भवति। अत्र वेदीनिर्माणाय विधयः प्रतिपादितस्सन्ति। अत्र (10800) अष्टशताधिकदशसहस्राणि इष्टिकानामवश्यकता विद्यते। इष्टिकानामाकारप्रकारमपि वर्णिताः सन्त्यत्र। ताभिरिष्टिकाभिः वेद्या आकृतिः पंखप्रसारितपक्षी इव भवति। षोडशाध्याये शतरुद्रियहोमस्य प्रसंगमस्ति। अस्मिन्नध्याये रुद्रस्य सांगोपांग विवेचनं प्राप्यते।

अष्टादशेऽध्याये वसोद्र्धारामन्त्राः गदितास्सन्ति। सर्वेषु यज्ञादीनामवसरेषु पूर्णाहुत्यनन्तरं वसोद्र्धारा प्रयोगस्य विधानं प्राप्यते। तदनन्तरं त्रिष्वध्यायेषु एकोनविंशतितमेऽध्याये, विंशतितमेऽध्याये एकविंशतितमेऽध्यायेषु च सौत्रामण्यज्ञस्य विधानं विहितमस्ति। लोके श्रूयते सोमस्याधिकपानेन इन्द्रः रुग्णः जातः। तस्य रोगस्य प्रशांतये सौत्रामण्यज्ञस्य विधानं निर्दिष्टमस्ति। अनेन यौनैवास्य चिकित्सा क्रियते। वैदिकवाङ्.मयस्येतिहासे लिखितमस्ति राज्यच्युतनृपाय, पथकामयजमानाय, सोमरसानुकूलतया पराङ्.मुखजनाय चास्यैव यज्ञस्यानुष्ठानं विहितमस्ति। सौत्रामण्यां सुरां पिबेदिति सोमरसेन सह सुरापानस्यापि विधानं वर्तते। द्वाविंशत्यध्यायतः पंचविशंपर्यन्तम् अश्वमेधस्य यागस्य मंत्राणां निर्देशः संहितायां प्राप्यते। सार्वभौमाधिपत्याभिलाषी राजा अश्वमेधं करोति। अश्वमेधयज्ञस्य संपूर्णं वर्णनं शतपथब्राह्मणस्य त्रयोदशे काण्डे कात्यायन श्रौतसूत्रस्य विंशतितमेऽध्याये च विद्यते। षड्विंशध्यायतः उनत्रिंशदध्यायपर्यन्तं खिलमंत्राणां वर्णनमस्तीति प्राप्यते। त्रिंशत्तमेऽध्याये पुरुषमेधयागस्य वर्णनमस्ति। अस्मिन् चतुरशीत्यधिकशतं पदार्थानामालम्भनस्य निर्देशः प्राप्यते। प्रायसः जनाः वदन्ति अत्र आलम्भनं नाम वधोऽस्ति। परंचैवं नास्ति। श्रीमद्भागवतमहापुराणे लिखितमस्ति परोक्षवादो वेदोऽयं बालानं हितकारकम्। वेदस्यादेशः परोक्षरूपेण अर्थात् रहस्यरूपेण जनानां समक्षे भवति। तस्य रहस्यावलम्बनं कृत्वा आचरणीयः। आलम्भनशब्दस्यार्थः यदि बधं भविष्यति चेत् परिणसंस्कारे हृदयालम्भनप्रकरणे पुरुषः कन्यायाः हृदयस्य आलम्भनं करोति। तत्र स्मृतिकाराः वदन्ति हृदयालम्भनमिति हृदयस्पर्शः। एवमुचितं प्रतीयते वैदिकवाङ्.मयस्येतिहासे लिखितमस्ति भारतवर्षे कदापि पुरुषमेधो नाऽभवत्। केवलोऽयं काल्पनिको यज्ञः। यज्ञेऽस्मिन् पुरुषस्य नानाप्रतिनिधिभूतवस्तुहेतवे विभिन्नपदार्थानां दानस्य विधानमस्ति। इयं पंक्ति सुष्टुतमं प्रतिभाति अस्मिन् अध्याये तात्कालिकस्य प्रचलितस्य व्यवसायस्य वृत्तेस्तथा कलाकौशलस्य चाऽपि यत्किंचित् परिचयः प्राप्यते। तस्य दर्शनं विद्यते। एकत्रिंशत्तमेऽध्याये पुरुषसूक्तमस्ति। अस्मिन्नध्याये ऋग्वेदस्यापेक्षा ष्डमंत्राः अधिकाः वर्तन्ते। द्वात्रिंशत्-त्रस्त्रिंशत्तमेचाध्याये सर्वमेधस्य मन्त्राः लिखितासन्ति। चतुस्त्रिंशत्तमेऽध्याये प्रारंभे एव शिवसंकल्पसूक्तस्य मन्त्राः प्राप्यन्ते। पंचत्रिंशत्तमेऽध्याये पितृमेधस्य संबंधितानां मन्त्राणां संकलनमस्ति। षट्त्रिंशदध्यायादारभ्य अष्टत्रिंशदध्यायं



Scanned with CamScanner

यावत् प्रवर्गस्य यागस्य वर्णनं दृश्यते। अन्तिमेऽध्याये ईशावस्योपनिषद् अस्ति।

### यजु:संहिताया: शाखा

यजुर्वेद: कल्पतरु: शुक्लकृष्ण इति द्विधा:। इत्यनेन चरणव्यूहसूत्रवचनेन यजुर्वेद: द्विविध: शुक्लो कृष्णश्च। पश्पशाह्निके वर्णितमेकशतमध्वर्यु शाखा:। यजुर्वेदस्यापर नाम अध्वर्युवेदो अस्ति। चतुर्षं ऋत्विक्षु अध्वर्यु नाम्न: ऋत्विज यजुर्वेदस्य ऋत्विक् भवति। कुत्राप्यस्य वेदस्य नाम अध्वरवेदोऽप्यस्ति। यास्कमुनिना निरुक्ते (7.3) अध्वर्यवे इत्यपि पाठो प्राप्यते।

प्रपंचहृदयस्य द्वितीये प्रकरणे यजुर्वेद एकोत्तरशतधा.................इति लिखितमस्ति। पं. चिन्नस्वामी सम्पादितेन हरदवृत्तिसहित आपस्तम्बगृहसूत्रे अष्टपंचाशदुत्तरशततमे पृष्ठे यजुर्वेदस्य शाखानां नामानीत्थं प्राप्यन्ते-माध्यन्दिन-कण्वपाराशर-वामदेव-जातुकर्ण-तुरुष्क-सोशुष्म-तृणबिंदु-वाजिजय-श्रवस-वर्षवरूथ-सनद्वाज-वाजिरत्न-हर्यश्व-तृणंजय-कृतंजय-धनंजय-सत्यंजय-सहंजय-मिश्रंजय-त्र्यरुण-त्रिवृष-त्रिधामाश्वंजु-फलिगु-ऊखा-आत्रेयशाखा:।

दिब्यावदानानाम्नि ग्रंथे लिखितमस्ति-अध्वर्युणां मते ब्राह्मणा: सर्वे तेऽध्वर्युर्भूत्वा एकविंशतिधा भिन्ना:। तद्यथा-कठा:। कण्वा:। वाजसनेयिन:। जातुकर्ण्णा:। प्रोष्ठपदा ऋषय:। तत्र दश कठा: दश काण्वा एकादश वाजसनेयिन: त्रयोदशजातुकर्णा: षोडशप्रोष्ठपदा: पंचचत्वारिंशद् ऋषय:।

अत्र उपरि लिखितमस्ति एकविंशतिधा अध्वर्यव:। परंचात्र दशकठा: दश काण्वा एकादश वाजसनेयिन: त्रयोदश जातुकार्णा: षोडशप्रोष्ठपदा: सर्वं सम्भूय षष्टिरभवत्। अत्रास्मिन् पंचचत्वारिंशद् ऋषय: योजने पंचोत्तरशतं शाखा: भविष्यन्ति। अत्र एकविंशति स्थाने पंचाधिकैकशतमुचितं प्रतीयते इति कथनमस्ति "वैदिक वाङ्.मय का इतिहास" इत्यस्य ग्रंथस्य मूललेखकानां पं. भगवद्दत्तमहोदयानाम्। अस्य ग्रंथस्य सम्पादकानां सत्यश्रवामहोदयानां कथनमस्ति यजुशाखानां विभाग: विचित्रमस्ति अन्यत्र वर्णनं न प्राप्यते। अस्मिन् पुस्तके याजुषसंबंधी तालिकाद्वयं प्राप्यते –

"प्रथमो भाग:"

**तित्तिरि-हिरण्यकेश-आपस्तम्ब-सत्याषाढ-बौधायन-याज्ञवल्क्य-भद्रंजय-बृहदुक्थ-वाजिमाध्यन्दिनी-शुक्लयजु:-मुख्य-सप्तदशभेदा:-**

| | | |
|---|---|---|
| 1. जाबाल: | नर्मदा | नर्मदाविंध्ययोर्मध्यदेशे |
| 2. बौधेया: | रणावटनामका | खांदेशे गोदामूलप्रदेशे |
| 3.कण्वा: | कर्णवटा: | गोमतीपश्चिमप्रदेशे |



Scanned with CamScanner

| | | |
|---|---|---|
| 4.माध्यंजना: | | सरयूतीरनिवासिन:। |
| 5.शाषीया: | नागरा: | अमरकंटकनर्मदाम्लवासिन:। |
| 6.स्थापायनीया: | नारदेवा: | नर्मदोत्तरदेशे |
| 7.कापार: | भृगौडा: | मालवदेशे |
| 8.पौड्रवत्सा: | त्रिवाडनामक: | मालवदेशे |
| 9. आवटिका: | श्रीमखा: | मालवदेशे |
| 10. परमावटिका: | आघगौडा: | गौडदेशे |
| 11. पाराशर्या | गौडगुर्जरा: | मरुदेशे |
| 12. वैधेया: | श्रीगौडा: | गौडदेशे |
| 13. वैनेया: | कंकरा: | बौध्यपर्वते |
| 14. औधेया: | औधेया: | गुरथी गुर्जरदेशे |
| 15. गलवा: | गालवी | सौराष्ट्रदेशे |
| 16. बैजवा: | बैजवाड | नारायणसरोवरे |
| 17. कात्यायना | | नर्मदासरोवरे |

**प्रथमविभागान्तर्गत जाबालस्य षड्विंशतिर्भेदा-**

| | | |
|---|---|---|
| 1.उत्कला: | | उत्कील गौडदेशे |
| 2.मैथिला: | | विदेहदेशे |
| 3.शर्वर्या: | मिश्र | ब्रह्मवर्तदेशे |
| 4. कौशीला: | | बाल्हीकदेशे |
| 5.तंतिला: | | सौराष्ट्रदेशे |
| 6.बर्हिशीला: | | बाहककाश्मीरदेशे |
| 7.खेटवा: | | खैवटद्वीपवासदेशे |
| 8.डोभिल: | | हिमदक्षिणदेशे |
| 9.गोभिल: | डभिला: | गंडकीतीरदेशे |
| 10.गौरवा: | ग्रामणी | मद्रदेशे |



Scanned with CamScanner

| | | |
|---|---|---|
| 11. सौभरा: | | कौशिकदेशे |
| 12.जृंभका: | | आर्यवर्त |
| 13. पौड्रका: | मिश्रो | कवसलदेशे |
| 14. हरित: | | सरस्वतीतीरगा: |
| 15. शौंडका: | | हिमवद्देशे |
| 16.रोहिण: | मिश्र | गुर्जरदेशे |
| 17. माभरा: | माभीर: | काश्मीरदेशे |
| 18. लैंगवा | | कलिंगदेशे |
| 19. मांडवा: | मांडवी | गौडदेशे |
| 20. भारवा: | | मरुदेशे |
| 21. चैभगा: | चोभे | मथुरादेशे |
| 22. टौनका: | | नेपालदेशे |
| 23. हिरण्यश्रृंगा: | | मागधदेशे |
| 24. कारुण्वेया: | करुणिका: | मागधदेशे |
| 25. धूम्राक्षा: | | हिमवद्देशे |
| 26. कपिला: | | आर्यावर्तदेशे |

**प्रथमविभागान्तर्गतगालवानां भेदा:-**

| | | |
|---|---|---|
| 1.काणा: | कनवजा: | गौडदेशे |
| 2.कुब्जा: | कुलका: | मागधदेशे |
| 3.सारस्वता: | | सरस्वतीतीरे |
| 4.अंगजा: | | अंगदेशे |
| 5.वंगजा: | | वंगदेशे |
| 6.भृंगजा: | भृंगा: | भृंगदेशे |
| 7.यावना: | योवन: | संगरदेशे |
| 8.शैवजा: | शैवज: | मरुदेशे |



Scanned with CamScanner

| | | |
|---|---|---|
| 9.पालीभद्रा: | पारीभद्र: | सिंकलदेशे |
| 10.नैलवा: | नैलव: | कूर्मदेशे |
| 11.वैतानला: | | नेपालदेशे |
| 12.जनिश्रवा: | जनीश्रव: | मत्स्यदेशे |
| 13.भद्रका: | भद्रकार: | बौध्यपर्वतदेशे |
| 14. सौभरा: | | बौध्यपर्वतदेशे |
| 15. कुथिश्रवा: | कुथिवश्रव: | हिमवद्देशे |
| 16. बौध्यका: | बोधक: | बौध्यपर्वतदेशे |
| 17. पांचालजा: | | पांचालदेशे |
| 18. उर्ध्वागजा: | | काश्मीरदेशे |
| 19. कुशेन्द्रवा: | | कूर्मदेशे |
| 20. पुष्करणीया: | | मारवाड |
| 21. जयत्रवारा: | | मरुदेशे |
| 22. उर्ध्वरतस: | जयंत्रव: | मरुदेशे |
| 23. कथसा: | काथस: | गोदादक्षिणदेशे |
| 24. पालाशनीया: | पलसी: | गोदादक्षिणदेशे |

**द्वितीयो विभाग:**

**वाजसनेय-याज्ञवल्क्य-कण्वादिपंचदश-शुक्लयाजुषानां वर्णनमीत्थमस्ति-**

| | | |
|---|---|---|
| 1. कण्वा: | | कृष्णाद्रनदेशे |
| 2. कठा: | | गोदादक्षिणदेशे |
| 3.पिंजुलकठा | पिंजुलकठ: | क्रौंचद्वीपे |
| 4.जृम्भककठा: | जृम्भककठ: | श्वेतद्वीपे |
| 5.औदलकठा: | | शाकद्वीपे |
| 6.सपिच्छलकठा: | | शाकद्वीपे |
| 7.मृद्गलकठा: | | काश्मीरद्वीपे |



Scanned with CamScanner

| | | |
|---|---|---|
| 8.श्रृंगलकठा: | | सृजयदेशे |
| 9.सौभरकठा: | | सिंहलदेशे |
| 10. मौरसकठा: | | कुशद्वीपे |
| 11. चंचुकठा: | चंचुलकठ: | यवनदेशे |
| 12.योगकठा: | | यवनदेशे |
| 13. हसलककठा: | | यवनदेशे |
| 14. दौसलकठा: | | सिंहलकठ: |
| 15. घोषकठा: | | क्रौंचद्विपे |

अनेन प्राकरेण तृतीये विभागे तैत्तिराया: - औख्या - कांडिकेया: - आश्रयस्त-म्बी-बौधायनीया: - सत्याषाठी - हिरण्यदेशी- श्रौधेयी इत्यादय वर्णितास्सन्ति। चरव-कादि-द्वादशभेदानां वर्णनं चरका: - आह्वरका: - कठा: - प्राच्यकठा: - कपिष्ठलकठा: - चारायणीया: - वार्तलवेया: - श्वेता: - श्वेततरा: - औपमन्यवा: - पातंद्रनीया: - मैत्रायणीया: विद्यंते। तत्र मैत्रायणीयानां सप्तभेदा: निगदितास्सन्ति यथा - मानवा: दुन्दुभा: - ऐकेया: - वाराहा: - हारिद्रवेया: - शामा: शामायनीया: सन्ति।

**सामान्यतया इत्थं ज्ञायते -**

वेद: यजुर्वेद:

शुक्लयजुर्वेद: — मायंदिनशाखा, कण्वशाखा

कृष्णयजुर्वेद: — तैत्तिरीयशाखा, मैत्रायणीशाखा, कठशाखा, कपिष्ठलकठशाखा

**माध्यंदिनीया शाखा**

अस्मिन् पाठे यजु: संहिताया: परिचये लिखितमस्ति मध्ये दिवसे उपदिष्टत्वात् अस्या: वाजसनेयी संहिताया अपर नाम माध्यन्दिनसंहिता विद्यते। इयं शुक्लयाजुषानां कृतेऽतीव प्रसिद्धा प्रतिष्ठिता चास्ति।

**काण्वशाखा**

शुक्लयजुर्वेदस्य द्वितीया प्रसिद्धा प्रचलिताश्च शाखा काण्वशाखा विद्यते। अस्या: शाखाया: प्रवक्तारस्सन्ति महर्षिबौधायनस्य पुत्रा: कण्वमहोदया:। आदित्यपुराणानुसारेण इमे आचार्या: याज्ञवलक्यमहोदयास्य शिष्यास्तथा वृहस्पतिमहोदयस्य प्रशिष्या आसन्। वैदिकवाङ्.मयस्येतिहासे प्राप्यते काण्वसंहिताया: प्राचीनसंबंध: उत्तरप्रदेशेनाअंगीकरणे न कापि विप्रतिपत्ति:।



Scanned with CamScanner

**तैत्तिरीयाशाखा-**

वैशम्पायनमहोदयस्य शिष्येष्वेकः शिष्यः यास्कपैङ्गि आसीत्। अस्य शिष्यः तित्तिरीमहोदया आसन्। तित्तिरी द्वारा प्रोक्तसंहितायाः अध्यवसायिनः तैत्तिरिया अभवन्। तैत्तिरीयासंहिता कृष्णयजुर्वेदस्यैका शाखा अस्ति।

**कठशाखा-**

कृष्णयजुर्वेदस्य तृतीया शाखा विद्यते कठिसंहिता। यजुर्वेदस्य सप्तविंशतिश्शाखासु कठशाखाऽन्यतमाऽस्ति। काठाका जनाः मध्यप्रदेशीया इति ख्यातास्सन्ति। इयं शाखा कठमुनिना प्रवर्तिता।

**कपिष्ठलकठशाखा-**

चरणव्यूहसूत्रानुसारेण चकरशाखाभ्यन्तरे कठानां, प्राच्यकठानां, कपिष्ठलकठानांचो-ल्लेखो प्राप्यते। अस्याः शाखायाः एकैव प्रतिः साऽप्यपूर्णा एवोलपब्धा भवति। अस्यां संहितायां काठकसंहितायां मध्ये भेदः दृश्यते।

## यजुःसंहितायां स्वरा

यजुःसंहितायां प्रधानतया त्रयः स्वराः वर्णितास्सन्ति। एतेषां स्वराणां नामानि उदात्तानुदात्तस्वरितश्चेति कथितानि सन्ति। अक्षराणामुपरि निच्चैर्वा संकेतचिन्हानां माध्यमेन स्वाराणां प्रदर्शनं क्रियते। उदात्ताक्षरं चिन्हरहितं भवति अर्थात् तस्य कृते स्वरसंकेतस्य प्रयोगः न क्रियते। अनुदात्तवर्णानां कृते अक्षराणामधो भागे एका तिर्यक्रेखा दीयते। यथा "क" अक्षरमनुदात्तमस्ति तह्यस्य कृते "क" इत्यङ्कनं क्रियते। स्वरितार्थं वर्णानामपरि लम्बायमानैका रेखा दीयते। यथा "हव्याम्यग्निम्" इत्यस्मिन्नस्थले स्वरितस्वरस्यांगनं "या" उपरि विद्यते।

सामान्यनियमो विद्यते प्रति शब्दोदात्तस्वरो भवति। शेषे सर्वे शब्दाः अनुदात्ताः भवन्ति। अनुदात्तोपरि अनुदात्तस्य संकेतस्य प्रयोगो भवति। उदात्तात् स्वतंत्रस्वरिताद्वा पूर्वाक्षरम् अनिवार्यरूपेणानुदात्तो भविष्यति। उदात्तान्तरमनुदात्तां स्वरितो भवति। यद्येकादात्तानन्तरमनुदात्ताः सन्ति तर्हि उदात्तानन्तरे प्रथमे अनुदात्ते स्वरितं भविष्यति। तदन्नतरे आगतानामनुदात्तानामुपरि सङ्केतचिन्हानि न भविष्यन्ति। सङ्केतरहितानामनुदात्तानां संज्ञा एकश्रुति प्रचय वा भवति। यत्रोदात्ताक्षरं भविष्यति तत्पूर्वमनुदात्तमेव भविष्यति। अत्र केचन नियमाः प्रतिपादितास्सन्ति-

**१ उदात्तस्वरसंबंधिनः नियमाः -**

(क) सामान्यतया तत्पुरुशसमासेऽन्तिमं वर्णमुदात्तं भवति।

(ख) बहुब्रीहिसमासे पूर्वपदमुदात्तं भवति।



Scanned with CamScanner

(ग) द्वंद्वसमासे उत्तरपदमुदात्तं भवति।

(घ) समासे एकैवशब्दस्यावर्तने प्रथमं पदमुदात्तं भवति।

(ड.) वाक्यस्य पदस्य वा प्रारंभे क्रिया स्यात् तर्हि उदात्तं भविष्यति।

(च) संबोधनान्तंर क्रियाया आगमने सति उदात्तो भवति।

(छ) प्रधानवाक्ये उपसर्ग उदात्तो भवति।

(ज) स्वतंत्रोपसर्गाभ्यां संयोगे उदात्तौ भवतः।

अनेन प्रकारेणात्रान्ये नियमा अपि सन्ति।

**२. अनुदात्तस्वरसंबंधिनः नियमाः-**

(क) युष्मद् अस्मद् इत्यनयो वैकल्पिकानि सर्वाणि रूपाणि त्वा, मा, ते, मे, वाम्, नौ, वः नः, अनुदात्तानि भवन्ति।

(ख) एते निपाताः सर्वदानुदात्तानि भवन्ति - इम्, सीम्, च, वा, उ, घ, चिद्, स्म, स्विद्, ह, हव, मल, समह इत्यादयः।

(ग) वाक्यस्यारम्भे संबोधनाभावेऽनुदात्तं भविष्यति।

(घ) वास्यस्य पदस्य वा प्रारंभे लिङ्.न्तानां क्रियापदानामभावेऽनुदात्तं भविष्यति।

अनेन प्रकारेण अन्येऽपि नियमास्सन्ति।

**३. स्वरितस्वराः -**

(क) पराश्रितस्वरितः

(ख) स्वाश्रितस्वतंत्रो वा स्वरितः।

(ग) संधिजन्यस्वतंत्रस्वरितः।

**स्वरप्रकाराः!!**

उदात्तस्वरः अनुदात्तस्वरः स्वरितस्वरः प्रचयस्वरः

स्वतंत्रस्वरितः आश्रितस्वरितः

नित्यः (जात्यः) संधिजः पादवृत्तम् तैरोव्यंजनम् तैरोविरामः ताथाभाव्यः

प्रश्लिष्टः अभिनिहितः क्षैप्रः

## वैदिकदेवताविचारः

अत्रास्मिन् प्रकरणे वेदेषु वर्णितानां देवतानां विचारः क्रियते। ऋग्वेदस्य भागद्वयमस्ति



Scanned with CamScanner

कर्मकाण्डं ज्ञानकाण्डंच। अनुष्ठानात्मको विभाग: कर्मकाण्डविभाग: दार्शनिको विभाग: ज्ञानकाण्डविभागश्च वर्तेते। वेदस्य कर्मकाण्डविभाग: दीर्घकाय: ज्ञानकाण्डविभाग लघुकायश्च विद्येते। वेदा हि यज्ञार्थमभिप्रवृत्ता: इत्यत्र संपुष्टमस्ति वेदानां मुख्यप्रयोजनं यज्ञास्सन्ति। याग: किम् इत्यत्र लक्षणं प्रतिपाद्यते देवतोदेशेन द्रव्यत्यागो याग:। अर्थात् कस्यापि देवस्य कृते तत्संबंधी द्रव्यस्य त्याग: याग इति समुचितमस्ति। जना: वदन्ति द्रव्य त्यागो याग:। तहर्यत्त प्रतीयते केवलं द्रव्यस्यत्याग: याग: नास्ति। देवतोदेश्यपूर्वकं तत्संबंधी द्रव्यस्य त्याग: याग: भवितुं शक्यते। अत्र प्रश्नमुत्तिष्ठति किमर्थं देवतोदेश्य:। अस्मिन् प्रसंगे यास्केन कस्यापि ब्राह्मणस्य वचनम् (निरु 8/22) उद्धृतमस्ति 'यस्य देवतायै हर्विगृहितं स्यात् तां मनसाध्यायेद् वषट्करिष्यन्। अर्थात् द्रव्यस्य हवनकरणात् पूर्वं यस्य देवस्य कृतेराहुतिं दीयते तस्य ध्यानमावश्यकमस्ति। यतोहि यागे देवताया: प्राधान्यमस्ति।

विदुषो वदन्ति ऋग्वेदस्यादिमे काले देवतानां सत्ता आसीद्। यस्य संज्ञा बहुदेववाद: (पॉलीथिज्म) कुर्वन्ति ज्ञानिन:। बहुदेववादानन्तरं बहुदेवतानामाधिपतिरूपेण प्रधानदेवस्य विचारा: कृतवन्त: आचार्या:। बहूनां देवतानां सत्ता एकस्मिन् एव देवे विराजमानास्तीति विचार्य एकेश्वरवादस्य अवधारणा जाता। अवान्तरकाले सर्वेश्वरवादस्य कल्पनाऽभवत्। सर्वेश्वरवादस्य (पैनमीज्म) वर्णनं पुरुषसूक्तस्य दशममण्डलस्य नवतितमे सूक्ते प्राप्यते।

वैदिकधर्मस्य वैशिष्टयं विद्यते यस्य देवस्य स्तुति: क्रियते तस्य कृते सर्वाधिकव्यापकं जगत: स्त्रष्टारं लोकोपकारणं च मन्यते। यथा वरुणस्य स्तुति काले वरुण एव श्रेष्ठ:। इन्द्रस्य स्तुति काले इन्द्र एव सर्वश्रेष्ठ इति प्रतिपादितमस्ति। वैदिककालादद्यावधिपर्यन्तं वैदिकदेवता: भारतीयानां जनानां हृदि येन केन प्रकारेण विराजामानास्सन्ति। पशुपक्षीत्यादय: वनस्पत्यादश्च संज्ञा अपि देवता मध्ये आगच्छति।

## देवानां संख्या विचार

देवानां संख्या विषये श्रुतिस्मृतिं वीक्ष्य गणना कर्तुं शक्यते। यास्काचार्यनुसारेण त्रय: लोकास्सन्ति। प्रतिलोकेष्वेकैकस्य देवस्याधिपतित्वं वर्तते। निरुक्ते लोकास्सन्ति। विलिख्यते। पृथिव्यामग्ने:, अंतरिक्षे इन्द्रस्य अथवा वायो:, आकाशे सूर्यस्याधिपत्यमंचस्ति। अर्थात् पृथिव्यामग्ने: अंतरिक्षलोकस्य देवता इन्द्र:, आकाशलोकस्य देवता सूर्यश्च वर्तन्ते। ऋग्वेदे (1.139.11) त्रयस्त्रिंशत्देवानामुल्लेखो प्राप्यते। अत्र विभागमपि प्राप्यते - पृथ्वीलोके एकादशदेवता:, अंतरिक्षलोके एकादशदेवता:, आकाशे एकादशदेवताश्च सन्ति। अन्यस्मिन् मन्त्रेऽपि (8.18.1) त्रयस्त्रिंशदेवता: वर्णितास्सन्ति। शतपथब्राह्मणस्यानुसारेण अष्टौ वसव:, एकादशरुद्रा:, द्वादशादित्या:, इन्द्र: प्रजापतिश्च देवतास्सन्ति।



Scanned with CamScanner

ऐतरेयब्राह्मणस्यानुसारेणेयं संख्या द्विगुणा विद्यते। तत्र लिखितमस्ति त्रयस्त्रिंशत् सोमपा: देवता: त्रयस्त्रिंशदसोपमा देवता: वर्णिता: सन्ति। ऋग्वेदस्यैकेनो-ल्लेखेनानुसारेण देवतानां संख्या त्रिनवत्युत्तरत्रयास्त्रिंशत्शतं विद्यते। एतादृशस्योल्लेख: शतपथब्राह्मणे (11.6.3.4) शांखायनश्रौतसूत्रेऽपि प्राप्यते।

## २.३ अथर्ववेदस्य

संहिताष्वर्थर्वसंहिताया: क्रम: चतुर्थोऽस्ति। अस्य वेदस्याचार्य: सुमन्तु: विद्यते। आदौ अथर्वशब्दस्योपरि चिन्तने निरुक्तस्यानुसारेण "थर्व" धातो: अथर्वस्य रचना क्रियते। थर्व शब्दस्यार्थ: गति: चेष्टा व विद्यते। अनेन प्रकारेण अथर्वन् शब्दस्यार्थ: न गति:। अर्थात् गतिरहित: चेष्टारहितो वा। अर्थात् यस्मिन् वेदे चित्तवृत्तीनां निरोधस्योपदेश: प्राप्यते तस्य नाम अथर्ववेदो भवति। गोपथब्राह्मणस्यानुसारेण अथ/अर्वाक् इति अथर्वन्। स्वकीयमात्मानं स्वान्त:करणे दर्शनम् अथर्वसंहिता विद्यते। अथर्ववेदे एतादृशान्यनेकानि सूक्तानि प्राप्यन्ते यस्मिन् आत्मविद्याया: प्रभावो दृश्यते यथा - आत्मविद्या (4.2), आत्मा (5.9), ब्रह्मविद्या (4.1) इत्यादय:।

### अथर्ववेदस्य परिचय

अथर्ववेदे प्रायश अभिचारात्मका: उपचारात्मकश्च मन्त्रा: संकलितास्सन्ति। मारणमोहनोच्चाटनमन्त्रैश्च सह मन्त्रतन्त्रौषधीनां च प्रतिपादनमन्त्रा: अप्यत्रवर्णितास्सन्ति। एहिकामुष्मिकयो: फलप्रदाताऽस्त्ययं वेद:। अस्य वेदस्य रचना यज्ञेषूत्पद्यमानानां विघ्नानां निराकरणार्थमस्ति। रचना दृष्ट्या तु ऋग्वेद इवास्त्ययं वेद:। परंच प्रतिपाद्यदृष्ट्या उभयोर्मध्ये प्रभूतवैभिन्यमस्ति। अस्य वेदस्य शाखाद्वयमेवोपलभ्यते, शौनक: पैप्लादश्च। उभयोगर्मध्ये शौनकशाखा एव प्रसिद्धा।

अथर्वऋषिणा दृष्टत्वादस्य वेदस्य नाम अथर्ववेद: इत्युच्यते। अस्मिन् वेदे विंशति-काण्डानि, एकत्रिंशदधिकसप्तशतं सूक्तानि, सप्ताशीत्यधिकैकोनत्रिंशत्शतं मन्त्राश्च सन्ति। मन्त्रेष्वेषु द्वादशशतं मन्त्रा ऋग्वेदसंहितायामपि दृश्यन्ते। विंशतितमेकाण्डे त्रय: पंचाशदधिकैकशतं सूक्तानि सन्ति, तेषु द्वादशसूक्तान्यतिरिच्यावशिष्टानि सूक्तानि ऋग्वेदस्य दशममण्डले समुपलभ्यते।

सायणमहोदयात् पूर्वं कस्याप्याचार्यस्य अर्थववेदोपरिभाष्यं न प्राप्यते। संपूर्णार्थवस-हितायामुपरि सायणेन स्वकीयं भाष्यं लिखितम् किंच प्रकाशितग्रंथेषु द्वादशकाण्डानाम् एव भाष्यमुपलब्धमस्ति। अनेन प्रकारेणास्याथर्ववेदस्य सायणभाष्यमपूर्णमस्ति।

### अथर्ववेदस्य प्रतिपाद्यविषया

अथर्ववेदस्यापरनाम अथर्वागिंरसवेद अस्त्येवं प्रो. विन्टरनित्समहोदया: प्रो.



Scanned with CamScanner

ब्लूफिल्डमहोदयाश्चापि कथनमस्ति। अवेस्तायां "अथ्रवन्" इति शब्दः प्राप्यते। अयं अथर्वन्शब्दः 'अथ्रवन्' इत्यस्य शब्दस्य प्रतिनिधित्वंकरोति। 'अथ्रवन' शब्दस्यार्थः पुरोहित अस्ति। अयं पुरोहित अग्निपूजक आसीत् अथर्ववेदेऽपि अग्निपूजनं यज्ञादीनां सम्पादनं चाथर्वेन भवतीति प्राप्यते। अवेस्ताया अथ्रवन् पोरोहित्य इव सह चमत्कारिकं कार्यं कुर्वन् आसीत्। आंगिरसः प्रागैतिहासिककालस्य पुरोहिता आसन्। अथर्वन् आंगिरसयोर्मध्ये भेदः अस्ति यत् अथर्वन्मंत्रेषु सुखाशान्त्यादिकृत्यानां तथा च रोगादीनां निवारणार्थकाः मन्त्रास्सन्ति। आंगिरसमन्त्रेषु कृत्याप्रयोगः, अभिचारादीनां कर्म शत्रुनाशन्ादीनांच मन्त्राः संकलितास्सन्ति।

काण्डानुसारेणाथर्ववेदस्य प्रतिपाद्यविषयाणां विवेचनमीत्थं प्राप्यते - प्रथमेकाण्डे विविधानां रोगानां निवृत्तिः, पापमोचनम्, रक्षोनाशनम्, शर्मप्राप्ति इत्यादयो विषयाः विवेचितास्सन्ति। द्वितीये काण्डे रोगाणां नाशनम्, कृमीत्यादिनाशनम्, दीर्घायुष्यप्राप्तिश्च वर्णितानि सन्ति। तृतीये काण्डे शत्रुसेनासम्मोहनम्, राज्ञस्य निर्वाचनम्, शालानिर्माणाविधानाम्, कृषिपशुपालनादिविषयाः विवेचितास्सन्ति। चतुर्थे काण्डे ब्रह्मविद्या, विषनाशम्, राज्याभिषेकः, वृष्टिः, पापमोचनं ब्रह्मोदनस्य च वर्णनं विवृतम्। पंचमे काण्डे ब्रह्मविद्या, कृत्यापरिहारादिविषयाः प्रतिपादितास्सन्ति। षष्ठे काण्डे दुःश्वप्ननाशम्, अन्नसमृद्धिसम्बद्धविषयाः वर्णितास्सन्ति। सप्तमे काण्डे आत्मावर्णनमस्ति। अष्टमे काण्डे प्रतिसरमणिः, विराट्ब्रह्मणः वर्णनम्। नवमे काण्डे मधुविद्या, पंचैदन अजः, अतिथिसत्कार, गोः महत्त्वम्, यक्ष्मानाशनादि विषयाश्च वर्णितास्सन्ति। दशमे काण्डे कृत्या निवारणम्, ब्रह्मविद्यायाः वर्णनम्, वरणमणेः वर्णनम्, सर्पविषनाशम्, ज्येष्ठब्रह्मणः, महत्त्वंच वर्णितमस्ति। एकादशे काण्डे ब्रह्मोदनम्, रुद्रसूक्तं ब्रह्मचर्यसूक्तंच विषयास्सन्ति। द्वादशे काण्डे पृथिवीसूक्तस्य भूमेश्च महत्त्वं प्रतिपादितमस्ति। त्रयोदशे काण्डे आध्यात्मकवर्णनमस्ति। चतुर्दशे काण्डे विवाहसंस्कारो वर्णितमस्ति। पंचदशे काण्डे व्रात्य-ब्राह्मणानां वर्णनमस्ति। षोडशे काण्डे दुःखमोचनस्य विषयो विद्यते, सप्तदशे काण्डे अभ्युदयाय प्रार्थना सम्मोहनश्च प्राप्येते। अष्टादशे काण्डे पितृमेधस्य विषयो वर्णितः। एकोनविंशतितमे काण्डे यज्ञादयः, नक्षत्राणां नामानि, विविधविषयाः, मणयः, छन्दसां नामानि, राष्ट्रस्य वर्णनम्, हिरण्यधारणादि सुरक्षाविषयाः रात्रिः, कामः कालयोश्च महत्त्वम्, दीर्घायुष्यम्, कुन्तापसूक्ते परीक्षितस्य राज्यशासनादीनांच वर्णनमस्ति।

अथर्ववेदे संकलनदृष्ट्या वैशिष्ट्यमस्ति। अथर्ववेदं चतुर्षु भागेषु विभाज्यते।

(क) प्रथमकाण्डतः सप्तमकाण्डं यावत् प्रतिसूक्तं मन्त्राणां संख्या विषये विशिष्टं ध्यानमस्ति। यथा - प्रथमकाण्डस्य प्रत्येकस्मिन् सूक्ते प्रायशः चत्वारो मन्त्रास्सन्ति। द्वितीये कण्डे प्रायशः पंचमंत्राः तृतीये काण्डे षट्मन्त्राः, चतुर्थे काण्डे सप्तमन्त्राः



Scanned with CamScanner

चतुर्विंशत्युत्तरत्रिशतम् (324), पंचमे काण्डे षट्सप्तत्युत्तरत्रिशतम् (376) षष्ठे काण्डे चतु:पंचाशदुत्तरचतु:शतंच (454) मन्त्रास्सन्ति।

(ख) अष्टमकाण्डत: द्वादशकाण्डं यावत् सर्वाणि सूक्तानि बहुसंख्यकमंत्रयुतानि सन्ति परंच विषया: भिन्ना:-भिन्ना: सन्ति।

(ग) त्रयोदशकाण्डत अष्टादशं यावत् बहुसंख्यकमन्त्रयुतानि सूक्तानि सन्ति। परंचेतेषां विषया: एकैव। यथा त्रयोदशे काण्डे आध्यायत्मविषया:, चतुर्दशे काण्डे विवाहविषया:, अष्टादशे काण्डे च पितृमेधस्य वर्णनमस्ति।

(घ) एकोनविंशतिर्काण्डत: विंशं यावत् प्रक्षिप्तज्ञानस्य वर्णनमस्ति। पंचपटलिकायां शौनकीयचतुराध्यायिकायांच एवमेव प्राप्येते। अथर्ववेद: अष्टादशकाण्डात्मकोऽस्ति। कौशिकगृह्यसूत्रे वैतानश्रौतसूत्रे च प्रतीकात्मकरूपेण अष्टादशात्मककाण्डं यावदेव मन्त्रा: प्राप्यन्ते।

अस्मिन् विषये मतवैभिन्यं दृश्यते। केचन आचार्या: मौलिकरूपेणाथर्ववेद: त्रयोदशकाण्डात्मक:, केचन अष्टादशकाण्डात्मक:, केचन एकोनविंशकाण्डात्मक: केचन च विंशकाण्डात्मक मन्यन्ते। अथर्ववेदस्य विंशकाण्डस्य सर्वे मन्त्रा ऋग्वेदस्य इनद्रविषयकात् नीयन्ते।

प्रो. मैकडानलमहोदयस्य मतमस्ति मूलरूपेणाथर्ववेदे त्रयोदशकाण्डानि आसन्। विषयविवेचनदृष्ट्या रचनाशैल्या च एवं वक्तुं शक्यते। त्रयोदशकाण्डस्यानन्तरं प्राप्ते विषये एकरूपता क्रमबद्धता च दृश्यते। यथा-चतुर्दशे काण्डे विवाहसंस्कार: पंचदशे काण्डे व्रात्यवर्णनम्, षोडशसप्तदशयोश्च काण्डयो: सम्मोहनमन्त्रा:, अष्टादशे काण्डे अन्त्येष्टिवर्णनंच वर्णितमस्ति। पंचदशषोडशकाण्डयो: व्याख्यानं ब्राह्मणग्रंथानामिव गद्यशैल्यां प्राप्येते। एकोनविंशतितमे काण्डे परिशिष्टतुल्यांशा: विद्यमानस्सन्ति। विंशतितमे काण्डे सर्वाणि सूक्तानि इन्द्रस्तुतिविधायकानि सन्ति। ऋग्वेदात् संगृहीतास्सन्त्येते मन्त्रा:। अथर्ववेदपरम्पराया: विरुद्धमत्स्यन्तिमेऽध्याये सोमयागस्य वर्णनम्। एवं प्रतीयते अथर्ववेद: चतुर्थो वेद: भवेदित्यस्य प्रयास: कृत:।

## अथर्ववेदस्य महत्त्वम्-

अथर्वसंहितातिमहत्वपूर्णा संहिताऽस्ति। मुख्यानि तत्वान्यधोलिखितानि सन्ति-



Scanned with CamScanner

4. अथर्ववेद: विश्वकोष अस्ति। अस्मिन् वेदकालिकोसभ्यतासंस्कृते: ज्ञानस्य विज्ञानस्य च संपूर्णं संग्रमस्ति।

5. अथर्ववेदे तस्मिन् समये प्रचलितानां प्रथानाम्, मान्यतानाम्, कतिपयान्धविश्वासानाम्, रूढीनाम्, कृत्यादिप्रयोगाणाम्, अभिचारादिकर्मणाम्, सम्मोहनादीनाम्, विविधानां मणीनाम्, 'जादू-टोना' इत्याख्यानाम्, अरिष्टनिवृत्तीनाम्, पापमोचनादीनाम्, शकुनविचाराणाम्, विविधौषधीनांच विषया: विशद्रूपेण वर्णितास्सन्ति।

6. अथर्ववेदे कतिपयानां विरोधीगुणानां समन्नयोऽपि विद्यते। अथर्ववेद: प्रथमदृष्ट्या ब्रह्मवेद: द्वितीय दृष्ट्या क्षत्रवेदश्चास्ति। अयं प्रथम: दार्शनिकविचारप्रधानवेद: द्वितीय: द्विजेतराणांच वेदोऽस्ति। अस्मिन् प्रथम आध्यात्मिकीयविषयानां चिन्तनम् द्वितीय: कृत्यादीनां प्रयोगाश्च प्राप्यन्ते।

7. अथर्ववेद: सामान्यजनस्य वेद अस्तीति वक्तुं शक्यते। अस्मिन् ब्राह्मणदि सर्वेषां वर्णानां वर्णनं समानरूपेण दृश्यते।

8. एका प्रसिद्धा उक्ति विद्यते कमपि साहित्यं तस्य समाजस्य दर्पणं भवति। अस्य सर्वोत्तममुदाहरणमथर्वसंहिता विद्यते।

9. एहिकामुष्मिकयो: दृष्ट्योपादेयोऽस्त्ययं वेद:। सायणस्याथर्वभाष्यभूमिकायां वचनमस्ति एहिकामुष्मिकयो: फलप्रदाता विद्यतेऽथर्ववेद:। अन्येषां त्रयाणां वेदानां फलं पारलौकिकं फलमस्तीति।

10. आचार्या: जयंतभट्टमहोदया: न्यायमंजर्याम् अथर्ववेदं प्रथमं स्थानं ददन् वदन्ति चतुर्षु वेदेषु सर्वोत्त्कृष्टमस्त्ययं वेद:। अथर्ववेद: सर्वकार्यसाधक: सार्वजनीनश्चास्ति।

Scanned with CamScanner

अथर्ववेदस्य विविधानि नामानि ज्ञायन्ते। अथर्ववेद: अथर्वाऋषे: कारणेन अथर्ववेदोऽभवत्। गोपथब्राह्मणे आंगिरसऋषि अस्ति मुख्य अत: अयं वेद: आंगिरसवेद: कथ्यते। अथर्ववेदस्य प्राच्यनाम अथर्वांगिरसो वेद अस्ति। अथर्ववेदस्य नाम ब्रह्मवेद अप्यस्ति। भृंगिरोवेदोऽप्यथर्ववेद अस्ति। शतपथब्राह्मणे अथर्ववेदस्य क्षत्रवेद: इत्युपाध्यस्ति। अनेन प्रकारेण भैषज्यवेद:, छंदोवेद:, महीवेदश्चास्य नामानि सन्ति।

## अथर्ववेदस्य शाखा-

अथर्वसंहितायाश्शाखा:

१ पैप्पलाद:(पैप्पलादशाखा पिप्लादऋषि:) २ तौद: ३ मौद: ४ शौनकीय: (शानकशाखा शौनकऋषि:) ५ जाजल: ६ जलद: ७ ब्रह्मवद: ८ देवदर्श: ९ चरणवेध:

महाभाष्ये नवधाऽथर्वणो वेद: इत्यनेन अथर्ववेदे नवशाखा: वर्णितास्सन्ति। प्रपंचहृदये, चरणव्यूहसूत्रे सायणस्याथर्ववेदभाष्यभूमिकायांच नवशाखा उल्लिखितस्सन्ति।

पैप्पलाद-तौद-मौद-शौनकीय-जाजल-जलद-ब्रह्मवद-देवदर्श-चरणवेधादयस्सन्ति शाखा:। आथर्वणपरिशिष्टे "तौद" इत्यस्थले "स्तौद" इत्यक्तिमस्ति। सम्प्रति द्वे शाखे एव स्त:-शौनकीयशाखा पैप्लादशाखा च।

### शौनकीयशाखा

वर्त्तमाने अथर्ववेदसंहिताया: शौनकीया शाखा एव अस्ति। अस्मिन् विंशतिकाण्डानि त्रिंशदुत्तरसप्तशतं सूक्तानि सप्ताशीत्युत्तरेकोनषष्टिश्शतं मन्त्रा: सन्ति। अस्मिन् बृहदात्मकानि त्रीणि काण्डानि सन्ति। विंशतितमे काण्डे अष्टौपंचाशदुत्तरनवशतं मन्त्रास्सन्ति। षष्ठे काण्डे चतु:पंचाशदुत्तरचतु:शतं मन्त्रास्सन्ति। एकोनविंशतितमे काण्डे त्रिपंचाशदुत्तरचतुश्शतं मन्त्रा: सन्ति। सर्वेष्येषु लघुकाण्डं सप्तदशमं काण्डमस्ति। अस्मिन् त्रिंशद् मंत्रा एव सन्ति। अथर्ववेदेऽपि यजुर्वेदस्य इव गद्यांशो विद्यते। पंचाशदधिकानि सूक्तानि गद्ये प्राप्यते। संपूर्णं पंचदशमं षोडशं च काण्डं गद्यमयात्मकमस्ति।

### पैप्पलादशाखा

अस्या: शाखाया: संहिता पैप्पलादसंहिता विद्यते। प्रो. ब्लूमफिल्डमहोदया (1901) एकोत्तरैकोनविंशतितमे ईस्वीये वर्षे आंगलनुवादेन सह प्रकाशनमकारयन्। अनन्तरं डा.

Scanned with CamScanner

शब्दस्याधारः ग्रंथात्मको नास्ति विषयको विद्यते। पद्यात्मिका रचना ऋक्, गीत्यात्मिका रचना साम गद्यात्मिका रचना यजुश्च भवति।

(ख) अथर्वशब्दस्योल्लेख ऋग्वेदसंहितायाम्-

ऋग्वेदसंहितायाम् अथर्वा शब्दस्य पंचदशावृतिरस्ति। अस्मिन्नथर्वा, अथर्वाणः अथर्वभ्यः इत्यादिशब्दानां प्रयोगाः विद्यन्ते। अनेन ज्ञायते ऋग्वेदे केवलमथर्वा ऋषि

Scanned with CamScanner

गोपथब्राह्मणे, छान्दोग्यब्राह्मणे, बृहदारण्यके, मुण्डके, माण्डुक्ये च ग्रंथेषु स्पष्टरूपेण चतुर्णां वेदानामुल्लेखो विद्यते।

(छ) अथर्ववेदस्योल्लेखाभावस्य कारणम्-

यज्ञस्य ऋक्यजुस्सामवेदैः सह प्रत्यक्षसंबंधोऽस्ति। होता-उद्गाता-अध्वर्युगणैः यागादिकं सम्पाद्यते। अथर्ववेदस्य मुख्यविषयः यज्ञः नास्त्येदर्थमत्रोल्लेखाभावः।

## अथर्ववेदसंहितायाः रचनाकालः

अथर्ववेदसंहितायाः कालनिर्धारणं सामान्यन्नास्ति। विषयेऽस्मिन् मतैक्यं न दृश्यते। अस्मिन् विषये द्विधा विचाराः विद्यन्ते भारतीयपरंपरागतविचारधारा पाश्चात्यविदुषां विचाराश्च।

(क) भारतीयविचारधारा-

अस्मिन् विषये व्यक्तमस्त्यग्नि-वायु-आदित्य-आंगिरसेभ्यः क्रमशः वेदानामाविर्भावः। सृष्टिप्रारभत् अद्यावधिपर्यन्तं तेनैव प्रकारेण गुरुशिष्यपरंपरारीत्या प्रवहमानाः भवन्ति वेदाः। भारतस्य परंपरावादिनामाचार्याणामेवं मतं विद्यते।

(ख) पाश्चात्त्यविचारधारा-

पाश्चात्त्याः, कतिपयाः भारतीयाः विद्वासश्च पूर्वोक्तस्य मतस्य समर्थकाः न सन्ति। ते वेदानां काल एतिह्यानां भौगोलिकानां भाषावैज्ञानिकीतथ्यानामाधारेण च ऋग्वेदस्यानन्तरीया रचना अथर्ववेदस्येति मन्यते।

(ग) अथर्ववेदस्य कालनिर्धारणे काठिन्यम्-

अथर्ववेदस्य कालनिर्धारणे काठिन्यमस्ति। अथर्ववेदस्य मूलांशे एतिह्यतत्त्वानामभावो विद्यते। अथर्ववेदे एतिह्यतत्त्वरूपेण कुन्तापसूक्तं प्राप्नोति। कुंतापसूक्तं खिलसूक्तं मन्यते। अस्याभिप्रायः मूलरूपेणेदं सूक्तमथर्ववेदस्य नास्ति। अनन्तरे काले संयुक्तमस्ति। कुन्तापसूक्ते प्रतीपः प्रतिसुत्वनश्च वर्णनं प्राप्यते। प्रो. रैप्सनमहोदयस्य मतमस्ति प्रतिसुत्वनः परीक्षितस्य पौत्र आसीत् प्रतीपः प्रपौत्रश्च। परीक्षितः अर्जुनस्य पौत्र अभिमन्योः पुत्रश्च आसीत्। अत्रार्जुनस्य पंचपुरुषान् वर्ण्यन्ते- अर्जुनः अभिमन्युः परीक्षितः प्रतिसुत्वनः प्रतीपः। महाभारतस्यानुसारेण वनगमनकाले युधिष्ठिरः परीक्षितस्य

Scanned with CamScanner

(क) सर्वप्रथममग्नेराविष्कारमनेन ऋषिणा जातम्। मन्त्रैर्ज्ञायते अरणिमन्थनद्वारा अग्न्युत्पादनं जलमन्थनेन विद्युतादीनामाविष्कारंचानेन अथर्वा महोदयेन कृतम्।

(ख) उत्खननविधिना पुरीष्याग्नेः अर्थात् 'प्राकृतिकगैस' (ध्नत ींह् र्नूर्लीत) इत्यस्याविष्कारः कृतः।

(ग) यज्ञकार्येषु अग्नेः प्रयोगः सर्वप्रथममथर्वणा एव सम्पादितः।

(घ) अथर्वा ऋषिः वैदिककर्मकाण्ड-यज्ञीयविधि-वैदिकतत्त्वमीमांसेत्यादीनां प्रचारकाः आसन्। आध्यात्मचिन्तनं वर्णनंच तस्य कृते मुख्य आसीत्।

(ङ) अथर्वा ऋषेः चिन्तनमतिविशदमासीत्। कर्मकाण्डं यावदेव तस्य चिन्तनं नासीत्। अध्यात्मिकानाम्, सामाजिकानाम्, राजनीतिकानाम्, आर्थिकानाम, धार्मिकानाम्, दार्शनिकानाम्, आयुर्वेदिकादीनांच विषयानामुपरि सूक्ष्मतया विवेचनमथर्वा ऋषेरासीत्।

## अथर्ववेदस्य महत्त्वपूर्णानि सूक्तानि-

अथर्ववेदेऽत्यधिकानि महत्वपूर्णानि सूक्तानि प्राप्यन्ते। अत्र कतिपयानां नामामात्रे-णाअंकनमत्र क्रियते।

Scanned with CamScanner

(12.1.45)

(घ) सत्यं बृहद् ऋतमुग्रं दीक्षा तपो ब्रह्मयज्ञः पृथ्वीं धारयन्ति। अथर्ववेदः (12.1.62)

२. ब्रह्मचर्यसूक्तम्-

अथर्ववेदे ब्रह्मचर्यसूक्तस्य षड्विंशतिर्मन्त्रेषु ब्रह्मचर्यः ब्रह्मचर्यस्य गुणधर्मः, गुरुशिष्यानामुदात्तसंबंधः, अनुशासनस्य महत्वंच विशदमुपस्थापितमस्ति। यथा-

(क) ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत - अथर्ववेदः (11.5.19)

(ख) आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते - अथर्ववेदः (11.5.17)

(ग) ब्रह्मचारी......श्रमेण लोकान् तपसा पिपर्ति - अथर्ववेदः (11.5.4)

अथर्ववेदस्य सूक्तद्वयेषु पंचदशमंत्रेषु कालस्य वैज्ञानिकं विवेचनं समहत्त्वं प्रस्तुतमस्ति। विज्ञानमपि कालस्य महत्त्वं स्वीकरोति। कालस्य प्रतिनिधिः सूर्य अस्ति। सर्वाणि कार्याणि कालेन नियंत्रितानि भवन्ति।

(क) कालो हि सर्वेश्वरः - अथर्ववेदः (19.53.8)

(ख) कालेनोदेति सूर्यः काले नि विशते पुनः - अथर्ववेदः (19.54.1)

(ग) कालाद् ऋचः समभवन्, यजुः कालादजायत-अथर्ववेदः (19.54.3)

४. विवाहसूक्तम्-

अथर्ववेदस्य संपूर्णं चतुर्दशकाण्डं विवाहसूक्तमस्ति। अस्मिन् द्वयोः सूक्तयोः नवत्रिंशदुत्तरशतं मन्त्राश्च सन्ति। अस्मिन् विवाहसंस्कारस्य विधयः, पतिपत्न्योः कत्र्तव्यम्, विवाहसंबंधस्याविच्छेद्यता, पतिव्रताधर्म, पत्न्यः अधिकारः कर्तव्यश्चेत्यादि विषयाः विवेचितास्सन्ति। यथा-

(क) पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम् - अथर्ववेदः (14.1.42)

(ख) सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु - अथर्ववेदः (14.1.44)

(ग) पितृभ्यश्च नमस्कुरु - अथर्ववेदः (14.2.20)

अनेन प्रकारेण व्रात्यसूक्तम्, मधुविद्यासूक्तम्, ब्रह्मविद्या इत्यादयः तत्र वर्णितास्सन्ति।

## २.३ सामवेदस्य

वेदानां सामवेदोऽहम् इत्युक्तवा गीतायां सामवेदस्य महत्त्वम् भगवता कृष्णेन



Scanned with CamScanner

ऋच: सन्ति या: ऋग्वेदसंहितायां न प्राप्यन्ते। सामवेदे ऋक्सामसंहितयो: सम्मेलनं दृश्यते। ब्राह्मणग्रंथेषु गृह्यसूत्रेषु च प्राप्यते ऋग्वेदेन सह सामवेदस्य संबन्ध: सुदृढमस्ति। यथा-

**अमोऽहमस्मि सा त्वं, सात्वमस्यमोऽहम्, द्यौरहं पृथ्वी त्वम्, सामाहमृक्त्वम् ताविह विवहावहै।**

सामशब्दस्यार्थे सा अर्थात् सा ऋचा, अम: नाम स्वर:, यस्या ऋच: उपरि सामगानं भवितुं शक्यते तस्या ऋच: नाम साम अस्ति। अस्मिन् सूत्रे अम:, अहम् असिम इत्यत्र अम: नाम स्वर:, सा अर्थात् ऋचा। अर्थात् ऋचा त्वमसि, स्वरोऽहमस्मि। पुन: वदति सा ऋचा त्वं तस्योपरि स्वरोऽहम्। अहं द्यौ: त्वं पृथ्वी अर्थात् ऋच: उपरि सामस्वरारोहणपूर्वकं सामसंहितायां पाठा: क्रियन्ते।

## साम्नां महत्त्वम्

साम्नां महत्त्वं प्रच्छिन्नं नास्ति। अस्य महत्त्वस्य प्रतिपादनं सर्वे वेदा: कुर्वन्ति। सर्वेषां वेदानां मुख्यप्रतिपाद्यविषयास्सन्ति यज्ञा:। यज्ञेषु देवानामावाहनं पूजनं च क्रियते। तस्य मुख्योदेश्यमस्ति देवताप्रीति। देवता प्रसन्ना भूत्वा यजमानस्य कल्याणं करोति। देवतानां प्रीतकरमंत्राणमुच्चारणार्थम् ऋग्वेदे मन्त्रा: प्राप्यन्ते परंचावाहनमंत्रा: भिन्ना:, पूजनमंत्रा: भिन्ना:, ज्ञानमंत्रा: भिन्ना:, घ्निानां निवारणमंत्रा: भिन्नाश्च। यत्र कुत्रचित् मन्त्रा: भिन्ना: न सन्ति चेत् तेषु उच्चारणपद्धतीनेषु भेदा: दृश्यन्ते। एतावता यज्ञे होता, अध्वर्यु:, उद्गाता ब्रह्मा च स्वीयेन-स्वीयेन वेदविधिना मंत्राणामुच्चारणं कुर्वन्ति। अत: साम्नां महत्वमस्ति।

Scanned with CamScanner

ऋग्वेदे गीतार्थं गीर, गातु, गाथा, गायत्र, गीति, सामादि नैकेषां शब्दानां प्रयोगः प्राप्यते। ऋग्वेदकालेऽपि आराधनायाः माध्यमः गानमासीत्।

**स नः स्तवान् आ भर गायत्रेण नवीयसा। रयिं वीरवतीमिषम्। (ऋग्वे. 1.12.11)**

अर्थात् हे अग्ने नवीनेन गायत्रेण स्तुतस्त्वं आगच्छ अत्र अस्माकं कृते धनं जनंच प्रयच्छ। ऋग्वेदकाले साम्नाम् आविष्कर्तृणां नैकेषामाचार्याणाम् उल्लेखाः प्राप्यते येषु आंगिरस भरद्वाज - वशिष्ठादयश्च प्रमुखस्सन्ति।

**देवा अंगिरसां सामभिः स्तूयमानाः (ऋग्वे. 1.107.2)**

बृहत् साम्न आविष्कारकास्सन्ति भरद्वाजमहोदयाः। अस्य साम्नः महत्त्वं सोमयागाय उत्कृष्टमस्ति। रथन्तरसाम्न उद्भावका ऋषयस्सन्ति वसिष्ठमहोदयाः। अस्य वर्णनं ऋग्वेदे प्राप्यते यथा-रथन्तरमा जभारा वसिष्ठः। विशिष्टसाम्नां विशिष्टैः छन्दैस्सह सन्निकर्षं संबद्धत्वात् तस्य नाम छंदानां नामभिस्सह प्रसिद्धो भवति। यथा-

**गायत्रं त्वो गायति शक्वरीषु। (ऋग्वे. 1.181.1)**

ऋग्वेदे साम्नां नामतः निर्देशः प्राप्यते। यथा - वैरुप, गौरिवीति, वृहत्, श्लोकः, अर्कादिः। वेदानामध्ययनेन सिद्ध्यति साम्नां गायनं न केवलं यज्ञादिकृत्यानां सम्पादने भवत्यपितु लौकिकोत्सवानामवसरेऽपि। व्यवह्रियते। भारुण्डसाम्नः गायनस्य परंपरा पितृकर्मणि मुख्यतया दृश्यते।

## यजुर्वेदानुसारेण साम्नां महत्वम्-

यजुर्वेदेऽपि साम्नां वर्णनं प्राप्यते। यथा रथन्तर-बृहत्-वैरूप-वैराज-वैखानस-वामदेव्य-यज्ञायज्ञिय-शाक्वर-गायत्र-गौरिवीति-अमीवर्त-कोश-सत्र्यस्याधि-प्रजापतेर्हृदयम्-श्लोकः-अक्रच्य-अनुश्लोकः-भद्र-इलान्द प्रभृतिनैकेषां साम्नामुल्लेखः प्राप्यते। येतेषामुल्लेखः वाजसनेयी संहितायाः दशमेऽध्याये दशतः त्रयोदशमंत्रपर्यन्तं प्राप्यते। एतदनन्तरं वैखानससाम्नः वर्णनं तैत्तिरीयसंहितायां प्राप्यते। वामदैव्यादि गायत्रसामपर्यन्तं वर्णनं द्वादशाध्यायस्य दशमाध्यायस्य च चतुर्थे मंत्रे प्राप्यते।

यागानुष्ठानेषु सर्वाधारभूतासंहिता यजुस्संहिता विद्यते। शाखाभेदेन शुक्लकृष्ण इत्युभयोः शाखयोः सामवेदस्य प्रचुरमात्रायां प्रशस्तिगानमस्ति। तैत्तिरीयसंहितादिशा ऋग्यजुर्वेदाभ्यां साम्नः महत्त्वं प्रभूतमस्ति। अयज्ञो व एषः योऽसामा इत्यनुसारेण सामवेदरहितो यज्ञः वस्तुतः अयज्ञोऽस्ति। तैत्तिरीये तु प्राप्यते अध्वर्यु अपि सामगानं कर्तुं शक्नोति। परंच सामगानस्य कृते सामवेदस्य ऋत्विक् उद्गाता पूर्वनियुक्तः अस्ति।



Scanned with CamScanner

**अथर्ववेदानुसारेण साम्नां महत्त्वम्-**

अथर्ववेद सामवेदस्य माहात्म्यं प्रभूतमस्ति। सामानी लोमाः कथ्यन्ते। उच्यते-

**ऋचः सामानि छन्दांसि पुराणं यजुषा सह।**

**उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः।।**

अथर्ववेदस्य मन्त्रेषु सामवेदस्याअंगीभूता प्रस्तावोद्थप्रतिहारोपद्रवादिस्वराणाम-ुल्लेखो विद्यते। अथर्ववेदस्य ऋषीणामुपरि साम्नां प्रभावः प्रभूतमस्ति। तत्र प्रहेलिकारूपेण प्राप्यते अतिथीनां दर्शनं हिंकारमस्ति, तस्याभिवादनं प्रस्तावो विद्यते, तस्य कृते जल-

Scanned with CamScanner

आसुरायण:, वैशाख्य:, प्राचीनयोगपुत्र:, पतंजलिश्चसहित अन्येषां शिष्ययानां द्वयं कृतवान्। अपपाठकारणात् लुप्तानि सन्ति नामानीति वैदिकवाड्.मयस्य बृहद् इतिहासेति ग्रंथे श्रीकुंदनलालशर्म्ममहोदया: प्रतिपादयन्ति। "लांगलिशालिहोत्रं" इत्युभौ षण्णां-षण्णां संहितानां व्याख्यानौ कृतवन्तौ।

लांगलमहोदयानां षट्शिष्या आसन् - भाल्लवि:, कामहानि:, जैमिनी:, लोमगायनी:, कण्डु: कहोलश्च।

सामवेदीयाश्शाखा:

सुमन्तु

सुकर्मा

पौष्पिंजि (५00)   हिरण्यनाभ कौशल्य (५00)

लौगाक्षी: कुथुमी: कुसीदी: लांगलि:

चतुर्विशति: सामससंहितानां प्रवचनं कृत:

राणायनि:

ताण्ड्य:

अनोवेन: या

मूलाचारी: असोरस: पाराशर: भागवित्ति:

भाल्लवि: कामहानि: जैमिनी: लोमगायनि: कण्डु: कहोल:

सकैतिपुत्र:

सात्यमुग्र: षट् पुत्रा: शौरिद्यु: श्रृंगीपुत्र:

चैल: प्राचीनयोग: सुराल:

आसुरायण: वैशाख्य: प्राचीयोगपुत्र: पतंजलि: अज्ञात: अज्ञात:

हिरण्यनाभमहोदया: चतुर्विंशतिस्सामसंहितानां व्याख्यानि प्रदत्तानि। अस्य महोदयस्य प्रधानशिष्य: कृत् महोदयास्सन्ति। चरणव्यूहानुसारेण शाखाभेदे अपि वैभिन्यमस्ति-

**राणायणीयानां सप्तभेदा:-**

राणायणीया: सात्यमुग्र:, कापोला: महाकापोला:, लांगलायना:, शार्दूला:, कौ-थुमाश्च।



Scanned with CamScanner

आसुरायणाः, वातायनाः, प्राजलिद्र्वैनभृताः, कौथुमाः, प्राचीनयोग्याः, नैगेयाः।

प्रपंचहृदयानुसारेण **द्वादशश्शाखास्सन्ति-**

तलवकारः, छन्दोगः, शाट्यायनः, राणायनिः, दुर्वासस्, भागुरीः, गैः तलवकारालिः, गौतमर्वाकिलिः, सावर्ण्यः, गार्ग्यः, वार्षगण्यः औपमन्यवश्च।

**आथर्वणपरिशिष्टस्य चरणव्यूहानुसारेण-**

राणायणीयः, सात्यमुग्रः, कालापः, महाकालापः, कौथुमः लांगलिकश्चैते आचार्यास्सन्ति। सामसम्प्रदाये त्रयोदश आचार्येभ्यः तर्पणं क्रियते-

राणायन-सात्यमुग्र-व्यास-भागुरि-और्गुण्डि-गौल्गुलमि-भानुमानौपमन्यव-कराटि-मशकोगार्ग्यः-वार्षगण्य-कौथुमी-शालिहोत्र-जैमिनी एते सामगाः आचार्याः सन्ति।

**एतदतिरिक्तं दशसमागानां कृतेऽपि तर्पणस्य विधानं प्राप्यते।** जैमिनी गृह्यसूत्रस्य तर्पणप्रकरणे त्रयोदशाचार्याणां नामानि प्रतिपादितानि सन्ति।

**शाखा भेदाः**

| चरणव्यूहानुसारेण | | प्रपंचहृदयानुसारेण | आथर्वणपरिशिष्ट |
|---|---|---|---|
| राणायणीयाः | कौथुमाः | | |

Scanned with CamScanner

| | | |
|---|---|---|
| 1. आसुरायण: | 1. तलवकार: | चरणव्यूहानुसारेण |
| 2. वातायना: | 2. छन्दोग: | 1. राणायणीय: |
| 3. प्रांजलिद्वैनभृता: | 3. शाट्यायन: | 2. सात्यमुग्र: |
| 4. कौथुमा: | 4. राणायनि: | 3. कालाप: |
| 5. प्राचीनयोग्या: | 5. दुर्वासस् | 4. महाकालाप: |
| 6. नैगेया: | 6. भागुरि: | 5. कौथुम: |
| | 7. गै: तलवकारालि: | 6. लांगलिक: |
| | 8. गौतमर्वाकलि: | |
| | 9. सावर्ण्य: | |
| | 10. गार्ग्य: | |
| | 11. वर्षगण्य: | |
| | 12. औपमन्यव: | |

## : वैशिष्ट्यम्-

ालितेयं शाखा सामवेदस्य विद्यते। अस्या: शाखाया: भागद्वयं क्रियते। आर्चिको द्विविध:। पूर्वार्चिकोत्तरार्चिकश्च। पूर्वार्चिकस्य विभाजनं दशतीषु च विद्यते। अध्यायेषु खण्डेष्वपि विभाजनमस्ति।

ाण्डानां व्यवस्था छंदोपर्यपि दृश्यते। प्रथमे काण्डे प्रथममन्त्रत: (114) मन्त्रपर्यन्तं आग्नेयं पर्व अस्ति। द्वितीये काण्डे गायत्रीछन्द: 115) मन्त्रत: द्वात्रिंशत्यधिकं शतद्वयं (232) मन्त्रपर्यन्तं प्राप्यते। शाधिकशतं (115) मन्त्रत: चतु:सप्तत्युत्तरशतं (174) मन्त्रपर्यन्तम्, त्युत्तरैकशतं (175) मन्त्रत: द्वात्रिंशदुत्तरशतद्वयं (232) मन्त्रपर्यन्तं, ुसामि: ते मन्त्रा: भविन्ति येषामुपरि द्वे अथवा द्वयाधिकासाम्नां गायनं ारशतद्वयं (233) मन्त्रत: द्वादशोत्तरशतत्रयं (312) मन्त्रपर्यन्तं, बृह-

Scanned with CamScanner

ऋचस्सन्ति।

**पूर्वार्चिकस्य विवरणम्**

| काण्ड्म | आदितः अन्तं यावत् | अध्यायाः | मन्त्राः |
|---|---|---|---|
| अग्नेयकाण्डम् | 1-114 मन्त्राः | 1 | 114 |
| ऐन्द्रकाण्डम् | 115-232 मन्त्राः | 2 | |
| | 233-351 मन्त्राः | 3 | |
| | 352-496 मन्त्राः | 4 | 382 |
| पवमानकाण्डम् | 467-585 मन्त्राः | 5 | 89 |
| आरण्यकाण्डम् | 586-640 मन्त्राः | 6 | 55 |
| महानाम्नी | 641-650 मन्त्राः | | |

**उत्तरार्चिके - १२२५ मन्त्राः = संपूर्णयोगः = १८७५**

**उत्तरार्चिकस्य विवरणम्**

प्रपाठकः - मन्त्र (प्र.द्वि.अर्ध.)

| | | |
|---|---|---|
| 1. 62+62 | = | 124 |
| 2. 55+56 | = | 111 |
| 3. 69+76 | = | 145 |
| 4. 83+59 | = | 142 |
| 5. 80+94 | = | 174 |
| 6. 32+56+54 | = | 142 |
| 7. 46+38+44 | = | 128 |
| 8. 40+54+54 | = | 148 |
| 9. 51+33+27 | = | 111 |
| उत्तरार्चिकमन्त्राणां संपूर्णयोग | = | 1225 |
| पूर्वार्चिकमन्त्राणां योगः | = | 650 |
| **संपूर्णमन्त्राणां योगः** | = | **१८७५** |



Scanned with CamScanner

## विशिष्टविवरणम्

| | | |
|---|---|---|
| उत्तरार्चिके ऋग्वेदीयमन्त्राः | = | 1206 (षडोत्तरद्वादशशतम्) |
| अऋग्वेदीयमन्त्राः | = | 19 (एकोनविंशतिः) |
| सर्वे मन्त्राः | = | (सूक्तानि 400) 1225 (पंचविंशत्युत्तरद्वादशशतम्) |
| पूर्वार्चिके ऋग्वेदीयमन्त्राः | = | 577 (सप्तासप्तत्युत्तरपंचशतम्) |
| अऋग्वेदीयमन्त्राः | = | 73 (त्रिसप्ततिः) |
| **सर्वं योगम्** | = | **६५० + १२२५ = १८७५ मन्त्राः** (पंचसप्तत्युत्तराष्टादशशतम्) |

सामवेदस्य पूर्वाचिकोत्तरर्चिकयोर्मध्ये विदुषां मते मतवैभिन्यं दृश्यते। तस्याधारमस्ति सामवेदस्य सामविधानब्राह्मणे उत्तरार्चिकस्यावर्णनम्। सामविधानब्राह्मणे सर्वत्र पूर्वार्चिकस्य मन्त्राणामेव वर्णनं प्राप्यते। ओल्डनवर्गमहोदयानां कथनमस्ति उत्तरार्चिकः ब्राह्मणग्रंथ-मशककल्प-लाट्यायन-द्राह्यायणादि श्रौतसूत्रात् अवरवर्ती अस्ति। अर्थात् उत्तरवर्ती विद्यते। यतोहि यथा पूर्वार्चिके देवतानामनुसारेण मन्त्राणां संकलनं दृश्यते तथा उत्तरार्चिके न प्राप्यते।

### जैमिनिशाखायाः वैशिष्ट्यम्

जैमिनिसंहितायां मन्त्राणां संख्या सप्ताशीत्युत्तरषोडशशतं विद्यते। जैमिनिकौथुमयोर्मध्ये पाठभेदः दृश्यते। सर्वप्रथमं तु क्रमे भेद अस्ति। कुंदनलालशर्ममहोदयैः प्रतिपादिते वैदिक वाङ्.मयस्येतिहासनाम्नि ग्रंथेऽयं क्रमभेदो विद्यते-

| | | |
|---|---|---|
| जैमि.सं- | 1,24,7= | कौथम सं - 2,12,5 |
| | 1,24,8= | 2,12,16 |
| | 1,24,5= | 2,12,07 |

प्रकारेणानेन उभयोः शाखयो एकस्मिन्नेव क्रमे भिन्न-भिन्नमन्त्राणां विधानानि प्राप्यन्ते। अवधेयमस्ति चिन्नस्वामिमहोदयाः ताण्ड्यमहाब्राह्मणस्य भूमिकायां सूचयन्ति सामवेदस्य पूर्वार्चिकोत्तरार्चिकयोर्मध्ये ऋक्संख्या (1810) दशाधिकाष्टादशमस्ति।

एवं प्रतीयते अरण्यकाण्डस्य पंचपंचाशतं मन्त्राः महानाम्यर्चिकस्य दशमन्त्राश्च गणनारहितास्सन्ति।



Scanned with CamScanner

प्रगाथ-तृचत्यादीनामुल्लेखो नास्ति परं कौथुमसंहितायामस्य व्यवस्थितो निर्देशो विद्यते। जैमिनीसंहितायामुत्तरार्चिके अनेके नूतनमंत्राः प्राप्यन्ते ये कौथुमसंहितायां न प्राप्यते।

जैमिनीसंहितायां सामगानानां संख्या कौथुमीयसामगानेभ्यः सहस्राण्यधिकानि सन्ति। कौथुमसंहितायां गानानां संख्या (2622) द्वाविंशदुत्तरषड्विंशतिर्विद्यते परं जैमिनीयगानानां संख्या (3681) एकाशीत्यधिककषड्त्रिंशदस्ति। प्राकरेणानेन अनयोः (959) ऊनषष्ट्युत्तरनवशतं गानानामन्तरमस्ति। डा. कैलेण्डमहोदयानामनुसारेण जैमिनीसंहितायां मन्त्राणां संख्याः (1687) सप्ताशीत्यधिकषोडशशतं सन्ति। अरण्यकाण्डस्य पूर्वार्चिके (646) षट्चत्वरिंशदुत्तरषट्शतं मन्त्राः उत्तरार्चिके (1041) एकचत्वारिंशदधिकसहस्राणि मन्त्राश्च प्राप्यन्ते। जैमिनिशाखाया अवान्तरभेदेन तवलकारशाखा अस्ति। शंकराचार्येण तवलकारब्राह्मणानामुल्लेखः कृतः। केनोपनिषद् अनया शाखया एव संबद्धा अस्ति।

## राणायनीयशाखायाः वैशिष्ट्यम्

अस्याः शाखायाः संहिता कौथुमसंहितातः लघु विद्यते। अत्रोच्चारणे भेदः दृश्यते यथा कौथुमीया "हाउ" "राइ" वदन्ति तत्र राणायनीयाः। "हावु" "रायी" इति उच्चारयन्ति। राणायनीयशाखायाः संहिता अप्रकाशितास्ति। विण्टरनित्समहोदयानां दिशा जे. स्टीवन्सनमहोदयैः सम्पादिता सामसंहिता तथा तस्याअंगलानुवाद अस्या शाखाया एव। परंचानेन मतेन आचार्याः भगवद्दत्तमहोदयाः असम्मतास्सन्ति। यतोहि तेन मतेन अप्रामाणिकोऽस्तीदं वचनम् इति वैदिकवाङ्मयस्येतिहासे प्राप्यते।

द्राह्यायण श्रौतसूत्रं खादिरगृह्यसूत्रंच राणायनीयाः शाखायाः रचना विद्यते। राणायनीयगृह्यपरिशिष्टमपि भागद्वये विभक्तम्। राणायनीयानामवान्तरशाखा विद्यते सात्यमुग्रि। अस्मिन् विषये महाभाष्यकाराः पतंजलिमहोदयाः लिखन्ति राणायनीया जनाः ह्रस्व - एकारस्यस्थले ह्रस्व - ओकारस्य उच्चारणं कुर्वन्ति। उदाहरणार्थं सुजातो अश्वसूनृते। अध्वर्यो ओ अद्रिभिः सुतम् (सामवेद 499) शुक्रं ते अन्यद् यजतम् (सामवेदः 75) इति तत्र प्रदत्तमस्ति। अपिशलिशिक्षायामप्येवमुल्लेखे प्राप्यते। परंचास्य



Scanned with CamScanner

ग्रंथस्योपलब्धि: नास्ति।

एतदतिरिक्तमन्यानां शाखानां वर्णनं विश्वेश्वरानन्दवैदिकशोधसंस्थानत: प्रकाशिते ग्रंथे वैदिकवाङ्.मस्येतिहासे प्राप्यते।

**नैगेया शाखाया: परिचय:-**

अस्या: शाखाया: नाम चरणव्यूहसूत्रेषु कौथुमशाखाया अवान्तरभेदेषूल्लिखितमस्ति। तत्र कौथुमानां सप्तभेदा: भवन्ति-आसुरायणा:, वातायना:, प्रांजलिद्र्वैनभृता:, कौथुमा:, प्राचीनयोग्या नैगेयाश्च। नैगेयशाखानुक्रमण्यां सिद्ध्यति अस्या: शाखाया: संहिता आसीत्। आर्षं दैवतमितिभागद्वयमस्त्यस्या: शाखाया: नाम। साममन्त्राणां ऋषीणां सूची आर्षम् देवतानामनुक्रमण्यां विद्यते। मन्त्राणां क्रमे कौथुमनैगेययोश्शाखयो: भेद: नास्ति। केवलं नैगेयां "आक्रन्दय" इति मंत्र अधिकोऽस्ति। अयं मन्त्र अन्येषां सामसंहितायां न प्रदत्तमस्ति।

अपरमपि वैशिष्ट्यं दृश्यते कौथुमशाखायाम् अरण्यकाण्डं सप्तमं प्रपाठकम् इति नोक्त्वा षष्ठाध्यायस्य संज्ञा प्रदत्ता। नैगेयशाखायां तम् अध्यायं सप्तमं प्रपाठकं मन्यते। अस्यान्तिमे पंचमे खंडे चतुर्दशस्थानोपरि पंचदशऋच: पठ्यन्ते। महानाम्न्या: प्रथमऋच: "विदा मघवन्" इतिमन्त्रं अरण्यकाण्डे अथवा सप्तमस्य प्रपाठकस्य अन्तिमायां ऋचि पठ्यते।

**शार्दूलशाखाया: परिचय: -**

हेमाद्रौ श्राद्धकल्पपरिभाषा प्रकरणे लिख्यते - तद्यथा शार्दूलशाखिनां स पूर्वी महानामति मधुश्रुन्निधनम्। आचार्या: वीरमित्रमहोदया: श्राद्धप्रकाशस्य (130) त्रिंशदुत्तरशततमे पृष्ठे शार्दूलशाखाम् उद्धृतं कुर्वन्ति येन ज्ञायते इयं शाखा आसीत्।

**वार्षगण्या शाखा -**

चरणव्यूहसूत्रे अस्या: शाखाया: वर्णनमस्ति। पिंगलछन्दसूत्रस्य व्याख्यायां यादवप्रकाश: नागी गायत्र्या: उदाहरणं वार्षगण्यसंहितात: ददाति - ययोरिदं विश्वमेजति ता विद्वांसो हवामहे वाम्। वीतं सौम्यं मधु।। इति वार्षगण्यानाम्। इदमेवोदाहरणं निदानसूत्रेऽपि उद्धृतमस्ति।

**गौतमीया शाखा-**

गौतमस्य धर्मसूत्रं पितृमेधसूत्रं च वर्तमाने प्राप्येते। संहिताया: विषये किंचिदपि न वदन्ति कुंदनलालशर्ममहोदया:।

अनेन प्रकारेण अन्या शाखा: यथा-भाल्लविनशाखा, कालबविनशाखा, शाट्यायिन शाखा, रुरुकिणशाखा, कापेयाशाखा, माषशराव्याशाखा, ताण्ड्यशाखेत्यादीनां शाखानां



Scanned with CamScanner

**चातुवर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमा: पृथक्।**

**भूतं भव्यं भविष्यं च सर्वे वेदात् प्रसिद्ध्यति।। (मनुस्मृति 11-97)**

वेदा एव परमपुमर्थं मोक्षं प्रतिपादयन्ति, अन्यत् सर्वमपि तदनूद्य एव प्रवर्तन्ते। यथोच्यते-

**विभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्।**

**तस्मादेतत् परं मन्ये यज्जन्तोरस्य साधनम्।। (मनुस्मृति 12-99)**

## २.५ ब्राह्मण:

वेदशब्दो ज्ञानार्थकाद् विदधातो: निष्पद्यते। अयं धातु: विद्याशब्दस्यापि समान:। अतोऽयं सामान्यार्थक: वेदशब्दप्रयोग आयुर्वेद-धनुर्वेदादिशब्देषु अपि दृश्यते। वेदशब्दस्य विशेषे पारिभाषिके अपि प्रयोगो वर्तते। यथा-

Scanned with CamScanner

**ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम्** इति ब्राह्मणशब्दश्च नपुंसलिंगे व्यवहार्यीमति प्रतिपादयति। किंतु महाभारते उद्योगपर्वणि पुल्लिंगे अपि ब्राह्मणशब्दस्य प्रयोगः वर्तते। यथा-

**य इमे ब्राह्मणाः प्रोक्ता मन्त्रा वै प्रोक्षणे गवाम्।**

**एते प्रमाणम् उताहो नेति वासव।।** इति रूपेण

एवमेव ब्राह्मणानां स्वरूपविषये भट्टभास्करः तैत्तिरीयसंहिताभाष्ये वदति-

Scanned with CamScanner

**ब्राह्मणग्रंथानां प्रतिपाद्यविषया:**

यज्ञानां सर्वाङ्.गपूर्णं निरूपणं ब्राह्मणग्रंथानां मुख्यप्रतिपाद्यं भवति। यज्ञमीमांसायां विधि: अर्थवादश्च प्रमुखौ भवत:। यज्ञानुष्ठानस्य समयानुष्ठानादिविषये विधि: विदधाति। यागविधय: अज्ञातार्थज्ञापका: भवन्ति। विधिभ्य एव ब्राह्मणग्रंथा: कर्मानुष्ठानं प्रेरयन्ति। कर्मचोदना ब्राह्मणानि (आपस्तम्बयज्ञपरिभाषासूत्रम् 35) इति आपस्तम्ब: सूत्रयति।

अर्थवाद: विधीनां स्तुतिनिन्दायां प्रवर्तते। अर्थवादपरकवाक्येषु यज्ञोपयागिवस्तुनां प्रशंसा, तन्निषिद्धवस्तूनांच निंदा भवति। मीमांसाका: विधिना तु एकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्यु: (जि.मी.सू -1-2-27) इति सूत्रेण विधि-अर्थवादवाक्ययो: मध्ये परस्परं शेषशेषिभावम्, अङ्.गाङ्.गिभावं वा स्वीकुर्वन्ति।

शबरस्वामी तु विधय एव अर्थवादादिरूपेण दशप्रकारा ब्राह्मणग्रंथेषु व्यवह्रियन्त इति भाष्ये प्रतिपादयति। यथा-

**हेतुर्निवचनं निंदा प्रशंसा संशयो विधि:।**

**परक्रिया पुराकल्पो व्यवधारणकल्पना।।**

**उपमानं दशैवैते विधयो ब्राह्मणस्य तु।**

**एतद्वै सर्ववेदेषु नियतं विधिलक्षणम्।। (शाबरभाष्यम् 2-11-11)**

हेतु: - विशिष्टविधौ कारणवत्तां निर्दिशति हेतु:। यथा-तेन ह्यन्नं क्रियते (श.ब्रा. 2-5-2-23) इति वाक्यं हेतोरुदाहरणम्।

निर्वचनम् - निर्वचनं व्युत्पत्तिमाध्यमेन यागे प्रयोज्यपदार्थानां सार्थकत्वं प्रतिपादयति। यथा - तद्ध्नो दधित्वम् (तैत्तिरीयसंहिता 5-3-3) इति।

निन्दा - अप्रस्तवस्तुन: निन्दां कृत्वा तस्य यागे अनुपादेयतां प्रतिपादयति निन्दा-वाक्यम्। यथा अमेध्या वै माषा: (तै.सं 5-1-8-1) इति।

प्रशंसा - यागानुष्ठानस्य प्रयोजनप्रतिपादनपुरस्सरं तस्य यागस्यानुष्ठाने प्रशंसति प्रशंसावाक्यम्। यथा-वायुर्वै क्षेपिष्ठा देवता (तै.सं 2-1-1-1) इति।

संशय: - संदेह एव संशय:। यथा यजमानस्य यागकरणे अकरणे च संशय:। तथा च वाक्यम्-

तदव्यचिकित्सत्जुहुवानी इमा हौषादूम् (तै.सं 6-5-9-1) इति।

विधि: - यजमानेन सम्मिता औदुम्बरी भवति (तै.सं 6-2-10-3) इति वाक्येन औदुम्बर्य्या: परिणामं प्रतिपादयति।



Scanned with CamScanner

मलब्ध्वा बन्धनमेवोपश्रयते, एवमेव खलु सोम्य, तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतन-
मलब्ध्वा प्राणमेवोपश्रयते, प्राणबन्धनं हि सोम्य, मन इति। इति उपमानस्योदाहरणम्।

## ब्राह्मणग्रंथानां वैशिष्टयम्

ब्राह्मणग्रंथानां भाषा वैदिकलौकिकसंस्कृतयोः मध्यवर्तिनी अनुभूयते। अत्र नियमबद्धता, सुसंहतिः, सरलता एवं प्रवाहमयता वर्तते या मन्त्रसंहितापेक्षया अधिका भवति। अत्र क्लिष्टसन्धीनां समासानांच दर्शनं न विद्यते। क्विचदंशे अपाणिनीयप्रयोगाः सन्ति। ब्राह्मणग्रंथाः पूर्णरूपेण गद्यमयाः भवन्ति। किंतु क्वचित्स्थलेषु पद्यानि अपि उपलभ्यन्ते।

शतपथ-तैत्तिरीयब्राह्मणादिषु भाषा स्वरांकिता वर्तते। अद्यत्वे ताण्डय-शांखायनादिषु [illegible]

Scanned with CamScanner

णाविष्णुना मन्त्रब्राह्मणोपरि भाष्यं रचितमासीत्। संहितोपनिषद्ब्राह्मणोपरि द्विजराजभट्टस्य भाष्यं प्रकाशितमुपलभ्यते। द्विराजभट्टस्य स्वात्मविवरणेन इदं ज्ञायते यद् अस्य पिता श्रीवंशे लब्धजन्मा वैदिकविद्वान् विष्णुभट्ट आसीदिति। अथर्ववेदीयगोपथब्राह्मणोपरि तु न किमपि भाष्यमुपलभ्यते। माध्यन्दिनशतपथब्राह्मणस्य श्रीहरिस्वामिना विरचितं भाष्यं श्रुत्यर्थविवृत्तिः इत्युच्यते। किंतु तत् अद्यत्वे अपूर्णम् उपलभ्यते। आचार्यसायणस्य भाष्यं वेदार्थप्रकाशाभिधं यद्यपि उपलभ्यते। भाष्येषु सायणभाष्यस्य महिमा तु अनितरसाधारणा एव। पाश्चात्यविद्वांसः बहवोऽपि सायणस्य प्रशंसायां प्रवर्तन्ते। शतपथब्राह्मणोपरि विज्ञानभाष्यं कवीन्द्राचार्येण विरचितम्। किंतु तद्यत्वे नोपलभ्यते। माध्यन्दिनशतपथब्राह्मणोपरि श्रीगणेशशास्त्रिवर्येण स्वरप्रकाशाभिधं भाष्यं विरचितं वर्तते। किन्तु इदं भाष्यं नातीवप्रसिद्धम् अवगमनेऽपि क्लिष्टमित्यपि ज्ञायते।

### ऋग्वेदीयब्राह्मणग्रंथपरिचयः

ऐतरेयब्राह्मणम् - ऐतरेयब्राह्मणग्रंथस्य प्रवचनकर्ता ऋषिः महिदास ऐतरेय इति संप्रदायप्रसिद्धिः। अस्य ब्राह्मणस्य भाष्यकारः षड्गुरुशिष्यः महिदासं यज्ञवल्कस्य ब्राह्मणस्य द्वितीयपत्न्याः पुत्र इति कथयति। यथा -

महिदासैतरेयर्षिसन्दृष्टं ब्राह्मणं तु यत्।..............

Scanned with CamScanner

ेदाङ्गेषु लब्धप्रतिष्ठश्चासीत्। तस्य ऋषेः इतरा इति भार्या काचिदासीत् या साध्वीगुणयुता आसीत्। तस्याम् उत्पन्नः पुत्र एव ऐतरेय इति।

**ऐतरेयब्राह्मणस्य स्वरूपम्**

ऐतरेयब्राह्मणे चत्वारिंशद् अध्यायाः सन्ति। प्रत्येकं पंच अध्यायाः मिलित्वा पंचिका इति रूपेण निष्पद्यते व्यवह्रियते च। अतः ऐतरेयब्राह्मणे अष्टौ पंचिका सन्ति। प्रत्येकम् अध्याये अवान्तरविभाजनं खंड इति नाम्ना उच्यते। ब्राह्मणेऽस्मिन् आहत्य 285 खण्डाः सन्ति।

ब्राह्मणग्रंथेऽस्मिन् सोमयागानां हौत्रपक्षः बाहुल्येन प्रतिपादितः। ऋत्विग एव होत्रक इति नाम्ना उच्यन्ते। ते ऋत्विगः सप्तः भवन्ति। यथा 1. होता 2. मैत्रावरुणः, 3. ब्राह्मणाच्छंसी, 4. नेष्टा, 5. पोता, 6. अच्छावाकः एवं 7. आग्नीध्र इति। एतेषाम् ऋत्विजां कार्यं त्रिषु सवनेष्वपि याज्या सम्पादनमेव। आहुतिसमये ये मन्त्राः पठयन्ते तेषां याज्या

Scanned with CamScanner

विभिन्नप्रायश्चित्तानि, शुनः शेपाख्यानम् एव राजसूययागाना प्रारम्भिककृत्यानां निरूपणं वर्तते। अष्टमपंचिकायां राजसूययागस्य, ऐन्द्रमहाभिषेक, पुरोहितमहत्ता, ब्रह्मपरिमरादीनां प्रतिपादनं विद्यते। यद्यपि अंतिमदशाध्यायाः परवर्तिन इति वदन्ति, अथापि पाणिनिमहर्षिणा चत्वारिंशद् अध्यायात्मकम् ऐतरेयब्राह्मणम्, त्रिंशद् अध्यायात्मकंच कौषीतकिब्राह्मणम् इति स्वरूपं निर्दिष्टं (अष्टाध्यायी 5-1-62) इत्यतः न विवादलेशोऽस्माकम्।

ऐतरेयब्राह्मणे ऐतिहासिकानां सांस्कृतिकानांच विवरणं बहुलम् उपलभ्यते। एवमेव नैतिकमूल्याणाम् उदात्ताचारव्यवहारणां विषयेऽपि अनेके विषया उपलभ्यन्ते। यथा -

ऋतं वाव दीक्षा सत्यं दीक्षा तस्माद् दीक्षितेन सत्यमेव वदितव्यम् (ऐ.ब्राह्मणम् 1-1)

विदुषा सत्यमेव वदितव्यम् (5-2-9)

अवत्येनं सत्यमनृतं हिनस्ति। (4-1-1)

कलिःशयानो भवति संजिहानस्तु द्वापरः।

उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चंरश्चवरैवेति।।

चरन्वै मधु विन्दति चरूस्वादुमुदुम्बरम्।

सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चवरैवेति।।

इत्यादयः।

**शांखायनब्राह्मणम्**

शांखायनब्राह्मणमेव कौषीतकीब्राह्मणमित्यपि। कथ्यते। क्विचत् शांखायनं सांख्यायनमित्यति कथ्यते। इदं ब्राह्मणं बाष्कलशाखायाः सम्बद्धं वर्तते। ब्राह्मणोपरि अस्मिन् न किमपि प्राचीनं भाष्यम् उपलभ्यते। संपूर्णमपि ब्राह्मणं त्रिंशद् अध्यायात्मकं भवति। प्रत्येकम् अध्यायः खंडेषु विभक्तः। आहत्य संपूर्णे ब्राह्मणे 227 खण्डाः सन्ति। ताण्डयब्राह्मणे कौषीतकानां व्रात्याभावापन्नत्वं कथ्यते। यथा-

एतेव वै शमनीचामेढ्रा अयजन्त तेषां कुषीतकः सामश्रवसो गृहपतिरासीत्तान् लुशाकपिः खार्गलिरनुव्याहरदवाकीर्षत् कनीयांसौ स्तोमावुपागुरिति तस्मात् कौषीतकानां न कश्चनातीव जिहते यज्ञावकीर्णा हि।



Scanned with CamScanner

ब्राह्मणेऽस्मिन्नपि नैतिकमूल्यानामाचाराणांच विषये बहुलमुपलभ्यते।

### यजुर्वेदीयब्राह्मणग्रंथा:

शुक्लयजुर्वेदीयब्राह्मणम्

शतपथब्राह्मणम्

ब्राह्मणग्रंथेषु समस्तेष्वापीदं वृहत्काय पुस्तकं भवति। माध्यन्दिन-काण्वशाखयोरपि इदं ब्राह्मणमुपलभ्यते। तैतिरिय ब्राह्मणानिव स्वरांकितं भवति, तेनास्य प्राचीनता सुस्पष्टा।

'शतं पन्थानो यत्र शतपथ: तत्रुलयग्रंथ:'

(गुणरानमहोदधि:)

शतं पन्थानो मार्गा नामाध्याया यस्य तच्छतयथम्

माध्यान्तिदशतयथविभाग:

माध्यन्दिनशतपथब्राह्मणे 14 काण्डा: सन्ति: 100 अध्याया:, 438 ब्राह्मणानि ता 7624 काण्डिका: सन्ति

काण्वशतपथे 17 काण्डा:, 104 अध्यय:, 435 ब्राह्मण, 6806 काण्डिका सन्ति।

शतयथब्राह्मणस्य प्रवचनकर्ता वाजसनेय याज्ञवलक्यु: शतयथान्ते वर्तते च 7 आदित्यानीमानि शुक्लानि यजूंपि वाजसनेयेन याज्ञवलक्येनाख्यायन्ते' इति।

तैतिरीयब्राह्मणम्

Scanned with CamScanner

भट्टकुमारिलः सामवेदस्य अष्टौ ब्राह्मणानि सन्तीति लिखति। यथा-

**ब्राह्मणानि हि यान्यष्टौ सरहस्यान्यधीयते।**

**छन्दोगास्तेषु सर्वेषु ना काश्चिचन्नियतः स्वरः।।**

(तन्त्रवार्तिकम् 1-3-12)

सायणाचार्योऽपि ब्राह्मोपनिषद् भाष्योपक्रमाणिकायां सामवेदस्य अष्टौ ब्राह्मणानीत्येव कथयति। यथा-

**अष्टो हि ब्राह्मणग्रंथाः प्रौढं ब्राह्मणमादिमम्।**

**षाड्विशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत्।।**

**आर्षेयं देवताध्यायो भवेदुपनिषत् ततः।**

**संहितोपनिषद् वंशो ग्रंथा अष्टावितीरिताः।।**

एवंरूपेण ताण्डयमहाब्राह्मणोन सह षड्विश-सामाविधानआर्षेय-देवताध्याय-ध्वान्दोग्य-संहितोपनिषदा संज्ञकानां ब्राह्मणानामपि सम्बंधः कौथुमशाखया सह कृतः वर्तते। कौथमराणायनीयशाकयोः क्विचद् उच्चारणभेद एव वर्तते।

शाटयायन ब्राह्मणं तथा भाल्लवि ब्राह्मण मद्यावे नोपलभ्यते शारयायन ब्राह्मणानां वाक्यानामुद्धरणं सायणाचार्यः ऋग्वेदभाष्येषु करोति। ब्रह्मसूत्रशाड्.करभाष्येऽपि अस्योद्धरणानि सन्ति।

भाल्लविब्राह्मणस्य उल्लेखः ताण्डयब्राह्मणे "श्रौतसूत्रेषु" महाभाष्यप्रभृतिष्वपि वर्तते।

सामवेदीय ब्राह्मणग्रंथानां वर्गीकरणं साम्प्रदायिका द्विधा कुर्वन्ति। ब्राह्मणम् अनुब्राह्मणमिति च। ब्राह्मणग्रंथ परंपरागत लक्षणवत् ब्राह्मणमिति कथ्यते। ब्राह्मणसदृशग्रंथः अनुब्राह्मणं कथ्यते। अष्ट सामवेदीय ब्राह्मणेषु ताण्डय-षड्विशयोः ब्राह्मणग्रंथत्वं साक्षात् वर्तते। सामविधान-आर्षेय-देवताध्याय-उपनिषद्-संहितोपनिषद् एव वंशब्राह्मणाना अनुब्राह्मणत्वं भवति।

**ताण्डयब्राह्मणम्**

ताण्डयब्राह्मणम् रचयिता साऽत् क इति न क्विचदुपलभ्यतो किंतु ताण्डिऋषिणा प्रोक्तवात् ताण्डि अथवा ताण्डयब्राह्मणमिति कथ्यते। अयं परंपरया प्राप्तः विषयः। सामविधान ब्राह्मणे सम्प्रदायातार्यप्रवर्तकर तण्डिः-शाटयायनश्च बादरायणशिष्यत्वेन

Scanned with CamScanner

पंचविंशति-अध्यायेषु प्रतिपादित विषयानां संक्षिप्तविवरणमेवम्-

अध्यायसंख्या        विषयवस्तु

उद्गात्रा पठनीय यदुषात्मक मन्त्राणां प्रतिपादनम्

त्रिवत्-पंचदशादिस्तोमानां विष्टुतिप्रातिपादनम्

सत्रयागानां प्रकृतिभूत गवमयनस्य वर्णनम्

ज्योतिष्टोय-उक्थ्य-अतिरात्रसंस्थ यागानां प्रतिपादनम्। विधिवप्रायश्चित्र विधीनां वर्णनंच।

द्वादशाहयागमां वर्णनम्

विभिन्नानाम् एकहायागानां वर्णनम्

अहीन यागानां निरूपणम्।

सत्र यागानां विधानम्

आहत्य ब्राह्मणेऽस्मिन् 72/611 सुत्याकानां 178 सोमयागानांच वर्णनं विद्यते।

ताण्डयब्राह्मणस्य रचनाकालः विक्रमसंवत्सरात् त्रिसहस्त्रपूर्वः इति प्रतीयते।

Scanned with CamScanner

षड्विंश ब्राह्मणेऽस्मिन् सम्प्रति अध्याया: सन्ति। षष्ठाध्याय: 'अद्भुतब्राह्मणम्' इति कथ्यते। तत्काकणन्तु पूर्वाध्यायेभ्य: अस्य भिन्नवस्तु प्रतिपादनमेव। अत्र प्रतिपादितद्भुतविषयेषु प्रायश्चितं, शकुनादि भवन्ति। अंतिमाध्यायोऽयं परवर्तिकाले योजितमित्यपि प्रसिद्धि:। 'इति' इति पदं प्राय: अध्यायपरिसमाप्तौ प्रयुज्यते। तथा च पंचमाध्याय परिसमाप्तौ इदं वाक्यमुपलभ्यते। यथा-

'तस्थानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति' (षड्विंशब्राह्मणम् 5-7-3) एवमेव 'अथ' शब्दस्य प्रयोग: ग्रंथादौ प्राय: क्रियते। षष्ठाध्यायस्य आरंभे च 'अथातोऽद्भुतानां कर्मणां शान्तिं व्याख्यास्याम: (षड्विंशब्राह्मणम् 6/1/1)

इति। यद्यपि अथातो धर्मजिज्ञासा 'अथातो ब्रह्मजिज्ञासा', इत्यत्र नवीनग्रंथेषु आरंभसूचकत्वे 'अथात:' प्रयज्यते, किंतु तथात्र नूतन ग्रंथत्वेन नेष्टता वर्तते। नूतन विषयस्य प्रतिपादने एव अथात: अत्र उक्त: वर्तते। पूर्वं पंचाध्यायेषु इष्टप्राप्ति साधन विषया उक्ता: इत: अनिष्टनिवारण साधनानां प्रतिपादनं कियते इति ग्राह्या: भवति।

षड्विशब्राह्मणे अध्यायानां विषयानां विवरणनवेवम् प्रथमाध्याय: - अत्र सप्तखण्डा: सन्ति। प्रथमखण्डद्वयो: विषय: सुब्रह्मण्य निगद: वर्णनं भवति। तृतीयखण्डे त्रिसवनानां साम्रां तच्छंदसांच वर्णनं विद्यते।

चतुर्थखंडे ज्योतिष्टोमस्य पूर्वकृत्यानां विश्वरूपागानस्य च विधानां वर्तते। पंचमखण्डे वसिष्ठगोत्रोत्पन्नब्राह्मणस्य ब्रह्मपदे स्थापनम्, भूभूर्व: स्व: इति व्याहृतीभ्य: ऋगादित्रयाणां नि:सरणं, व्याहृतीनां वर्णनं, प्रायश्चितकृत्यानांच वर्णनं विद्यते। षष्ठखंडे ज्ञाताज्ञातत्रुटीनां प्रायश्चितं विहितं विद्यते। सप्तखंडे अर्थवादपूर्वक सौम्यचरू निर्वापनस्य विधानां विद्यते।

द्वितीयाऽध्याय: अत्र सप्त खण्डा: सन्ति। आद्यत्रिषु खण्डेषु अग्निष्टोमान्तर्गतस्य बहिष्पवमानस्य रेतस्या: धूरगानांच विधानं वर्तते। चतुर्थखंडे होता- अध्वर्यु:-ब्रह्मा-उद्गाता प्रभृतीनां यागगत प्रकीर्णधर्माणां सामान्य निरूपणं विद्यते। पंचमखण्डात् सप्तमखण्डचपर्यन्तं सवनत्रयेषु अपि चमस भक्षणाये उपहवादिकथनं विद्यते।

तृतीयध्याय: - नवखंडा: अत्र विद्यन्ते। तेषु प्रथमखंडद्वयं होता-अध्वर्युप्रभृतिभि: क्रियमाण यागत्रुजय: यजमानस्य हानिं कुर्वन्ति। अत: पूर्ण ज्ञानं प्राप्य विना अंगवैकलयं यागानुष्ठानाय विदधाति। इदमत्र ज्ञातण्यं यत् यजमानस्य पशुसम्पति: अध्वर्यौ आश्रितं तिष्ठति, यजमानस्य कीर्ति: होतरि आश्रितं तिष्ठति, यजमानस्य योगक्षेमौ ब्रह्माणि आश्रितं तिष्ठति, यजमानस्य आत्मा च उद्गातरि आश्रितं तिष्ठति।

तृतीयखंड: ऋग्विवरण, राज्ञ: योगभूमिचाचनादीनां वर्णनं करोनं करोति। चतुर्थखंड:



Scanned with CamScanner

अवभृतधर्मादीनां प्रतिपादनं करोति। पंचमखण्डाद् नवमखण्डं यावत् अभिचारयागानां वर्णनं विधानंच विद्यते।

चतुर्थाध्याय: षटखण्डा: अत्र सन्ति। प्रथमखण्ड: व्यूढद्वादशाहयागधर्माणा, छन्दसां क्रम-परिवर्तनादिविषयाणां विधानं करोति। द्वितीयखंडे श्येनयागस्य अभिचाररूपस्य तत्संबन्धिस्तोम सामानांच वर्णनं विद्यते। त्रिवृदाग्निष्टोमस्य सन्दंशयागानांच निरुपणं तृतीयचतुर्थखण्डयो: विषय:। वज्रयागन्तत्सम्बधिविषयाणां 513 विषये पंचमखण्डे प्राप्यते। वैश्वदेवाख्य त्रयोदशाहस्य निरुपणं षष्ठखंडे प्राप्यते।

पंचमाध्याय: सप्तखंडा: सन्त्यत्र। प्रथमखंडे आग्निहोत्रनिरुपणं ज्योतिष्टोमेन सह तस्य तुलना च वर्तते। द्वितीयखंडे आग्निहोत्रस्य महत्वं प्रतिपादितं विद्यते। अग्नि-होत्रस्यानुष्ठानेनान्येषाम् इष्टसाधनानामपि इष्टं स्वत: साधितं भवति। तृतीयचतुर्थखण्डयो: औदुम्बरी-यज्ञयूपयो: निरूपणं विद्यते। सन्ध्योपासनाविषयस्य प्रतिपादनं पंचमखण्डे विद्यते। षष्ठखंडे चन्द्रमस: वृद्धिक्षयित्व प्रतिपादनेन सह देवानां सोमदीक्षापानादीनां प्रतिपादनं विद्यते।

षष्ठाध्याय:- अत्र द्वादशखण्डा: सन्ति। अत्राध्याये अद्भुतकर्मणां विधानं विद्यते। एवमेव अनिष्टानाम् उपशकुनानांच शान्तिविधानमपि वर्तते।

प्रथमखंडे 1008 पलाशसमिद्धि: आहुतीनां विधानविषये उक्तं विद्यते। एवमेव इन्द्र-यम-वरुण-धनद-अग्नि-वायु-सोम-विष्णुदेव विषयकं अष्टौ मन्त्रा: सन्ति। शत्रु-विजयाय होमविशेषस्य प्रतिपादनं द्वितीयखण्डे प्राप्यते। तृतीयखंडे इन्द्रविषयकस्य अद्भुतहोमविशेषस्य प्रतिपादनं विद्यते। चतुर्थखंडे यमविषयकाद्भुतक्मणाम् अनुष्ठानं विहितं विद्यते। पंचमखंडे वरुण सम्बन्धि उद्भुतशांतिप्रयोगानां विधानं वर्तते। षष्ठखंडे वैश्रवणदेवनिमितं होमविधानं क्रियते। वैश्रवणदेवनिमित होमकणेन पिशाचदिजन्योद्वेगा प्रभृतीनां शान्ति: भवति। सप्तमखंडे अग्निसम्बद्धानाम् अपशकुनानां निवारणविधि: उक्त: वर्तते। अष्टमखंडे वायुदेवसम्बद्धानाम् उत्पातानां शन्तिकर होमविशेष: विहित:। नवमखण्डे क्षोमाद्भुतातानां शान्ति: विहित:।

दशमखंडे विष्णुजन्याद्भुतानां शांतिकर होमविशेषस्य प्रतिपादनं विद्यते। एकादश-खंडे रुद्राद्भुतानां शांति विधानं विद्यते। अन्तिमे च द्वादशखंडे च सूर्यदैवत्यस्य अद्भुतानां शांतिविधानं विद्यते।

### सामविधानब्राह्मणम्

ताण्डयब्राह्मणम् तथा षड्विंशब्राह्मणं श्रौतयागानां विवेचनं कुर्वन्ति। अन्यान्यब्राह्म-णानि शाखान्तएतानि अपि श्रौतयागानामेव वर्णनं कुर्वन्ति।



Scanned with CamScanner

## सामविधान ब्राह्मणस्य प्रतिपाद्य विषया

सामविधानं ब्राह्मणं त्रिप्र पाठकैः पंचविंशति-अनुवाकैश्च विभक्तः वर्तते। तेषां विवरणं यथा-

प्रथमपाठकः- अस्य प्रपाठकस्य प्रथमानुवाके प्रजापत्युत्पत्तिः, भौतिकजगत् सृष्टिः, सामप्रंशसानां वर्णनं विद्यते। द्वितीयानुवाके कृच्छ्र तथा अति कृच्छ्रव्रतानां स्वरुपं फलंच वर्णितं विद्यते। तृतीयानुवाके स्वाध्यायः, अग्न्याधाननियमाः, दर्शपूर्णमासादीनां प्रयोगाः प्रतिपादिताः सन्ति। चतुर्थानुवाके श्रौतयागानां प्रतिपादनेन सह रूद्रादिदेवप्रीतिकर सा-मगानानम् उल्लेखः विद्यते। उंचयानुवाकतः अष्टमानुवाकं यावत् अवाच्यवाच्य-चैर्यादीनां प्रायाश्चितं वर्णितं विद्यते।

द्वितीयप्रपाठकः तृतीय प्रपाठकश्रच काम्यरोगादिजन्यभयशमनादि प्रयोगान् निरूपयति। चतुर्थप्रपाठकात् अष्टमान्त् अभीष्टसिद्ध्यादिविषये निरुपयति। नवमप्रपाठके सामसम्प्रदाय-प्रवर्तकाचार्यणाम् अनुक्रमः, अध्ययनाधिकारिणः, प्रभृतिविषयाणां निरुपणं करोति। अस्य ब्राह्मणस्योपरि सायणाचार्यस्य भरतस्वामिनश्रच भाष्ये वर्तते।

## आर्षेय ब्राह्मणम्

आर्षेयब्राह्मणं सामवेदीय-ऋषीणां विषये प्रतिपादयति। यथा ब्राह्मारम्भे एवोक्तं वर्तते-

**'अथ खलवयमार्षप्रदेशो भवति' (आर्षेयब्राह्मणम् 1-1-1) इति**

अत्र ब्राह्मणे सामगानानामुल्लेखः प्रसिद्ध नामान्तरैः सह प्रदत्तः वर्तते। प्रायः सायगानानि तानि तेषां ऋषीणां नाम्रा प्रसिद्धिङ्.गतानि यैः तत्तत्सामगानानां योजना कृता। एवम् अर्थकरणे कृते सत्येव आर्षेय ब्राह्मणम् इति नाम सार्थकं भवति। यतो हि अत्र ब्राह्मणे सामगान-ऋषीणां तथा तेषां ऋषिगायकानां विषये साक्षात्प्रतिपादनं सूची वा नोपलभ्यते।

सामगानानां चत्वारः प्रकाराः सन्ति। तेषु आर्षेयब्राह्मणम् ग्रामगेयसामगानेग्र अरण्यग-

Scanned with CamScanner

3. क्विचत् गानविशेषस्य अन्त्यभागस्याधारेणापि नामकरणं भवति। यथा-'प्रजापतेः सुतं रयिष्ठीये'(2.4.7) दाव सुनिधन इत्यादि गानानि।

4. प्रयोजनमूलकत्वेन गानानां नामकरणम्। यथा-संवर्ग, रक्षोध्नगानानि।

5. आर्षेयब्राह्मणस्य रचना सूत्रशैलयां वर्तते। ऋषीणां नामधेयगोत्रोप धारणम्। स्वर्ग्यं यशस्यं पुण्यं पशण्यं ब्रह्मवर्चस्यं स्मात्र्तमायुष्यम् (1-1-(1-2)) इत्यनेन ज्ञायते सामगान-ऋषि-तद्गोत्राणां ज्ञानेंन स्वर्ग-यशादीनां प्राप्तिः भवति। आर्षेयब्राह्मणस्यायं नियमः यत् प्रातराशनात्पूर्वं गेयमिति। यथोक्तम्-

"प्राक् प्रातराशिकमित्याचक्षते" (1-1-4)

## देवताध्यायब्राह्मणम्

इदं ब्राह्मणम् चतुर्षु खंडेषु विभक्तं वर्तते। आकरो ति लघुकायग्रंथोऽयं भवति। सामदेवानां निरुपणमत्र वर्तते। तत्र प्रत्येकं खण्डानां विवरणं यथा-

प्रथमखण्डः - देवनाम्नां विभिन्न सामगानां संदर्भे संकलनं विद्यते।

द्वितीयखण्डः - छन्दसां वर्णाः एवं देवतानां निरुपणं विद्यते।

तृतीयखण्डः - सामगनाश्रित छन्दसां नाम्नां निरुक्तिः विद्यते।

चतुर्थखण्डः - गायत्रसामाधारभूतायाः सावित्र्याः

विभिन्नाङ्ग-देवतानांच वर्णनं विद्यते।

सायणाचार्यस्तु देवताध्यायब्राह्मणं संग्ह्यैवं वदति। यथा-

**'साम्नां निधनभेदेन देवताधयनादयम्।**

**ग्रंथोऽपि नामतोऽन्वर्थाद् देवताध्याय उत्यते।।**

Scanned with CamScanner

गृह्यकृत्यानां कृते विनियुक्तानां मन्त्राणां सङ्कलनं प्रथमद्वितीयखण्डयोः वर्तते। प्रथमद्वितीयखण्डयोः मन्त्रब्राह्मणम् एवं मन्त्रपर्व इत्यपि व्यवहारः विद्यते। तृतीयखण्डतः दशखण्डं यावत् छान्दोग्योपनिषद् विद्यते। इदं ब्राह्मणं मन्त्रम् उपनिषदंच मिलित्वा 'उपनिषद्ब्राह्मणम्' इति प्रशस्यते।

### संहितोपनिषद्-ब्राह्मणम्

इदं ब्राह्मणम् संहितायाः रहस्यं प्रकाशयति। अत्र संहिताशब्दः सायणाचार्येण व्याख्यातः। यथा-

'सामवेदस्य गीतिषु सामाख्या' इति न्यायेन केवलगानात्मकत्वात् पदाभावेन प्रसिद्धा संहिता यद्यपि न भवति तथापि तस्मिन् साम्नो सप्तस्वरा भवन्ति। क्रुष्ट प्रथमद्वितीय तृतीय चतुर्थमन्द्रातिस्वार्या इति। तथा मन्द्रमध्यमताराणीति त्रीणि वाचः स्थानानि भवन्ति। एतेषां यः सन्निकर्षः सा संहिता। (संहितोपनिषद्-ब्राह्मणभाष्यभूमिका) इति।

संहितोपनिषद्-ब्राह्मणे संहितानां वर्गीकरणं -'देवहू', 'वाकशबहू' एवं 'अमित्रहू' इति प्रकारणे त्रिधा कृतं वर्तते।

### वंशब्राह्मणम्

वंशब्राह्मणम् सामसम्प्रदायप्रवर्तक-ऋषीणांम्, आचार्याणां वंशपरंपरा प्रकाशयति। ब्राह्मणारम्भे ब्रह्मणः, ब्राह्मणानां आचार्याणां, ऋषीणां वायुमृत्युविष्णुदेवानां, वैश्रवणश्च वंदना कृत वर्तते। एते सर्वेऽपि गुरुपरंपराया प्रतिपादनं विद्यते।

### जैमिनीशाखीय ब्राह्मणम्

जैमिनीय ब्राह्मणम्, जैमिनीयार्षेय-ब्राह्मणम्, जैमिनीयोपनिषद् ब्राह्मणमिति ब्राह्मणत्रयंमद्यत्वे प्राप्तं वर्तते।

### जैमिनीयब्राह्मणम्

इदं ब्राह्मणम् त्रिधा विभक्तं वर्तते। प्रथमभागे 360 खंडाः सन्ति। द्वितीयभागे 437 खण्डाः सन्ति। तृतीयभागे च 385 खण्डाः सन्ति। आहत्य 1182 खण्डाः सन्ति।

उज्जहारागमाम्भोधेर्यो धर्मामृतमंजसा।

न्यायैर्निर्मथ्य भगवान् स प्रसीदतु जैमिनः।।

सामाखिलं सकलवेदगुरार्मुनीन्द्राद् व्यासादवाप्य भुवि येन सहस्त्रशाखम्।

Scanned with CamScanner

### जैमिनीयार्षेय ब्राह्मणम्

अत्र स्वाध्याय:, ऋषि: छन्द:, देवतानांच विषये प्रतिपात्रदनं विद्यते। कौथुमशाखीय आर्षेयब्राह्मणमिव समानमिदं ब्राह्मणम् भवति। अत्रापि 'अथ खलवयमार्षप्रदेश: भवति इति वाक्यं विद्यते। अध्याय-खण्डादीनां विभाजनमपि समानमेव कौथुमशाखीयार्षेय ब्राह्मणस्य दैमिनीयार्षेयब्राह्मणस्य च।'

### जैमिनीयोपनिषद्-ब्राह्मणम्

चतुर्भि: अध्यायैं विभक्तमिदं ब्राह्मणम्। अध्यायानां अवान्तरविभाजनं अनुवाकै: खंडैंच कृतं वर्तते। ब्राह्मणारम्भे ओंकार-हिंकारयो: महत्वं प्रतिपादितं वर्तते। एवं गायत्र्या वर्णने प्रवर्तते। अन्ते च 'सैषा शद् यायनी गायत्रस्योपनिषद् एवमुपासितव्या' इति वर्तते। अत्र ब्राह्मणग्रंथापेक्षया उपनिषदांम् आरण्यकानां विषये अधिकं प्राप्यते।

### गोपथब्राह्मणम्

अथर्ववेदस्य एकमात्रमुपलब्धं ब्राह्मणं गोपथब्राह्मणं भवति। पूर्वं गोपथब्राह्मणं शौनकीशाखान्तर्गतमिति प्रचारे आसीत्, किंतु पातंजलमहाभाष्यानुरेण इदं पिप्लादशा-खार्न्ततमिति स्पष्टं ज्ञातु शक्नुम:। तत्र भाष्ये 'शं नो देवीरभिष्टय आयो भवन्तु' इत्यादि मन्त्राणाम् अथर्ववेदस्य प्रथममन्त्रत्वेनोक्त: यत् पैप्पलादशाखामेव साक्षादभिप्रैति इति निश्चयेन वक्तं शक्र्म:।

ऋग्वदानुक्रमाणकायामाप वड्.कटमाधस्याक्तराप अत्र प्रमाणम्। यथा-

'ऐतरेयमस्माकं पैप्लादमथर्वणाम्।।

तृतीयं तित्तिरिप्रोक्तं जानन् वृद्ध इहोच्यते।।'

(8.1.13)

ऋषिगोपथप्रवक्तृत्वादिदं गोपथब्राह्मणमुच्यते। गोपथशब्दस्य च निष्पति: गोप्ता शब्दादभिप्रेत:। यथा 'अथर्वाडिंगरसो हि गोप्तार:' (गो.ब्रा.1/1/13)

इति। गुप् धोतो: 'अथ' योगे सति गोपथशब्दस्य व्युत्पत्ति: भवति।

गोपथब्राह्मणस्य प्रकाशनविवरणम्-

गोपथब्राह्मणंस्य प्राचीनं भाष्यमिति किमपि अद्यत्वे नोपलभ्यते। किंतु गोपथब्राह्मण-स्य प्रकाशनं जातं विद्यते। तेषां विवरणं यथा-

1. राजेन्द्रलाल मित्र तथा हरचन्द्र विद्याभूषणद्वारा संपादितं प्रकाशनमुपलभ्यते यत् द्विसप्ततिरुत्तराष्टादशशततमे ख्रीष्टाब्दे (1872) एशियाटिकसोसायटी कोलकातानगरे प्रकाशितम्।



Scanned with CamScanner

2. तदेव पुन: एकनवत्युत्तरे अष्टादशशततमे खरूीष्टाब्दे (1891) पं-जीवानन्दविद्यासागरमहोदयै: कोलकातात: प्रकाशितम्।

3. एकोनविंशत्युत्तरैकोनविंशतितमे (1919) ख्रीष्टाब्दे डयूक ग्रास्ट्रा (अगल्व उ्ँाीा) द्वारा सुसम्पादितं संस्करणं, लाइडेनत: प्रकाशितम्।

4. पं॰क्षेमकरणदासत्रिवेदिमहोदयै: हिंदी अनुवादसहितं प्रकाशनं चतुर्विंशत्युत्तरैकोनविंशतिशततमे (1924) खरूीष्टाब्दे प्रकाशितम्। इदमेव प्रकाशनं प्राज्ञदेविद्वारा 1977 संवत्सरे पुन: प्रकाशितं वर्तते।

5. 1980 वत्सरे रामलाल कपूर ट्रस्ट, सोनीपतक्षेत्रम् (हरियाणाप्रदेश:) द्वारा डा. विजयलाल विद्यावारिधिमहोदयानां सम्पादने प्रकाशितं वर्तते।

**गोपथब्राह्मणस्य प्रतिपाद्य :-**

गोपथब्राह्मणस्य प्रतिपादनं द्विधा क्रियते पूर्वभाग: उत्तभागश्चेति। यथा- एवं प्रकारेण पूर्वभागस्य पंचप्रपाठकेषु 135 कण्डिका: सन्ति। उत्तरभागस्य षट्प्रपाठकेषु 123 कण्डिका: सन्ति। अत: गोपथब्राह्मणे 258 कण्डिका: सन्ति। संपूर्णे ब्राह्मणे च एकादशप्रपाठका: सन्ति।

गोपथब्राह्मणस्य पूर्वभागस्य प्रतिपाद्यविषया:॰

प्रथमे प्रपाठके ब्रह्मण: तपस: प्रतिपादनम्, ईश्वरस्य सृष्टिविषयिणीच्छा, वेदस्य महत्त्वम्, महाव्याहृतिसहितपंचसर्पवेदादिनिरूपणम्, वैकल्ययज्ञे अनिष्टप्राप्ति:, तत्र दोषनिवारणे सति इष्टफलप्राप्ति:, ब्रह्मचर्यम्, जगत्सृष्टे: प्रतिपादनम्, पृथ्वी-वायु-सूर्य-जलादीनां सृष्टि:, गायत्रीमंत्रस्थपादानां व्याख्या, द्वादशमहातत्वविषयकप्रतिपादनम्, आचमनविधि: इत्यादय: विषया: प्रतिपादिता: सन्ति।

द्वितीये प्रपाठके ब्रह्मचारिमहत्वम्, कत्र्तव्यस्य निरूपणम्, प्रायश्चितविधानम्, ऋत्विजां वर्णनम्, यज्ञविषय: वैश्रवानर-जातवेद-अश्व-सान्तपनादि अग्नीनां प्रतिपादनम्, ब्रह्मप्राप्ति:, ईश्वरस्य महत्वम्, देवरक्षा, अग्न्याधानम्, भौतिकयज्ञस्य संरचना इत्यादय: विषया: सन्ति।

तृतीये प्रपाठके यज्ञे वेदविदुषामेव ऋत्विजत्वम्, अन्यथा पतनम्, यज्ञ-सम्पादने त्रुटि:, प्रायश्चितनिरूपणम्, उद्दालकस्य यज्ञसंबंधिविवेचनम्, अमावास्यपूर्णमास्यो: यज्ञविधानादि, अग्निहोत्रसंबंधिप्रश्नानां, उद्दालकस्योत्तराणि, क्रियात्मकयज्ञ-मानसिकयज्ञयोश्च अनुष्ठानयोग्यता, स्वाहाशब्दाभिप्राय:, दीक्षितपुरुषस्य कत्र्तव्याकत्र्तव्यविचार: पुत्रेष्टियज्ञस्य विधानम् इत्यादिविषया: सन्ति।



Scanned with CamScanner

चतुर्थे प्रपाठके प्रमुखऋत्विजां सहऋत्विजाञ्च दीक्षाविषयकवर्णनम्, गृहपते: दीक्षा-वर्णनम्, अग्निष्टोम:, अष्टादशप्रकारदेवयज्ञानां फलकथनम्, संवत्सरविषयकजिज्ञासानां प्रतिपादनम्, यज्ञीयविषयाणां विवेचनम् इत्यादिविषया: प्रतिपादिता: सन्ति।

पञ्चमप्रपाठके संवत्सरयज्ञस्य विधानस्य प्रतिपादनम्, राजसूय-वाज-पेय-अश्वमेध-पुरुषमेधादिपञ्चदशप्रकारयज्ञानां प्रतिपादनम्, सहस्त्रसंवत्सरयज्ञस्य निरूपणम्, विश्वजित् यज्ञस्य कथानकवर्णनम्, ऋत्विजां योग्यतानिरूपणम्, प्रजा-पति-नारायणकथानकम्, प्रात: माध्यन्दिन सायंकालसवनानां स्तुतिश्चेत्यादिविषया: प्रतिपादिता: सन्ति।

**गोपथब्राह्मणस्योत्तरभागस्य प्रतिपाद्यविषया:**

प्रथमे प्रपाठके ब्रह्मण: आसनप्रतिपादनम्, प्रणीतापात्रं परिधयश्च, प्राशित्रविधानम्, हुतादाहुतादयो: वर्णनम्, अमावास्यापूर्णमास्यो: प्रतिपादनम्, सोमयागकर्त्तव्यता, चरुविषयकं कथानकम्, चातुर्मास्यानां वर्णनम्, हविर्विधानमाचारविधानमित्यादिविषया: प्रतिपादिता: सन्ति।

द्वितीये प्रपाठके यज्ञ-धर्म-प्रवर्ग्य-देवासुसंग्रामे देवानां विजयप्राप्तिवर्णनम्, सोम-पानम्, सोमयज्ञ:, हविर्निरूपणम्, यज्ञे दोषाणां विनिवारणम्, देवपत्नीनां वर्णनम्, आहुतीनां वर्णनम्, यज्ञसिद्धिविषयप्रतिपादनम्, सत्यवक्तृजनेषु श्रद्धाकथनम्, दर्शपूर्णमासयज्ञस्या-रम्भे द्वित्रिदिवसेषु स्वीकरणं विदुषां निमंत्रणञ्चेत्यादिविषयाणां प्रतिपादनम्।

तृतीये प्रपाठके वषट्कार-अनुवषट्कारयोश्च निरूपणम्, षट् ऋतूनां वर्णनम्, षडाकाशादीनां वर्णनम्, वषट्कारानुवषट्कारयो: कर्त्तव्याकर्त्तव्यताविचार:, विविध-ेसवनेषु मन्त्रणां प्रयोग: मैत्रवरुण-ब्राह्मणाच्छंसी-आच्छावकादिभिस्तुति:, इन्द्रस्य महिमा, दक्षिणा दक्षिणापात्रस्य च निरूपणम्, छन्दैस्सह प्रणवशब्दानां संबद्धा: विविविषयाणां प्रतिपादनमित्यादय: विषया: सन्ति।

चतुर्थे प्रपाठके एकहयज्ञावसरे मैत्रवरुण, ब्राह्मणांच्छसी, अच्छावाकादिऋत्विजां मन्त्रप्रयोगविधानम्, पात्रीव्रतस्तोत्रस्य पाठ:, अवभृथस्त्रानम्, औषधिस्थापनम्, षोडशी-शब्दस्य व्याख्या, पञ्चदेवतानां स्तुतीनाश्च वर्णनं विद्यते।

पञ्चमे प्रपाठके अतिरात्रविषयकं विवेचनम्, सौत्रमणिइष्टि-वाजपेय-आप्तोर्याम-अ-हीनयज्ञानां निर्वचनम्, परिधानीयानाम् ऋचामनुवर्णनञ्च विषयाणां प्रतिपादिनमस्ति।

षष्ठे प्रपाठके विभिन्नानां सूक्तानां वर्णनम्, मन्त्रणां वर्णनम्, अहीने यज्ञे सम्पात-आ-वाप-प्रगाथानां वर्णनम्, वालखिल्य-नाराशंस-प्रगाथ-बृहती-सतो वृहती-वृषाकर्-

Scanned with CamScanner

गोपथब्राह्मणस्य निर्वचनशैली विशिष्टा वर्तते। गोपथनिर्वचनविज्ञाननाम्निग्रन्थे निर्वचनं षट्प्रकारेण विभक्तं वर्तते।। यथा-

स्फुटनिर्वचनम् उत प्रत्यक्षवृत्तिरनिर्वचनम्-

यस्मिन् निर्वचने व्याकरणप्रक्रिया संदिग्धा न भवति तत् स्फुटनिर्वचनम् इत्युच्यते। यथा गोपथब्राह्मणे (1-2) जायाशब्दः प्राप्यते। तत्र जाया-तद् यदब्रवीदादिभिर्वा अहमिदं सर्वं जनिष्यामि यदिदं किं चेति तस्माज्जाया अभवन्, तज्जायानां जायात्वं यच्चासु पुरुषो जायते। अत्र गोपथकारेण जनिष्यामिक्रियापदेन जाया शब्दस्य निरुक्तिः कृता वर्तते। वैयाकरणा अपि 'जनि' धातुद्वारा यक् प्रत्ययं कृत्या जाया शब्दस्य निष्पत्तिं साधयन्ति। अतः एतद् स्फुटनिर्वचनं प्रत्यक्षवृत्तिनिर्वचनं वा विद्यते। एवम् आपः इत्यादिशब्दाः अपि भवन्ति।

**अस्फुटनिर्वचनम्-**

यस्मिन् शब्दे प्रकृतिप्रत्ययकल्पनासम्पादने काठिन्यमस्ति तस्य निर्वचनस्य नामास्फुटनिर्वचनं वर्तते। यास्केनास्य परिभाषा परोक्षवृत्तिः। अतिपरोक्षवृत्तिरिति वा निर्वचनं कृतमस्ति। यथा-गोपथब्राह्मणे (2-21) रथो विद्यते। रथः-सोऽशाम्यत्तस्माश्वः पशूनां जिघत्सुतमो भवति वैश्रवानरो रसमपीडयत् स रसोऽभवत्, रसो ह वा एष तं वा एतं रसं

Scanned with CamScanner

सूक्तेन देवाश्च ऋषयश्च स्वर्गलोकमायन्। तथैवेतद् यजमाना एतेनैव सूक्तेन स्वर्गलोकं यान्ति। अत्र स्वर्गप्राप्ते: साधनत्वात् सूक्तविशेषस्य "स्वग्र्य:" इत्युच्यते।

**समस्तशैल्या: निर्वचनम्-**

येषु शब्देषु समासस्य निर्देशो भवति तत् सामासिकं निर्वचनमुच्यते। यथा-अ-ज्योतिष्क इत्यत्र-तद् यदादिव्यं पुरस्तात् पर्यन्तं न पश्यन्ति, तस्मादज्योतिष्क उत्तरो भवति। अयं शब्द: नञ् समासस्योदाहरणमस्ति। वैयाकरणा: व्यक्तं कुर्वन्ति-अविद्यमाना ज्योतिर्यत्र स: अज्योतिष्क:।

पर्यायनिर्वचनम् अर्थनिर्वचनम् वा-

यस्मिन् निर्वचने अर्थस्य प्राधान्यं दृश्यते तत् पर्यायनिर्वचनम् उत अर्थनिर्वचनम् उच्यते। यथा गोपथब्राह्मणे (1-26) ओम्-धातु-रित्याप्रधातुरवतिमप्येके............... सर्वमाप्नोतीत्यर्थ:। अत्र अव धातुद्वारा ओम् पदं व्युत्पादितं भवति।

**गोपथब्राह्मणस्य देवशास्त्रीयं निर्वचनम्-**

गोपथब्राह्मणे देवशास्त्रीयं निर्वचनं वर्तते इति अस्य ब्राह्मणस्य वैशिष्टयं वर्धते। यथा-वरुण: इति पदम्-अत्र वरुणशब्द: वरणशब्देन निष्पन्नो भवतीति गोपथकारस्य मतमस्ति। वरुणशब्द: परमेश्वरस्य वाचको शब्द: विद्यते। गोपथब्राह्मणे (1-7) विलिख्यते तं वा एतं वरणं सन्तं वरुण इत्याचक्षते। तत्र लिख्यते ता या अम: रेत: समुदंर वृत्वाऽतिष्ठन्....................ता भीता अब्रुवन् भगवन्तमेव वयं राजानं वृणीमह इति। यच्च वृत्वाऽतिष्ठन् तद् वरणोऽभवत्, तं वा एतं वरणं सन्तं वरुण इत्याचक्षते। वृञ् वरुणे धातुत: निष्पन्नोऽयं वरणशब्द:। वरुणशब्दस्य मूले वरण एव अस्तीति अभिप्राय:।

वाक् इति पदम् - गोपथब्राह्मणस्य पूर्वभागे (2-18) वाग्भ्युवाच इति लिखितमस्ति। अत्र उवाच पदेन वच परिभाषणे धातो: स्पष्टनिर्देशोऽस्ति। इतोपि स्पष्टरूपेण वक्तुं शक्यते-वक्ति, शब्दानुच्चारयति यया सा वाक्। अत्र शाब्दिका: क्विप्प्रत्यस्य कल्पनां कृत्वा वाक् पदस्य निष्पत्तिं कुर्वन्ति।

वात: इति पदम् - गोपथब्राह्मणस्य पूर्वभागे (3-13) न कुतश्चन वातो वायात् इति लिखितमस्ति। तत्र "वात आवातु भेषजम्" इति निर्दिष्टमस्ति। न कुतश्चन वातो वायात् इत्यत्र गतिगंधनयो: धातो: निर्देशोऽस्ति। अत्र वाति प्रवहति इति वातो वायु: इति व्याकरणेऽस्ति। गोपथे (2-4) वातो वहति इति निर्दिष्टं भवति। अत्र "वह्" धातो: प्रयोग: वा धातो: अर्थेऽस्ति।

विश्वदेवा: - गोपथब्राह्मणे (4-10) अथ यद् दशरात्रमुपयान्ति विश्वानेव तद्देवान् देवतां यजन्ते विश्वेदेवा: देवता: भवन्ति।



Scanned with CamScanner

**गोपथब्राह्मणस्य याज्ञिकं निर्वचनम्-**

यज्ञानां प्रतिपादनमस्ति समस्तब्राह्मणग्रंथानां मुख्यविषय:। गोपथब्राह्मणे याज्ञिका: शब्दा: यथा अग्निहोत्रम्, आज्यज्योतिष्कम्, अतिरिक्तोक्थवान्, अन्नाहार्य:, उपाङ्.गर्भ:, आप्तोर्याम:, अभिप्लव:, अयातयाम्य:, आग्रेय:, आंगिरस:, आथर्वण:, अध्वर्यव:, आयुष्मान्, आहुति:, ऋद्धि ऋतुयाज:, उद्गाता, उदयनीया:, इष्टि:, इष्टी, मख:, यजनम्, ब्राह्मण:, याज्या, वषट्, वषट्कारादयस्सन्ति। एतेषां निर्वचनं तत्र विशिष्टरूपेण प्राप्यते। यथा-

अग्निहोत्रम्-गोपथब्राह्मणस्य पूर्वभागस्य अयं (2-22) शब्द: आहवनीयस्य गार्हपत्यस्य दक्षिणाग्नेर्योऽग्निहोत्रं जुहोति। अग्निहोत्रं करोति प्रयोगं न कृत्वा अग्निहोत्रं जुहोतीति पदस्य प्रयोगं करोति। अनेन प्रकारेण "हु" धातो: प्रयोग: सूचयति "होत्र" शब्दस्य मूले हुदानादानयो: धातुरस्ति। वैयाकरणा अपि "हु" धातुद्वारा एव होत्रशब्दस्य व्युत्पत्तिं कुर्वन्ति। हूयते इति होत्रं होम: इति द्रष्टुं शक्यते। अत: अग्नि: परमेश्वरो हूयते स्तूयते यत्र यस्मिन् वा कृत्ये तदग्निहोत्रम्। अथवा हविरग्नौ हूयते इति अग्निहोत्रम्।

पूर्वभागे (3-10) आगच्छति-यदन्नाहार्यमन्नाहरति तानेव तेन प्रीणाति। यदा स अन्नाहार्यं करोति तदा तेन अन्नाहारेण देवान् प्रसीदति। अत्र अनु आघ्च पूर्वकं "हृञ्" हरणे धातो: प्रयोग: अन्नाहरतीति पदे विद्यते। गोपथकारस्य निरुक्ते अभिप्राय: अन्नाहरतीति अन्नाहार्यं नाम श्राद्धम् इत्यस्ति।

आप्तोर्याम: - आप्तोर्यामस्य विषये गोपथैकं व्याख्यानमागच्छति। प्रजापति: प्रजा: निर्मिता:। प्रजा: पराघ्मुखी भूत्वा दूरं गतवत्य:। तदा वारवन्तीयस्तोत्रै: ता: रोध: कृतवन्त। नियमानामनुवचनं कुर्यात्। गोपथब्राह्मणस्योत्तरेभागे (5-9) तस्माद् वारवन्तीयं ता यदाप्त्वाऽयच्छत्, अतो वा आप्तोर्यामा:। अत्र आप्तोर्यामस्य निरुक्ति: आप्त्वाऽयच्छत् इत्यनेन वाक्येन कृतमस्ति।

स्तोता कारणादपि स्तुतय: प्रसिद्धा: भवन्ति।

यथा गोपथब्राह्मणस्योत्तरेभागे (3-15) तौ ह्यस्यैतद् यज्ञस्याङ्.गमनु समाहरतामच्छावाकीयाम्। तस्मादच्छावाक: प्रात: सवन ऐन्द्रग्नानि शंसति। अत्र प्रतिपाद्यते अच्छावाक् ऋत्विक् भवति। स ऋत्विक् प्रात:सवनकाले इन्द्रस्य अग्नेश्च स्तोत्राणि पठति।

Scanned with CamScanner

कारी गृहस्थाश्रमनिष्ठः भवति। वानप्रस्थाश्रमप्रविष्टानान्तु आरण्यकग्रंथाः एव विशेषतः उपादेयाः भवन्ति।

आरण्यकनाम्नैव इद ज्ञातुं शक्यते यत् आरण्यकग्रंथानां सम्बन्धः अरण्येन अर्थात् वनेन सह विद्यते। आरण्यकग्रंथेषु भाषा वैदिकलौकिक भाषयोः मध्यवर्तिनी भवति।

सायणाचार्यस्तु-

'अरण्याध्ययनदेतदारण्यकमितीर्यते।

अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते।।'

(तैत्तिरीयारण्यकबाष्यभूमिका श्लोकः-6) इति प्रतिपादयति।

तत्रैव ब्रह्मचारिव्रतमनुमतिष्ठतामेव आरण्यकग्रंथानामध्ययने अधिकारः उक्तः। यथा-

'एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति' (श्लोकः-8)इति।

अरण्ये भवमिति आरण्यकम्। आरण्यकशब्दः अरण्यशब्दस्य भावार्थके 'वुञ्' प्रत्यये सति निष्पद्यते। अरण्ये एव अर्ध्यतव्यमिति न नियमबद्ध वर्तते। यतो हि तैत्तिरीयारण्यके शुद्धान्तः करणेन अरण्यान्तरप्रदेशेष्वपि पारायणाय उक्तं वर्तते। यथा-

ग्रामे मनसा स्वाध्यायमधीयीत दिवा नक्तं उतारण्येऽबल उत वाचोत तिष्ठन्नुत

प्राणविद्ययाया: विषये कतिपथ वाक्यानि यथा-

'सोऽयमाकाश: प्राणेन बृहत्या विषटब्धं तद्यथायमाकाश: प्राणेन बृहत्या विष्टब्धानी-त्येवं विद्यात्' (ऐतरेयाख्यकम् 2/1/6)

'यावद्ध्यास्मिन् शरीरे प्राणोवसति तावदायु:'

(कौषीतक्युपनिषद्)

प्राणेन सृष्टावन्तरिक्षं च वायुश्चा अन्तरिक्षं वा अनुचरन्ति अंतरिक्षमनुश्रृण्वन्ति। वायुरस्मै पुण्यं गंधमावहति। एवमेतौ प्राणंपतरं परिचरतोऽन्तरिक्षं च वायुश्च। (ऐतरेय आरण्यकम् 2/1/7)

'ता वा एता: सर्वा ऋच: सर्वे वेदा: सर्वे घोषा: एकैव व्याहृति: प्राण एव प्राण ऋच इत्येवं विद्यात्' (ऐतरेयारण्यकम् 2/2/2)

**आरण्यकग्रंथानां प्रवचनकर्ता**

आधिकांश आरण्यकग्रंथाना: ब्राह्मणग्रंथानाम् अंतिमभाग एव भवति। प्राय: ब्राह्मणग्रंथानां प्रवचनकर्ता एव आरण्यकग्रंथानामपि प्रवचनकर्ता भवति।

यथा ऐतरेयब्राह्मणस्य प्रवचनकर्ता महिदास एव एतरेयारण्यकभागस्यापि प्रवचन-कर्ता। आश्वालयन:, पंचमारण्यकस्य च शौनक: मन्यते। सायणाचार्योऽत्र वदति। ऐतरेयारण्यकस्य चतुर्थस्य प्रवचनकर्ता आश्वलायन:, पंचमारण्यकस्य च शौनक: मन्यते। सायणाचार्योऽत्र वदति ऐतरेयारण्यकभाष्ये 'अत एव पंचमे शौनकेनोदाहृता:। ताश्च पंचमे शौनकेन शाखांतरमाश्रित्य पठिता:।' इति। शांखायनारण्यकस्य द्रष्टा गुणाख्यशाड्.खायन: भवति। शांखायनविषये तत्रैव पंचदशे अध्याये एवं प्राप्यते-'नमो ब्रह्मणे नम आचार्येभ्यो गुणाख्याच्छाड्.खायनादस्माभिरधीतं गुणाख्य: शाड्.खायन: कहोलात् कौशीतके:' इति। बृहदारण्यकस्य प्रवचनकर्ता महर्षियाज्ञवलक्य:। यो हि संपूर्णशतयथब्राह्मणस्यापि प्रवचनकर्ता भवति। सायणाचार्यनुसारेण तैतिरीयारण्यकस्य कृष्णयजुर्वेदीयारण्यकस्य द्रष्टा कठऋषि: भवति। मैत्रायणीयारण्यकमेव मैत्राय-णीयोपनिषदिति ख्यातिं प्राप्तम्। जैमिनीयोपनिषद्-ब्राह्मणमेव तलवकारारण्यकमित्यपि उच्यते। ब्राह्मणग्रंथानां भाषैव आरण्यकग्रंथेष्वपि लभ्यते। वर्तमानकाले तु षट् आरण्य-कग्रंथा एव अपलभ्यन्ते। यथा

ऋग्वेदस्य ऐतरेयारण्यकं शांखायनारण्यंच।

Scanned with CamScanner

शुक्लयजुर्वेदीयम् उपनिषत्वेन सुप्रसिद्धं वर्तते। तैत्तिरीयारण्यके दशप्रपाठकाः सन्ति। चतुर्भिरध्यायैः सामवेदीय तलवकारआरण्यकं विभक्तं विद्यते।

## २.७ उपनिषदां

तत्राऽप्यादौ उपनिषत्शब्दार्थो वर्ण्यते। ततः उपनिषदां वेदगर्भत्वं निरूप्यते। अत उपनिषदां प्रधानप्रतिपाद्यविषयः प्रदर्श्यते। ततः उपनिषदां प्रस्थानत्रय्यां स्थानं निगद्यते। ततः उपनिषदां संख्याविषयः उपस्थाप्यते। ततश्चान्ते ईशावास्योपनिषद् केनोपनिषद् कठोपनिषद् तथा च प्रश्नोपनिषद् इत्येवं क्रमेण चतसृणाम् उपनिषदां परिचयः प्रदीयते।

**उपनिषच्छब्दस्य अर्थः**

उपनिषद्यते प्राप्यते ज्ञायते ब्रह्मविद्या अनया इति उपनिषदिति एकोऽर्थः। उपनिषद् इति शब्दे पदत्रयं वर्तते- उप इति, नि इति, षद् इति। तत्र उप, नि इति उपसर्गद्वयपूर्वात् षद् धातोः उपनिषच्छब्दस्य व्युत्पत्तिः। उप इत्यस्य समीपम् इत्यर्थः। गुरोः समीपम्

Scanned with CamScanner

**उपनिषदां प्रस्थानत्रय्यां स्थानम्**

भारतवर्षे वेदांतदर्शने प्रस्थानत्रय्यां विशिष्टं स्थानं वर्तते। अस्यां प्रस्थानत्रय्यां प्रथमं स्थानम् उपनिषदामेव। उपनिषदः श्रुतिप्रस्थानम् इत्युच्यन्ते। तदन्तरं श्रीमद्भगवद्गीता इति द्वितीयं प्रस्थानं स्मृतिप्रस्थानम् इति व्यपदिष्यते। भगवता बादरायणेन प्रणीतानि ब्रह्मसूत्राणि च तृतीयप्रस्थानं भवति। तत्रस्थानं तर्कप्रस्थानम् इत्युच्यते। तासां च उपनिषदां स्वतः प्रामाण्यं भवति। अतः उपनिषदां महत्वं भारतवर्षे अतीव वर्तते।

**उपनिषदां संख्या**

यद्यपि उपनिषदः शताधिकाः सन्ति। तथापि भारतवर्षे प्रधान्येन दश उपनिषदः प्रसिद्धाः। यथा केनचित् उक्तम्-

"ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरीः।

ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश।।"इति।

अस्मिन् श्लोके दशानाम् उपनिषदाम् उल्लेखः वर्तते। इदमत्राऽवधेयं यदुपनिषदो दश एव सन्ति इति न मन्तव्यम्। अतोऽपि अधिकाः उपनिषदः सन्त्यैव। यथा श्वेताश्वतरोपनिषद्, जाबालोपनिषद्, कोशितकीपनिषद्, इत्यादि बहव्यः उपनिषदः सन्ति। तथापि अद्य वयं याः एताः दशप्रमुखाः उपनिषदः सन्ति तेषं परिचयं अवगच्छामः। अथ एकैकशः ईशादिनामुपनिषदां परिचयः प्रदश्यते।

**ईशावास्योपनिषत्परिचयः**

ईशावास्योपनिषद् शुक्लयजुर्वेदे समाहिताः। शुक्लयजुर्वेदसंहितापाठस्य अंतिमाध्यायः एव एषा ईशोपनिषद्। अस्यां उपनिषदि अष्टदश श्रुतयः सन्ति। अस्या आरम्भः "ईशावास्यमिदं सर्वं यत्किंचजगत्यां जगत्। तेन त्यक्ेतन भंजीथाः मा गृधः कस्यस्विद्धनम्।" (ई.उ.१) इति मन्त्रेण भवति। अत एव अस्याः उपनिषदः नामधेयम् 'ईशावास्योपनिषद्' अथवा 'ईशोपनिषद्' इत्युच्यते।

अस्ति कश्चिज्जगतो नियामकः। तेन नियामकेन ईदं सर्वं जगत् व्याप्तमस्ति इति अस्याः उपनिषदः प्रधानोपदेशः। ईशावास्यम् इदं सर्वमित्यस्य इदं सर्वं यत्किमपि प्रपंचे दृश्यते तत्सर्वं ईशा नियामकेन वास्यम् व्याप्तम् इत्यर्थः। तथा च अन्यत्र श्रूयते "सर्वस्यो वशी सर्वस्येशानः सर्वास्याधिपतिः" (श्वे.उ.) इति। एवमेव "एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसो विधृतौ तिष्ठतः" (बृ.उ) इत्यादि। एवम् ईशावास्यभावनया यदि जनाः कर्म कुर्वन्ति तदा तेषां कर्मणां बनधनं न भवति इत्यपि तत्रोपदिष्टम्। यथा 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नाऽन्यथेतोऽस्ति न कर्म लिप्यते नरे।" (ई.उ.२) इति।



Scanned with CamScanner

यः जनः ईशावस्यम् इदं सर्वं इति मन्त्रोक्तं यथावद् जानाति तस्य फलान्यप्यत्र प्रदर्शितानि। यथा "यस्तु सर्वाणि भूतान्यात्मन्येवाऽनुपश्यते। सर्वभूतेषु चाऽऽत्मानं ततो न विजुगुप्सते।" (ई.उ.५) इति।

अपरमप्याह "यस्मिन् सर्वाणि भूतानि आत्मन्येवाऽभूद् विजानतः तत्र को मोहः को शोक एकत्वमनुपश्यतः।" इति।

ततश्वेह ज्ञानकर्मणोः समुच्चयः उपदिष्टः। यथा"विद्यां चाविद्यां यस्तद् वेदोभ्यं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।" इत्यादि। ततश्चान्ते चतुःसु मन्त्रेषु चतस्रः प्रार्थनाः श्रूयन्ते। यथा "हिरण्मयेन पात्रेण सत्यस्पापिहितं मुखम्। तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।" (ई.उ.) इत्यादि। इवमस्यामुपनिषदि नियामकस्य व्यापकस्य वर्णनम्, ज्ञानकर्मणोः समुच्चयः, दिव्याः प्रार्थना इत्यादिकं समुपदिष्टम्। एवम् अस्माभिः ईशावास्योपनिषदः परिचयः प्राप्तः।

**केनोपनिषत्परिचयः**

इयमुपनिषतृ सामवेदे समाहिता। सामवेदान्तर्गते तवलकारब्राह्मणे चतुर्थाध्याये यो दशमोऽनुवाक् तत्र केनोपनिषत् पठिता। अस्यामुपनिषदि चत्वारः खण्डाः सन्ति। परमात्मा एव सर्वकर्ता, तस्यैव इच्छशक्त्या, ज्ञानशक्तया, क्रियाशक्त्या च सर्वं प्रवर्तते इति अस्याः प्रधानो विषयः। "केनेषितं पतति प्रेषित मनः" (के.उ.१/१) इत्येवं केनेतिशब्देनाऽस्या आरम्भोऽत एवाऽस्या उपनिषदः नामधेयं केनोति। केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथम प्रैति युक्तः। केनेषितां वाचमिमां वदन्ति चक्षुःश्रोत्रं क उ देवा युनक्ति।" (के.उ.१/१) इति जिज्ञासयाऽस्या आरंभः। "श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुष्चक्षुरतिमुच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति।" (के.उ.१/२) इति मंत्रेण तस्योत्तरं पठितम्। परमात्मैव सर्वज्ञः, सर्वकर्ता, सर्वनियामकश्चेत्यादि अत्र प्रतिपादितम्। तथा चोक्तं "यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्।" (के.उ.२/३) इत्यादि। परमात्मज्ञानस्योपायोऽप्यत्र प्रदर्शितः। यथा "प्रतिबोधविदितं मतममृतत्वं हि विन्दते। आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्।" (के.उ.२/४) इति।

**आख्यायिका**

अत्र एका आख्यायिका उच्यते। एवं तस्या उपक्रमः "ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्ताऽस्माकमेवायं विजयोऽस्माकमेवाऽयं महिमेति।" (के.उ.३/१) इति। देवैरसुरोपति विजयो लब्धः। यद्यपि परमात्मकृपयैव सः विजय आसीत्, तथापि देवैरहंकारणे अस्माकमेव अयं विजय इति मतम्। अस्माकं बलेनैवाऽयं



Scanned with CamScanner

विजयो लब्ध इति तेषामभिमानमासीत्। तमहंकारमपनेतुं परमात्मा यक्षस्वरूपं गृह्णाति। तच्च यक्षं दूरतस्तिष्ठति। सर्वे देवा एतं यक्षं पश्यन्ति किंतु न जानन्ति किमिदं यक्षम् इति। अतः प्रथमतया ते देवा अग्निं वदन्ति, 'अग्ने! विजानीहि किमेतद् यक्षमिति? अग्निस्तथा कर्तुमुद्यतो भवति। तथा च मन्त्रः "ते अग्निमब्रूवन् जातवेद एतद् विजानीहि किमेतद् यक्षमिति तथेति।" (के.उ.३/३) इति।

अग्निः यक्षसमीपं गच्छति। तदा यक्षमेवाऽऽदावग्निं प्रति पृच्छति, 'कोऽसि?' इति। अग्निः वदति, 'अहम् अग्निरस्मि। जातवेदा इति नाम्ना अहं प्रसिद्धः।' तदा यक्षेप पृष्टं, 'तस्मिन् त्वयि किं वीर्यमिति? त्वयि कीदृशी शक्तिः वर्तते?' तदा अग्निः वदति - 'यदिदं सर्वं पृथिव्यां वर्तते तदहं दहेयमिति।'

तदा यक्षमग्नेः पुरस्तृणं स्थापयति, वदति च 'एतद् दह' इति। किंतु अग्निस्तदहने समर्थो न भवति। अतः स तत एव प्रत्यावर्त्य देवानां समीपं गच्छति वदति च, 'अहं न जानामि किमेतद् यक्षम्' इति। तथा च मन्त्राः "तदभ्यद्रवत् तमभ्यवदत् कोऽसीत्यग्निर्वां अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति।। तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वं दहेयं यदिदं पृथिव्यामिति।। तस्मै तृणं निदधावेतद् दहेति तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुम्। स तत एव निववृते नैतदशकं विज्ञातुं किमेतद् यक्षमिति।" (के.उ.३/४-६) इति।

तदनन्तरं वायुः आगच्छति। यादृशः वार्तालापः अग्निना सह संजातः तादृश एव वार्तालापः वायुना सहाऽपि भवति। वायुः अपि एतद् यक्षं ज्ञातुं समर्थो न भवति। स अपि प्रत्यावर्तते। देवानां समीपम् आगच्छति वदति च, 'किमिदं यक्षमिति ज्ञातुमहं न समर्थः।' इति।

तदनन्तरम् अन्ते देवराजः इन्द्रः तत्र गच्छति। तत्समये तद्यक्षमदृश्यं भवति। तत्स्थाने उमा नाम्नी एका स्त्री उपस्थिता भवति। सा देवान् प्रति वदति 'भो देवाः, भवन्तः अहंकारेण अमन्यन्त यद् अस्माकमेवायं विजयः, अस्माकमेव अयं महिमा इति, किंतु यदिदं यक्षमासीत्। स तु परमात्मा आसीत्। परमात्मना एव अयं विजयः आसीत्। अतः भवद्भिः अहंकारः न कर्तव्यः' इति। देवेषु सर्वप्रथममिन्द्रस्य ज्ञानं जातमत इन्द्रस्य तद्वैशिष्ट्यमुच्यते।

एवमत्र आख्यायिकाकथनेन परमात्मैव सर्वकर्ता इत्युपदिष्टम्। अन्ते च एषा उपनिषद् ब्राह्मी उपनिषद् इत्युच्यते। तथा च मन्त्रः "उपनिषदं भो ब्रूहीत्युवक्ता त उपनिषद् ब्राह्मीं वाव त उपनिषदब्रूमेति।।" (के.उ.४/७) इति।

एवमस्माभिः केनोपनिषदः परिचयः प्राप्तः। अथ कठोपनिषदः परिचयं प्राप्नुमः।



Scanned with CamScanner

**कठोपनिषत्परिचय:**

"उषन् ह वै वाजश्रवस: सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस।" (क.उ.१/१) वाचश्रवसनामा कश्चिद् विश्वजिन्नामानं यज्ञं चकार। यागाऽन्ते स: गवां दानं यच्छति। किंतु तद्दानं योग्यं नासीत्। ता: गाव: पीतोदका जग्धतृणा दुग्धदोहा एवमेव निरिन्द्रया आसन्। नचिकेता इदं पश्यति। स: पितरं वदति, 'यादृशं दानं तादृशं फलं भवति।' एवं हि तत्रत्यो मन्त्र: "पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रिया:। अनंदा नाम ते लोकास्तान् स गच्छति ता ददत्।" (क.उ.१/३) इति।

नचिकेता: पुन: पुन: पितरं पृच्छति "कस्मै मां दास्यसि" इति। तदा 'मृत्यवे त्वा ददामि" इति पिता वदति। एतच्छ्रुत्वा पितृभक्तो नचिकेता यमसदनं प्रति गच्छति। तत्र यमो नासीत्। नचिकेतास्त्रिरात्रिपर्यन्तं यमद्वारे एवोपवसति। तदनन्तरं यदा यम: प्रत्यागच्छति तदा यमस्य किंकरा यमं वदन्ति, 'भो यम! तव द्वारे एको बालब्राह्मणस्त्रि-रात्रिपर्यन्तमनश्नन् एवाऽतिष्ठत्।' तदा यम: नचिकेतस: समीपम् आगच्छति, स्वयमेव तं त्रीन् वरान् याचितुं वदति।

**प्रथमो वर:**

तदा नचिकेता: प्रथमं वरं याचते। तथा च मन्त्र: "शांतसंकल्प: समुना यथा स्याद् वीतमन्युर्गौतमो माऽभि मृत्यो। त्वत्प्रसृष्टं माऽभिवदेत् प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे" (क.उ.१/१०) इति।

अस्मिन् प्रथमे वरे स: पितु: शान्तिं याचते। तदा यम: तथास्तु इति वदति।

**द्वितीयो वर:**

तदनन्तरं नचिकेता द्वितीयं वरं याचते "स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहिं तं श्रद्दधानाय मह्यम्। स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण।।" (क.उ.१/१३) इति।

एवं नचिकेतसा याचिते यमस्तमग्निविद्यां पाठयति। नचिकतसो ग्रहणधारणपाटवेन प्रसन्नो यमस्तमाह 'तव नाम्ना अयं अग्नि: प्रसिद्ध: भविष्यति।' इति। तथा च प्रियाय तस्मै मालामपि यच्छति।

**तृतीयो वर:**

Scanned with CamScanner

याचस्व।'इति। तदा नचिकेताः वदति, 'अयमेव वरो ममाऽभिप्रेतः। नाऽहमन्यत् किमपि वांच्छामि।' तदा यमः तस्मै प्रलोभनानि प्रदर्शयति। यथा "शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्चान्। भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि।" (क.उ.१/२३) इत्यादि।

अन्यानि अपि बहूनि प्रलोभनानि यमेन प्रदर्शितानि। किंतु नचिकेतास्तस्मिन् लुब्धो न भवति। स यमं कथयति "श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः। अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते।" (क.उ.१/२६) इत्यादि।

अतो यन्मया याचितं तदेव मह्यं देहीति नचिकेतसो निश्चय आसीत्। नचिकेतसः निश्चयं दृष्ट्वा यमः प्रसीदति। तदनन्तरं तस्मै सविस्तरं तृतीयवरदानरूपेणोपदेशं यच्छति। तस्मिन् उपदेशे यमेन "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देव मत्वा धीरो हर्षशोकौ जहाति।" (क.उ.२/१२) इत्यादिभिः परमात्मस्वरूपं निरूपितम्। "सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चयन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतद्।। एतद्ध्येवाऽक्षरं ब्रह्म एतदेवाऽक्षरं परम्। एतदेवाऽक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।। एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।" (क.उ.२/१५-१७) इत्यादिभिर्मोक्षे सति जीवात्मना यत्र गतिः क्रियते तादृशस्य परमदेशविशेषस्य भगवद्धाम्नोऽक्षरब्रह्मणो निरूपणं कृतम्।

ततश्च "न जायते म्रियते वा विपश्चिन्नाऽयं कुतश्चिन्न बभूव कश्चित्। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।। हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नाऽयं हन्ति न हन्यते।।" (क.उ.२/१८, १९) इत्यादिरूपे-

Scanned with CamScanner

**फलम्**

एवमत्र ब्रह्मविद्या सम्यगुपदिष्टा। तस्याः फलमप्यत्र प्रदर्शितम्। यथा "यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रंथयः। अथ मर्त्योऽमृतो भवत्येतावदनुशासनम्।" (क.उ.६/१४) इत्यादि। तथा चान्ते उच्यते "मृत्युप्रोक्तां नाचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्। ब्रह्मप्राप्तो विरजोऽभूद् विमृत्यरन्योऽप्येवं यो विदध्यात्ममेव।" (क.उ.६/१८) इति। एवमस्माभिः कठोपनिषदः परिचयः प्राप्तः। अथ प्रश्नोपनिषदः परिचयं प्राप्नुमः।

**प्रश्नोपनिषत्परिचयः**

अथर्ववेदे इयमुपनिषत् समाहिता। आथर्ववणिकब्राह्मणग्रंथेषु पिप्पलादाख्यशाखायामस्याः पाठो भवति। अस्यामुपनिषदि षड्भिः शिष्यैः षट् प्रश्नाः पृष्टाः। गुरुणा च तेषाम् उत्तरानि प्रदत्तानीत्याहत्य षट्प्रश्नाः सन्ति। अतः अस्याः उपनिषदो नामधेयं प्रश्नोपनिषद् इति। षण्णामपि शिष्यानां नामानि प्रथममंत्रे प्रदर्शितानि। यथा "सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौशल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबंधी कात्यायनः" (प्र.उ.१/१) इति। कीदृशा इते शिष्या इत्यपि वर्णितम्। यथा "ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्माऽन्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्लादमुपसन्नाः" (प्र.उ.१/१) इति।

एते सर्वेऽपि शिष्या ब्रह्मविद्योत्सुकाः, ब्रह्मणि निष्ठावन्तः परमात्मानं चाऽन्वेषमाणा आसन्। ब्राह्मीं स्थितिमाप्तानामेव परमात्मोपासनाऽधिकार इति सूचयितुमिदम्। एते च शिष्याः गुरोः पिप्पलादस्य समीपं गताः।

**प्रथम प्रश्नः**

तत्र कबंधी प्रथमं प्रश्नं पृच्छति "भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्ते" (प्र.उ.१/३) इति। तदा "प्रजा कामो वै प्रजापतिः" (प्र.उ.१/४) इत्युक्त्वा प्रजानामधिपतेः परमात्मन इच्छयैवैताः प्रजाः प्रजायन्ते इति पिप्पलादः प्रथमप्रश्नमुदतरत्।

**द्वितीयः प्रश्नः**

Scanned with CamScanner

"भगवन्कुत एष प्राणो जायते। कथमायात्यस्मिन् शरीरे। आत्मानं वा प्रविभज्य कथं प्रतितिष्ठते। केनोत्क्रमाते। कथं बाह्यमभिधत्ते। कथम् अध्यात्मम्" (प्र.उ.३/१) इति। तदा "आत्मन एव एष प्राणो जायते" (प्र.उ.३/३) इत्यादिकमुत्तररूपेण वदति पिप्पलादः। तत्र राज्ञो दृष्टांतोऽपि प्रदत्तः। यथा "यथा सम्राडेवाधिकृतान् विनियुंक्ते। एतान् ग्रामानेतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान् प्राणान् पृथक्पृथगेव सन्निधत्ते।" (प्र.उ.३/४) इति। मुख्यः प्राणः आन्यान् प्राणान् नियोजयतीति तात्पर्यम्।

**चतुर्थः प्रश्नः** तदनन्तरं शौर्यायनिगार्ग्यः चतुर्थं प्रश्नं पृच्छति। तथा च मन्त्रः-

"भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति। कान्यस्मिंजाग्रति। कतर एष देवः स्वप्नान् पश्यति। कस्यैतत्सुखं भवति। कस्मिन्नु सर्वे सम्प्रतिष्ठिता भवन्तीति।।" (प्र.उ.४/१) इति।

तदा प्राणा एवैतस्मिन् पुरे जाग्रतीत्यादिरूपेण पिप्पलाद उत्तरं यच्छति। यदा इतराणि इन्द्रियाणि स्वपन्ति तदापि प्राणः जागर्त्येवेति तात्पर्यम्। अयं जीवात्मा एव स्वप्नान् पश्यति। स्वप्ने किं पश्यतीत्यप्युक्तम् - "दृष्टं चाऽदृष्टं च श्रुतं चाश्रुतं चानुभूतं चाऽननुभूतं च सच्चासच्च सर्वं पश्चति सर्वः पश्चति।" (प्र.उ.४/५) इत्यादि।

**पंचमः प्रश्नः** तदनन्तरं पंचमं प्रश्नं शैब्यः सत्यकामः पृच्छति। तथा च मन्त्रः - "सत्यकामः पप्रच्छ। स यो ह वै तद् भगवन् मनुष्येषु प्रायणान्तम् ओंकारमभिध्यायीत कतमं वाव स तेन लोकं जयति" (प्र.उ.५/१) इति।

हे गुरो! यदि कश्चिज्जनः ओंकारालम्बनेनाऽभ्यध्यायीत तस्य किदृशं फलं भवतीति तात्पर्यम्। तदा गुरुः प्रथमम् ओंकारस्य अर्थं वदति। तथा च मन्त्रः - "एतद् वै सत्यकाम परं चाऽपरं च ब्रह्म यद् ओंकारः" (प्र.उ.५/२) इति। हे सत्यकाम! ओंकारस्य प्रणवस्य अर्थद्वयं वर्तते। ओंकारस्य एकोऽर्थः परं ब्रह्म। द्वितीयोऽर्थोऽपरं ब्रह्म। परं ब्रह्म नाम परतोऽप्यक्षरात् श्रेष्ठं ब्रह्म परमात्मा इति। अपरं ब्रह्म नाम अक्षरम्। परमात्मा तु अक्षरादपि परभूतः। तदुक्तम् "अक्षरात् परतः परः" (मु.उ.२/१/२) इति। श्रीमद्भगवद्गीतायामपि स्मर्यते "अक्षरादपि चोत्तमः" (गी.१५/१८) इति। एवं परं ब्रह्म अपि च अपरं ब्रह्म इत्यर्थद्वयम् ओंकारस्य वर्तते। ततश्च पिप्पलाद आह

Scanned with CamScanner

(प्र.उ.६/२) इत्यादिरूपेण परमात्मनः महिमानं निरूपयति। एवमिहाऽऽत्मनः षोडश-कलाः परमात्माधीना इति प्रतिपादितम्। तथा च मन्त्रः - "स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्याऽस्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते। एवमेवाऽस्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्याऽस्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः।।" (प्र.उ.६/५) इत्यादि।

एवं सर्वेषां प्रश्नानाम् उत्तरं प्रदायाऽन्ते पिप्पलाद आह "एतावदेवाऽहमेतत् परं ब्रह्म वेद नाऽतः परमस्ति"(प्र.उ.६/७) इति। स्वप्रशनामुत्तरैः प्रसन्नाः शिष्याः पिप्पलादं प्रति वदन्ति "त्वं हि नः पिता" (प्र.उ.६/८) इति। हे गुरो! त्वं हि अस्माकं पितृसदृशः इत्यर्थः। अन्ते च "नमः परमऋषिभ्यो नमः परमऋषिभ्यः" (प्र.उ.६/८) इति नमस्कारेण एषा उपनिषत् संपूर्णा भवति। एवम् अस्माभिः प्रश्नोपनिषदः परिचयः प्राप्तः।

## मुण्डकोपनिषत्परिचयः

मुण्डकं नाम शिरः। शरीरे शिरसः यथा महत्वं वर्तते तथैव वेदान्ते मुण्डकोपनिषदः महत्वं वर्तते। यतो हि वेदान्ते मूर्धन्यभूतायाः ब्रह्मविधायाः अत्र निरूपणाद् ईयमुपनिषद् अपि मुण्डकोपनिषद् इति उच्यते। एषा उपनिषद् अथर्ववेदे समाहिता। अस्यामुपनिषदि त्रीणि प्रकरणानि सन्ति। एतानि प्रकरणानीह मुण्डकमित्युच्यन्ते। त्रीणि मुण्डकानि अस्याः उपनिषदः। प्रत्यकेषु मुण्डकेषु खंडद्वयं वर्तते। इति आहत्य अस्यामुपनिषदि षट्खंडाः सन्ति। ब्रह्मविद्याऽस्या उपनिषदः प्रधानप्रतिपाद्यविषयः। ब्रह्मविद्येयमिह पराविद्या इति व्यपदिष्टा।

उपदिष्टविषयाः

Scanned with CamScanner

"यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्" इत्यादिशब्दैरुच्यते। ततश्चैतदक्षरं जगत्कारणम् इत्यपि "यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्।" (मु.उ.१/१/७) इत्यादिना प्रतिपादितम्।

Scanned with CamScanner

गुरु समाश्रित्य लब्धब्रह्मविद्यस्य कीदृश फलमितीहोक्तम्। यथा-

“भिद्यते हृदयग्रंथिश्चिछद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।” (मु.उ. २/ २/ ८) इति।

अपरमपि फलमुक्तम्-

“तरति शोकं तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवति” (मु.उ. ३/ २/ ९) इत्यादि।

इत्थमुस्यामुपनिषदि ब्रह्मविद्यायाः स्फुटं निरुपणमुपलभ्यते। एवमस्माभिर्मुण्डकोपनिषदः परिचयः प्राप्तः। अथ माण्डूक्योपनिषदः परिचय उपस्थाप्यते।

३ माण्डूक्योपनिषत्परिचयः

अथर्ववेदस्थेयमुपनिषत्। अथर्ववेदगतायां माण्डूक्यशाखायामस्याः पाठः। अत एवेयं माण्डूक्योपनिषदिति प्रथिता। अस्यामुपनिषदि द्वादशमन्त्राः सन्ति। अस्याश्च चत्वारः खंडाः सन्ति।

प्रतिपाद्यविषयः

इह आत्मनश्चत्वारः पादाः निरूप्यन्ते। पादाः नाम अवस्थाः। आत्मनश्चतसृणाम-

Scanned with CamScanner

गुरु समाश्रित्य लब्धब्रह्मविद्यस्य कीदृश फलमितीहोक्तम्। यथा-

"भिद्यते हृदयग्रंथिश्चिछद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।" (मु.उ.२/२/८) इति।

अपरमपि फलमुक्तम्-

"तरति शोकं तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवति" (मु.उ.३/२/९) इत्यादि।

इत्थमस्यामुपनिषदि ब्रह्मविद्यायाः स्फुटं निरूपणमुपलभ्यते। एवमस्माभिर्मुण्ड-कोपनिषदः परिचयः प्राप्तः। अथ माण्डूक्योपनिषदः परिचय उपस्थाप्यते।

३ माण्डूक्योपनिषत्परिचयः

अथर्ववेदस्थेयमुपनिषत्। अथर्ववेदगतायां माण्डूक्यशाखायामस्याः पाठः। अत एवेयं माण्डूक्योपनिषदिति प्रथिता। अस्यामुपनिषदि द्वादशमन्त्राः सन्ति। अस्याश्च चत्वारः खण्डाः सन्ति।

प्रतिपाद्यविषयः

इह आत्मनश्चत्वारः पादाः निरूप्यन्ते। पादाः नाम अवस्थाः। आत्मनश्चतसृणाम-वस्थानामिहोपदेशः। तत्र प्रथमा जाग्रदवस्था। द्वितीया स्वपनावस्था। तृतीया सुषुप्त्यवस्था। एवं तत्परभूता चतुर्थी च तुर्यावस्था ब्राह्मीस्थितिरिति।

तत्रत्या मन्त्राश्चैवम्-

'ओम् इत्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भविष्यदिति सर्वमोङ्.कार एव।

Scanned with CamScanner

"स्वप्रस्थानोऽन्त:प्रज्ञ: सप्ताऽङ्ग एकोनविंशतिमुख: प्रविविक्तभुक् तैजसो द्वितीय: पाद:।" (मा.उ. २/२) इति।

ततश्च तृतीया सुषुप्त्यवस्था एवमुच्यते-

"यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूत: प्रज्ञानघन एवानंदमयो ह्यानन्दभुक् चेतोमुख: प्राज्ञस्तृतीय: पाद:।" (मा.उ. २/३) इति।

एवं प्रथमपादरूपेण जाग्रदवस्था निरूपिता। द्वितीयपादरूपेण स्वप्नावस्था निरूपिता। तृतीयपादरूपेण सुषप्त्यवस्था निरूपिता।

तदनन्तरं चतुर्थपादरूपेण एताभ्य: अवस्थाभ्य: परभूता तुर्यावस्था निरूप्यते। एषैव तुर्यावस्था ब्राह्मीस्थितिरित्युच्यते। तथा च मन्त्र:-

"नान्त:प्रज्ञं न बहि:प्रज्ञं नोभयत:प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाऽप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपंचोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय:।" (मा.उ. २/५) इत्यादि।

Scanned with CamScanner

ततश्च अत्र दीक्षातप्रवचनमपि वर्तते। यदा कस्यचिच्छिष्यस्य शिक्षणं गुरुकुलवासश्च पूर्णतामेति तदा गुरुः तस्मै उपदेशं यच्छति। यथा-

"वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।" (तै.उ.१/१/१/१) इत्यादि।

तथा च

"मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि।" (तै.उ.१/११/२) इत्यादि।

तथा च

"यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि।" (तै.उ.१/११/२)

इत्यादि।

एवं शिक्षावल्लयां शिक्षायाः महात्म्यमुक्तम्।

आनंदवल्ली

शिक्षावल्लया अनंतरमानंदवल्ली समाम्नाता।

आनंदवल्लयां परमात्मनोऽनन्त आनंद इति प्रधानो विषयः। इत्थमस्या वल्ल्या आरंभः-

"ओम् ब्रह्मविदाप्नोति परम्। तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति" (तै.उ.२/१/१) इति ब्रह्मणः महात्म्यनिरूपणेन भवति।

Scanned with CamScanner

अत एव परब्रह्मण आनंदविषयेऽत्रोक्तम्-

"यतो वाचो निवर्तन्त। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति।" (तै.उ.२/९/१) इत्यादि। परमात्मनः आनंदस्य वर्णनं कर्तुं न कोऽपि पारयति। तस्य आनंदः अत्यंतः अनन्तः वर्तत इति भावः। यः एवं जानाति तस्य कदापि कस्मादपि भयं न भवतीत्यत्र फलमपि दर्शितम्।

भृगुवल्ली

आनंदवल्ल्या अनन्तरं भृगुवल्ली समान्माता। भृगुः वरुणस्य पुत्रः। स पितरं वरुणमुपजगाम। पितरं प्रति गत्वा भृगुः तं प्रार्थयते - "अधीहि भगवो ब्रह्मेति" (तै.३/१/१) इति। मह्यं ब्रह्मविषयकं ज्ञानं यच्छ इति। तदनन्तरं वरुणस्तस्मै ब्रह्मविषयकं ज्ञानं यच्छति। यस्माद् वरुण इह ब्रह्मविषयकं ज्ञानं यच्दति तस्मादेषा विद्या वारुणी विद्येत्युच्यते। भृगुः अत्र श्रोता अत एषा भार्गवी विद्या अपि भवति। इत्थं तैत्तिरीयोपनिषत्स्थितानां शिक्षा-

Scanned with CamScanner

“येन वा पश्यति येन वा शृणोति येव वा गंधानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चाऽस्वादु च विजानाति।” (ऐ.उ. ३/१) इत्यादि।

सर्वकर्ता परमात्मैव सर्वोपास्येत्युपदेशः। ततश्च “प्रज्ञानं ब्रह्म” (ऐ.उ. ३/३), “सर्वाण्येतानि प्रज्ञानस्य नामधेयानि भवन्ति” (ऐ.उ. ३/२) इत्यादिरूपेण ज्ञानरूपस्य सर्वाऽऽत्मतया ब्रह्मणो वर्णनम्। इत्थमस्माभिरैतरेयोपनिषदः परिचयः प्राप्तः। अथ छांदोग्योपनिषदः परिचयं प्राप्नुमः।

छान्दोग्योपनिषत्परिचयः

छान्दोग्योपनिषत् सामवेदे समाहिता। सामवेदान्तर्गते तवलकाराख्यब्राह्मणेऽस्याः पाठः भवति। अस्यामुपनिषद्यष्टाऽध्यायाः सन्ति। ते चाऽध्याया विभिन्नेषु खंडेषु विभक्ताः। विविधैरुपाख्यानैरत्र ब्रह्मविद्यैवोपदिष्टा।

तत्र यथा चतुर्थाध्याये सत्यकामजाबालस्योपख्यानं श्रूयते। गुर्वाज्ञया गवां सेवया तस्य ब्रह्मज्ञानं कथं जातमित्यादि सर्वं तत्रोपवर्णितम्।

सद्विद्या

Scanned with CamScanner

एवमस्याऽऽरम्भः - शोकाक्रान्तो नारदः सनत्कुमारं प्रतिगच्छति शोकतरणस्य चोपायं पृच्छति। तथा च मन्त्रः-

"अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति।" (छा.उ.७/१/१) इति।

तदा सनत्कुमारः वदति "भो नारद! यत्त्वं जानासि तन्मह्यं ब्रूहि। ततः ऊर्ध्वं ते वक्ष्यामीति।

तदा "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदम् आथर्वणं चतुर्थम् इतिहासपुराणं पंचमम्" (छा.उ.७/१/२) इत्यादि रूपेण नारदः स्वाधिता विद्याः प्रकटयति। ततः सः वदति "यद्यपि मया एतावत् अधितं तथाऽप्यहं मन्त्रविदेवाऽस्मि। न तु आत्मवित्। सोऽहं भगव शोचामि तं मां भगवान् शोकस्य पारं तारयतु" इति।

तदा सनत्कुमारस्तस्मै शोकतरणोपायमुदिशति। तथा चेवं तत्रत्यमन्त्रः "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति।"(छा.उ.७/२३/-१) इति।

अत्र भूमाशब्देन परमात्मा उच्यते। परमात्मा एव सर्वमहान्। अत एव परमात्मनो भूमशब्देन व्यपदेश। यो वै भूमा तत्सुखम्। परमात्मनः इतरत्सर्वमपि अल्पमेव। अतोऽत्रोच्यते नाल्पे सुखमस्तीति। तदनन्तरं नारदः सनत्कुमारं भूमानं विज्ञापयितुं प्रार्थयते। गुरुः अपि तादृशं परमात्मानं निरूपयति। तथा च मन्त्रः

Scanned with CamScanner

छान्दोग्योपनिषदोष्टमाध्याये दहरविद्यायाः निरूपणं वर्तते। इत्थं च तत्रत्यः प्रस्तावः।

“अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्य-दन्तस्-तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति” (छा.उ.८/१/१) इति।

अत्र दहरशब्देन दहराकाश उच्यते। तस्मिन् यदन्त इत्यनेन परमात्मोच्यते। अत एव एषा विद्या दहरविद्या इति प्रथिता।

एवं रूपेण छान्दोग्योपनिषदि विविधानि उपाख्यानानि वर्तन्ते। यैः उपाख्यानैः क्वि-वचत् सद्विद्यारूपेण, क्वचिद् भूमविद्यारूपेण, क्विचद् दहरविद्यारूपेण वेत्यादिविविधैः रूपैर्ब्रह्मविद्याया उपदेशः प्रदीयते।

एवम् अस्माभिः छान्दोग्योपनिषदः परिचयः प्राप्तः। अथ बृहदारण्यकोपनिषदः परिचयम् अवगच्छामः।

## २.८ बृहदारण्यकोपनिषत्परिचय

एषा उपनिषद् शुक्लयर्जुवेदस्य वाजसनेयब्राह्मणे समाहिता। अस्यां षडध्यायाः सन्ति। एते सर्वेऽपि अध्याया विभिन्नेषूपप्रकणेषु विभक्ताः। एतान्युपप्रकारणानीह ब्राह्मणसंज्ञया व्यपदिष्यन्ते। अत्राऽपि विविधैरुपाख्यानैर्ब्रह्मविद्यायाः उपदेशः क्रियते।

यथाऽस्या द्वितीयाध्याये याज्ञवल्क्यस्य मैत्रेय्याश्च संवादः वर्तते। अस्मिन् संवादे

“न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति” (बृ.उ.२/४/५), “आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः” (बृ.उ.२/४/५) इत्यादिरूपेण ब्रह्मविद्याया उपदेशः प्रदत्तः।

ततश्च तृतीयाध्याये राज्ञो जनकस्य सभायां महर्षेर्याज्ञवल्क्यस्येतरैर्विद्वत्भिः साकं प्रश्नोत्तररूपेण या गोष्ठी संजाता तस्य वर्णमुपलभ्यते। तत्र याज्ञवल्क्यं प्रत्यक्षवलस्य प्रश्नाः सन्ति। याज्ञवल्क्यः तेषाम् उत्तरं प्रयच्छति। तदनन्तरमार्तभागस्य प्रश्नाः सन्ति। याज्ञवल्क्यस्तस्याऽपि सम्यग् उत्तराणि प्रयच्छति। तदनन्तरं भुज्योर्लाह्यायनेः प्रश्नाः सन्ति। याज्ञवल्क्यस्तस्याऽप्युत्तराणि यच्छति। तदनन्तरं गार्गीति काचिद् विदुषी तत्रोपस्थिता

Scanned with CamScanner

"यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः।।" (बृ.उ. ३/८/१०) इत्यादि।

तदनन्तरं पंचमाध्यायेऽपि प्रजापतिना देवान् प्रति मनुष्यान् प्रत्यसुरांश्च प्रति यदुपदिष्टं तन्निरूपितम्। एकेनैव 'द' शब्देन प्रजापतिना तत्र दमनस्य दानस्य दयायाश्च उपदेशः कृतः। एवम् अस्यामुपनिषदि विविधैरूपाख्यानैर्ब्रह्मविद्यायाः उपदेशः समुपलभ्यते। इत्थं बृहदारण्यकोपनिषदः परिचयः प्राप्तः।

## २.९ वेदानां परिचय

इह किल लोके प्रसिद्धाः चत्वारो वेदाः ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेद इत्यभिधीयमानाः अनंता मन्त्रराशयः भगवतः विराट्रूपस्य परम्ब्रह्मणः निश्वासरूपाः सन्ति। वेदाः नित्याः अपौरुषेयाश्च। अनंतकोटिब्रह्माण्डानां नायकस्य जगदीश्वरस्य कृपया वेदमंत्राणां राशिभ्यः एव इदमखिलं स्थावरजंगमात्मकं विश्वमाविर्बभूव। स एव परमेश्वरः सर्वात्मना आब्रह्मस्तम्बपर्यन्तं व्याप्तः सन् नियंत्रयति। अत एव भगवान् चतुर्वेदभाष्यकृतसायणाचार्यो डिन्डिमघोषवदुद्घोषयन्ति वेदभाष्यारम्भे, यत्

**यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।**

**निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्।। इति।**

अस्यार्थस्तु यस्य जगन्नियामकस्य परम्ब्रह्मणः विराट् संज्ञकस्य पुरुषस्य शरीरे श्वासोच्छ्वासरूपक्रियायां निश्वासरूपूण यो वायुः शरीरात् बहिर्निस्सरति तादृशा वेदाः नित्यरूपात् परमेश्वरात् आकाशे निस्सृताः। तथा च तेभ्य एव वेदेभ्यो अखिलं जगत् जडजंगमात्मकं विश्वमिदं सृष्टम्। अतः तादृशं विद्यातीर्थं नाम, ज्ञानस्य समस्तज्ञानानामाश्रयस्थानं महेश्वररुपिणं परमात्मानं वा ज्ञानदातृगुरुस्वरूपणिं वा तम् अहं प्रणौमीत्यर्थः।

वेदाः सकलज्ञानानामाकरभूताः सन्ति। युगयुगान्तरेषु यदा जगतः सृष्टि-पालन-प्रलयरूपस्थितयोऽपि नित्यरूपान् आकाशब्रह्माणि अवस्थितान् वेदमंत्राराशीन् भूतभवद्भविष्यज्ञातारो कश्यपात्रिभरद्वाजदयो महर्षयः बहुभिः नैकविधैः तपोभिः सिद्धाः सन्तः, स्वयम्भुना परमेश्वरेण अनुज्ञाताः सन्तः वेदमंत्रराशीन् मनसा दर्शनेन प्राप्तुवन्निति। महाभारते वनपर्वणि कृष्णद्वैपायनव्यासेनाख्यातम्। उक्तंच-

युगान्तेन्तर्हितान् वेदान् सेतिहासान् महर्षयः।

लेभिरे तपसापूर्वमनुज्ञाताः स्वयम्भुवा।। इति।



Scanned with CamScanner

तत्रादौ वेदाः समष्ट्यात्मकेन मन्त्रराशयः अध्ययनाध्यापनरूपेण प्रचलिताः आसन्। तेन समष्ट्यात्मकमन्त्रराशिभ्य एव प्राचीनाचार्यमहर्षिभिः समस्ता श्रौतस्मार्तयज्ञाः सर्वे सम्पादिता अभूवन्। गच्छताकालने ऋषीणां वेदविदां सामान्यजनानांच मेधाशक्तेः ह्रासादिकं भूत्तभवद्भविष्यज्ञानदृष्ट्या तत्वतो ज्ञात्वा भगवान् वेदव्यासः श्रौतस्मार्तयज्ञा-नुष्ठानान् व्यवस्थितक्रमेण सम्पादनाय समग्रं वेदं चतुर्धा व्यभजत्। त एव ऋग्वेदः, यजुर्वेदः, सामवेदः, एवम् अथर्ववेद इति नाम्ना प्रसिद्धिं प्राप्नुवन्। सैव चातुर्होत्रपरंपरा इति कथ्यते। तत्र ऋग्वेदे समस्तदेवतानां स्तुतिपरका मंत्रा अत्र संवलिता भवन्ति। श्रौ-तयज्ञेषु होता नामको ऋत्विक् अस्य ऋग्वेदस्य अधीतवेदः सम्यक् ज्ञाता च भवति। तत्र श्रौतयज्ञेषु ब्रह्मणा ऋत्विजा देवताव्हानाय स्तुतये अनुज्ञां प्राप्य सम्बद्धदेवतामन्त्रस्तोमान् होता उच्चारयेत्। होता नाम देवतान् मन्त्रोच्चारणेन आह्वाता इत्यर्थः। एवं यजुर्वेदाध्येता अधीतयजुर्वेदः यज्ञेषु अध्वर्यु संज्ञकं पदमलंकरोति। यज्ञेषु ब्रह्मणा अनुज्ञां प्राप्य अध्वर्युः आहूतदेवतानुद्दिश्य हविषामाहुतिं कुंडे प्रददाति। अध्वरस्य यज्ञस्य संपूर्णतया धुरं दधातीति अध्वर्युः। भगवता यास्केन निरुक्तग्रंथे अध्वर्युपदनिर्वचनमेवं युक्तं यत्, “अध्वर्यु-रध्वरयुरध्वरं युनक्त्यध्वरस्यनेता अध्वरं कामयत इति वा, अपि वाधीयानेयुरपबन्धो अध्वर इति यज्ञ नाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधः” इति। श्रौतयज्ञेषु पूर्वोक्तवद्ब्रह्मणा

Scanned with CamScanner

पूर्णतया वाक्शरीरं निष्पादयन्ति, परंतु ब्रह्मा एक एव अधीताथर्ववेदः तथा सर्वविद्यश्च सन् श्रौतयज्ञस्य पूर्णतया धुरं वहन् मनश्शरीरं निष्पादयति अयं विषयिका सूक्तिः एतरेय ब्राह्मणे श्रूयते। यत्-

अयं वै यज्ञो योऽयं पवने। तस्य वाक्यमनश्च वर्तन्यौ। वाचा च हि मनसा च यज्ञोऽवर्तत। इयं वै वाग्। अदो मनः। तद् वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति। मनसैव ब्रह्मा संस्करोति। (ऐ.ब्रा.5.33)

गोपथब्राह्मणेप्याम्नातम्-अथ ह प्रजापतिः सोमेन यक्ष्यमाणो वेदानुवाच-कं वो होतारं वृणीयाम्। कम् अध्वर्युम्। कम् उद्गातारम्। कं ब्रह्माणम् इति। त ऊचुः ऋग्विदमेव होतारं वृणीष्व। यजुर्विदम् अध्वर्युम्। सामविदम् उद्गातारम्। अथर्वागिंरोविदं ब्रह्माणम्। तथा हास्य यज्ञः......चतुष्पात्.....प्रतितिष्ठति।" (गो.ब्रा.1.2.24) इति।

एवमेव अनुष्ठानं विधेयम्। नो चेत् यज्ञः समृद्धिं न प्राप्नोति भ्रष्टो यज्ञः भवति। उक्तंच-

"अथ चेन्नैवं विदं ब्रह्माणं दक्षिणत एवैषां यज्ञोरिच्यते।" (गो.ब्रा.-1.2.24)

उपमानंच श्रूयते। यत् - यथैकपात् पुरुषो यो अनुभयचक्रो वा रथो वर्तमाने भ्रेषं न्येति एवमेवास्य यज्ञो भ्रेषं न्येति। (गो.ब्रा.1.3.2) इति।

वेदानां शाखाभेदाः-

एवम्प्रकारेण चत्वारोऽपि वेदाः श्रौतयज्ञानां सम्पादनाय सर्वथा उपकारका भवन्ति। ते च वेदाः भगवता वेदव्यासेन चतुर्धा विभक्ता अपि गच्छताकाले ब्रह्मर्षीणां तपोबलैश्च अनेकानेकशाखोपशाखैः प्रसृताः। एवं ऋग्वेदस्य शाकला, बाष्कला इत्यादयो एकविंशतिः शाखाः अभवन्। यजुर्वेदस्य तु एकशतशाखा आसन्। सामवेदे तु सहस्रशाखा आसन्। एवम् अथर्ववेदेऽपि पैप्लादा शौनका इत्यादयो नवशाखाः आचार्यगुरुपरंपरानुगताः आसन् इति वैयाकरणमहाभाष्ये श्रूयते। उक्तंच-

"एकविंशतिधा बाहुवृच्यम्। एकशतमध्वर्युशाखाः। सहस्त्रवत्र्मा सामवेदः। नवधाथर्वणोवेदः" इति (प.महाभाष्यम्)

एवम्प्रकारेण चत्वारोऽपि वेदाः अस्माकं भारतवर्षे सर्वत्र आसप्तसिंधुसरिद्भ्यः कन्याकुमारी पर्यन्तम् आगुर्जरम् वङ्गदेशपर्यन्तं गुरुशिष्यपरंपरानुसारेण आहत्य एकत्रिंशदुत्तरैकशताधिकैकसहस्त्रशाखाः (1131) वैदिकसम्प्रदायगताः आसन्। तत्र प्रकरणानुसारेण अथर्ववेदस्य नवशाखाः आसन्। ताश्च-पैप्लादाः, नौदाः, मौदाः, शानकीयाः, जाजलाः, जलदाः, ब्रह्मवदाः, वेददर्शाः, एवं चारणवैद्याश्च। तत्र पूर्वोक्तासु चतुर्णां वेदानां शाखापरम्परासु अधिकाः शाखाः लुप्ता सन्ति। काश्चन एव शाखाः



Scanned with CamScanner

सम्प्रदायेषु प्रचलिताः वर्तन्ते।

प्रत्येकस्मिन् वेदेऽपि मूलग्रंथरूपेण संहिताभागः ब्राह्मणभागः, आरण्यकभागः, उपनिषद्भागश्चेति भवन्ति। ब्राह्मणं नाम संहिताग्रंथोक्तानां मन्त्राणां व्याख्यानात्मकोग्र-थः। मन्त्राणां महत्वम्, तैस्सहकृत अनुष्ठानानि, तेषां प्रयोजनानि, अनुष्ठानफलानि च सोदाहरणं वर्णितानि भवन्ति। तत्र आधानाग्निहोत्रदर्शपूर्णमासादि सप्तहविर्यज्ञानां वर्णनानि, सप्तपाकयज्ञानां सप्तसोमयज्ञानां महत्वानि तेषां प्रयोजनानि विस्तृतं वर्णितानि।

तत्र ऋग्वेदे ऐतरेयब्राह्मणम्, कौशीतकीब्राह्मणंच प्रसिद्धौ। शुक्लयजुर्वेदे शतपथब्राह्मणंच भवति। कृष्णयजुर्वेदे तु तैत्तिरीयब्राह्मणमनुस्मर्यते। सामवेदे तु ताण्ड्यमहाब्राह्मणम् एवंच सामविधानब्राह्मणम्, संहितोपनिषद्ब्राह्मणम्, षड्विंशब्राह्मणम्, तल्वकारब्राह्मणम्, आर्षेयब्राह्मणंचेति प्रसिद्धानि। अथर्ववेदे तु एकमेव गोपथब्राह्मणम् अध्ययनाऽध्यापनपरंपरासु प्रचलति। तत्र उपनिषत्सु चुतुर्णामपि वेदानां संहिताभागेषु पठिताः काश्चन, ब्राह्मणग्रंथेष्वागताः काश्चन, आरण्यकभागेषु पठिता काश्चन इति अन्याश्च लुप्तसंदर्भाः सम्प्रदायेष्वनुसृताश्चेति।

आरण्यकं नाम अरण्ये अध्ययनात् आरण्यकमित्युच्यते। पितृकर्मणां विधीनाम् आध्यात्मिकानाम् उपासनाविधीनां क्वचित् सन्यासपदग्रहणविधीनां वर्णनानि आरण्य-कग्रंथेषु अधीयन्ते। मुमूक्षूणां कृते संसारात् विरक्तानां कृते उपासनाविधयः अध्यात्मि-कज्ञानमवाप्तये आत्मज्ञानाय च आरण्यकग्रंथाः बहूपकुर्वन्ति।

उपनिषद्ग्रंथेषु आध्यात्मिकतत्वानां जीवब्रह्मणोरैक्यप्रतिपादकानामद्वैततत्वानां विषयाः नैकविधसुललितैः सरलतरैरुपायैः वर्णिताः भवन्ति। तत्र अहं ब्रह्मास्मि, अयमात्मा ब्रह्म, तत्वमसि, प्रज्ञानं ब्रह्मोत्याख्य महावाक्यानां सिद्धांताः अतीवसरलतरैर्निरूपिताः सन्ति। तत्र दशोपनिषदः भवन्ति। यत्-

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।

ऐतरेयंच छान्दोग्यं बृहदारण्यकं दश।।

शताधिका उपनिषदः अध्ययनाध्यापनपरंपरासु प्रवर्तन्ते। तत्रोपनिषदां तु मोक्ष एव परमपुरुषार्थः। अतः आत्मज्ञानावाप्तये उपनिषत्सु सर्वत्र सुललितरोदाहरणैः ब्रह्मज्ञानविषयका वैदिकसनातन-अद्वैततत्वसिद्धांताः भृशमुपबृंहिताः सन्ति।

तथा च चतुर्णामपि वेदानाम् उपवेदरूपेण प्रसिद्धाः केचन ग्रंथाः सन्ति। तत्र आयुर्वेदः ऋग्वेदस्योपवेदः यजुर्वेदस्य च धनुर्वेदः उपवेदरूपेण पठितः। तथा सामवेदस्योपवेदरूपेण गान्धर्ववेदः उपदिष्टः। एवंचाथर्ववेदस्योपवेदरूपेण अर्थवेदः अर्थशास्त्रं वा शस्त्रविद्या

Scanned with CamScanner

अस्माकं भारतवर्षे प्रचलिता आसीत्।

महर्षिणा शौनकेन प्रोक्तः चरणव्यूहाख्यो ग्रंथः अतीव प्राचीनतया समस्तवेद-शाखानां वैदिककालेषु प्रचलितानां मूलशाखोपशाखानामभिलेखग्रंथरूपेण वरीवर्ति। तत्रापि शौनकोक्तः चरणव्यूहः, कात्यायनोक्तश्चरणव्यूहः एवम् अथर्ववेदान्तर्गत अथर्वपरिशिष्टोक्तश्चरणव्यूह इति च उपलभ्यन्ते।

वेदांगनि- वेदमंत्राणामुच्चारणपऋतीनामवगमाय ह्स्तस्वरदर्शनपरिज्ञानाय, मन्त्राणामर्थतो ज्ञानाय विविधप्रकाराणां मन्त्रार्थानुसंधानाय, गायत्र्यादि नैविधछन्दोबद्धानां मन्त्राणामनुष्ठानाय श्रौतस्मार्तयज्ञानुष्ठानानां परिज्ञानाय एवंच अमावास्या पूर्णिमादिविहितमुहूर्तेषु यज्ञानुष्ठानां निर्वर्तनाय वेदागानां सृष्टिराविरभूत्। तानि चे वेदांगानि-

**शिक्षा व्याकरणं निरुक्तं ज्योतिषं तथा।**

**कल्पश्चेति षडअंगानि वेदस्याहुर्मनीषिणः।।इति।**

शिक्षा-वेदमन्त्राणामुच्चारणविधयः शिक्षाग्रंथेषु विहिताः सन्ति। तत्र वर्णानामुच्चारणप्रकाराः, ह्रस्वदीर्घप्लुतादयः, उदात्तानुदात्तस्वरितविषयाः, द्रुतविलम्बितमध्यमवृत्तिभिः मंत्राणां पाठोच्चारणविधयः, पदपाठः, क्रमपाठः, जटापाठः, एवं घनपाठाख्याः, विकृतिपाठाः शिक्षाग्रंथेषु तथा प्रातिशाख्यग्रंथेषु सविस्तरं वर्णिताः सन्ति। तत्र प्रत्येकस्मिन् वेदेऽपि शिक्षाग्रंथाः पृथक्-पृथक्तया उपलभ्यते तद्यथा-ऋग्वेदे पाणिनीयशिक्षा, यजुर्वेदे शुक्लयजुषासम्बद्धा याज्ञवल्क्यशिक्षा, कृष्णयजुर्वेदान्तर्गतया व्यासशिक्षा, सामवेदे नारदीयशिक्षा, अथर्ववेदे माण्डूकीशिक्षा च। एवं शिक्षाग्रंथाः वर्णानामुच्चारणज्ञानायोपकुर्वन्ति।

व्याकरणम्- वेदमन्त्रेष्ववस्थितानां शब्दानां शब्दरुपधातुरूपाणां निर्माणनियमाः, प्रकृतिप्रत्ययादीनां विधयः उदात्तानुदात्तानां नियमाः, विविधसन्धीनां नियमाः, एवंच शब्दानां प्रकृतेः प्रत्ययस्य च स्वरूपावधारणं तेषामर्थनिर्धारणंचेति अनेके विषयाः व्याकरणशास्त्रे विचार्यन्ते। वेदमंत्राणां सामान्यतोऽर्थनिर्धारणाय व्याकरणशास्त्रमतीव प्राधान्येन उपकरोति। व्याकरणशास्त्रान्तर्गत संस्कृतभाषायाः मूलं तु प्रातिशाख्यमेव।

Scanned with CamScanner

एवोपलभ्यते। गायत्रीछंदसि चतुर्विंशत्यक्षराणि (24) पादत्रयश्च भवति। एवं चतुश्चतु-रक्षरवृध्या उष्णिगादि छन्दांसि ज्ञायन्ते। मन्त्राणां छन्दोज्ञानेन वेदार्थज्ञानायातीव सौकर्यं भवति।

निरुक्तम्- वेदमंत्रेष्ववस्थितानां शब्दानां निर्वचनपूर्वकं विविधप्रकारैः अर्थनिर्णयायोपकारकं शास्त्रं निरुक्तशास्त्रं भवति। निरुक्तंविना केनापिप्रकारेण वे-दमंत्राणां निष्कृष्टरूपेण अर्थनिर्णयं कर्तुं न पार्यते। भगवता यास्केन निरुक्ताख्यो ग्रंथः प्रणीतः। निघण्टुनाम्नः वैदिकशब्दपर्यायपदकोशस्य व्याख्यानात्मको निरुक्तग्रंथः। तत्र काण्डत्रयरूपेण नैघण्टुकं काण्डम्, नैगमं काण्डम्, दैवतं काण्डंचेति भवति। तत्र निरुक्ते पूर्वषट्कोत्तरषट्करूपेण षण्णां षण्णामध्यायानां समूहः आहत्य द्वादशाध्यायाः पुनः परिशिष्टरूपेण द्वे अध्यायौ भवतः। संपूर्णतया चतुर्दशाध्यायाः निरुक्ते सन्ति। तत्र "प्रकरणशः अर्था निर्वक्तव्याः" इति सिद्धांतानुसारेण निरुक्ते वेदमंत्राणां आध्यात्मिकार्था,

Scanned with CamScanner

ज्योतिषशास्त्रे मूलग्रंथरूपेण लगधमुनिप्रणीतः एक एव ग्रंथः "वेदाअंगज्योतिषम्" अस्ति। स्मार्तयज्ञाः, संस्कारकर्माणि अन्यानि च नित्यनैमित्तिककाम्यानुष्ठानानां प्रयोगाः वर्णिताः सन्ति। कल्पसूत्राणि चतुर्धा विभक्तानि सन्ति - (क) श्रौतसूत्रम्, (ख) गृह्यसूत्रम्, (ग) धर्मसूत्रम्, (घ) शुल्बसूत्रंचेति।

(क) श्रौतसूत्रम् - श्रौतसूत्रेषु श्रुतिः नाम वेदः। वेदेषु प्रतिपादिता आधानाग्निहोत्रादि सप्तहविर्यज्ञसंस्थाः, अग्निष्टोमादि सप्तसोमासंस्थागतयज्ञाः केचन काम्ययज्ञाश्च विहिताः सन्ति। तत्र सप्त हविर्यज्ञाः एते भवन्ति-अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणेष्टिः, पिण्डपितृयज्ञः, चातुर्मास्यः, निरूढपशुबंधः, सौत्रामणीयज्ञश्च। एते सर्वे यज्ञाः अत्र सूत्रनिर्देशपूर्वकं निगदिताः। सप्त सोमयज्ञाश्च सन्ति। अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्यामा च। सर्वेप्येते यज्ञाः श्रौतसूत्रेषु सूत्रवद्विहिताः सन्ति। चतुर्ष्वपि वेदेषु पृथक् पृथक्तया श्रौतसूत्राणि सन्ति। ऋग्वेदे आश्वलायनश्रौतसूत्रम्, शुक्लयजुर्वेदे कात्यायनश्रौतसूत्रम्, यजुर्वेदे बौधायन एवं आपस्तम्ब श्रौतसूत्रे, सामवेदे लाट्यायन एवं द्राह्यायण श्रौतसूत्रे, तथा च अथर्ववेदे वैतानश्रौतसूत्रंच।

(ख) गृह्यसूत्रम् - पंचमहायज्ञानां सप्तपाकयज्ञानां षोडशसंस्काराणामन्येषां काम्यानुष्ठानविधीनां प्रयोगाः सूत्रवद्विहिताः सन्ति। सप्त पाकयज्ञाश्च एते सन्ति। औपासनम्, वैश्वदेवः, पक्षश्राद्धम्, मासिश्राद्धम्, अष्टकाश्राद्धम्, श्रवणाकर्म, शूलगवश्च। गृह्यसूत्राण्यपि चतुर्षु वेदशाखासु पृथक्तया सन्ति। ऋग्वेदे आश्वलायनगृह्यसूत्रम्, शुक्लयजुर्वेदे पारस्करगृह्यसूत्रम्, कृष्णयजुर्वेदे बोधायनगृह्यम्, आपस्तम्बगृह्यसूत्रंच। सामवेदे गोभिलगृह्यसूत्रम्, द्राह्यायणगृह्यसूत्रम्, जैमिनीयगृह्यसूत्रंच। अथर्ववेदे कौशिकगृह्यसूत्रंच।

(ग) धर्मसूत्रम् - धर्मसूत्रेषु धर्माचरणविषयाः ब्राह्मणक्षत्रियवैश्यशूद्रवर्णानां स्वस्वाचारनियमाः, वर्णाश्रमधर्माः, ब्रह्मचारीगृहस्थ-वानप्रस्थ-सन्यासविधयः सूत्रबद्धा, श्लोकैरपि सविस्तरं वर्णिताः। तत्र बौधायनधर्मसूत्रं, गौतमधर्मसूत्रंच। धर्मार्थकाममोक्षाख्य चतुर्विधपरमपुरुषार्थानां प्राप्तये धर्मसूत्रविहितानामचरणं शिष्टैरनुसर्यते।

Scanned with CamScanner

ेनिमितैरनुष्ठानैः श्रौतस्मार्तयज्ञानुष्ठाने मन्त्रार्थानुसधानेष्वपि परमोपयोगाः भवन्ति। यतो हि यज्ञानुष्ठानप्रयोग एव ज्ञानार्थं प्रवृत्तिं जनयति। अतः यथालक्षणसहकृतैरनुष्ठानैः चतुर्विधपुरुषार्थाः सिध्यन्ति। अस्तु।

**वेदानां महत्वम्-**

वेदाः समस्तज्ञानानामाधारभूताः सन्ति। विश्वसंस्कृतिरपि वैदिकसनातनपरंपरामूलादेव विनिस्सृता। वेदेभ्य एव विश्वस्मिन् प्रथमतः ज्ञान-विज्ञानानां नैकविधपद्धतयः प्रसारिताः। समस्यत विश्वस्य कल्याणाय एवं विश्वस्य सर्वविधसमृद्धये वेदाः सदैव प्रेरयन्ति। समस्तधर्मणां मूलाधाररूपेण चत्वारो वेदाः सर्वत्र प्रकाशन्ते। अत एवोक्तं भगवता मनुना मनुस्मृतौ-

वेदोऽखलो धर्ममूलं स्मृतिशीले च तद्विदाम्।

........................ मात्मनस्तुष्टिरेव च। (मनु. 2.6)

यः कश्चिद् कस्यचिद्धर्मो मनुना परिकीर्तितः।

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः। (मनु. 2.7)

धर्मार्थकामोक्षाणां प्राप्तये सर्वैर्योग्यतासम्पन्नैरवश्यं वेदाध्ययनं विधातव्यम्। शास्त्रकारैः वेदानां महत्वं ज्ञातृभिश्च वेदस्य स्वतः प्रामाण्यं सिद्धान्तितम्। वेदाध्ययनमेव जगति परमं तपः ब्राह्मणेन निष्कारणेन षडअंगोवेदोऽध्येयो ज्ञेयश्च। (माहाभाष्यम्)

वेदमेव सदाऽभ्यस्येत् तपस्तप्यन् द्विजोत्तमः।

वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते। (मनु.2.166) इति।

अखिलवेदेषु सामाजिकजीवनस्योन्नतेः आदर्शविचाराः विश्वबंधुत्वविचाराः जगतः कल्याणाय च कर्त्तव्याः विविधोपायाः बहुत्र निर्देशिताः सन्ति। वैदिकसनातनसंस्कृतेः वैशिष्ट्यानि, आर्यकुलानां जनजीवनविषयाः बहुविस्तरेण वेदेषु निगदिता। आर्यजनाः

Scanned with CamScanner

रा:। तदुनसारीणि यज्ञानुष्ठानानि च आचरन्ति स्म इति वेदमंत्रेभ्य एव प्रमाणान्युपलभ्यन्ते। उक्तंच-

सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक्।

वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।। (मनु.१.२१)

सा प्रथमा संस्कृति विश्ववारा............... (यजु.7.14) इत्यादि।

भगवता प्राचीनस्मृतिकारेण मनुना ज्ञानविज्ञानादिसमस्तशास्त्राणां मूलत्वेन वेदस्य प्राशस्त्यं वर्णयता वेदेषु बीजरूपेण दार्शनिका: सिद्धांता:, राजनीति:, अध्यात्मम्, समाजशास्त्रम्, मनोविज्ञानम्, आयुर्वेद:, गणितशास्त्रम्, अर्थशास्त्रम्, नाट्यशास्त्रम्, काव्यशास्त्रम्, कामशास्त्रम्, अन्याश्च विविधा: कलाश्च मन्त्रार्थानुसन्धानैर्लभ्यान्ते इति मनुस्मृतौ प्रतिपादितम्। प्राचीननाट्यशास्त्रप्रणेत्रा भगवता भरतमुनिना नाट्यशास्त्रग्रंथारम्भे एवं प्रारम्भं कृतं, यत्-

जग्राह पाठ्यम् ऋग्वेदात् सामभ्यो गीतमेव च।

यजुर्वेदादभिनयान् रसानाथर्वणादपि।। (ना.शा.1.17)

जगत: कल्याणाय ब्राह्मणक्षत्रियविटशूद्रपंचमाख्यानां समस्तलोकजनानां कृते परस्परं स्वस्वकुलधर्माचारेषु नैरन्तर्येण प्रवृत्तिं धर्मशास्त्राणि बोधयन्ति। सर्वेषां कृते श्रुत्युक्तेषु मार्गेषु स्मतिग्रंथोक्तेषु आचारेषु आत्मसंतुष्टिभावंच वेदा: प्रतिपादयन्ति।

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानव:।

इह कीर्तिवाप्नोति प्रेत्य चानुत्तमं सुखम्।।

वैदिकग्रंथेषु लोककल्याणाय जनानामार्थिकसमृद्धिप्राप्तये कृषिकर्मणां समृद्धये च बहवोप्युपाया: तत्र निर्देशिता: सन्ति। गोमहिषादिसमाजोपयोगिपशूनां समृद्धिद्वारा कृषिधान्यानां समृद्धये नैकविधोपाया: वेदेषु लभन्ते। अत एव तत्र तत्र राष्ट्रसमृद्धिकर्माणि, गोष्ठससमृद्धिकर्माणि, कृषिसमृद्धिकर्माणि, चान्ये अनेकानेक समाजयोपयोगि अनुष्ठानानि वेदेषु वर्णिता: अतएव वेदानां लोकल्याणाय बहुमहत्वं भवति।

अथर्ववेदस्य परिचय:- अथर्ववेद:, अंगिरो वेद:, अथर्वाअंगरसवेद: ब्रह्मवेद:, भृग्वअंगरोवेद:, छंदो वेद:, क्षत्रवेद:, भैषज्वेद इत्याद्यभिधानै: प्रसिद्धोऽथर्ववेद: न केवलं पारलौकिकफलानि, ब्रह्मज्ञनावाप्त्यादि कामान् साधयत्यपितु अस्मिन् जगति जनानामपेक्षितफलान् अन्नसमृद्धिधनकनकभूसौभाग्यैश्वर्यपुत्रपौत्रादिसकल ऐहिकफलानि च विशेषत: पूरयति। जगत: कल्याणाय सर्वत्र सुभिक्षशांतिसौमनस्यादि विश्वस्मिन् स्थापनाय च अथर्ववेदे नैके श्रौतस्मार्तयज्ञानुष्ठानप्रयोगा: सविस्तरं वर्णिता:। अत एव



Scanned with CamScanner

विपर्ययेन अचलात्मकास्थिररूपी नित्यब्रह्मरूपस्य, नाम नित्यरूपक्य परमात्मनः विषयान् यो वेदो वर्णयति सोऽथर्ववेदे इति सिध्यति। एवं हिंसाराहित्यविषयान् अस्मिन् संसारे सुखसंतोषशान्त्यादीन् एवं सच्चिदानन्दादिब्रह्मज्ञानविषयान् यो वेदो बोधयति सः अथर्ववेद इति ज्ञायते। उक्तंच गोपथब्राह्मणे यत्-

अथार्वाम् एनम् एतास्वेवाप्सु अन्विच्छेति तदथर्वाऽभवत्।

तदथर्वणोऽथर्वत्वम्।।................अथर्वा वै प्रजापतिः।। (गो.ब्रा.1.1.4) इति।

पूर्वोक्तवदथर्ववेदे नवशाखा आसन्निति पतंजलिमहर्षिणा कृत वैयाकरणमहाभाष्योक्ता प्रमाणैर्लभ्यते। ताश्च शाखाः - पैप्पलादाः, तौदाः, मौदाः, शौनकीयाः, जाजलाः, जलदाः, ब्रह्मवदाः, वेददर्शाः, चारणवैद्याश्चेति। तासु च नवशाखासु सम्प्रति अस्माकं भारतवर्षे केवलं शाखाद्वयं पैप्पलादशाखा, शौनकीयशाखा चेति द्वे एव अध्ययनाऽधपनपरंपरासु प्रवर्तेते। तत्र पैप्पलाद-अथर्वसंहितायां 'शं नो देवीरभिष्टये' इत्यारभ्य भवति। शौनकीय शाखन्तर्गते अथर्ववेदसंहितायामारभ्यसूक्तं 'ये त्रिषप्ताः' इति भवति। संहिताग्रंथे विंशतिः काण्डानि। अथर्ववेदसंहितायां पूर्णतया एकादशोत्तर

Scanned with CamScanner

आग्रयणेष्टि:, चातुर्मास्यानि, निरूढपशुबंध:, सौत्रामणी, अग्निष्टोम:, अत्यग्निष्टोम:, उक्थ्य: षोडशी, वाजपेय: अतरात्र:, अप्तोर्यामा चेति सप्तहविर्यज्ञा: सप्तसोमयज्ञाश्च विस्तरेण व्याख्याता:। एवं समस्तश्रौतयज्ञा: अयनयज्ञाश्च वैतानश्रौतसूत्रोदितानि सन्ति।

गृह्यप्रयोगा:- कौशिकगृह्यसूत्रेषु-गृह्यस्थालीपाकतन्त्रेणानुष्ठीयमानयज्ञा: एवं आज्यतन्त्रविधानेन अनुष्ठीयमानयज्ञाश्च विस्तरेण अत्र विहिता: सन्ति। तत्र विशेषेण संस्कारकर्माणि, मेधाजननकर्माणि, ब्रह्मचारिण: सायम्प्रातरग्निपरिचर्याकर्माण, सर्वसम्पदभिवृद्धिकर्माणि, तदअंगतया पुत्र-पौत्र-सती-धन-धान्य-पशु-भू-ऐश्वर्यादीनां समृद्धिकर्माणि, राज्ञा क्रियमाणानि ग्राम-नगर-राष्ट्र-लाभकर्माणि, रक्षाकर्माणि, समस्तजनानां परस्परं सौमनस्यस्थापनकर्माणि, भूपालानुद्दिश्यक्रियमाणानि राजकर्माणि यथा शत्रुसेनानाशनकर्माणि, संग्रामविजयसाधनकर्माण, परसेनामोहनस्तम्भनोच्चाटनादिकर्माणि, संग्रामविजयकर्माणि, राज्ञ: स्थिररूपेण स्थापनाय अभिषेककर्माणि, सर्वपापविनाशकर्माणि, पौष्टिककर्मसु अंतर्भूतानि चित्राकर्माणि, गोसमृद्धिकर्माणि, कृषिपुष्टिकर्माणि, जन्मजन्मान्तरकृतपापनिमित्तेद्भूतविविधरोगभैषज्यकर्माणि, सर्वरोगभैषज्यकर्माणि, तथा पुत्रादिकामस्त्रीकर्माणि, सुखप्रसवकर्माणि, सौभाग्यप्राप्तिकर्माणि, अभीष्टसिद्धिविज्ञानकर्माणि, दुर्दिनाशनिवृष्टिनिवारणकर्माणि, वृष्टिकर्माणि, वाणिज्यलाभकर्माणि, दु:स्वप्ननिवारणकर्माणि, पापनक्षत्रजननशांतिकर्माणि, आभिचारकर्माणि, स्वस्त्ययनकर्माणि, दीर्घायुष्यप्राप्तिकर्माणि, एवं जातकर्मनामकरणोपनयनादिसंस्कारकर्माणि, गृह्यसूत्रेषु वर्णितानि सन्ति। येषामनुष्ठानै: सर्वेजना: योगक्षेमादि आनुकूल्यतां प्राप्नुवन्ति।

शांतिकल्पे आथर्वणिकप्रयोगपद्धत्या कृत्तिकादिनक्षत्रदेवतानुदिद्श्य पूजाजपाभिषेकहोमा:, प्रकृते: रक्षणाय, विश्वस्य कल्याणाय च विविधानि अद्भुतकर्मणां महाशांतिकर्माणि, निरऋतिकर्माणि, अमृतशान्त्यादि अभयशांतिपर्यन्तं त्रिंशत् महाशांतिकर्माणि, प्रतिपादितानि सन्ति। समस्तभूमण्डलस्य संरक्षणाय शांतिकल्पे विशेषतया दिव्यन्तरिक्षादि-आपदां निवारणाय, लोकानां गतायुषां पुनर्जीवनाय, अग्निभयशत्रुभयादि विविधमहाभयनिवारणाय एवं विविध आपदामपनोदनाय विविधप्रकारकाणि महाशांतिकर्माणि, अनुष्ठानप्रयोगै: सर्वान् लोकानुपकुर्वन्ति।

आंगिरसकल्प:-जगत: कल्याणाय सज्जनानां रक्षणाय तथा च दुष्टानां दुराचारिणां



Scanned with CamScanner

नवानां ग्रहाणामानुकूल्यतासिद्धये ग्रहशान्त्यादि-अनुष्ठानानि राज्ञा, विदुषा पुरोहितेन कारयेदिति निर्देशाः सन्ति। भगवता सायणाचार्येण वेदभाष्ये निर्देशितमस्ति यत् "पौरोहित्यं शांतिकपौष्टिकानि राज्ञामथर्ववेदेन कारयेद् ब्रह्मत्वंचेति।" उक्तंच विष्णुपुराणेऽपि यत्-

शांतिपुष्टयभिचारार्था एकब्रह्मत्विगाश्रयाः।

क्रियन्तेऽथर्ववेदेन त्रय्येवात्मीयगोचराः।।इति।

सुवर्णधेनुभूमिदानादीनि अनुष्ठानानि राज्ञा प्रतिदिनमनुष्ठेयानि। रात्रीदेवी प्रतिमास्थापनं पूजनानि च। पुरोहितेन राज्ञः कृते मान्त्रिकरीत्या रक्षाकरणानुष्ठानानि कारयितव्यानि। राज्ञः समस्तपापक्षयार्थं घृतावेक्षणम्, तिलदानम्, हस्तिरथदानानुष्ठानम्, अश्वरथदानानुष्ठानम्, गोसहस्रविधिप्रयोगः, वृषोत्सर्गः, कोटिगायत्रीहोमः, आयुतहोमः, लक्षहोमः, घृतकम्बलविधिप्रयोगः, तटाकप्रतिष्ठापनम्, पाशुपतव्रतम्, एवमादीनि दानव्रतजपाभिषेकमार्जनब्राह्मणभोजनादीनि अनुष्ठानानि अथर्वपरिशिष्टग्रंथे संकलितानि सन्ति।

## २.१० अनुक्रमणी

अनुक्रमणी ग्रन्थाः, यत्र मन्त्राणां द्रष्टारो ऋषयः के?, तेषां देवताः काः?, तेषां छन्दःअनुवाकवर्गसूक्तानि च कानि ? इति बोधनं भवति। वेदाङ्गेषु अपरिगणिता अपि अनुक्रमणीग्रन्थाः, प्रातिशाख्यग्रन्थाः, देवताग्रन्थाश्च वेदस्य रक्षार्थमेव प्रणीताः । बहवः अनुक्रमणीग्रन्थाः सन्ति । प्रत्येकं वेदस्य अनुक्रमण्यः समुपलब्धा भवन्ति ।

अनुक्रमण्याः रचयितृषु शौनक-कात्यायनौ नितान्तौ प्रख्यातावाचार्यो स्तः। शौनकेन ऋग्वेदरक्षार्थम् आर्षानुक्रमण्यादयो दशग्रन्थाः प्रणीताः। कात्यायनेन प्रातिशाख्यस्य रचना कृता । वेदाङ्गत्वाभावे अपि वेदरक्षार्थं, तद्गतावान्तरविषयाणां विवेचनार्थं च अनुक्रमणीग्रन्थाः महत्त्वपूर्णाः सन्ति । ऋक्सर्वानुक्रमणि-वृत्त्याः भूमिकायां वृत्तिकारेण षड्गुरुशिष्येण शौनकेन ऋग्वेदरक्षार्थं येषां दशग्रन्थानामुल्लेखः कृतः ते निम्नाः सन्ति -



Scanned with CamScanner

विविधेष्वनुष्ठानेषु विशेषफलकामनायै प्रदर्शितोऽस्ति । शौनकीयप्रातिशाख्यमृग्वेदेनैव सम्बद्धमस्ति ।

**बृहद्देवता**

बृहद्देवता अनुक्रमणी-ग्रन्थेषु मुख्यग्रन्थः मन्यते। ग्रन्थोऽयं शौनकेन रचितः। अस्य ग्रन्थरत्नस्य आलोके ऋग्वेदीयदेवतानां रहस्यं स्पष्टतः आलोकितं भवति। द्वादशशतेषु पद्येषु निर्मितोऽयं ग्रन्थः ऋग्वेदीयदेवतानां विषये प्रामाणिकः, प्राचीनस्तथा पर्याप्तरूपेण विस्तृतोऽप्यस्ति । ग्रन्थोऽयम् अष्टाध्यायेषु विभक्तोऽस्ति । प्रत्येकस्मिन्नध्याये प्रायः पञ्चपद्यानामेकः वर्गो भवति, किञ्चास्य विभाजनस्य सम्बन्धः ऋग्वेदस्य अष्टकेन सह कथमपि भवितुं न शक्यते। वर्गाणां विभाजनमपि पूर्णतः अव्यावहारिकं, यथेच्छकल्पितं चास्ति । अतो यदा कदा आख्यानस्य मध्ये एव कोऽपि वर्गः समाप्तो भवति ।

बृहद्देवतायाः प्रथमाध्यायस्य द्वितीयाध्यायस्य च आदिमपञ्चदशवर्गाः (१२५ श्लोकाः) ग्रन्थस्य उपादेयभूमिकारूपेण सन्ति । अत्र देवतायाः स्वरूपस्य, स्थानस्य, वैलक्षण्यस्य च विवरणं विस्तरेण प्रदत्तमस्ति । भूमिकायाः अन्तिमानां सप्तवर्गाणां सम्बन्धः व्याकरणेन सहास्ति । निरुक्तेन सम्बद्धविषयाणां निपात-अव्यय-सर्वनाम-संज्ञा-समासादीनां वर्णनं यथेष्टरूपेण लभते। शब्दविभाजने यास्कस्य अपि अशुद्धीनामालोचना

Scanned with CamScanner

यास्कस्य निरुक्त, कात्यायनस्य च सर्वानुक्रमणीग्रन्थयोः मध्यकालवर्त्ती ग्रन्थोऽयं महत्त्वपूर्णोऽस्ति । शौनकेनात्र निरुक्तस्य न केवलं देवताविषयककल्पना एव अङ्गीकृता, प्रत्युत तेषामनेकानि वाक्यान्यप्युद्धृतानि । कात्यायनेनाऽपि बृहद्देवतायाः समुपयोगः स्वरचनायां सर्वानुक्रमण्यां बहुशः कृतः । सूत्ररूपे सत्यपि सर्वानुक्रमण्यां बृहद्देवतायाः प्रायः त्रिंशत् श्लोकाः यथावद् अल्पपरिवर्तनेन सह स्वीकृताः, उद्धृताश्च सन्ति। अपाणिनीयपदानां बहुलतया प्रयोगेण सर्वानुक्रमणीकारः कात्यायनो वार्त्तिककाराद् वैयाकरणकात्यायनात् सर्वथा भिन्नः एवाऽऽसीत् । अनेन प्रणीतस्य बृहद्देवतायाः उद्धरणानि तेन स्वग्रन्थे दत्तानि, अतः बृहद्देवता पूर्वपाणिनीययुगस्य कृतित्वेन वि० पू० अष्टमशतकोतरभागे अवर्ततेति मन्यते।

सर्वानुक्रमणी

सर्वानुक्रमणी ऋग्वेदस्य समस्तावश्यकविषयाणां ज्ञानाय कात्यायनस्य कृतिः। ग्रन्थोऽयं सूत्ररूपेण निबद्धोऽस्ति । प्रत्येकं सूत्रस्य आदिपदम्, अनन्तर-ऋचां संख्यां, सूक्तस्य ऋषेर्नाम, तस्य गोत्रं, सूक्तानां, तदनन्तर्गतमन्त्राणां च देवतायाः निर्देशं, मन्त्राणां छन्दसां क्रमबद्धोल्लेखं च कृतवान्। अनेन प्रकारेण ऋग्वेदस्य विषये आवश्यकसामग्रीसङ्कलनत्वेन ग्रन्थोऽयं विशेषरूपेणोपादेयोऽस्ति।

याजुष-अनुक्रमणी

शुक्लयजुःसर्वानुक्रमसूत्रस्य रचयिता कात्यायन एवाऽस्ति । ग्रन्थेऽस्मिन् पञ्चाध्यायाः सन्ति । एतेषां सूत्राणामर्थावबोधनाय अस्य ग्रन्थस्य भाष्यमपि प्रकाशितमस्ति । अस्य भाष्यस्य रचयिता महायाज्ञिकस्य प्रजापतेः पुत्रो महायाज्ञिकः श्रीदेवोऽस्ति । अस्य परिचयः प्रत्येकमध्यायस्यान्ते प्रदत्तपुष्पिकातो लभते। ग्रन्थेऽस्मिन् माध्यन्दिनसंहितायाः देवतानां, ऋषीणां, छन्दसां च विस्तृतं विवरणं प्रदत्तमस्ति । ग्रन्थारम्भे ऋषेश्छन्दसो ज्ञानस्य महिमा प्रतिपादितः अस्ति । अस्य ज्ञानं विना वेदाध्ययनं मरणमिव कष्टप्रदं भवति -

'अथान्तराश्वगर्त वाऽऽपद्यते स्थाणुं वच्छेति प्रमीयते वा पापीयान् भवति।' १.

अत्र यागविधानस्य निमयः, अनुष्ठानानां च वर्णनं विशेषरूपेण लभते। छन्दसां

Scanned with CamScanner

संपूर्णं जीवनमपि यज्ञमयरूपमेव। सत्य-ज्ञान-तपसाम् अनुष्ठानमेव जीवनस्य स्वरूपं भवति। एतत्सर्वमपि सामवेद ब्राह्मणेषु विद्यन्ते, अनेन पाठेन वयं वेदोक्तमर्थमवगम्य सफलान्तिताः। तदर्थं यत्रंच कुर्मः।

इत्थं पाठेऽस्मिन् उपनिषच्छब्दार्थं तासां वेदगर्भत्वं तत्प्रधानविषयं प्रस्थानत्रय्यां तत्स्थानं तत्संख्यां चाऽवगम्य ईशावास्योपनिषदः केनोपनिषदः कठोपनिषदः प्रश्नोपनिषदश्चेत्येवं क्रमेण चतसृणामुपनिषदां परिचयः प्राप्तः।

एवम्प्रकारैः अस्मिन् प्रथमपाठे वेदानां परिचयः अथर्ववेदस्य परिचयः, श्रौतयज्ञानां वैशिष्ट्यम्, अथर्ववेदस्य विश्वकल्याणाय बहुधा उपयोगित्वानि चेति विषयाः संकलिताः।

## २.११ प्रश्न

Scanned with CamScanner

रत्नद्वयमिदं सकलकाव्यवाङ्.मयमूर्द्धाभिषिक्तं विश्ववाङ्.मयरत्नभूतञ्च। तत्र न कापि संशीतिः। रामायणं हि आदिकाव्यं समुच्यते। अभिजातसंकृतकविताया उद्गमबिन्दुरयं महाग्रंथः। रामायणे रामकथा वर्तते। रामश्चापि कथाया अस्या नायकभूतः समस्तविश्वसंस्कृतेरादर्शभूतः शलाकापुरुषोऽस्ति यो हि मर्यादापुरुषोत्तमशब्दवाच्यः।

रामायणानन्तरं समायाति महाभारतम्। ग्रंथद्वयमिदं क्रमशः महर्षिणा वाल्मीकिना कृष्णद्वैपायनेन च प्रणीतम्। यतो हि प्रणयनकारौ द्वावपि महर्षी, अतएव काव्यद्वयमिदम् आर्षकाव्यमित्युच्यते। सम्प्रत्यनयोः विषये क्रमशः विचार्यते।

## ३.२ रामायणरचनाकाल

भारतीयवाङ्.मये रामायणरचनाकालमभिलक्ष्य विश्वसनीयं प्रमाणमुपलभ्यते-ऽनेकमहापुराणेषु महाभारते च। प्रायेण सर्वत्राप्ययमेवोल्लेखः समवाप्यते यत् चतुर्विंशतितमत्रोतायुगस्य द्वापरयुगस्य च संधिकाले रामायणं प्रणीतं जातं महामुनिना

Scanned with CamScanner

कालमानो भवति अष्टाविंशतिसहस्राधिकसप्रदशलक्षवर्षात्मक:।

एवं हि तुरीयाणां युगानां कालमान: सम्भूय भवति विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षवर्षात्मक: (४३,२०,०००) एतादृश्य एव त्रयोविंशतिमिताश्चतुर्युग्यो व्यतीता: अर्थात् ४३२०००० ??२३ = ९९३६०००० समा: व्यतीता:। सम्प्रति संख्ययाऽनया यदि व्यतीतत्रियुगानां काल:, व्यतीतकलियुगस्यापि ५११५ वर्षात्मक: काल: संयोज्येतां तर्हि सिद्धं भवति यत् अद्यत: १०३२५३११५ (पंचदशाधिकैकशतोरत्रिपंचाशत्सहस्राधिकद्वात्रिंशल्लक्षाधिककदर्शकोटिमितवर्षाणि)

वर्षेभ्य: प्राक् रामायणस्य रचना महामुनिना वाल्मीकिना कृताऽऽसीत्। यद्यपि कालावधिरयं केषाञ्चित् कृतेऽविश्वसनीयोऽपि प्रतीयते परंतु एतत् सर्वमपि प्रामाणिकमेव वर्तते।

रामायणस्य रचनाकारो महर्षिवाल्मीकिरपि रामस्यैव समसामयिको वर्तते। तत्समक्षमेव रामो रावणं निहत्य लंकाविजयञ्च कृत्वाऽयोध्यामुपावर्तते। रामस्य राज्याभिषेकानंतरमेवासौ कथामिमां प्रणीतवान्। अतएव वाल्मीकेरपि समय: सर्वथा प्रमाणपुष्ट एव।

एवं हि ज्ञायते यत् कस्मिंश्चित् संध्याकाले महामुनिर्वाल्मीकि: संध्यासवनाय तमसानद्यास्तटं प्रतस्थे। तावददेव काश्चित् मांसार्थी निषादो व्याधो निशितशरेण कामकेलिलग्नं क्रौञ्चमेकं विव्यधे। सा च क्रौञ्ची अतृत्पतकामोपभोगा निहतं स्वसहचरं मृत्युव्यथां नाटयन्तं दृष्ट्वैव महत्क्रन्दनं कृतवती। तस्या: क्रन्दनं श्रुत्वा सहचरवियोगजन्यविवर्तनञ्च निर्वण्योऽकस्मादेव महर्षेर्वाल्मीकेर्मुखात् शापस्वरोऽयं प्रकटित: -

**मा निषाद प्रतिष्ठां त्वमगम: शाश्वती: समा:।**

**यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम्।।**

तथा हि व्याधं शप्त्वा वालमीकिर्निजाश्रमं प्रत्यावर्तत। परंतु प्रगाढसन्तप्तोऽसौ जात:। वारं वारं चिन्तितवान्-हन्त कस्मान्मयाऽसौ निषाद: शप्त:? स तु मांसभक्षक:। निजोदरपूरणाय पशुपक्षिवधं करोत्येव। को नु तत्र दोष:? स तु निजे व्यवसाय एव निरत: आसीत्। न मयाऽसौ शप्तव्य आसीत्। हा दैव! किमिदं मया कृतम्।

एवं चिन्तयत्येव महामुनौ चतुर्मुखो ब्रह्माऽकस्मादेव समक्षमाययौ प्रोवाच च-महामुने! चिन्ता न कार्या। मत्प्रेरणयैव वाणीयं ते प्रस्फुटाऽभूत्। नाऽयं हृदयशोकोऽन्यथा ग्राह्य:। शोकोऽयमेव ते श्लोकोऽस्ति संजात:। सम्प्रति अनेनैव छंदसा भवान् रघुनंदनस्य रामस्य चरितवर्णनं करोतु।



Scanned with CamScanner

वाल्मीकिः सविनयमूचे - प्रभो! कथमिदं सम्भवति? राघवविषये नाऽहं सम्यक्तया ऽवैमि। इदनीमेवासौ लोकरावणं रावणं निहत्य अयोध्यामुपगतोऽस्ति। व्यतीतघटनास्तु काश्चित् जानामि। तथापि साकल्येन तचचरितमहं नैव वेद्मि। तत्कथं तं महामनसमुपश्चलोकयितु क्षमो भविष्यामि?

परमेष्ठी भूयोऽयाह - महर्षे! श्वः प्रातरेव मम मानसपुत्रो देवर्षिर्नारदो भवंतयुपगम्य राघवविषये महता विस्तरेण वक्ष्यति। अन्यच्च यत्किमप्यवशेक्ष्यते तत्सर्वं ममाशीः प्रभावेण भवदन्तराले स्वतः प्रकाशितं भविष्यति। हे महर्षे! काव्येऽस्मिन् न ते वागनृता भविष्यति। किञ्च यावत् पृथिव्यां वहन्ति नद्यः, यावच्च विलसन्ति महीधराः तावद्रामकथा ते लोकेषु प्रचरिष्यति।

इत्यभिधाय परिसांत्व्य चानतर्हिते पद्मसम्भवे परेद्यरुरेव देवर्षिर्नारदस्समाययौ। तं समभिनन्द्य परिपूज्यापृच्छत् महामुनिः - हे प्रभो! को न्वस्मिन् लोके साम्प्रतं नायकरूपेण प्रतिष्ठापयितुं योग्यः? एवं पृष्टे सति देवर्षिर्नारदो दशरथनंदनस्य रामस्य गुणकदम्बकं श्रावयामास। व्यूढोरस्कस्य महाबाहोः महाधनुर्धरस्य मर्यादापुरुषोमस्य रामस्य सुचरितं विस्तरेण श्रुत्वैव वाल्मीकिः रामकथाप्रपंचने निरतोऽभूत्। सहि षट्काण्डात्मकं चतुर्विंशतिसहस्रश्लोकात्मकं रामायणं पौलस्त्यवधारव्यं प्रणीतवान् प्रणीय च रामस्यैव यमजौ पुत्रौ लवकुशौ ब्रह्मचारिणौ स्वशिष्यौ ग्राहयामास। तौ च कलं जगतुः काव्यमिदं बहुषु अवसरेषु।

## रामायणप्रतिपाद्यम्

रामायणं प्रारभ्यतेऽयोध्यावर्णनेन। महाराजस्य दशरथस्य बलवीर्यपराक्रमादिप्रशं- ... महर्षिणा ऋष्य श्रृंगेण पुत्रेष्टियज्ञः सम्पाद्यते। यज्ञान्ते

गाधिनंदनस्य निर्देशतो लीलयैव पिनाकमुत्तोलयति, सीताञ्च जनकनन्दिनीं परिणयति। अन्येऽपि त्रयो भ्रातरः परिणीतास्तिष्ठेन्ति वैदेहीभगिनीभिस्सह।

तदनन्तरं समायाति रामस्य राज्याभिषेकप्रसंगो यत्र मध्यमराजमहिषी दुर्मतिः कैकयी दास्या मन्थरया शिक्षिता सती प्रत्यावयाभूता तिष्ठति। सा राज्याभिषेकं याचते भरतपक्षे। रामाय चाभिलषति चतुर्दशवर्षात्मकं वनवासम्। रामः प्रतिष्ठते वनं ससीतः सलक्ष्मणश्च। पुत्रवियोगकातरो दशरथोऽपि प्राणांस्त्यजति।

वने रामप्रिया सीता लङ्.कापतिना रावणेनापह्रियते। रामोऽपि सुग्रीवादीन् कपीन् सहायान् विधाय, सेतुं निर्माय सागरं चोल्लंघय तुमुलसङ्.ग्रामे लोकरावणस्य रावणस्य च वधं करोति। ततश्च लंकानृपासने विभीषणं प्रतिष्ठाप्य यशस्वी सन् पुष्पकविमानारुढोऽयोध्यां प्रत्यावर्तत। स च कुलगुरुणा वसिष्ठेन राज्यासने प्रतिष्ठाप्यते। एवं हि प्रवर्तते रामराज्यम्।

सेयं संक्षिप्ता रामकथाऽत्र वर्णिता। परंतु वाल्मीकिमुखान्निर्गता इयमेव रामकथा सहस्रधारतामुपययौ। अध्यात्मकरामायणमिति, कङ्.कणरामायणं मंत्ररामायणमिति च। तत्श्चापि बौद्धकवीनां जैनकवीनां रामायणग्रंथाः। ततश्चापि गद्यपद्याश्रिताः चम्पूमहाकाव्यनाटकादिरूपा रामायणग्रंथाः संस्कृतोपनिबद्धाः। ततश्चापि संस्कृतेतरासु भारतीयभाषासु प्रणीता रामकथात्मकाः ग्रंथाः। अहो को नु क्षमो रामकथावाङ्.मयस्य विस्तारं परिज्ञातुम्। सागरकल्पमिदं वाङ्.मयं रामकथायाः। आकाशवद् विस्तृतं चापि प्रतीयते। यदि गणना क्रियते तर्हि प्रारम्भतः इदानीं यावत् संस्कृते रामकथामवलम्ब्य ५६ महाकाव्यानि ८० खण्डकाव्यानि, ४० नाटकानि विंशतिमितानि च प्रकीर्णानि काव्यानि प्रणीतानि वर्तन्ते। तत्सर्वं मया स्वकीयशोधपत्रेऽन्यत्र (वाल्मीकीयरामकथा-उद्भव एवं विकास, संधानसिंधुनाम्नि शोधप्रबंधे सङ्.कलितोऽयमालेखः) महता विस्तेरण च निरुपितं वर्तते।

अमेरिकादेशस्य विदुषी राइसडेविड विश्ववाङ्.मयस्य त्रीणि कथानकानि प्रशस्ततमानि घुष्यति। प्रथमं तावत् जुलियससीजर-क्लियोपेट्राकथानकं यत् खलु समाश्रयते

Scanned with CamScanner

न वाऽन्यथाऽऽचरति कीर्त्यर्थम्। वस्तुतः तस्य सहजा नैसर्गिका एव व्यवहारास्तं मर्यादा-पुरुषोत्तमं विदधति।

रामोऽस्ति लोकप्रियः। तथापि पितृवचनं समादृत्यासौ राज्यासनं समर्पयति अनुजाय भरताय। भरतेन बहुशः सम्प्रार्थितोऽपि राज्यासनं न स्वीकारोति। सखलु निषादकुलोत्पन्नं गृहमपि सुहृदं मत्वा प्रगाढमुपगूहते। जटायुषं पक्षिजातीयमपि पितृसखायं मत्वा स्वहस्ताभ्यामेव तस्य दाहादिकम् और्ध्वदैहिकं सम्पादयति। महर्षिमतंगो यद्यपि अन्त्यजकुलोत्पन्नस्तथापि तं प्रत्यात्मनः समादरभावं प्रकटयितुं रामस्तदाश्रमं गच्छति, तच्छिष्यां शबरीं च सम्भावयति। वानरराजं सुग्रीवं सङ्.कटग्रस्तमुद्धर्तुं रामः प्रयतते अत्याचारिणं पापकर्माणं वालिनञ्च एकेनैव शरेण निहन्ति।

यद्यपि नृशंसेन रावणेनाऽपहृता सीता। तथापि रणभूमौ निहते सति तस्मिन् तदौर्ध्व-दैहिकं सादरं सम्यक् सम्पादयितुं रामः सौमित्रिं निर्दिशति - मरणान्तं हि वैरमित्यभिधाय। अनेन राघवस्य महासत्त्वता निहङ्.कारता समदर्शित्वञ्चेति दुर्लभा मर्त्यगुणगुणाः प्रत्यक्षमवलोकयितुं शक्यन्ते।

अद्यापि हि दशरथनन्दनो रामः धैर्यसंयमविक्रमपराक्रममैत्रीसख्य-सेवाभावश-रणागतवत्सलतादिगुणानां प्रतीकभूत एवाऽअंगीक्रियते। ईसवीयप्रथमशतकारम्भे यदा भारतीयाः शास्तारः सुवर्णभूमिं कम्बोडियां चम्पां (इण्डोचीन) सुवर्णद्वीपं (जाबा-बाली) च गतवन्तः रामकथा तैः सह तत्रापि गतवती। तेषु सर्वेषु एव क्षेत्रेषु विद्यमाना जनसंस्कृतिः रामायणसंस्कृतिरेव वरीवर्ति। यवद्वीपस्य महाकविर्योगेश्वरः खिस्तनवमशतकस्यान्ते महाराजस्य बलितुंगस्य संरक्षणे स्वकीयं कालजयिकाव्यं रामायणककवीनं प्रणीतवान् यस्मिन् षड्विंशतिमिताः सर्गा २७७८ (अष्टसप्तत्यधिक सप्तशतोत्तरद्विसहस्रमितानि च) पद्यानि सन्ति। कथेयमतीव रुचिरा मधुरा सती भट्टिकाव्यमनुहरति। यथाह भट्टिः-

Scanned with CamScanner

द्वितीयमार्षकाव्यं वर्तते महाभारतम्। ग्रंथरत्नमिदं महर्षिणा कृष्णद्वैपायनेन व्यासेन प्रणीतम्। कथं प्रणीतम्, कियता कालेन प्रणीतम्? इत्यस्मिन् विषये महाभारत एव पद्यमिदमवाप्यते-

**त्रिभिर्वर्षैः सदोत्थायी कृष्णद्वैपयानो मुनिः।**

**महाभारतमाख्यानं कृतवानिदमुत्तमम्।।**

एवं खलु श्रूयते यन्महाभारतयुद्धे समाप्ते सति कदाचित् महाराजेन परीक्षितेन प्रार्थितः सन् वेदव्यासः जयनामकं स्वकाव्यं तं श्रावयामास ८८०० श्लोकात्मकम्।

**जयसंज्ञायाः प्रमाणमवाप्यते ग्रन्थस्य मंगलाचरणे-**

**नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।**

**देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्।।**

जयसंहितायाः श्लोकसंख्या ८८०० (अष्शतोत्तराष्सहस्त्रमिता) आसीदित्युच्यते। परन्त्वन्यत्रा इयं संख्या महाभारतस्य कूटश्लोकानामुक्ता। तद्यथा-

**अष्टौ श्लोकसहस्त्राणि अष्टौ श्लोकशतानि च।**

**अहं वेद्मि शुको वेति सञ्जयो वेत्ति वा न वा।।**

महाभारतयुद्धानन्तरं षट्त्रिंशद्वर्षाणि यावन्महाराजो युधिष्ठिरः पृथ्वीं शासितवान्। ततश्चाऽभिमन्युपुत्राः परीक्षितो राजा बभूव। तस्मिन्नुपरतेऽपि सहसा जन्मेजयस्तत्सूनुः शासनञ्चकार। इदानीं षष्ठिवर्षाणि व्यतीतानि महाभारतसमरस्य। तावदेव जन्मेजयः पितृनिधनविषये श्रुतवान् यत्तक्षको नागो महाविषवैद्येन काश्यपेन निवारितोऽपि सन्,

Scanned with CamScanner

(कथावाचकः) आसीत् [illegible] कथाया गुरुत्वादेव श्रावितवान् येनाऽसौ भारतकथा सम्प्रति लक्षश्लोकात्मिका जाता। कथाया गुरुत्वादेव सम्प्रतीयं भारतकथा महाभारतकथा सञ्जाता। एवं हि पञ्चविंशतिवर्षान्तराल एव अस्याः कथायाः रूपत्रायं सञ्जातम्। तद्यथा-

(क) जयंसंहिता ८८०० श्लोकात्मिका, व्यासेन प्रोक्ता।

(ख) भारतंसंहिता २४००० श्लोकात्मिका, वैशम्पायनप्रोक्ता।

(ग) महाभारतंसंहिता लक्षश्लोकात्मिका, लौमहर्षणिसूतप्रोक्ता।

एवं हि महाभारतमस्ति कथाया बृहत्तमं रूपम्। यतो हि प्रारम्भे कथेयमधर्मोपरि धर्मविजयमभिलक्ष्य प्रणीता अतएव सञ्जाताऽस्याः संज्ञा जयसंहितेति। परन्तु वैशम्पायनो यां कथां श्रावितवान् साऽमसीत् भरतवंशिनां कौरवपाण्डवानां गृहकलहकथा। अतएव भरतानामिदं भारतमिति व्याख्यामहिम्ना ग्रन्थसंज्ञाऽपि सञ्जाता भारतमिति। भगवान् श्रीकृष्णोऽपि भारतशब्देनैव वारं वारं सम्बोध्यत्यर्जुनम्। तद्यथा-

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**

**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।**

एवं हि भरतवंशिनां राज्ञां कथाभूतत्वात् काव्यमिदं भारतं जातम्। गुरुत्वात् विस्-ताराच्चापि तदेव महाभारतमपि ख्यातम्।

## महाभारतकथासमीक्षा

महाभारतं यद्यपि गृहयुद्धाख्यानमात्राम्। तथापि मानवचिन्तितो न कोऽप्येतादृशो विषयः प्रमेयो वा य एतस्मिन् निबद्धो न स्यात्। तत एव विविधसूचनानामयं ग्रन्थो विश्-वकोश एवाऽअंगीकृतः महाभारते स्वयमपि रहस्यमिदं प्रकाशितं वर्तते यत् महाभारते न वर्तते यो विषयः स भारतराष्ट्रे एव न वर्तते। यन्नेहास्ति न तत् क्वचिदिति। यन्न भारते तन्न भारते इति। किञ्च,

**धर्मे अर्थे च कामे च मोक्षे च पुरुषर्षभ।**

**यदिहास्ति तदन्यत्रा यन्नेहास्ति न तत् क्वचित्।।**



Scanned with CamScanner

एवमप्युच्यते यत् महाभारतयुद्धस्य प्रत्यक्षदर्शी अतीन्द्रियज्ञानसम्पन्नः सम्प्राप्तयो-गजप्रत्यक्षसिद्धिः भगवान् कृष्णद्वैपायनः नित्योत्थायी त्रिभिर्वर्षैरिमां कालजयिनीं कथाञ्चकार। स खल्वस्य लेखनार्थं निवेदयामास भगवन्तं गणनायकम्। सोऽपि प्रत्याचष्टे- महर्षे! यदि मल्लेखने न स्यादुपरोधः, प्रत्यवायो, विरामो वा तदैवाऽहं लेखनदायित्वं स्वीकर्तुं क्षमोऽस्मि। विरते खलु सकृत् लेखनप्रवाहेऽहमपि विरतो भविष्यातिम। सम्प्रति महदिदं सङ्.कटमापतितम्। कथायाः वर्णने विरामस्तु क्वाचित्कः अपरिहरणीय एवाऽसीत्। तथापि उपायश्चिन्तितो भगवताव्यासेन। स भूयोऽपि निवेदितवान्- प्रभो! भवत्प्रस्तावः स्वीक्रियते मया। परन्तु ममापि प्रार्थनेयं यत् मन्निर्दिष्टपद्यानामभिप्रायं ज्ञात्वैव भवता तानि लेखनीयानि, नाऽन्यथा। भगवता गणनायकेनाऽपि स्वीकृतोऽयं प्रस्तावः।

अस्याः कथाया वक्ताऽऽसीत् कृष्णद्वैपायनो व्यासः। लेखकश्चासीत् शिवपार्वतीपुत्रो गणेशः। मध्ये मध्ये विश्राममवाप्तुं, विच्छेदभयाक्रान्तस्सन् भगवान् व्यासः कूटश्लोकानपि प्रोवाच। यावद्गणपतिस्तेषामर्थानुसन्धनं कुरुते स्म तावदेव व्यासः कथायाः पुरोवर्तिनमंशं निश्चितवान्। कूटश्लोको यथा विराट्पर्वणि गोहरणप्रसंगे, यथा वा भीष्मशिखण्डीयुद्धप्रसंगे भीष्मवचनमिदम्-

**अर्जुनस्यइमे बाणा नेमे बाणाः शिखण्डिनः।**

**कृन्तन्ति मम गात्राणि माघमासेगवा इव।।**

Scanned with CamScanner

भूतास्तिष्ठन्ति। महाभारतं धर्मस्य विविधस्वरूपं प्रतिपाद्य प्रत्येकमपि दृढतया समर्थयत। न केवलं शाश्वतध्र्म एव जीवनऽनुपालनीयः। क्वचिदधर्मोऽपि धर्म एव जायते। तद्यथा-अनृतं मिथ्याभाषणं भवत्येव पातकमूलम्। तथापि भीष्मपितामहो युधिष्ठिरं बोध्यति-

**न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन् न विवाहकाले।**

**प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि।।**

धर्मस्य सन्त्येव विविधरूपाणि। तत्र शाश्वतो धर्मः यस्त्रिकालसिद्धाऽपरिवर्तनीयश्च भवति।

आपद्धर्मोऽपि धर्मस्यैव रूपम्। महाभारतकालीना नियोगप्रथाऽपि आपद्धर्मस्यैव स्वरूपं प्रथयति। वंशनाशे समुपस्थिते सति अग्रजोऽपि अनुजवधूमुपभुज्य वंशाङ्.कुरं जनयितुमनुमत आसीत्।

वैयक्तिकधर्मोऽपि ध्र्म एवासीत्। यथा पितुः कल्याणार्थं देवव्रत स्याजीव-

षट्महारथिनः सम्भूय घातयन्ति चक्रव्यूह।

इत्येवं महाभारते पदे-पदे जीवनस्य विसंगतयः परिलक्ष्यन्ते। परन्तु वर्तते समेषां समाधनम्। जीवनसमस्यानां समाधनान्वेषणमेव प्रतीयते माहभारतस्य लक्ष्यम्।

रामायणं महाभारतञ्चोभयमपि परवर्तिसंस्कृतसाहित्यस्य स्रोतोभूतम्। प्रायेण सर्वाण्यपि महाकाव्यानि खण्डकाव्यानि रूपकाणि च रामायणाश्रितानि महाभारताश्रितानि वा। भासेनैव कर्णभारमिति दूतवाक्यमिति, पञ्चरात्रामिति, ऊरभंगमिति, दूतघटोत्कचमिति बालचरितमिति च प्रायेण महाभारतकथातः एव संकलितानि वर्तन्ते। भट्टनारायणप्रणीतं वेणीसंहारनाटकं तु संक्षिप्तमहाभारतमेव। राजशेखरप्रणीतं प्रचण्डपाण्डवमपि तत एव गृहीतम्।

रामायणे हि करुणो रसः, इति मनुते स्वयमानन्दवर्धनोऽपि ध्वन्यालोककारः। परन्तु आपाततो युद्धप्रायस्य महाभारतस्यापि अंगीरसः शान्त एवेति प्रतिपादयति भारतमञ्जर्याचार्यक्षेमेन्द्र इत्यहो आश्चर्यम्। वस्तुतः समाप्ते सति वैरमूले युद्धे शान्तिरेवाऽवशिष्यते। अत एव शान्तरस एव महाभारतस्य प्रधनरस इत्यत्रा न कापि विप्रतिपत्तिः।

## ३.४ पुराणवाड्.मयपरिचय

वेदपुराणशब्दौ युग्मकल्पौ प्रतीयते। वेदे समुच्चरिते सत्येव पुराणशब्दः स्वयमेव अध्याहृतो जायते। पुराणे समुच्चारिते सत्यपि वेदस्य पूर्वाभासः परिलक्ष्यत एव। संस्कृतवाड्.मये वेदानन्तरं पुराणानामेव क्रमः समायाति। एवमपि तावदुच्यते यद् वेदानां, लोकल्याणधिया चतुर्धा विभाजनं विधाय, भगवान् कृष्णद्वैपायनो व्यास एव पुराणानि रचयामास। एतानि पुराणानि सन्ति अष्टादशसंख्यकानि। तद्यथा-

**मद्वयं, भद्वयञ्चैव ब्रत्रयं वचतुष्टयम्।**

**अनापल्लिंगकूस्कानि पुराणानि प्रचक्षते।।**

Scanned with CamScanner

यथाऽष्टादश महापुराणानि तथैवाऽष्टादश-उपपुराणानामपि नामानि श्रूयन्ते। एवमेव कानिचन उपोपुराणान्यपि विलसन्तीति महान् विस्तार: पुराणानां संश्रूयते। परंतु प्रश्नोऽयं विचारणीय: प्रतिभाति यत् किं सत्यमेव भगवान् कृष्णद्वैपायन एव समेषामेव पुराणग्रंथानां लेखक: ? किमेतत् संभवत्यपि ?

सम्भावनायास्तु काऽप्यसंभावना नैव वर्तते। यतो हि जन्मजन्मान्तरोपात्तविलक्षणप्रतिभानां सरस्वतीपुत्राणां कृते सर्वमपि सुकरं जायते। भगवान् आदिशंकरोऽपि अष्टवर्षदेशीय एव सकलविद्यापारंगतो जात:। तस्य कृते सर्वमपि शास्त्रज्ञानं हस्तामलककल्पमेवाऽ-सीत्। महाराजो भोजदेवस्तु एकयैव निशया रामायणचम्पूं प्रणिनायेति श्रूयते।

कृष्णद्वैपायनो व्यासोऽपि ज्ञानमय: प्रदीपोऽभिधीयते। अर्थात् तत्कृते चतुर्दशमितमपि विद्यास्थानं प्रकाशितमासीत्। न केवलं भारत एव, ईरानदेशेऽपि तस्य ज्ञानालोकं प्रति महती श्रद्धा आसीदेव। तमधिकृत्य धर्माचार्यो जरथुष्ट्र: सम्राजं गुस्ताष्मं कथयति -

**अकूनू विरहमने व्यास नाम अजहिन्द।**

**आमल दस दाना कि अअकल चुना मस्त।।**

अर्थात् हे राजन्! तस्यैव पवित्र-सिंधु (हिंदू) देशस्य कोऽपि व्यासनामा ब्राह्मण: ऋषि: अस्माकं भूमौ समागत: यो हि महाप्रतिभ: ज्ञानमयप्रदीप आसीत्।

प्रायेण नव्या इतिहासकारा भारतीयाश्चापि व्यासस्य पुराणविषयकं कर्तृत्वं प्रति सन्दिहाना एव परिलक्ष्यन्ते। ते खलु पुराणानां रचनाकालं गुप्तकालोत्तरमेव मन्यन्ते। वस्तुत: पुराणविषयिणी तेषामनास्था पाश्चात्त्यविद्वद्भिरेव प्रदत्ता वर्तते। इतिहासकारो मैकडानेलमहोदयस्तु महर्षि कृष्णद्वैपायनव्यासं काल्पनिकनाममात्रं स्वीकरोति। मन्ये तस्य तदेव मन्तव्यं समादृत्य गतानुगतिका निर्विवेका भारतीयेतिहासकारा अपि पुराणेषु पुराणकारे च अश्रद्दधाना: परिलक्ष्यन्ते। महद् दुर्भाग्यमिदमस्य राष्ट्रस्य।

रामायणं महाभारतञ्चेति काव्यद्वयं भारतस्य प्रामाणिकमैतिह्यं प्रस्तुवत:। तत्राशङ्काया: कोऽप्यवसर एव नास्ति। अस्मिन् विषये सविशेषं किञ्चिदुपस्थाप्यते।

भारतवर्षे ज्यौतिषीयगणना पञ्चागेन क्रियते। पञ्चांगपरम्परेयमतिप्राचीना। तत्र मुखपृष्ठोपर्येव कालिसंवत् अंकितो भवति। कले: प्रादुर्भावदिवसादवे संवदयं प्रचलति। महाराजस्य परीक्षितो राज्यारोहणतिथिमपि संकेतयति कलिसंवत्। इदानीं तावत् का-लिप्रादुर्भावस्य ५११५ वर्षाणि (पञ्चदशाधिकैकेशतोत्तरपञ्चसहस्रमितानि) व्यतीतानि यदि अनया वर्षसंख्यया १२५ वर्षाणि योज्येरन् तर्हि भगवत: श्रीकृष्णस्यजन्मतिथि: (५२४० चत्वारिंशदधिकैद्विशतोत्तरपंचसहस्राणि वर्षाणि) परिज्ञायते। महाभारतकथायां

Scanned with CamScanner

परंतु ततोऽप्यधिकं दुःसहं कष्टं भवति भारतीयेतिहासकाराणां क्षुद्रबुद्धिमवलोक्य यत्तेऽपि भगवन्तं वेदव्यासं प्रामाणिकं न मन्यन्ते।

कलिवर्षगणना विक्रमकालगणनातोऽप्यधिकप्राचीना। किंच, निखिलस्यापि विश्वस्य प्राचीनतमा कालगणना। नात्र कोऽपि संशयः। तथापि पाश्चात्त्यैः सा कालग-णनोपेक्षिता। अनेन भारतीयेहिासस्यावधिः लघुर्जातः। तत्सर्वमासीत् पाश्चात्त्यद्वेषबुद्धेः परिणामः।

साम्प्रतं बिन्दव इमे उल्लेखनीयाः

१. कृष्णद्वैपायनो व्यासः भारतस्येतिहासपुरुषोऽस्ति। स खलु महर्षेः पराशरस्य पुत्रः, शक्तेः पौत्रः ब्रह्मर्षिवशिष्ठस्य च प्रपौत्र आसीत्। स खलु ज्ञानमयप्रदीप आसीत्। तनैव वेदस्य चतुर्धा विभाजनं कृतम्।

२. महर्षिर्वेदव्यासः प्रमुखपुराणानां रचनाकारोऽपि वर्तते। कामं तेन सर्वाण्यपि पुराणानि प्रणीतानि न स्युस्तथापि महापुराणानि तु तेनैव रचितानि। नाऽत्र काऽप्याशंका।

## पुराणानां रचनाकालः पौर्वापर्यंच -

Scanned with CamScanner

भगवतो नंदनंदनस्य भुवनमोहिन्यो लीला नोपवर्णिता:। हरिकथागान विना क्व सुखं, क्व वा मनसि शान्ति: ? हे महर्षे! त्वं तावन्नवं किमपि पुराणं लिख, यत्र भगवतो वासुदेवस्य गुणानुकीर्तनं स्यात्।

देवर्षे: प्रस्तावं शिरसा सन्धार्य भगवान् कृष्णद्वैपायन: अंतिमं पुराणं श्रीमद्भागवतं प्रणीतवान्। तस्य च पुराणस्य दशमस्कन्धेऽसौ भगवतो देवकीनन्दनस्य लीलाप्रचुरं जीवनवृत्तं वर्णितवान्। तद्रचनयैव तस्य मानसोल्लासस्समजनि।

एवं हि श्रीमद्भागवतस्य अन्त: साक्ष्येनैव सिद्धं जायते यत् पुराणं तत् वेदव्यासस्य अंतिमा कृतिवर्तते। अतएव सर्वेषामेव अन्येषां पुराणानां श्रीमद्भागवतपूर्ववर्तित्वं तु स्वयमेव सिद्धम्। इदानीं पौर्वापर्यं विचार्यते पुराणानाम्।

यदि साकल्येन समीक्ष्यते तर्हि पुराणानि बहुविधानि सिद्धयन्ति। तद्यथा-

(क) वैष्णवपुराणानि - मत्स्यपुराणम्, भागवतपुराणम्, विष्णुपुराणम्, वामनपुराणम्, वाराहपुराणम्, कूर्मपुराणम्।

Scanned with CamScanner

**पुराणस्वरूपाववचनम्-**

पुराणशब्दस्य कोऽभिप्रायः? पुराणशब्दः प्राचीनतावाचकः, अतएव व्यतीत-कालसम्बद्धो ग्रंथः प्रत्नवृत्तं या पुराणशब्दवाच्यं भवति। परंतु कैश्चिद् विद्वद्भिः शब्दोऽयमन्यथाऽपि व्याख्यातः। तद्यथा - पुरा यत्र नवं भवतीति पुराणम्। अर्थात् पुराणग्रंथेषु व्यतीतकालघटनाश्चापि नूतना इव प्रकल्प्य लिख्यन्ते।

केचन विद्वांसः पुरा प्राचीनं वृत्तम् अणति वक्तीति पुराणम्। इत्येतादृशी व्याख्या कृता। अत्र अण् धातुः कथने इति प्रयुज्यते। परंत अयमपि प्रश्न उदेति यत् पुराणेषु न केवलं व्यतीतघटनानामेव वर्णनमवाप्यते प्रत्युत भविष्यघटनाया अपि सूचना दीयते। श्रीमद्भागवतपुराण एव द्वादशस्कंधे भाविभूभृतां प्रभूतं विवरणं प्रस्तुतमस्ति। एवं सत्युपर्युक्तनिर्वचनस्य का सार्थकता भविष्यति? किंच प्रत्नवृत्तसम्बद्धं सदपि कथं तद् भविष्यपुराणं भविष्यति? कुत्रखलु तादृशं वृत्तं यद् भविष्यमपि स्यात् पुराणमपि भवेत्। अत्र तु वदतो व्याघातः परिलक्ष्यते संज्ञायामेव।

परंतु तन्न। केचित् विपश्चित्तल्लजाः कथयन्ति यत् पुरेति अव्ययस्योभयी गतिः। पुराशब्दो यथा व्यतीतं व्यनक्ति तथैव भविष्यंचापि। अर्थात् व्यतीतं किल पश्चाद्वर्ति पुरा, अनागतंचाप्यागामि पुरा। एवं तावत् पुराशब्दः, समानरूपेण कालद्वयवाचकस्तिष्ठिति।

Scanned with CamScanner

व्यास एव इदम्प्रथमतयाऽष्टादशपुराणानि प्रणिनाय।

सम्प्रत्युच्यते पुराणानां प्रतिपाद्यविषये। तद्यथोक्तं महाभारते -

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।

बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति।।

अनेन कथनेन इतिहासपुराणयोर्भूमिका सुस्पष्टा जायते। वेदमन्त्रेषु बह्वीनां कथानां गाथानामुखख्यानानां सन्ति सूक्ष्मसंकेताः। महाभारतकारः कथयति यदितिहासग्रंथैः रामायणमहाभारतादिभिः पुराणग्रंथैः श्रीमद्भागवतादिभिश्च ते गूढकथासंकेताः समुप-बृंहणीयाः, विस्तारमापादनीयाः।

एवं हि इतिहासः पुराणंचेत्युभयमपि वेदार्थपरिपूरकं तदनुवर्ति तदवलम्बि वा वाङ्.मयं प्रतीयते।

परंतु यदिदमेव लक्ष्यमुभयोः इतिहासपुराणयोस्तर्हि पृथग्गणना किमर्थं कृता? तच्चिन्त्यमिदं यदितिहासः पुराणंचेत्युभयमप्येकमेव उताहो पृथग् वाङ्.मयम्। तदुच्यते।

वस्तुतः वाङ्.मयं त्रिविधं प्रतिष्ठितं दृश्यते। १. काव्यम् २. इतिहासः, ३. पुराणंच।

Scanned with CamScanner

अपरिस्मन् जन्मन्यहं गोपीचरणरेणुजुषाम् आसां वृन्दावनस्थगुल्मलतौषधीनामेव समवाये क्वचिद् व्रततीभूय क्षुपीभूय वा स्थितः स्याम्।

इदं हि काव्योचितभावनायाः परा काष्ठा। परः प्रकर्षः। रामायणेऽपि एतादृशं ललितकाव्यत्वमिदं पदे-पदे एव परिलक्ष्यते। संध्याकालं वर्णयन् कथयति वाल्मीकिः,

चंचच्चन्द्रकरस्पर्शा हर्षोन्मीलिततारका।

अहो रागवती संध्या जहाति स्वयमम्बरम्।।

अनुरागवती संध्या दिवसस्तत्पुरस्सरः।

अहो दैवगतिः कीदृक् तथापि न समागमः।।

अत्र पद्यद्वये समासोक्ति-विशेषोक्त्यलंकारयोः यादृशं विलक्षणसंविधानकं परिलक्ष्यते तत् श्लाघ्यमेव।

महाभारतेऽपि भूरिश्रवसः निकृत्तबाहुमभिलक्ष्य लिखितं पद्यम् 'अयं स रशनोत्कर्षी पीनस्तनविमर्दनः। नाभ्यूरुजघनस्पर्शीत्यादि' प्रायेगण सर्वैरेवाचार्यैः रसाभासप्रसंगे समुद्धतं दृश्यते। एवं हि पुराणेतिहासकाव्यानां संकीर्णविषयत्वं सर्वथा प्रमाणसिद्धं वर्तते। प्रत्येकं पर्यायेण काव्यमपि वर्तते, ऐतिह्यमपि, पुराणमपि। तथापि पुराणेतिहासयोः किमपि सूक्ष्ममन्तरं तु भवत्येव कविदृष्टेः।

पुराणे तावत् ऐतिह्यतत्त्वं भवति गौणम्। धर्मतत्त्वं भवति प्रधानमेव। परंतु इतिहासग्रंथे ऐतिह्यतत्त्वमेव महीयते, धर्मतत्त्वं भवति गौणम्।

Scanned with CamScanner

इदानीं तावत् श्वेतवाराहकल्पः, वैवस्वत मन्वन्तरम् अष्टाविंशतितमः कलियुगः, तस्य कलियुगस्य चापि प्रथमो हि चरणः प्रवर्तते यस्य ५११५ (पंचदशाधिकशतोत्त-पंचसहस्राणि) वर्षाणि व्यतीतानि सन्ति। एतत् सर्वं पुराणज्ञानेनैवोद्भासितं स्यात्।

श्रीमद्भागवतपुराणे तु स्थलद्वये (द्वितीयस्कंधे १.१०.२, दशमस्कंधे च १०.२२.७-१०) दशलक्षणस्यापि पुराणस्य चर्चा समवाप्यते। तथापि पुराणानां पंचलक्षणान्येव आधारभूतानि मन्यन्ते समेषां पुराणानाम्।

पुराणानां प्रतिपाद्यं विलक्षणमेव प्रतीयते। तेषामवगमे विवेकस्य धैर्यस्य संयमस्य चापेक्षा भवति। यथा तिक्तौषधं शर्करया सहैव ग्राह्यते तथैव पुराणानि हितकरं तत्त्वं विविधैरुपायैः व्याजैर्वा ग्राहयन्ति। क्वचित्कथानां बाह्यस्वरूपमतीव बंधुरम् उच्चावचं

Scanned with CamScanner

रतीयमितिहासं प्रति द्वेषभावग्रस्ता दृश्यन्ते। भारतीया इतिहासलेखनेऽनभिज्ञा आसन्निति कथयतिस्म ए.स्टीननामा कोऽपि पाश्चात्त्य इतिहासकारः। वस्तुतः पुराणनिबद्धमैतिह्यं कथाअंगभूतं सत् क्वचित् हि शिथिलं प्रतीयते। तत एवेदमुच्यते। परंतु पुराणं पूर्णतः इतिहासग्रंथ एव वर्तते। दंडनाम्ना ख्यातं दंडकारण्यम्। उत्कलस्य साम्राज्यं वर्तते उत्कलजनपदः। विशालेन निर्मिता वैशाली, कुशाम्बेन स्थापिता कौशाम्बी, हस्तिना स्थापितं हस्तिनापुरं, महाराजस्य कुरोरेव क्षेत्रं कुरुक्षेत्रं, त्रिभिः पर्वतैः परीतं क्षेत्रमेव कथ्यते त्रिगर्त (सम्प्रति तिगड्.डेत्युच्यते) राज्यम्, महर्षेः भृगोस्तपःस्थलमेव वर्तते भरुच-(भडौंच वा) नगरम् इति शतशः प्रामाणिकसूचनाः पुराणान्येव ददति।

विविधानां देवानां स्तुतयः पुरश्चरणविधयः, कर्मानुष्ठानानि, चित्रकर्म-स्थापत्य-संगीत-मूर्तिकला-नाट्यकला-लेखनकला-शकुनशास्त्र-सामुद्रिक-वृक्षायुर्वेद-शालिहोत्र-गजविद्या-तन्त्रज्यौतिषादिशतशतविषयाणां प्रामाणिकं ज्ञानं सुरक्षितं तिष्ठति पुराणवाड्.मय एव। निखिलमपि विश्वेतिहासं ग्रहान्तररहस्यजातंचापि प्रस्तौति पुराणवाड्.मयम्।

Scanned with CamScanner

केवलं भारतीया एवाऽपितु समग्रस्यापि भूतलस्य भूपाः सम्मिलिता आसन् कौरवपक्षतः पाण्डवपक्षतो वा। तत्रा केचन असुरा, राक्षसा नागा गन्धर्वाश्चापि भागग्रहीतार आसन्। एतत् सर्वं सम्प्रति व्याख्यासापेक्षमेव प्रतीयते।

परन्तु पृथुलकलेवरोऽयमितिहासग्रंथो मावनसमाजस्य कटुयथार्थमुपन्यस्यति।

Scanned with CamScanner

वस्तुत: रामायणमहाभारत एव भारतीयधर्मसंस्कृत्याचारसंहितानां मेरुदण्डभूते।

वेदानन्तरं समायाति पुराणवाङ्.मयम् इत्येव हि भारतीया परंपरा। पुराणं तावद् वेदानामुपवृंहणम् इत्यस्मात्मकारणादपि पुराणं वेदानुवर्ति अंगीक्रियते। पुराणकथाभि: वेदमंत्ररहस्यानि विशदीकृतानि ऋभिभि:। तत्र पुरा प्राचीनं वृत्तम् अणति वक्तीति पुराणं-मत्यर्थस्तु प्रसिद्ध एव। परंतु पुरा अतीतमनागतंचेत्युभयमपि वक्तीत्यपि पुराणमित्यद्भुता व्याख्याऽप्यवलोक्यते। पुराणानां संख्याऽष्टादशोक्ता। तद्यथा-

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।

अनापल्लिंगकूस्कानि पुराणानि प्रचक्षते।।

अष्टादशमितान्येव उपपुराणान्यपि। ततश्चापि औपपुराणानां संख्याविस्तार इत्यहो आश्चर्यम्! एव किल प्रतीयते यद् वेदार्थव्याख्यानरूपाणां पुराणानां समुदय: संहितकाल एव जात:। यथा हि श्रूयते-पुराणं यजुषा सहेति। प्रारंभे तु मुख्यान्येव पुराणानि प्रणीतानि। परंतु पश्चात् पुराणशैलीमवलम्ब्य पुष्कलं साहित्यं प्रणीतं जातम्। आराध्यदेवदृष्ट्या पुराणानि शैवानि, शाक्तानि, वैष्णवानि च कथ्यन्ते। गाणपतानि, सौराणि चापि पुराणानि कानिचित्। परंतु सर्वाण्यपि पुराणानि प्रतिपाद्यत्वेन यद्वर्णयन्ति तस्य संग्रहोऽत्र दृश्यते श्लोके-

सर्गश्च प्रतिसर्गश्च वंशो मन्वतन्राणि च।

वंशानुचरितंचैव पुराणं पंचलक्षणम्।।

भवतु! पुराणानां महत्त्वमनेकदृष्ट्या महीयते। भारतीयमितिहासं ज्ञातुं पुराणमेवैकमात्रं शरणम्। विश्वभूगोलमपि वर्णयन्ति पुराणानि सप्रमाणम्। यद्यपि पुराणानां शैली क्वचिदतिशयोक्तिमिश्रिता गूढा, रहस्यमयी, जटिला च प्रतीयते। परंतु सविवेकं परिशीलितं पुराणं विलक्षणं ज्ञानं प्रददाति। पुराणज्ञानं विना वेदज्ञानं वेदेतरज्ञानमित्युभयमप्यपूर्णं प्रतीयते। तत्सर्वमत्र आलेखे मया सप्रमाणं व्याख्यातम्।

## ३.५ प्रश्न परीक्षते

१. रामायणरचनाकालपरिचय विवृणोति करोति।

२. महाभारतकथाया विकासक्रम विवृणोति करोति।

३. पुराणवाङ्.मयपरिचय व्याख्याति करोति।

❖❖❖



Scanned with CamScanner

# अध्याय:४

## महाकाव्यम् इतिहासश्च

### ४.० प्रस्तावना

एतत् अध्याय उत्तर अध्यायिन् विद्यार्थिन् समर्थ

महाकाव्येन परिकल्पना

महाकाव्यस्य विकास

महाकाव्यलक्षणानि

### ४.१ प्रस्तावना

महाकाव्यम् इति किञ्चन काव्यस्य लक्षणम्। किं काव्यं महाकाव्यम् उच्यते इत्यस्य परिमाणाय एतस्य लक्षणस्य उपयोगो भवति। साहित्यदर्पणादयेषु अनेकेषु ग्रन्थेषु महाकाव्यस्य लक्षणानि वर्णितानि सन्ति।

**परिकल्पना**

महाकाव्येन अष्टाधिकसर्गेषु विभक्तेन भाव्यम् । अत्र हि एको नायकः सुरो वा क्षत्रियः, बहवो वा सद्वंशक्षत्रियाः भूपा नायकाः । नायकेन हि धीरोदात्तप्रकृतिकेन भाव्यम्, शृङ्गारवीरशान्तानामेकोऽङ्गी रसः, अन्ये रसा अंगान्येव, सर्वेऽपि नाटकसन्धयः, वृत्तं त्वैतिहासिकं वा तदितरदापि सज्जनाश्रयं, चतुर्णामेव वर्गाणां साधनं फलं तु तेष्वेक, आशीर्नमस्क्रियां वस्तुनिर्देशो वा प्रारम्भवाक्यं, सतां गुणसंकीर्तनं खलानां निन्दा च, प्रतिसर्गं हि भाविसर्गकथासंसूचकमवसानं, यथायोगं सन्ध्या-सूर्य-इन्दु-रजनी-प्रदोष-ध्वान्त-वासर-प्रातर्मध्याह्नमृगयाशैलः तु वन-सागर-सम्भोग-विप्रलम्भ-मुनि-स्वर्ग-पुराध्वररणप्रयाणोपयममन्त्रपुत्रोदयादयः साङ्गोपाङ्गं वर्णनीयाः । अस्य नाम वृत्तस्य कवेर्नायकस्य वा नाम्ना नाम, सर्गनाम तु सर्गोपादेयकथयैव । एतादृशलक्षणलक्षितं हि महाकाव्यं सौभाग्याय भवति।

### ४.१ इतिहासः

संस्कृतसाहित्यजगति महाकाव्यस्य विकासः कदाप्रभृत्यभूदिति तु न पार्यते निश्चयेन वक्तुम् । एतावदेव निश्चितं यद् वाल्मीकिः हि लौकिकसंस्कृतसाहित्यस्य

Scanned with CamScanner

। अत्र हि नायको धीरोदात्तगुणान्वितः सद्वंशक्षत्रियो रामः । अत्र हि वीरो मुख्यो रसः शृङ्गारादयश्चान्येऽङ्गानि फलश्चास्य धर्मः । वस्तुनिर्देश एवास्य प्रारम्भवाक्यं यथा -

कोशलो नाम मुदितः स्फीतो जनपदो महान्।

निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ।।

आदिमहाकाव्यमिदं -

धर्म्यं यशस्यमायुष्य राज्ञाञ्च विजयावहम्।

आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम्।। इति ।।

धर्मो यथा -

सामं दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ ।

पार्थिवानां गुणा राजन् दण्डश्चाप्यपकारिषु।।

राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः।।

नास्तिकः परिवेत्ता च सर्वे निरयगामिनः।।

अर्थो यथा - भूमिहिरण्यं रूपञ्च विग्रहे कारणानि च।

कामो यथा - ततः पर्वतशृङ्गाणि वनानि विविधानि च ।

पश्यन् सह मया कामी दण्डवान् विचरिष्यसि।।

ऋतुवर्णनं यथा हेमन्तस्य -

वसतस्तस्य तु सुखं राघवस्य महात्मनः।

शरद्व्ययाये हेमन्त ऋतुरिष्टः प्रवर्तते।।

अयं स कालः सम्प्राप्तः प्रियो यस्ते प्रियंवद।

अलङ्कृत इवाभाति येन संवत्सरः शुभः।।

नीहारपरुषो लोकः पृथिवी सस्यमालिनी।

जलान्यनुपयोग्यानि सुभगो हव्यवाहनः ।।

सेवमाने दिशं सूर्ये दिशमन्तकसेविताम्।

विहीनतिलकेव स्त्री नोत्तरा दिक् प्रकाशते।।

प्रकृत्या हिम शाढ्यो दूरसूर्यश्च साम्प्रतम्।



Scanned with CamScanner

यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः।।
रविसङ्क्रान्तसौभाग्यस्तुषारारुणमण्डलः।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।।
अवश्यायतमीनद्धा नीहारतमसावृताः।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः।।

यद्यपि महाभारतेऽपि काव्यात्मकत्वं विलसत्येव तथापि न तथा तत्र काव्यलक्षणं घटते यथा रामायणे । तत्र हि बहवो नायकाः, वस्तुनिर्देश एव प्रारम्भवाक्यं वीरो हि मुख्यो रसो जये शान्तो महाभारते । फलञ्चास्य धर्म एव । अत्र हि पूर्वभागे युधिष्ठिराभिषेकान्ता कथा वीररसप्रधाना, उत्तरभागं समावेश्य तु शान्तरसस्य प्राधान्यम् । रामायणेऽपि पूर्वकाण्डपर्यन्ता कथा वीररसप्रधाना उत्तरकाण्डं समावेश्य तु करुणरसस्य प्राधान्यम् ।

संस्कृतजगतः महाकाव्येषु महाभारतानन्तरं जाम्बवतीविनयं समुदेति । इदं उच्यते यत्, संस्कृतकाव्यस्य उदयस्तु प्रशान्तपावने तपोवनेऽजायत, किन्तु तस्य विकासो हि राज्ञां प्रासादेष्वेव समभवदुपरतञ्च तद्राजप्रासादानां विनाशेन सहैव इति। कथ्यते हि पाणिनेः उदयाय प्रद्योतस्य नन्दिवर्द्धनस्य, वररुचेरुदये प्रद्योतस्यैव नन्दिनः, पतञ्जलेरुदयाय शुङ्गस्य पुष्यमित्रस्य, भासस्योदये राजसिंहस्य, कालिदासस्योत्कर्षाय विक्रमस्य, अश्वघोषोदये कनिकस्य, भारवेरुत्कर्षाय पुलकेशिद्वितीयस्य विष्णुवर्द्धनस्य, भट्टरुत्कर्षाय श्रीधरनरेन्द्रस्य, बाणस्योदये हर्षवर्द्धनस्य, माघस्योदयाय भोजाख्यस्य कस्यचिद् गुर्जरेश्वरस्य, रत्नाकरस्यावस्थानेऽवन्तिवर्मणः काश्मीरकस्य, श्रीहर्षस्योदये जयचन्द्रस्य कान्यकुब्जेश्वरस्य, विह्लणस्योदये चालुक्यस्य विक्रमादित्यस्य, जगन्नाथोदयाय शाहजहानस्य भूमिका दरीदृश्यते। वस्तुतस्तु कवयो हि द्विविधोद्देश्यपूर्तये राज्ञ आश्रयन्ते स्म । प्रथमं तु तेषां राजाश्रयेणाजीविकासमस्या समाहिता भवति स्म । अपरञ्च, तत्र तेषां ग्रन्थपरीक्षका अपि सुलभा भवन्ति स्म । यथा स्मरति राजशेखरः "श्रूयते हि पाटलिपुत्रे

Scanned with CamScanner

प्रहरकमपनीय स्वं निदिद्रासतोच्चैः प्रतिपदमुपहूतः केनचिज्जागृहीति।

मुहुरविशदवर्णां निद्रया शून्यशून्यां दददपि गिरमन्तर्बुध्यते नो मनुष्यः।।

वासः खण्डमिदं प्रयच्छ यदि वा स्वाङ्के गृहाणार्भकं

रिक्तं भूतलमत्र नाथ भवतः पृष्ठे पलालोच्चयः।

दम्पत्योरिति जल्पितं निशि यदा चौरः प्रविष्टस्तदा

लब्धं कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः।।

संस्कृतकाव्ये पाण्डित्यप्रदर्शनापेक्षया रसबन्धस्यैवाध्यवसायो बहुधा प्रवर्तितो दृश्यते । यद्यपि कालिदासापरवर्तिनो हि कवयो ज्ञानगरिमाणमपि स्वकाव्यविषयत्वेन ग्रथ्नन्ति स्म, तथापि तत्रापि रसापेक्षा तु नैव कथमपि क्षीणा वोपेक्षिता दृश्यते । नैषध-ीयचरिते ज्ञानगरिमा सर्वातिशायित्वेनान्तर्लीनो दृश्यते, तथापि तत्र रसपेशलता सर्वत्र विलसत्येव । न केवलं काव्यसामान्य एवापितु शास्त्रकाव्येष्वपि येषां हि प्रधानमुद्देश्यं व्याकरणशिक्षणमेव भवति रसपेशलतापेक्षितैव दृश्यते ।

सामान्यतः शृङ्गारवीरकरुणशान्तेष्वन्यतम एव रसः काव्यस्याङ्गित्वेन स्वीकृतोऽन्ये तु अङ्गरूपमात्रमेव । तत्रापि महाकाव्ये प्रायो वीरो वा शान्त एव सम्मतः।

## ४.१ महाकाव्यलक्षणानि

साहित्यदर्पणानुसारम्

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।।३१५।।

सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।

एकवंशभवा भूपाः कुलजा बहवोऽपि वा।।३१६।।

शृङ्गारवीरशान्तनामेकोऽङ्गी रस इष्यते।।

अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसंधयः।।३१७।।



Scanned with CamScanner

इतिहासोद्भवं वृत्तमन्यद् वा सज्जनाश्रयम्।।

चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्।।३१८।।

आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।।

क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्।।३१९

एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।।

नातिस्व ल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।।३२०।।

नानावृत्तमयः क्वापि सर्गः कश्चन् दृश्यते।

सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।।३२१।।

सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।

प्रातर्मध्याह्नमृगयारात्रिवनसागराः।३२२।।

संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।।

रणप्रयाणो यज्ञम न्त्रपुत्रोदयादयः।।३२३।।

वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।

कर्वेवृत्तस्य वा नाम्ना नायकस्यान्यतरस्य वा।३२४।।

नामास्य सर्गोपादेयकथया सर्गनाम तु।।ड५.

अर्थात् -

**प्रमुखानि -**

१. महाकाव्यस्य कथा सर्गेषु विभक्ता भवति।

२. अस्य नायकः अनेकाः देवताः अथवा धीरोदात्तगुणैः युक्ताः अनेके उच्च-कुलोत्पन्नाः क्षत्रियाः भवेयुः। एकस्मिन् वंशे समुद्भूताः अनेके नायकाः अपि अस्य नायकाः भवितुम् अर्हन्ति।

३. एतस्मिन् शृङ्गारः, वीरः, शान्तः इत्येतेषु त्रिषु रसेषु कश्चन एकः रसः प्रधानो भवेत्, अन्ये च रसाः तस्य रसस्य सहायकाः स्युः।

**गौणानि -**

४. नाटकस्य सर्वाः सन्धयः (मुख-प्रतिमुख-गर्भ-विमर्श-उपसंहृतयः) भवेयुः।

५. काव्यस्य कथानकः ऐतिहासिको भवति। यदि ऐतिहासिकः नास्ति, तर्हि



Scanned with CamScanner

७. एतस्य आरम्भ नमस्कारस्य, आशीर्वचनस्य, मुख्यकथावस्तोः च सङ्केतरूपेण निरूपकं मङ्गलाचरणं भवेत्।

८. एतस्मिन् प्रसङ्गानुसारं दुष्टानां निन्दा, सज्जनानां च प्रशंसा भवेत्।

९. एतस्मिन् सर्गाणां सङ्ख्या अष्टतः अधिका, तेषां सर्गाणाम् आकारश्च अतीव लघुः न भवेत्। प्रायः प्रत्येकं सर्गे समानस्य छन्दसः प्रयोगः भवेत्। सर्गस्य अन्ते छन्द-परिवर्तनम् उचितं मन्यते। कुत्रचित् सर्गेषु विविधानि छन्दांसि प्रयुक्तानि दरीदृश्यन्ते। प्रत्येकं सर्गस्य अन्ते आगामिनः सर्गस्य कथावस्तोः सूचना भवेत्।

१०. एतस्मिन् सन्ध्या, सूर्यः, चन्द्रः, रात्रिः, प्रदोषः, अन्धकारः, दिनं, प्रातःकालः, मध्याह्नः, मृगया (आखेटः), ऋतुः, वनं, समुद्रः, मुनिः, स्वर्गं, नगरं, यज्ञः, युद्धः, यात्रा, विवाहः, मन्त्रः, पुत्रः, अभ्युदयः इत्यादीनां यथावसरे साङ्गोपाङ्गं वर्णनं भवेत्।

११. महाकाव्यस्य नामकरणं कवेः, कथावस्तोः, नायकस्य उत कस्यचित् अन्यचरित्रस्य नाम्ना भवेत्। सर्गाणां नाम सर्गगतकथायाः आधारेण भवेत्।

एवं प्रायः प्रत्येकं शास्त्रकाराः स्वस्य समये उपलब्धमहाकाव्यानाम् आधारेण महाकाव्यस्य लक्षणानां विधानं कृतवन्तः। परन्तु अधिकांशः आधुनिकविचारकाः विश्वनाथस्य विचारान् प्रामाणिकत्वेन अङ्गीकुर्वन्ति। परवर्तिमहाकाव्येषु तु विश्वनाथस्य मतम् अधिकाधिकं ग्राह्यं मन्यते। गौणानि लक्षणानि क्वचिद् व्यभिचरन्ति। यथा -

१ हरविजयकाव्ये ५० सर्गाः सन्ति।

२ नैषधस्य कतिपयसर्गेषु द्विशताधिकानि पद्यानि विद्यन्ते ।

३ भट्टिकाव्यस्य प्रथमे सर्गे २७ पद्यानि सन्ति।

## ४.४ पचमहाकाव्यानि।

कवयतीति कविः, तस्य कर्म काव्यम्। एतत् काव्यं गद्य—पद्य—मिश्रभेदेन त्रिविधं भवति। तत्रा पद्यस्य बहवः भेदाः सन्ति। तेषु अन्यतमं भवति महाकाव्यम्। महाकाव्यमधिकृत्य ईशानसंहितायात् एवमुंक्त भवति—

अष्टसर्गात्रा तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम्।

Scanned with CamScanner

प्रसिद्धालङ्कारिकेण दण्डिमहाशयेन स्वस्य काव्यादर्शस्य प्रथमपरिच्छेदे महाकाव्यस्य समग्रं लक्षणम् एवमुक्तम्—

सर्वबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।

आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्।।

इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।

चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्।।

नगरार्णवशैलर्त्तुचन्द्रार्कोदयवर्णनैः।

उद्यान सलिल क्रीडा मधुपानरतोत्सवैः।।

विप्रलमभैर्विवाहैश्च कुमारोदय वर्णनैः।

मन्त्रादूतप्रयाणाजिनायकाभ्युदयैरपि।।

अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम्।

सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः।।

सर्वत्रा भित्राावृत्तान्तैरूपेतं लोकरज्जकम्।

काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति।। इति ।

महाकाव्यानि सर्गयुक्तानि भवेयुः। तेषाम् आरम्भे आशीर्वादपद्यं वा, नमस्क्रियापद्यं वा, वस्तुनिर्देशपद्यं वा कर्तव्यम्। नगरस्य, समुद्रस्य, पर्वतस्य, ऋतूनां, सूर्यचन्द्रयोः उदयस्य च वर्णनं करणीयम्। उद्यानं, जलक्रीडा, मधुपानं, सम्भोगविप्रलम्भशृङ्गारौ, विवाहः, पुत्राजन्म, मन्त्राः, दूतः विजययात्रा, युद्धः, नायकोदयः—इत्येतेषां वर्णनैः युक्तानि भवेयुः। अत्रा रसभाववृत्तसन्ध्यादयश्च अवश्यं करणीयः। एतया रीत्या निर्मितानि महाकाव्यानि कल्पावसानपर्यन्तस्थायीनि जायन्ते।

संस्कृतकाव्यप्रपचे प्रचलितानां महाकाव्यानां मध्ये पचमहाकाव्यानि प्रसिद्धानि भवन्ति। तानि यथाा —

१. कालिदासस्य रधुवंशः।

२.कलिदासस्य कुमारसम्भवम्।

३.भारवेः किरातार्जुनीयम्।



Scanned with CamScanner

अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् इति त्रीणि नाटकानि च विरचितानि।

संस्कृतसाहित्ये वर्तमानेषु पचमहाकाव्येषु रघुवंशः प्रथमस्थानमलङ्करोति। तत्रा एकोनविंशतिसर्गाः सन्ति। कालिदासस्य उपमाप्रयोगस्य सुप्रसिद्धानि उदाहरणानि अस्मिन् काव्ये द्रष्टुं शक्यन्ते। ‘दीपशिखा कालिदासः‘ इति प्रसिद्धोक्ते‘ उदाहरणं रघुवंशात् उद्धृतम् एव। अलङ्कारसंयोजने, प्रकृतिसौन्दर्यस्य वर्णनायां, ललितपदविन्यासे च कालिदासः अतीव वैदग्ध्यं प्रकटितवान्।

रघुवंशमहाकाव्यं वागर्थौ इव मिलितयोः पार्वतीपरमेश्वरयोः वन्दनया एव आरभते। अत्रा वंशस्थापकस्य रघो‘ पितुः दिलीपमहाराजस्य कथायाः आरभ्य अग्निवर्णपर्यन्ते-कोनत्रिंशन्महाराजानां कथा अतिमानेहररीत्या वर्ण्यते। तत्रात्य आदिमसप्तदशसर्गेषु दिलीपादारभ्य अतिथिपर्यन्तसप्तमहाराजानां कथा विस्तरेण प्रतिपाद्यते। अष्टादशसर्गे

Scanned with CamScanner

उपवर्णिता। अष्टमसर्गपर्यन्तमेव इदं काव्यं कालिदासेन विनिर्मितमिति बहूनां पण्डितानां मतम्। किंच कालिदासकृतीनां व्याख्यात्रा मल्लिनाथेन अष्टमसर्गपर्यन्तमेव व्याख्याते। किन्तु सप्तदशसर्गयुक्तकुमारसम्भवं महाकाव्यं। कालिदासविरचितम् अद्य उपलभ्यते।

**किरातार्जुनीयम्**

संस्कृतसाहित्ये अलङ्कृतशैल्याः प्रवर्तकस्यापि भारवेः ध्यानं विशेषरूपेण अर्थगौरवे स्थितम्। अत एव 'भारवेरर्थगौरवम्' इति लोकोक्तिः अत्यन्तख्यातिं प्राप्ता। कविवरः भारविः विपुलान् ललितेषु शब्देषु सन्निवेश्य स्वस्य काव्यकुशलतां प्रकटीकरोति। भारवेः जीवनकालमधिकृत्य विभिन्नमतानि सन्ति। तथापि सः क्रिः व. षष्ठशतके जीवनमधारयदिति विद्वांसः मन्यन्ते।

सर्वविधलक्षणयुक्ते किरातार्जुनीयमहाकाव्ये अष्टादशसर्गाः सन्ति। महाभारतस्य वनपर्वादुद्धृतः अर्जुनस्य पाशुपतास्त्राप्राप्तिवृत्तान्तः अस्य इतिवृत्तम्। द्यूते पराजिताः युधिष्ठिरादयः वनवासपूर्त्यर्थं द्वैतवनं प्राप्तवन्तः। तत्रास्थाः ते दुर्योधनवृत्तान्तं विप्रवेषध्-ारिणः कस्मच्चित् किरातदूतात् ज्ञात्वा दुर्योधनं प्रति युद्धं कर्तुं निश्चयं कुर्वन्ति। तदर्थं व्यासनिर्देशानुसारं अर्जुनः शिवात् पाशुपतास्त्रालाभाय हिमालये घोरतपः कुर्तम् आरब्धवान्। अर्जुनं परीक्षितुं शिवः किरातवेषेण तत्रा आगच्छति। शूकरवधमधिकृत्य

कपर्वतस्य षट्ऋतूनां, जलक्रिडायाः, प्रभातस्य, यमुनानद्याश्च वर्णनं दृश्यते। अनन्तरं कृष्णपाण्डवसमागमः, श्रीकृष्णस्य नगरप्रवेशः, शिशुपालस्य क्रोधः, युद्धाय सन्नद्धता, दूतसंवादः, प्रयाणं, युद्धम्, अन्तिमे शिशुपालस्य वधः च माघेन अतिमनोहररीत्या उपवर्णिताः। नवनवशब्दानां प्रयोबाहुल्येन 'नवसर्गे गते माघे नवशब्दो न विद्यते' इति लोकोक्तिः अतिशयेन प्रचलिता।

**नैषधीयचरितम्**

नैषधीरचरितमहाकाव्यस्य कर्ता श्रीहर्षः भवति। सः कान्यकुब्जाधीश्वरयोः विजयचन्द्रजयचन्द्रयोः सभापडितः आसीत्। तस्य जीवनकालः द्वादशशतकं भवति। तस्य पिता हीरः माता मामल्लदेवी च भवति।

पचमहाकाव्येषु प्रौढं श्रेष्ठं च भवति नैषधीयचरितम्। तत्रा द्वाविंशतिसर्गाः सन्ति। अस्य इतिवृत्तं महाभारतस्य नलोपाख्यानात् स्वीकृतमेव। नलश्रीवर्णनादारब्धमिदं महाकाव्यं नलदमयन्त्योः सुखसङ्गमं प्राप्य विश्राम्यति। तत्रा प्रथमे दमयन्त्याः स्मृत्या विहरन् नलः एकं स्वर्णमयं हंसं पश्यति, तं गृह्णाति च। हंसः स्वामवस्थां निवेद्य मोचनं प्रार्थयति। राज्ञः प्रीत्यर्थं हंसः विदर्भानगरीं गत्वा तस्य अनुरागं दमयन्तीं प्रति ज्ञापयति। किन्तु तत्समये विदर्भराजेन दमयन्त्याः स्वयंवरसभा आयुज्यते। यद्यपि तत्रा चत्वारः दिक्पालाः नलरूपं धृत्वा आगच्छन्ति, तथापि दमयन्त्याः नलं प्रति अनुरागं ज्ञात्वा ते स्वस्वरूपाण्येव गृह्णन्ति। ततः दमयन्ती नलं स्वयंवरजा विभूषयति। अथ ईर्ष्यया कलिः नलं प्रविश्य तं विरूपयति। अन्ते लब्धस्वरूपेण नलेन सह दमयन्त्याः सुखसङ्गमो भवति च।

अस्य काव्यस्य शैली, वर्णनारीतिः, पदानां प्रयोगाश्च अतिक्लिष्टं भवति। एवं-कृतवैशिष्ट्यात् एवमुच्यते 'नैषधं विद्वदौषधम्' इति। काव्यानुशीलनार्थं साहित्यपठितृभिः उपयुक्तः आदिग्रन्थो भवति नैषधीयचरितम्। अत एव उक्तम् 'उदिते नैषधे काव्ये क्व माघः क्व च भारविः' इति।

**इतराणि महाकाव्यानि**

१.बुद्धचरितम् — क्रैस्तवीयस्य एकशतकस्य उत्तरार्धे निवसन् अश्वघोषः कनिष्कसभाङ्गः आसीत्। सुवर्णाक्षीपुत्राः सः बौद्धश्च भवति। तेन बुद्धचरितम्, सौन्दरनन्दम् इति काव्यद्वयं, शारीपुत्राप्रकरणं च विरचितम्।

प्रसिद्धीकृते बुद्धचरिते त्रायोदशसर्गाः सन्ति। किन्तु चीनपाठे अष्टविंशतिसर्गाः सन्ति इति श्रूयते। बौद्धेन संस्कृते विरचितं प्रथमं महाकाव्यं भवति बुद्धचरितम्। श्रीबुद्धस्य

Scanned with CamScanner

२.सौन्दरनन्दम् — अष्टादशसर्गयुक्ते अस्मिन् काव्ये श्रीबुद्धस्य अर्धसोदरस्य नन्दस्य जीवनचरितं पगतिपादयति। नन्दस्य पत्नीं प्रति स्नेहः, बौद्धधर्मस्वीकारे विमुखता, बुद्धशिष्येण आनन्देन नन्दस्य परिवर्तनं, नन्दपत्न्याः विलापः इत्यादयः अत्रा उपवर्णितः।

३.सेतुबन्धम् — सेतुबन्धस्य कर्ता प्रवरसेनः भवति। हर्षचरितस्य आमुखे बाणः प्रवरसेनम् एवं स्मृतवान्—

कीर्तिः प्रवरसेनस्य प्रयाता कुमुदोज्ज्वला।

सागरस्य परं पारं कपिसेनेव सेतुना।। इति।।

अस्मात् श्लोकसूचनात् प्रवरसेनस्य जीवनकालः क्रि. व. पचशतकमिति ज्ञातुं शक्यते।

सेतुबन्धं महाकाव्यं रावणवधम् अथवा सेतुकाव्यम् इति नाम्नापि विश्रुतम्। प्राकृतभाषायं विलिखिते अस्मिन् काव्ये रामायणकथा विस्तरेण अतिमनोहररीत्या प्रतिपाद्यते।

४. पद्यचूडामणिः — बुद्धघोषेण विरचितं महाकाव्यं भवति पद्यचूडामणिः सः क्रि. व. पचशतके जीवनमधारयदिति विद्वांसैः मन्यन्ते। अस्मिन् महाकाव्ये दशसर्गाः सन्ति।

५.जानकीहरणम्— जानकीहरणस्य कर्ता कुमारदासः भवति। क्रि. व. षष्ठशतकस्य पूर्वार्धे निवसन् सिलोणराजा कुमारदासः एव भवति अस्य कर्ता इति केषाचनपण्डितानां मतम्। सः सम्यग्रीत्या कालिदासं अनुकरोति इति जानकीहरणपठनात् ज्ञातुं शक्यते। तत्रा विंशतिसर्गाः सन्ति। रामायणकथा—प्रतिपादके अस्मिन् काव्ये काशिकावृत्त्यनुसाराः व्याकरणविशेषाः अपि द्रष्टुं शक्यन्ते।

६.भट्टिकाव्यम् — भट्टिः कि. व. सप्तशतके जीवनमधारयत् इति विद्वांसैः मन्यन्ते। रावणवधो नाम महाकाव्यस्य कर्ता भवति भट्टिः। भट्टिना विरचितत्वात् एतत् महाकाव्यं भट्टिकाव्यम् इति प्रसिद्धम्। तत्रा द्वाविंशतिसर्गाः सन्ति। तत्रा रामायणकथा विस्तरेण प्रतिपाद्यते।

७. गौडवहो — क्रि. व. अष्टशतके निवसन् वाक्पतिराजः कानौज्देशस्य महा-राजस्य यशोवर्मणः सभापण्डितः आसीत्। तेन गौडवहो इति प्राकृतमहाकाव्यं मधुमथन विजयं च विरचितम्। तयोः मधुमथनविजयम् अधुना नोपलभ्यते। गौडवहोमहाकाव्ये यशोवर्ममहाराजस्य गौडराजकुमारं प्रति विजयः विस्तरेण ललितपदविन्यासेन उपन्यस्य-ते।

८.धर्मशर्माभ्युदयम् — धर्मशर्माभ्युदयस्य कर्ता हरिश्चन्द्रः भवति। सः नवमशत-

Scanned with CamScanner

१ २ . नवसाहसाङ्कचरितम् — नवसाहसाङ्कचरितस्य कर्ता पद्मगुप्तः भवति। सः परिमलः इति नाम्नापि प्रस्तूयते। सः क्रि. व. एकादशशतके जीवनमकरोत्। सः धारादेशस्य सिन्धुराजस्य सभापण्डितः आसीत्। सिन्धुराजस्य 'नवसाहसाङ्कः' इति बिरूदमस्ति। तस्य निर्देशानुसारमेव पद्मगुप्तः एतत्काव्यं विरचितवान्।

१ ३ . विक्रमाङ्कदेवचरितम् — बिल्हणेन विरचितं महाकाव्यं भवति विक्रमाङ्-

Scanned with CamScanner

२०. कुमारपालचरितम् — हेमचन्द्रेण विरचितं काव्यं भवति कुमारपालचरितम्। तस्य कालः क्रि. व. द्वादशशतकमिति श्रूयते। इदं काव्यम् ऐतिहासिककाव्येषु अन्यतमत्वेन पण्डितैः गण्यते।

२१. श्रीकण्ठचरितम् — अस्य कर्ता मङ्खकः भवति। सः क्रि. व. द्वादश-शतकमध्ये जीवनमकरोत्। मङ्खकः अलङ्कारसर्वस्वस्य कर्तुः रुय्यकस्य शिष्यः आसीत्। पचविंशतिसर्गैर्युक्ते श्रीकण्ठचरितम् शिवस्य त्रिपुरदहनं विस्तरेण प्रतिपाद्यते।

२२ण् राघवपाण्डवीयम् — कविराजेन विरचितं महाकाव्यं भवति राघव-पाण्डवीयम्। सः क्रिः व. द्वादशशतके जीवनमधारयदिति ए. बि. कीथ् महाशयस्य

Scanned with CamScanner

२८. सहृदयानन्दम् — अस्य काव्यस्य कर्ता कृष्णानन्दः भवति। अस्मिन् काव्ये पचदशसर्गाः सन्ति। अत्रा नलकथा ललितपदविन्यासेन अलङ्कारप्रयोगेण च उपन्यस्यते।

२९. मधुराविजयम् — अस्य कर्त्री गङ्गादेवी भवति। तस्याः जीवनकालः क्रि. व. चतुर्दशशतकमासीत्। विजयनगरस्य राज्ञः कम्पणस्य कथा अस्मिन् काव्ये विस्तरेण प्रतिपाद्यते।

३०.श्रीकृष्णविलासम् — सुकुमारकविविरचितं महाकाव्यं भवति श्रीकृष्णविलासम्। तस्य कालः क्रि. व. पचदशशतकमिति विद्वांसैः मन्यते। द्वादशसर्गैर्युक्ते

Scanned with CamScanner

३८. पतञ्जलिचरितम् — (अष्टसर्गाः) रामभद्रदीक्षितः (अष्टादशशतकम्)।

## ४.५ उपसंहार:

महाकाव्येन अष्टाधिकसर्गेषु विभक्तेन भाव्यम् । अत्र हि एको नायकः सुरो वा क्षत्रियः, बहवो वा सद्वंशक्षत्रियाः भूपा नायकाः । नायकेन हि धीरोदात्तप्रकृतिकेन भाव्यम्, शृङ्गारवीरशान्तानामेकोऽङ्गी रसः, अन्ये रसा अंगान्येव, सर्वेऽपि नाटकसन्धयः, वृत्तं त्वैतिहासिकं वा तदितरदापि सज्जनाश्रयं, चतुर्णामेव वर्गाणां साधनं फलं तु तेष्वेक, आशीर्नमस्क्रियां वस्तुनिर्देशो वा प्रारम्भवाक्यं, सतां गुणसंकीर्तनं खलानां निन्दा च, प्रतिसर्गं हि भाविसर्गकथासंसूचकमवसानं, यथायोगं सन्ध्या-सूर्य-इन्दु-रजनी-प्रदोष-ध्वान्त-वासर-प्रातर्मध्याह्नमृगयाशैलः तु वन-सागर-सम्भोग-विप्रलम्भ-मुनि-स्वर्ग-पुराध्वररणप्रयाणोपयममन्त्रपुत्रोदयादयः साङ्गोपाङ्गं वर्णनीयाः । अस्य नाम वृत्तस्य कवेर्नायकस्य वा नाम्ना नाम, सर्गनाम तु सर्गोपादेयकथयैव । एतादृशलक्षणलक्षितं हि महाकाव्यं सौभाग्याय भवति।

कवयतीति कविः, तस्य कर्म काव्यम्। एतत् काव्यं गद्य—पद्य—मिश्रभेदेन त्रिविधं भवति। तत्रा पद्यस्य बहवः भेदाः सन्ति। तेषु अन्यतमं भवति महाकाव्यम्। महाकाव्यानि सर्गयुक्तानि भवेयुः। तेषाम् आरम्भे आशीर्वादपद्यं वा, नमस्क्रियापद्यं वा, वस्तुनिर्देशपद्यं वा कर्तव्यम्। नगरस्य, समुद्रस्य, पर्वतस्य, ऋतूनां, सूर्यचन्द्रयोः उदयस्य च वर्णनं करणीयम्। उद्यानं, जलक्रीडा, मधुपानं, सम्भोगविप्रलम्भशृङ्गारौ, विवाहः, पुत्राजन्म, मन्त्राः, दूतः विजययात्रा, युद्धः, नायकोदयः—इत्येतेषां वर्णनैः युक्तानि भवेयुः। अत्रा रसभाववृत्तसन्ध्यादयश्च अवश्यं करणीयः। एतया रीत्या निर्मितानि महाकाव्यानि कल्पावसानपर्यन्तस्थायीनि जायन्ते।

## ४.६ प्रश्न परीक्षते

१. संस्कृतसाहित्यजगति महाकाव्यस्य विकास व्याख्याति करोति।

२. रधुवंशः , कुमारसम्भवम् विवृणोति करोति।

३. किरातार्जुनीयम् विवृणोति करोति।

❖❖❖



Scanned with CamScanner

# अध्याय:४

## वैदिकसाहित्यम् इतिहासश्च

### ५.० प्रस्तावना

एतत् अध्याय उत्तर अध्यायिन् विद्यार्थिन् समर्थ

नाट्यशास्त्रम् परिचय: ;

ास: अश्वघोष: परिचय: ;

शूद्रक भट्टनारायण: श्रीहर्ष:परिचय: ;

विशाखदत्त:परिचय: ;

### ५.१ प्रस्तावना

नाट्यशास्त्रम् इति एक: प्राचीनग्रन्थ: द्विसहस्त्रवर्षेभ्य: पूर्वमेव भरताचार्येण कृत: अस्ति । तस्मिन् ग्रन्थे स: नाट्यस्वरूपं नाटकलक्षणं च सम्यक् उक्तवान् । धनञ्जय: नामक: पण्डित: 'दशरूपकम्' इति ग्रन्थं विलिख्य रूपकाणां परिचयं कारितवान् ।

प्रथमं कविना गद्यपद्ययुक्त:, सम्भाषणात्मक:, अभिनययोग्य: कश्चन ग्रन्थ: लिख्यते । तत्रत्या कथा रामायणादिषु प्रसिद्धा वा भवेत्, कविकल्पिता वा भवेत् । स: ग्रन्थ: नटै: रङ्गे अभिनीयते । एष: अभिनय:, 'प्रयोग:' इति कथ्यते । सहृदया: सामाजिका: तं दृष्ट्वा आनन्दमनुभवन्ति । नाटके चतुर्विधा: अभिनया: भवन्ति - आङ्गिक:, वाचिक:, आहार्यक:, सात्त्विक: चेति । हस्तपादनेत्रादिभि: य: अभिनय: क्रियते स: आङ्गिक: । भाषणं वाचिक: । वेषभूषणादिकम् आहार्यक: । गात्रकम्पनम्, स्वेद: इत्यादय: सात्त्विकाभिनया: । एतादृशै: अभिनयै: नटा: प्रेक्षकेषु नव रसान् उत्पादयन्ति ।

संस्कृतनाटकेषु प्रथमम् एकं मङ्गलपद्यं भवति । 'नान्दी' इति तस्य नाम । तदनन्तरं सूत्रधार: प्रविशति । स: नाटके अभिनेष्यमाणाया: कथाया: सूचनां ददाति । तदनन्तरं नाटकस्य प्रारम्भ: भवति । संस्कृतनाटके उत्तमजना: संस्कृतेन, नीचजना: स्त्रिय: च प्राकृतेन भाषन्ते । रङ्गे जलपानं, भोजनं, अग्नि:, युद्धम् इत्येतादृशा: विषया: न दर्शनीया: इति नियम: अस्ति । नाटकस्य अन्ते एक: श्लोक: भवति । प्राय: नायक एव इमं श्लोकं पठति । अस्मिन् श्लोके 'लोका: समस्ता: सुखिनो भवन्तु' इत्येतादृशम् अर्थपूर्णं मङ्गलाशंसनं भवति । अस्य श्लोकस्य 'भरतवाक्यम्' इति नाम ।



Scanned with CamScanner

संस्कृतनाट्यवाङ्.मयपरिचयः

निखिलेऽपि विश्वसाहित्ये संस्कृतनाट्यवाङ्.मय महीयते, नाऽत्र कापि संशीतिः। कलिकातोच्चन्यायालयस्य न्यायाधीशः श्रीमान् विलियमजोन्समहोदयः चतुरशीत्यधि-कसप्तदशशततमे ख्रिस्ताब्दे कालिदासप्रणीतं नाटकमभिज्ञानशाकुन्तलम् आंग्यभाषया अनूदितवान्। पश्चात् एकनवत्यधिकसप्तदशशततमे ख्रिस्ताब्दे जानफास्टररस्तमेव आंग्लानुवादं शर्मण्यभाषयाऽनूदितवान्। अयमेवाऽनुवादो महाकविना समीक्षकमूर्द्धन्येन गेटेमहोदयेन पठितः।

अभिज्ञानशाकुन्तलमधीत्यैव जर्मनभाषाकविर्गेटे निरतिशयानन्दबिह्वलो जातः। स खलु नाटकेऽस्मिन् स्वर्गपृथ्व्योः संगमनं ददर्श। गेटेमहोदयेन ग्रंथस्यास्य या समीक्षा कृता तया भारतीयनाट्यकलायाः मेधायाः प्रतिभायाश्च वर्चस्वं प्रकाशितं जातम्। अ-कस्मादेव विश्वस्य विपश्चिन्निकायो भारतं प्रति श्रद्धावान् संजातः। संस्कृताध्ययनं प्रति शतमितानां पाश्चात्त्यानां रुचिर्जजागार। बर्लिन-लिपजिग-लीडन-एडिनबर्गादिनगरेषु संस्-कृताध्ययनपीठानि संस्थापितानि जातानि। कतिपयवर्षेष्वेव राथ-विल्सन फग्युसन-का-लब्रुक-स्टेनकोनो-पिशेल-ल्यूडर्स-वेबर-कीथ-मैकडानेल-कार्न-हार्टले-ग्रिम-ग्रास-मान-बर्नर-ह्विटनी-मैक्समूलर-सिल्वालेवीप्रभृतयो महान्तः संस्कृतज्ञाः पाश्चात्त्यराष्ट्रेषु समुत्पन्नाः। एकोनविंशतमे ख्रिस्ताब्दे समग्रमेव विश्वं संस्कृतमय जातम्। लक्षमिताः संस्कृतस्य ताडपत्रांकिता हस्तलेखा अन्विष्टाः पाश्चात्त्यविद्वद्भिः। देववाणीयं विश्वभाषा समुद्घुष्टा।

गेटेमहोदयेन अभिज्ञानशाकुंतलस्य बृहती समीक्षा कृताऽऽसीत्। तस्याः समीक्षाया निष्कर्षं महामहोपाध्यायः वासुदेवविष्णुर्मिराशी एकेनैव पद्येन प्रकाशितवान्-

वासन्तं कुसुमं फलंच युगपद् ग्रीष्मस्य सर्वंच यद्  
यच्चान्यन्मनसो रसायनमतः संतपूर्ण मोहनम्।  
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयो-  
रैश्वर्यं यदि वांच्छसि प्रियसखे! शाकुंतलं सेव्यताम्।।

विश्वकविः रवीन्द्रनाथठाकुरोऽपि गेटेसमीक्षामनुमोदमानः कालिदासं प्रति स्वकीयां परां प्रशस्तिं प्रकटयति। स खलु विलियमशेक्सपीयरप्रणीतेन टेम्पेस्टानाम्ना नाटकेन सहाभिज्ञानशाकुंतलस्य तुलनां प्रस्तुवन् कथयति-

टेम्पेस्टनाटके वर्तते भक्तिः शाकुन्तले पुनश्शक्तिः। शक्त्या विजयः प्राप्यते टेम्पेस्टनाटके, शाकुंतले तावन्मंगलेन सिद्धिरवलोक्यते। अर्धमार्गे विरमति टेम्पेस्टनाट-कम्, शाकुंतले पुनः पूर्णताया अवसानं वर्तते।



Scanned with CamScanner

कृतनाटकप्रयुक्तां जवनिकां यवनिकां मत्वा, संस्कृतनाटकं यवनपरंपराप्रभावितं मेने। कीथमहोदयोऽपि वीरपूजात एव संस्कृतनाटकं समुत्पन्नं स्वीचकार।

एवं हि विद्वद्भिः विविधानि मतानि प्रस्तुतानि। परंतु सम्प्रति तानि सर्वाण्येव खंडितानि तिष्ठन्ति। भारते छायानाट्यानां काऽपि प्रथैव नासीत् सहस्रद्वयवर्षात्मके कालखंडे केवलमेकमेव नाटकं छायाकोटिकमवाप्यते-सुभटप्रणीतं दूताअंगदमिति

जवनिकाशब्दस्तिरस्करिणीं ज्ञापयति। परंतु नायं शब्दो यवनिकया संगच्छते। यूनानदेशं बोधयितुं संस्कृते यवनशब्दः प्रयुज्यते। यवनी (उीाॅथ्र्ॅब) यवनिका दिशब्दाः यूनानदेशं संकेतयन्ति। परंतु ते सर्वेऽपि जवनिकातस्सर्वथा भिन्ना एव वर्तन्ते। अतएव

Scanned with CamScanner

याचितवन्तः। देवानां प्रार्थनां स्वीकृत्यैव भगवान् परमेष्ठी सार्ववर्णिकं पंचमं नाट्यवेदं कृतवान्। तद्यथा-

एवं संकल्प्य भगवान् चतुर्वेदाननुस्मरन्।

नाट्यवेदं ततश्चक्रे चतुर्वेदाअंगसम्भवम्।।

जग्राह पाठ्यमृग्वेदात् सामभ्योगीतमेव च।

यजुर्वेदादभिनयान् रसानाथर्वणादपि।।

एवं हि, संस्कृतनाट्यस्य वैदिकी समुत्पत्तिः सिध्यति। पाश्चात्त्यविद्वांसोऽपि प्रायेण नाट्यशास्त्रोक्तं विवरणं प्रामाणिकं मन्यन्ते। तदिदं नाटकं भारतीयपरंपरायां चाक्षुषः क्रतुर्मन्यते, न पुनः सामान्यमनोरंजनमात्रम्। यथाऽह महाकविः कालिदासः

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं

रुद्रेणेदमुमाकृतव्यतिकरे स्वांगे विभक्तं द्विधा।

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते

नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम्।।

त्रिवर्गसाधनं नाट्यमित्यप्युक्तम्। अत्र त्रिवर्गः खलु धर्मार्थकामानां समन्वयः। नाट्येन धर्मस्य, अर्थस्य, कामस्य चाऽपि सिद्धिर्जायते। मोक्षस्यापि सिद्धिर्जायते इति नोक्तम् यतो हि मोक्षपुरुषार्थो मरणानन्तरमेव साधयितुं शक्यते। परंतु मोक्षस्य साधको भवति धर्मः। अतएव नाट्येन धर्मसिद्धौ जातायां मोक्षस्यापि सिद्धिर्जातैवाऽअंगीकरणीया। एवं हि, पुरुषार्थचतुष्टयसिद्धिस्त्रोतोभूतमेव नाटकमित्यत्र न काऽपि संशीतिः।

पाश्चात्त्यजगति नाटकं काममेव सामान्यकोटिकं मनोरंजनं भवेत् परंतु भारतीयस-माजे तु नाट्यप्रयोगो धार्मिकमनुष्ठानमेव मन्यते। तत्सर्वं रहस्यं वैशिष्ट्यं वा नाट्यशास्त्रो-क्तस्य दैवतपूजनस्याध्ययनेनैव ज्ञातुं शक्यते।

भरतप्रणीतं नाट्यशास्त्रम्-

त्र्यस्त्र - चतुरस्त्र-विकृष्टकोटिकं त्रिविधं भवति नाट्यमण्डपं येषु विकृष्टमध्यम-कोटिकं (64 ?? 32 हस्तपरिमाणम्) सर्वोत्तमं मन्यते। अस्मिन् नाट्यमण्डपे 32 हस्तपरिमितम् अग्रवर्तिस्थानं दर्शकनिवेशनं भवतिस्म। अवशिष्टं 32 हस्तपरिमितं स्थानं नाट्यमंचस्य कृते सुरक्षितमासीत्। तत्रापि भागत्रयम्। दर्शकनिवेशनस्य समक्षमासीत् रंगपीठम् यमुभयतः सोत्सेधा मत्तवारणी भवतिस्म। रंगपीठमनु भवतिस्म रंगशीर्षम्।

Scanned with CamScanner

च भागे द्वारद्वयं भवतिस्म-एकं नियत्यधिष्ठितम्, अपरं मृत्य्वधिष्ठितम्।

एवंगुणविशिष्टमिदं नाट्यवेश्म प्रत्यंगं देवाधिष्ठितं भवति स्म। के के देवा: कुत्र-कुत्र राजन्ते रक्षकरूपेणेत्यस्य बृहद् विवरणं रंगदैवतपूजनाध्याये निरूपितं वर्तते। समग्रस्यापि नाटयमण्डपस्य सुरक्षार्थं वासवप्रहरणस्य जर्जरस्य प्रतिष्ठा क्रियते। पंचपर्वसमन्वितोऽयं जर्जराख्यो वंशदंडोऽपि विधि-शिव-विष्णु-स्कंद-नागाधिष्ठितो भवति। एवं हि, समग्रमेव नाटयभवनं दैवरक्षितं भवति। तदर्थं नाटयप्रयोगात्प्रागेव रंगदैवतपूजनमनिवार्य भवति स्म-

यज्ञेन सम्मितं ह्येतद्रगंदैवतपूजनम्।

अपूजयित्वा रंगं तु नैव प्रेक्षां प्रयोजयेत्।

पूजिता: पूजयन्त्येते मानिता मानयन्ति च।।

तस्मात्सर्वप्रयत्नेन कर्तव्यं रंगपूजनम्।

न तथाऽऽशु दहत्यग्नि: प्रभंजनसमीरित:।

यथा ह्यपप्रयोगस्तु प्रयुक्तो दहित क्षणात्।। (ना.अ.३.९७-१००)

समग्रमेव विश्वं, किंच समस्तब्रह्माण्डमेव व्याप्नोति नाटयमिदम्। स्वयमेवाऽचार्यो भरतो वक्ति-

त्रैलोक्यस्यास्य सर्वस्य नाटयं भावानुकीर्तनम्।

क्वचिद्धर्म: क्वचित्क्रीडा क्वचिदर्थ: क्वचिच्छम:।

क्वचिद्धास्यं क्वचिद्युद्धं क्वचित्काम: क्वचिद्वध:।।

धर्मो धर्मप्रवृत्तानां काम: कामार्थसेविनाम्।

निग्रहो दुर्विनीतानां मत्तानां दमनक्रिया।।

क्लीबानां धाष्ट्यजननमुत्साह: शूरमानिनाम्।।

अबोधानां विबोधश्च वैदग्ध्यं विदुषामपि।।

ईश्वराणां विलासश्च स्थैर्यं दु:खार्दितस्य च।

अर्थोपजीविनामर्थो धृतिरुद्विग्नचेतसाम्।।

नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।

लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्।।

उत्तमाधममध्यानां नराणां कर्मसंश्रयम्।



Scanned with CamScanner

विश्रान्तिजननं काले नाट्यमेतन्मया कृतम्।।

धर्म्यं यशस्मायुष्यं हितं बुद्धिविवर्धनम्।

लोकोपदेशजननं नाट्यमेतद् भविष्यति।।

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।

न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।

सप्तद्वीपानुकरणं नाट्यमेतद् भविष्यति।

येनानुकरणं नाट्यमेतत्तद्यन्मया कृतम्।।

देवानामसुराणां च राज्ञामथ कुटुम्बिनाम्।

ब्रह्मर्षीणांच विज्ञेयं नाट्यं वृत्तांतदर्शकम्।।

योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।

सोऽगाद्यभिनयोपेतो नाट्यमित्यभिधीयते।।

वेदविद्येतिहासानामाख्यानपरिकल्पनम्।

विनोदकरणं लोके नाट्यमेतद् भविष्यति।।

नाट्य. अ. 107-20

अनेन विलक्षणाविवरणेन भारतीयअंगमंचस्य माहात्म्यं प्रकटीभवति। वस्तुतः निखिलस्य ब्रह्माण्डस्यैव यथार्थानुकरणं प्रतीयते। नाट्यम्। इमदवस्थानुकरणं कथं सम्भवति? अभिनयेन। अभिनयो नाम किम्? अभिसमक्षं नयति प्रापयति प्राचीनं कथावस्तु इत्यभिनयः। आचार्याभिनवगुप्तपादानामियं व्याख्या। सहस्रलक्षवर्षप्राचीनाः रामादयः चतुर्विधाऽभिनयमाध्यमेनैव साक्षात्क्रियन्ते दर्शकैः। चित्रतुरगन्यायेन नररूपान् रामादीन् प्रकृतरूपानेव मन्वाना दर्शकाः साधारणीकरणमहिम्ना रसाप्लुता जायन्ते।

अभिनयस्वरूपम्-

स चाभिनयश्चतुर्विधो भवति-वाचिकः, आगिंकः, सात्त्विकः आहार्यश्च। तत्र वाचिकस्तावत् भारती वृत्तिबहुलः, पात्राणां संवादैः समन्वितो भवति। आंगिकश्चापि

Scanned with CamScanner

।का।लचवस्त्रचमाद्ययद्रूप क्रियते बुधैः।

सन्धिमो नामविज्ञेयः पुस्तो नाटकसंश्रयः।।

व्याजिमो नामविज्ञेयो यंत्रेण क्रियतेतु यः।

चेष्ट्यते चैव यद्रूपं चेष्टिमः सतु संज्ञितः।।

शैलयानविमानानि चर्मवर्मध्वजाः नगाः।

यानि क्रियन्ते नाट्ये हि स पुस्त इति संज्ञितः।।

-नाट्य. 21.7-9

वस्तुतः न केवलं पुस्तमात्रेणैव नेपथ्यं सम्पाद्यते। तत्राऽपरमपि तत्त्वत्रयं महत्वपूर्णं परिलक्ष्यते-अलंकारः अंगरचना, संजीवश्च। तत्राऽलंकारो यथा-

अलंकारस्तु विज्ञेयो मालाभरणवाससाम्।

नानाविधसमायोगात् योऽगोपाअंगसमन्वितः।।

तत्र माल्यं पंचविधं भवति-चेष्टितं, विततं, संघात्यं, ग्रंथिमं, प्रलम्बितं च। आभरणं भवति चतुर्विधं तद्यथा-आवेध्यं, बन्धनीयं, प्रक्षेप्यम्, आरोपकम्।

आवेध्यं कुण्डलादीनि तथा श्रवणभूषणम्।।

श्रोणिसूत्राअंगदैर्युक्ताबन्धनीयानि निर्दिशेत्।।

प्रक्षेप्यं नूपुरं विद्याद्वस्त्राभरणमेव च।

आरोप्यं हेमसूत्रादि हाराश्च विविधाश्रयाः।।

भूषणानां विकल्पास्तु पुरुषास्त्रीसमाश्रयदृष्ट्या विविधाः देशजातिसमुद्भवाश्च भवन्ति।

तथा प्रोषितकान्ता या व्यसनाभिहताश्च याः।

वेषः स्यान्मलिनस्तासामेकवेणीधरं शिरः।।

यद्यपि प्रश्नोऽयं सम्भवति यदाहार्योऽभिनयस्य किं सार्थकत्वम्? अन्येऽभिनयाः चेतनशरीरस्य धर्मभूता भवन्ति। अंगानि शरीरस्यैव भवन्ति। तैः सम्पादितोऽभिनय आगिंकः। वागपि शरीरसम्बद्धैव। तया वाचिकोऽभिनयः प्रस्तूयते। सत्त्वमपि सावहितं मनः, शरीरसम्बद्धमेव। तेन सात्त्विकोऽभिनयो विधीयते। परंतु वेषभूषादिकं तु शरीरव्यतिरिक्तमचेतनंच। वस्त्रभरणादीनि यथैव धार्यन्ते तथैवाऽपनीयन्तेऽपि। को नु तत्र विशेषः। का नु तेषां भूमिकाऽभिनये?

प्रश्नमिमं सम्यक् समाधत्तेऽभिनवभारतीकारः। यद्यपि नेपथ्यं न भवति वागअंगसत्त्वसदृशं चेतनम्। तथापि चेतनपात्रनियमसाहचर्यवशात् तेषामुपर्यपि चैतन्यसमारोपः जायत एव। किंच संवादे समाप्ते एव वार्गाभिनयः, अंगासंचालनेऽवसित एव अंगभिनयः, सत्त्वे शिथिले सत्येव सत्त्वाभिनयोऽवसीयन्ते। परंतु आहार्यन्तु तदवधि जीवति यावन्नापनीयते। किंच राजवेषधरो नटः नाटकानन्तरमपि यत्र कुत्रापि गच्छति, तत्क्षणमेव प्रत्यभिज्ञायते केवलं नेपथ्यमहिम्ना। अतएव नेपथ्यस्य माहात्म्यं सर्वोपरि राराज्यते।

नाट्यप्रयोगे यथा चतुर्विधोऽभिनयः महीयते तथैव करणाअंगहारादयः नृत्तं तु अत्यपेक्षितं तत्त्वं येन विना रूपकावतरणं न सम्भवति। अतएवोक्तं विष्णुधर्मोत्तरपुराणे-

नृत्तमुत्पादितं ह्येतन्मया पद्मनिभेक्षणे।

अंगहारैः सकरणैः संयुक्तं सपरिक्रमैः।।

नृत्तेनाराधयिष्यन्ति भक्तिमन्तस्तु मां शुभे।

त्रैलोक्यस्यानुकरणं नृत्ते देवि प्रतिष्ठितम्।।

-विष्णुधर्मो.3.34.16,16

संस्कृतनाट्यवाङ्.मयम्-

अयमासीत् संस्कृतनाटकस्य सिद्धांतपक्षः। सम्प्रति तस्य रचनात्मकः पक्षो

-दारद्रचारुदत्तम्, प्रातज्ञायोगंधरायणम्, स्वप्नवासवदत्तम्। बालचरितं तावद्भागवताश्रितं मन्यते। परंतु महाभारताश्रितामपि तद्भवितुमर्हति।

परवर्तिनाटककारेषु महीयन्ते कालिदासादयः। महाकविकालिदासो नाट्यकृच्छिरोरत्नभूतस्तिष्ठति यमधिकृत्य सुभाष्तिमिदमुच्यते-

काव्येषु नाटकं रम्य तत्र रम्या शकुंतला।

तत्रापि च चतुर्थोऽकंस्तत्र श्लोकचतुष्टयम्।।

Scanned with CamScanner

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः
वाताः शीकरिणः पयोदसुहृदामानंदकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हादेवि धीरा भव।।

आत्मविषये कविर्नाटकभूमिकायां सम्यगेव वक्ति-

औचित्यं वचसां प्रकृत्यनुगतं सर्वत्र पात्रोचिता
पुष्टिः स्वावसरे रसस्य च कथामार्गं न चातिक्रमः।
शुद्धिः प्रस्तुतसंविधानकविधौ प्रौढिश्च शब्दार्थयो-
र्विद्वभिः परिभाव्यतामवहितैरेतावदेवास्तु नः।।

एते सर्वेऽपि नाटककाराः ख्रिस्तपूर्वचतुर्थशतकादारभ्य षोडशशताब्दं ख्रैस्तं यावत् मध्यावधौ संजाताः।

परवर्तिनो नाट्यकाराः कुलशेखरवर्मा (तपतीसंवरणम्, सुभद्राधनंजयम्) रामचन्द्रसूरिः (नलविलास-राघवाभ्युदय-यादवाभ्युदय-सत्यहरिश्चन्द्रनिभर्यभीमादिकम्) जयसिंहसूरिः (हम्मीरमदमर्दनम्) रविवर्मा (प्रद्युम्नाभ्युदयम्) वामनभट्टबाणः (पार्वती-परिणयम्) युवराजरामवर्मा (रुक्मिणीपरिणयम्) बिल्हणः (कर्णसुंदरी) मथुरादासः (वृषभानुजा) रामभद्रमुनिः (प्रबद्धरौहिणेयम्) यशश्चन्द्रः (मुद्रितकुमुदचन्द्रम्) कृष्णमिश्रः (प्रबोधचन्द्रोदयः) वेदांतदेशिकः (संकल्पसूर्योदयः) यशः पालः (मोहराजपराजयः) पर-मानन्ददासः कर्णपूरः (चैतन्यचन्द्रोदयः) आनंदरायमखी (जीवानन्दनम्, विद्यापरिणयनम्) नल्लाध्वरी (जीवन्मुक्तकल्याणम्, चित्तवृत्तिकल्याणम्) गोकुलनाथः (अमृतोदयः) हरिहरः (भर्तृहरिनिर्वेदः) राजचूडामणिदीक्षितः (आनंदराघवम्) सुभटः (दूताअंगदम्) हस्तिमल्लः (विक्रांतकौरवम्, अंजनापवनंजयम्) क्षेमीश्वर - (चण्डकौशिकम्) प्रभृतयो यद्यपि तत्पूर्ववर्तिनः इव नैव श्लक्ष्णमतयस्तथापि सर्जनापारंगताः परिलक्ष्यन्ते।

भाणकारेषु ईश्वरदत्तः (धूर्तविटसंवादः) वररुचिः (उभयाभिसारिका) श्यामिलकः (पादप्ताडितकम्) शूद्रकः (पद्मप्राभृतकम्) वामनभट्टबाणः (श्रृंगारभूषणम्) रामभद्रद-ीक्षितः (श्रृंगारतिलकम् अय्याभाणेति ख्यातम्) वरदराजाचार्यः (वसंततिलकम्, अम्माभाणेतिख्यातम्) युवराजकविः (रससदनभाणः) काशीपतिः (मुकुंदानंदभाणः) नल्लाकविः (श्रृंगारसर्वस्वम्) शंकरकविः (शारदातिलकम्) एते महीयन्ते।

प्रहसनकारेषु मूद्र्धाभिषिक्तो वर्तते बोधायनकविः यं विण्टरनित्जमहोदयः ख्रिस्तपूर्वपंचमशताकेत्पन्नं मन्यते। तद्विरचितं भगवदज्जुकीयं विलक्षणप्रहसनं कथा-



Scanned with CamScanner

सौगन्धिकाहरणव्यायोगः, वेंकामात्यप्रणीतः वीरराघवव्यायोगः इति।

दशरूपकाणामन्येऽपि भेदाः प्रणीताः कैश्चन। परंतु महता कृच्छ्रेण ते प्राप्यन्ते। प्रयोगदृष्ट्याऽपि न ते लोकप्रियाः।

साम्प्रतिकी संस्कृतरूपकसर्जना-

वस्तुतः एकाकिंरूपकाणां युगमिदानीं प्रभवति। तत्रापि प्रहसनान्येव महीयन्ते। साम्प्रतिकी सर्जना 1784 मितख्रिस्ताब्दादनन्तरमेव प्रवर्तते। अयं कालखंडः भारतीयस्–वातन्त्र्यसमरस्य आसीत्। अतएव एतद्युगीनाः कृतयोऽपि स्वातत्र्यवीरान् नायकीकृत्य प्रणीता दृश्यन्ते। मूलशंकरमाणिक्यलालयाज्ञिकः छत्रपतिसाम्राज्यम् प्रतापविजयं, संयोगितास्वयंपरंच प्रणीतवान् (1886) म.म. मथुरानाथदीक्षितोऽपि (1878) भारतविजयं षडअंकनाटकं प्रणिनाय 1937 मितवर्षे यस्मिन् भारतं ब्रिटिशदासतामुक्तं प्रदर्शितवान्।

Scanned with CamScanner

एव। प्रो. राधावल्लभस्तत्प्रणीतम् इन्द्रजालम् (चतुष्पथीयम्) सस्कृतस्य प्रथम कोणनाट्य (नुक्कड.नाटक) मनुते।

नाट्यनवार्णवं वर्तते कोणनाट्यसंकलनमाद्यन्तम्। तस्य लक्षणं स्वयं प्रस्तौति रचनाकारः-

नासोपमे लघुक्षेत्रे संकार्णेऽनायते क्वचित्।

नरैः प्रदर्शितं नाट्यं नासिक्यमभिधीयते।।

संवादबहुलं प्रायः प्रत्यग्रवृत्तसंश्रितम्।

साधिक्षेपंच सव्यंग्यं हास्मुख्यं समन्ततः।।

सम्भवन्ति रसाश्चान्ये यथावृत्तं यथानटम्।

Scanned with CamScanner

यजुर्वेदात् अभिनयतत्त्वं, अथर्ववेदाच्च रसतत्त्वमादाय नूतनमिदं नाट्यं रचयांचकार।

रचनानन्तरमेव महेन्द्रविजयस्य मंचप्रस्तुतिरपि कृता भरतेन। तत्र दानवानामुपरि देवानां विजयं दृष्ट्वाऽसुराः क्रुदाः जाताः। ते विघ्नान् उत्पादयामासुः। इन्द्रश्च ध्वजदंडमेव प्रहरणीकृत्य तान् जर्जरानकरोत्। पश्चाच्च भगवान् प्रजापतिः उभावपि वर्गौ समाहूय, नाट्यस्य प्रकृतिं विशदयांचकार, असुरांश्च यथाकथंचित्तोषयामास।

तृतीयचरणे वेधस आज्ञया विश्वकर्मा नाट्यमण्डपं त्रिविधं चतुर्रत्र्यस्त्रविकृष्टसंज्ञं निर्मितवान्। तत्रापि प्रयोगदृष्ट्या विकृष्टमध्यमकोटिकं मण्डपं सर्वश्रेष्ठमुद्घुष्टम्। तस्य नाट्यमण्डपस्य दारुकमर्3-सुधाकर्म-चित्रकर्म-निर्यूहादिरचनाकर्म चापि सविस्तरं वर्णितं वर्तते नाट्यशास्त्रे।

एतत्सर्वं सम्पाद्यैव पुत्रैः सार्धं भरतः समुद्रमंथननाम समवकारं प्रयुक्तवान्। ततश्च कैलाशशिखरं गत्वा त्रिपुरदाहाख्यं डिमंचाभिनीतवान् रुद्रसमक्षम्। सर्वेऽपि देवा ऋषयः प्रसंताः जाताः। परंतु नाट्ये कैशिकीमपि मेलयितुं शिवः परामृष्टवान्। तन्निर्देशं स्वीकृत्य ब्रह्मा कैशिकीसामग्रीं भरताय दत्तवान्-मंजुकेशीप्रभृतीश्चतुर्विंशतिदेवनर्तकीः गानभाण्डार्थं च स्वातिं नारदम्। सम्प्रति भरतप्रणीतं नाट्यं सर्वदृष्ट्या सम्पन्नं जातम्।

तदेव नाट्यं महाराजोः महुषः स्वर्गलोकात् भूतलमानिनायेति कथा नाट्यशास्त्रे वर्णिताऽस्ति। एवं हि नाट्यं देवा सुरऋषिमहर्षिमानवादीनां समेषां समन्वितं मनोरंजन-साधनम्। नाट्यमंचे प्रतिपदं देवानां प्रतिष्ठापना क्रियते। यतो हि रंगदैवतपूजनं विना प्रयोगो न कथमपि प्रवर्तते प्रवृत्तश्चापि अनिष्टकरो जायते। एवं हि भारतीयनाट्यप्रयोगः चाक्षुषयज्ञकल्पः स्वीक्रियते, न तावत् नयनानंदासेचनकं मनारंजनमात्रम्।

तत्सर्वं नाट्यमाहात्म्यं सविस्तरमत्र निरुपितं वर्तते निबंधेस्मिन्। नाट्ये चतुर्विधोऽ-भिनयः, चतस्त्रो नाट्यवृत्तयः, दृश्यानि च लोकधर्म-नाट्यधार्माश्रितानि, दशरूपकभेदा, उपरूपकाणि इति सर्वमपि निबंधेऽस्मिन् संक्षेपतो वर्णितम्। ततश्चार्वाचीनं नाट्यवाङ्.मयमपि पाठकानां परिज्ञानाय, संकलव्य प्रस्तुतम्।

**भासः**

भासस्य त्रयोदशनाटकानि उपलभ्यन्ते । १९०९ क्रिस्ताब्दौ त्रिवेन्द्रम् निवासी महामहोपाध्यायरू टी० गणपतिशास्त्रीमहोदयः तिरुवाङ्कोर राज्यात् तालपत्रलिखितानि एतानि प्राप्तवान् । तेषां नाटकानाम् नामानि सन्ति अधोलिखितानि। एतेषां त्रयोदशानामपि नाटकानां कर्ता भास इति लब्धयशसः टिण्गणपतिशास्त्रिणः निरणयन् । प्राचीनः नोन-

Scanned with CamScanner

भास तस्य ग्रन्थाणा वाक्यानि च समुदाहरन् । अपि च एतानि सर्वाण्यपि नाटकानि एकत्रैव प्राप्तानि । अतः एतानि सर्वाण्यपि रूपकाणि प्रायशः भासकृतानीति विद्वद्भिः सिद्धान्तित-मस्ति । किन्तु एतस्मिन् विषये ऐकमत्यं न सिद्धम् । इमं कविं महाकविः कालिदासः मालविकाग्निमित्रम्इति नामके स्वस्य नाटके ष्प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः क्रियायां कथं परिषदो बहुमानःघ्ष् इति सबहुमानं भासम् अश्लाघत । बाणोऽपि स्वकाव्ये हर्षचरितम् नाम्नि काव्ये ष्सूत्रधारकृतारम्भैः नाटवै-र्बहुभूमिकैः । सपताकैर्यशो लेभे भासो देवकुलैरिवष् इति भासकविम् अस्तौत् । कविः राजशेखरः अपि भासो रामिलसोमिलौइतिए ष्भासो हासःष् इति जयदेवःमुरारिश्च भासम् अस्तुवन् ।

**भासस्य कालः**

अनेके कवयः भासं प्रशंसन् । काव्यशास्त्रकाराः भासकृतान् श्लोकान् स्वग्रन्थेषु समुदाहरन् । एतेन ज्ञायते यत् भासः कालिदासादपि प्राक्तनः तदर्वाचीनकवीनाम् आत्मीयश्च स्यादिति । अनेकेषां कवीनाम् यथा तथैव भासस्यापि देश.कालयोः विषये कोऽपि निश्चयः नास्ति । तथापि विमर्शकानाम् अभिप्रायानुसारं क्रिण्पूण्१थमे शतमाने भास आसीदिति निर्णेतुं शक्यते । शार्ङ्धरपद्धतिः, सूक्तिमुक्तावलिः, सदुक्तिकर्णामृतम्ए सुभाषितावलिःए इत्यादिषु प्राचीनेषु सुभाषितग्रन्थेषु भासाङ्कितानि पद्यानि लभ्यन्ते । एतादृशानि सर्वाणि साक्ष्याणि उद्धृत्य भासः क्रिस्तात् पूर्वं सप्तमे शतके आसीदित्यपि विमर्शकाः निर्णीतवन्तः । केचन विपश्चितः भासः क्रिण्शण्२तीये शतके आसीदित्यपि अभिप्रयन्ति । गते शतके समुपलब्धम् यज्ञफलम् नाम रामायणकथावस्तु नाटकमपि भासकविकृतमेवेति तस्य अध्येतारः दोषज्ञाः निरचिन्वन् । भासस्य देशविषयेए मातापित्रोः विचारे च कापि कथा नोपलभ्यते । अयं दाक्षिणात्यः इति केचन साधारं प्रतिपादयन्ति ।

**भासस्य रुपकाणि**

प्रतिज्ञायौगन्धरायणस्वप्नवासवदत्ताऽविमारकाणि त्रीणि बृहत्कथाऽऽधाराणि ।

Scanned with CamScanner

२. दूतघटात्कच दृाहाडम्बाभामयारात्मजस्य घटात्कचस्य महाभारताय चारतम् ।

३. कर्णभारे दृकर्णस्योदात्तं चरितम्ए तेन हीन्द्राय कवचकुण्डले दत्ते ।

४. ऊरुभङ्गे दृभीमेन प्रियापरिभवप्रतप्तेन दुर्योधनस्य जङ्घे भग्ने । संस्कृतसाहित्ये शोकान्तनाटकस्येदमेकं निदर्शनम् ।

५.दूतवाक्ये दृदूतभूतस्य श्रीकृष्णस्य सदाशयतया सहैव दुर्योधनस्याभिमानित्वं वर्णितम् ।

६. पञ्चरात्रे दृकल्पिता कथा । द्रोणेन कौरवाणां यज्ञे आचार्यकत्वं कृतम्ए दक्षिणायां स पाण्डवानां राज्यं याचितवान् ।

पञ्चदिनाभ्यन्तरेऽन्वेषणेक्रियमाणे लभ्यं तदिति दुर्योधनस्याश्वासने द्रोणेन तथा कृतम्।

७.बालचरिते दृकृष्णस्य बाललीला भागवताधारेणा कृता ।

८.अविमारके दृया कथा सा सम्भवतो गुणाढ्यकृतबृहत्कथातो गृहीता राजकुमारस्याविमारकस्य कुन्तिभोजकुमार्या कुरङ्ग्या सह प्रणयोऽत्र वर्णितः ।

९. प्रतिज्ञायौगन्धरायणे दृ मन्त्री यौगन्धरायणं पद्मावत्या मगधराजभगिन्या सहा-ेदयनस्य विवाहं कारयित्वा राजशक्तिं वर्ध्दयिउमैच्छत् । ध्रियमाणायां च वासवदत्तायां न सम्भवतीदमिति कदाचिदुदयने मृगयार्थं गते मन्त्रिसम्मत्या वासवदत्ता दग्धेति प्रचार्यते । राज्ञा चिरं विषद्यापि न तत्प्रेमणि मालिन्यमानीयते पश्छात् पदमावत्यां परिणीतायां स्वप्नक्रमेणैव वासवदत्ता लभ्यते ।

१०. दरिद्रचारुदत्ते.वसन्तसेनाचारुदत्तयोः प्रणयकथा वर्णिता । अस्य चत्वार एवाङ्का उपलभ्यन्ते ।

Scanned with CamScanner

७. अप्रधानपात्राणां नामसाम्यम्ए व्याकरणलक्षणहीनप्रयोगप्राचुयम् समाः वाक्यम्ए सर्वत्र बाहुल्येन लभ्यते ।

८. भरतकृतनाट्यशास्त्रीयनियमानां सर्वत्र समभावेनानादरः ।

९. नाट्यनिर्देशस्य अभावः समानः ।

१०. एषां सर्वेषां रुपकाणां नामानि केवलमन्त एव ग्रन्थस्य लभ्यन्ते नान्यत्र क्वापि ।

**भासस्य द्विरवतारः**

यद्यपि बहवो विद्वांसो गुणपतिशास्त्रिणा प्रकाशितानि सर्वाण्यपि रुपकाणि प्रचीनभ्ासकृतानीत्युक्तवन्तः प्रमाणानि चोपस्थापितवन्तःए परन्तुजातेन बहुविधानुसन्धानेनेषां कर्त्ता प्राचीनो भासो न सिद्ध्यतिए यतो भासकृतत्वेनोदाहृतानि पद्यानि लभ्यमानग्रन्थेषु नासाद्यन्तेए अतः सर्वाण्यपीमानि रुपवाणि केरलदेशीयेन केनचित् कविना कृतानीति

Scanned with CamScanner

कथास्तयैवोपन्यस्यापि केवलेन सरलत्वकथनोपकथनचातुर्यादियोजनेन तानि स्मवीयता प्रापयतीति भासस्य नाटकनिर्माणनैपुण्यं सुखमवगन्तुं शक्यम् ।

**भासकृतिभिरन्यकविकृतिसाम्यम्**

भासस्य कृतयोऽन्येषां कृतिभिः सह साम्यं बिभ्रति । यथा शाकुन्तले चतुर्थोऽङ्के वृक्षलतादीन् प्रति शकुन्तलाया यः कोमलो मनोभावः दृष्पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु य इत्यादिना वर्णितस्तत्तुल्य एव भासस्याभिषेके ष्यस्यां न प्रियमण्डनापि महिषी देवस्यमन्दोदरीष् इत्यादौ मनोभावो वर्ण्यते । यथा शाकुन्तले आश्रमवासिनां पीडनं परिहर्तुमादिश्यते तथैव स्वप्नवासवदत्ते दृ ष्न परुषमाश्रमवासिषु प्रयोज्यम् ष् इत्यादिश्य

Scanned with CamScanner

शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ।

केचित्त्वत्रत्य 'कालिदासत्रयी' पदस्य काव्यत्रये निरूढमर्थं गृह्णन्ति भक्त्या न तु कवीनां त्रयीति । अपरे तु मुख्यमेवार्थं समाधृत्य राजशेखरसमये एव कालिदासाभिधास्त्रय: कवय: प्रसिद्धा: आसन्निति मन्यन्ते । ग्रन्थानां कालिदासप्रणीतत्वेन प्रसिद्धानामाभ्यन्तरपरीक्षणेन तु श्लोकेनानेन कवीनां त्रय्येव सङ्केतिता सम्भवति इति मन्यते। श्रव्यकाव्येष्वपि रघुवंशकुमारसम्भवमेघदत-ऋतुसंहाराणां परस्परं रचनावैशिष्ट्यं नैकप्रणीतत्वं समर्थयति । मेघदूते हि -

वक्र: पन्था यदपि भवत: प्रस्थितस्योत्तरस्यां

सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्या:।

विद्युद्दामस्फुरितचकितैर्यत्र पौराङ्गनानां

लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।

इति सर्वातिशायित्वेन स्मृता उज्जयिनी रघुवंश-कुमारसम्भवयो: नाम्नाऽपि न स्मर्यते । कुमारसम्भवस्य कर्ता हिमालयस्य केदारकूर्माचलखण्डयोरेव रमते । रघुवंशस्य प्रणेता तु चतुर्थषष्ठसर्गयो: भरतवर्षमेव भ्रमति । ऋतुसंहारस्य कर्ता पर्वतीयमेव ऋतुपरिवर्तनं विवृणोति । विषयप्रतिपादनदृष्ट्याऽपि तेषां सर्वेषामेवैककर्तृकत्वं नैव सिध्यति । तेषु तेषु हि भौगोलिकवर्णनमपि मिथो न संवदते । एवमेव स्थितिकालदृष्ट्याऽपि तत्र सामञ्जस्यं नैव सिध्यति । मालविकाग्निमित्रस्य प्रणेता अग्निमित्रं हि पुष्यमित्रस्य पुत्रं विदिशे नायकत्वेन गृह्णाति । विक्रमोर्वशीये तु कश्चिदपर एव विक्रमाख्यो नायक: । रघुवंशस्य कर्ता मगधं हि सर्वोत्कृष्टराज्यत्वेन स्मरति यतो हि स रघो: दिग्विजयप्रसङ्गे मगधं नाम्नाऽपि न स्मरति किन्तु षष्ठसर्गे स्वयंवरप्रसङ्गे परन्तपाख्यस्य मगधराजस्य तत्रोपस्थितिं कथयति । यथा हि तत्रोक्तम् -

कामं नृपा: सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्।

नक्षत्रताराग्रहसङ्कुलाऽपि ज्योतिष्मती चन्द्रमसैव रात्रि:।।

इति।

ऋतुसंहारस्य कर्ता हि विन्ध्योपकण्ठं साधु वर्णयति यदा कुमारसम्भवस्य प्रणेता तु गन्धमादनं साधु जानाति । तथैव रघुवंशे हि मालवसाम्राज्यसमसामयिकी भौगोलिकस्थिति: वर्णिताऽस्ति । मघदूतस्य कर्ता तु उज्जयिनीं विशेषेण स्तौति । सम्प्रति कालिदासकृतित्वेन ख्यातेषु त्रिषु रूपकेषु तावत्स्वेव श्रव्यकाव्येषु ऋतुसंहारोत्तरेषु च

Scanned with CamScanner

काग्निमित्र-ऋतुसंहारयोश्च साम्यं समर्थयन्ति पण्डिता:, किन्तु समुद्रगुप्तप्रणीतकृष्णचरितं तु दृश्यकाव्यानां कालिदासाभिधकाव्यकारकतृत्वं श्रव्यकाव्यानां तु हरिषेणस्य कालिदासविशेषणस्य कृतित्वं समर्थयति । यथोक्तं तत्र -

पुरन्दरबलो विप्र: शूद्रक: शास्त्रशस्त्रजित् ।
धनुर्वेदं चौरशास्त्रं रूपके द्वे तथाऽकरोत्।।
तत्कथां कृतवन्तौ तौ कवी रामिलसौमिलौ ।
तस्यैव सदसि स्थित्वा तौ मानं बहु चाप्तताम् ।।
सतां मत: सोऽश्वमेधं कृतवानुरुविक्रम: ।
वत्सरं स्वं शकान् जित्वा प्रावर्तयत वैक्रमम् ।।
तस्याऽभवन्नरपते: कविसप्तवर्ण:
श्रीकालिदास इति योऽप्रतिमप्रभाव: ।।
दुष्यन्तभूपतिकथां प्रणयप्रतिष्ठां
रम्याभिनेयभरितां सरसाञ्चकार।।
शाकुन्तलेन स कविर्नाटकेनाप्तवान् यश: ।
वस्तुरम्यं दर्शयन्ति त्रीण्यन्यानि लघूनि च।।
भूय: स मृच्छकटिकं नवाङ्कं नाटकं व्यधात् ।
व्यधात्तस्मिन् स्वचरितं विद्यानयबलोजितम् ।।

अत्रान्येषु त्रिषु विक्रमोर्वशीयं मालविकाग्निमित्रमिति द्वे तु ज्ञाते तृतीयं सम्प्रति नैवोपलभ्यत इति युधिष्ठिरमीमांसकमतम् । एवमेव -

काव्येन सोऽद्य रघुकार इति प्रसिद्धो
य: कालिदास इति महार्हनामा।
प्रामाण्यमाप्तवचनस्य च तस्य धर्म्ये
ब्रह्मत्वमध्वरविधौ मम सर्वदेव।।
चत्वार्यन्यानि काव्यानि व्यदधाच्च लघूनि य:।
प्राभावयच्च मां कर्तुं कृष्णस्य चरितं शुभम्।।
हरिषणकविर्वाग्मी शास्त्रशस्त्रविचक्षण:।



Scanned with CamScanner

३ २ - खाद्यटपाकिकस्य महादण्डनायकध्रुवभूतिपुत्रस्य सान्धिविग्रहिक-कुमारामात्यमहादण्डनायकहरिषेणस्य सर्वभूतहितसुखायास्तु।

३ ३ - अनुष्ठितञ्च परमभट्टारकपादानुध्यातेन महादण्डनायकतिलभट्टकेन।

इति।

हरिषेणो हि चन्द्रगुप्तस्य मन्त्रिणः शिखरस्वामिनः पौत्रः कुमारगुप्तस्य मन्त्रिणः पृथिवीषेणस्य पुत्र आसीदित्यपि कुमारगुप्तस्य कर्मदण्डशिलास्तम्भाभिलेखस्य षष्ठसप्तमपङ्क्तितो ज्ञायते।

मन्यते यत्, अभिज्ञानशाकुन्तलादिरूपकाणां प्रणेता कविः परमशैवः किन्तु रघुवंशप्रणेता तु मङ्गलाचरणे पार्वती शङ्करौ स्तुवन्नपि विष्णोः प्राधान्यसमर्थको भागवतः । राजकविवर्णनप्रसंगे समुद्रगुप्तस्य कृष्णचरिते कविवर्णनक्रमेऽपि कालिदासोऽश्वघोषात्पूर्वमेवोपस्थापितोऽस्ति । अश्वघोषस्य कनिष्कसभासत्त्वं चतुर्थसौगतमहासंसदि भागग्रहणञ्च तत्रैवोक्तम् । यथोक्तं तत्र -

सौगतानां महासंसत् तुरीयाऽभून्महोज्ज्वला ।

तस्यां सभ्यो बभूवायं विश्वविद्वच्छिरोमणिः।। इति ।

इत्थं हि कालिदासस्य चत्वारि स्वरूपाणि चिन्त्यन्ते अभिज्ञानशाकुन्तलकुमारसम्भवयोः प्रणेतकः, विक्रमोर्वशीयरघुवंशयोः रचयिताऽपरः, मालविकाग्निमित्र-ऋतुसंहारयोः कर्ता तृतीयः, मेघदूतस्य प्रणेता चतुर्थ इति ।आद्यो हि केदारखण्डीयः, द्वितीयस्तु मागधः, तृतीयो वैन्ध्यः, चतुर्थस्त्वावन्तिकः । एकतो हि यदा कुमारसम्भवकृतं हिमालयस्य यथार्थवर्णनं कवेः पर्वतीयत्वं घुष्णाति, अपरतस्तु तदैव ऋतुसंहारोपवर्णितं ग्रीष्मवर्णनं स्पष्टमेव विन्ध्यवासित्वं कवेः सूचयति ।युधिष्ठिरमीमांसकस्य मते कालिदासप्रणीतत्वेन

Scanned with CamScanner

सागरमुद्रणालयप्रकाशितायाः प्रथमे गुच्छके श्यामलादण्डकस्य पादसूच्या (अष्टमे पृष्ठे) दुर्गाप्रसादः कथयति -

राजशेखरात्पूर्वं त्रयः कालिदासाः समुत्पन्नाः । ते च कस्मिन् कस्मिन् देशे काले च प्रादुरभुन्निति न ज्ञायते । अकबरीयकालिदासस्तु चतुर्थोऽर्ववाचीनः । राजशेखरस्तु ख्रीस्तसंवत्सरस्य दशमे शतके समुत्पन्नः इति ।

कालिदासस्य जीवनदर्शनम्

कालिदासो हि परम्परासमर्थको भारतीय आसीद्,यो हि सनातने धर्मे मनागपि परिवर्तनं वोपेक्षणं नैव सहते। तेनैव सोऽभिज्ञानशाकुन्तलस्य मङ्गलाचरणपद्ये बौद्धसम्मतनिरीश्वरवादनिरासाय 'प्रत्यक्षाभिः प्रपन्नस्तनूभिः' इति कथयति । स हि त्रयीसम्मतं चातुर्वर्ण्य चातुराश्रम्यञ्चेत्थं समर्थयति -

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।

मुनिवनतरुच्छायां देव्या तया सह शिश्रिये।

गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्।।

न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ।

तदनुसारेण पुरुषार्थचतुष्टयसिद्धिरेव जीवनस्य लक्ष्यम् । तत्रापि अर्थकामाभ्यां धर्मपरकाभ्यां भाव्यं यतो मोक्षसिद्धिः सम्पद्यते । तेनैव तस्य दुष्यन्तः प्रथमं विप्रकन्यां

Scanned with CamScanner

दुष्यन्त उद्घोषयति -

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।

तथैव शम्भुनोपेक्षिताऽपि पार्वती -

इयेष सा कर्तुमबन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।

अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः।।

उपायेनाशक्यं न किमपि सम्भवतीति तस्य प्रबलो राद्धान्तः । तस्य हि सर्वाण्यपि पात्राणि तथैवाचरन्ति । स हि मर्यादाकविः । स्वसम्मतां मर्यादां स कदापि नैवोल्लङ्घयति। तस्य हि मर्यादोल्लङ्घनमपि मर्यादास्थापनायैव भवति । यथोक्तम् -

नृपतेः प्रतिसिद्धमेव तत् कृतवान् पङ्क्तिरथो विलङ्घ्य यद् ।

अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः।।

स हि परमार्थतो माहेश्वरः सम्मतः । स प्रायः सर्वास्वेव कृतिषु महेश्वरभवीष्टदेवत्वेन स्तौति । किन्तु नैतावतेतच्चिन्तनीयं यत्सोऽन्यदेवेषु न तथा बद्धादर इति । स तु देवत्रयस्यै-कान्तैक्यं समर्थयति । यथा मङ्गलपद्ये शिवः कुमारसम्भवे ( २ सर्गे ) ब्रह्मा, रघुवंशे (१० सर्गे), विष्णुश्च स्तुताः सन्ति । प्रत्यभिज्ञावादी स साङ्ख्ययोगावपि तथैवाद्रियते । वेदेषु परमश्रद्धा, पुनर्जन्मवादः, ईश्वरस्य जगत्प्रणेतृत्वञ्च कालिदासस्य जीवनदर्शनस्य केचित्पक्षाः । स हि सन्दिशति -

'त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।

यशसे विजिगीषूणां प्रजायै

गृहमेधिनाम्।।

इति।

कवेः देशः

कालिदासस्य जीवनवृत्तिविषये अनेकाः लोकविश्रुतयः अनेके वादाः च सन्ति । केचित् एनं विक्रमादित्यस्य सभायां कविः इति मन्यन्ते । केचित् गुप्तकालीननरेशाणाम् आश्रयं प्राप्तवानिति कथयन्ति । धारानगरे भोजराजस्य सभायां कविरत्नपदभूषितः अभूत् इति कथाकोविदाः कथयन्ति। जनश्रुत्यनुसारं बाल्यकाले सः अतीव मूर्खः आसीत् । विद्याधरया सह तस्य विवाहः अभवत् । मूर्खः पतिः इति ज्ञात्वा विद्याधरा तं कालीदेव्याः आलयं नीत्वा यावत् सा भवते विद्यां न उपदिशति तावत् भवता ततः बहिः न आगन्तव्यम् इति आदिशत् । ततः पत्न्याः कथनानुसारेण तथैव आचरितः कालिदासः कालीदेव्याः



Scanned with CamScanner

वरप्रसादेन विद्वान् अभवत् इति । इयं कथा कालिदासस्य प्रतिभया कविताचातुर्येण च जाता तथ्या तु न इति विदुषां मतिः । यतः जानकीहरणस्य कर्ता राजाकुमारदासः च सप्तमे शतके आस्ताम् इति विद्वांसः निश्चितवन्तः । अतः अयं तस्मिन् काले नासीत् इति वक्तुं शक्यते । इतोऽपि कालिदासस्य कविताचातुर्यं निर्दिश्यमानाः अनेकाः कथाः सन्ति ।

1.उत्तररामचरितस्य कर्ता भवभूतिः स्वयं नाटकं विलिख्य कालिदासस्य अभिप्रायं प्रष्टुं गतः आसीत् । समग्रं नाटकं परिशील्य पठित्वा च कालिदासः नाटकस्य प्रथमाङ्के विद्यमाने –

किमपि किमपि मन्दं मन्दमासत्तियोगा-

दविरलितकपोलं जल्पतोरक्रमेण ।

अशिथिलपरिरम्भव्यापृतेकैकदोष्णो-

रविदितगतयामा रात्रिरेवं व्यरंसीत् ।।

श्लोकेऽस्मिन् 'रात्रिरेवं' इत्यत्र रात्रिरेव इत्येव सूक्तमिति परिष्कारम् अकरोत् । भवभूतिना लिखिते श्लोके एवं रसमयार्थः यथा द्योत्येत तथा परिष्कारं कृतवानिति अत्र कालिदासस्य काव्यप्रतिभां सहृदयाः श्लाघितवन्तः चेदपि भवभूतिकालिदासौ समकालीनौ आस्ताम् इत्येतं विषयं ऐतिहासिकाः नाङ्गीकुर्वन्ति ।

२. अपरा काचित् कथा एवं श्रूयते यत् कदाचित् सरस्वती देवी कालिदासभवभूत्योः कवितागुणतारतम्यं परीक्षितुं तुलायां द्वयोः स्थाल्योः उभौ अपि स्थापितवती इति । तदा भवभूतेः स्थाल्याः भारः न्यूनः अभवदिति सरस्वती स्वस्य कर्णे धृतं कल्हारमुकुलमकरन्दं तत्र योजितवती इति । तस्मात् द्वे स्थाल्यौ अपि समाने जाते इति श्रूयते । कालिदासस्य कविताचातुर्यं परिश्लाघ्यमानानि अनेकानि उपाख्यानानि 'भोजप्रबम्ध'इत्यस्यां कृतौ परिदृश्यते । परन्तु तानि सर्वाणि प्रमाणभूतानि इति वदितुं न शक्यते ।

३. विक्रमसंवत्सरस्थापकस्य विक्रमादित्यस्य आस्थाने नवरत्नेषु अयमपि अन्यतमः इति परम्परागतः अपरः विश्वासः । यथा –

धन्वन्तरि-क्षपणकामरसिंह-शङ्कुवैतालभट्ट-घटकर्परकालिदासाः ।

Scanned with CamScanner

गवेषकाणाम् एक: एव निष्कर्ष: अद्यावधि समुपलभ्यते यत् पुरातना: कवय: स्वनिर्वचनं नैव कुर्वन्ति स्म इति । पाठकानां सामाजिकानां गवेषकाणां च प्रश्न: भवति बलवान् येन प्रेरिता: ते एतादृशान् ऐतिहासिकान् विषयान् कौतूहलेन गवेषयन्ति । गवेषणाया: सिद्धान्ता: प्रकाराणि च विभिन्नानि दृश्यन्ते । अस्य जीवनविषये बह्व्य: दन्तकथा:, ऐतिहासिककथा: च सन्ति । मेघदूते अन्यासु कृतिषु स: पुन:पुन: उज्जयिन्या: सौन्दर्यं वर्णितवान् अत: स: तत्रैव बहुकालम् उषितवान् स्यात् । काश्मीरे प्रवर्धमानस्य केसरपुष्पं स: केवलं वर्णितवान् इत्यत: काश्मीरीय: स्यादिति केषाञ्चित् अभिप्राय: । तेन मेघदूते निर्दिष्ट: रामगिरि: विदर्भे अस्ति । तत्रत्यानि असनवसनादिविषयान् स: वर्णयति इत्यत: विदर्भीय: स्यादिति, न समीचीनं निर्णयं लभते । मालवं विस्तरेण वर्णितवान् इत्यत: स: मालवीय: अस्तीति पुनश्च केषाञ्चित् अभिप्राय: । रघुवंशमहाकाव्ये तेन वर्णितं रघो: दिग्विजयं सूक्ष्मतया परिशीलयामश्चेत् भारते तस्य अपरिचित: प्रदेश: नास्तीति स्पष्टं ज्ञायते । यथा असमप्रदेशम् अवर्णयत् तथैव मनोहरशैल्या केरलमपि अवर्णयत् । हिमालयमिव समुद्रतीरमपि सुन्दरम् अवर्णयत् । अत: स: राष्ट्रकवि:, उज्जयिनी तस्य स्थिरस्थानम्, समग्रभारतं तस्य चरस्थानम्, अत: समग्रभारतमेव तस्य प्रदेश: इत्यपि वक्तुं शक्यते । एतदीयमातापित्रो: नामनी अद्यापि नोपलभ्येते न वा अयमेव सम्यक्तया निर्णयो जात: यदयं कुत्रत्य: इति । अस्य काव्यनाटकेषु आसमुद्रं भूस्थानानि वर्णितानि सन्ति । अस्य देश: काश्मीर इति, बङ्गाल इति, गालव इति च विभिन्ना: वा वादा: मण्डिता: बुधै: । यद्यपि कालिदासत्रयीति समालोचकपरम्परया अवबुध्यते तथापि संस्कृतसाहितीपरिचितानां मन:सु स: अन्यतम: कालिदास: । यदियं काव्यत्रयं नाटकत्रयं च जगन्मोहयति । आवर्जयति च हठात् पाश्चात्त्यविदुषामपि मनांसि ।

व्यक्तित्वम्

नूनमयं शैव: इति हेतो: मेघदूतकृतम् उज्जयिनीस्थमहाकालवर्णनं तत्रत्या: भौगोलिकीस्थिते: तत्सम्बद्धं चित्रणं निरीक्ष्य बहव: विद्वांस: अयम् उज्जयिनी निवासी इति विश्वसन्ति । इत्थं परिचयशून्योऽपि सर्वपरिचित: महाकविरयं सर्वासु दिक्षु स्वकीयम्

Scanned with CamScanner

कालिदासस्य काव्येषु वयं भारतसंस्कृतिदर्शनं पश्यामः ।

तेन चित्रिताः नायकाः प्रेमपाशे संलग्नाः चेदपि सभ्यतायाः सीमां न अतिक्रामन्ते स्म । नायकाः दाक्षिण्यपराः, धर्मनिष्ठाः आसन् इति कवेः चित्रणं तस्य मनोधर्मं सूचयति । कालिदासः बालेषु नितरां स्निह्यति स्म इति बहुत्र व्यक्तः भवति । मित्राणि परिवाराः, भृत्याः, अतिथि-अभ्यागताः, तपस्विनः इत्यादिभिः नायकैः आचर्यमाणया रीत्या कवेः कुटुम्बदृष्टिं सामाजिकदृष्टिं ज्ञातुं शक्नुमः । तस्य नाटके आदौ क्रियमाणानि तेन लिखितानि सम्भाषणानि तस्य विद्वद्विनयं व्यनक्ति । अभिज्ञानशाकुन्तलस्य अन्तिमभागे परमेश्वरेण पुनर्जन्मराहित्या मुक्तिः दीयताम् इति तेन कृता प्रार्थना कालिदासः तृप्तिकरं परिपूर्णं जीवनं कृत्वा भगवति मुक्तिमपेक्ष्यमाणः अस्तीति अवगम्यते ।

कालः

आभारतीया भारतीया वा कविवरमिमं नवीनतमं प्राचीनतमं वा कल्पयन्तु नाम, किन्तु अस्य कृतिभिः एतस्य स्थायि यशः न मनागपि ह्रीयते । अस्य कालविषये तु प्राधान्येन । 1 तत्र प्रथमं क्रिस्ताब्दतः पूर्वं प्रथमशताब्द्याम् । 2. द्वितीयं क्रिस्ताब्दतः पश्चात् पञ्चमशताब्द्याम् । 3 तृतीयं क्रिस्ताब्दतः पश्चात् षष्ठशताब्द्याम् । प्रथममतस्य समर्थकाः प्रायः सर्वेऽपि विद्वांसः सन्ति । तेषां कथनमिदम् अस्ति यत् कालिदासः राज्ञः विक्रमादित्यस्य आस्थाने नवविद्वन्मणिषु आसीत् अन्यतमः । यथा - मालविकाग्निमित्रस्य कथांशेन परिज्ञायते यत् कालिदासः शुङ्गवंशस्य अभिज्ञः इति । कालिदासस्य काव्यरचनाप्रणाली सुतरां स्वाभाविकी सत्यपि महाभाष्यम् अनुकरोति । प्रवृत्तिरियं

Scanned with CamScanner

स्थितं तत्पुत्रमग्निमित्रं नाटके नायकीकरोतीति परं प्रमाणं तस्य तत्समकालिकत्वस्य । अग्निमित्रो हि तदा पित्रा कृतवैरो विदिशापालक आसीदिति।

सोऽहमिदानीमंशुमता सगरपुत्रेणेव प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति कथनेन ज्ञायते । तत्र हि सम्राट् पुष्यमित्रस्तत्कालप्रचलितेन सेनापतिशब्देन प्रतिज्ञातोऽपि दृश्यते । यथोक्तं -

ठस्वस्ति । यज्ञशरणात् सेनापतिः पुष्यमित्रो वैदिशस्थं पुत्रमायुष्यन्तमग्निमित्रं स्नेहापरिष्वज्येदमनुदर्शयतिऽऽऽऽइति ।ठ ठअदिघोरे क्खु पुत भो सेनावदिणा णिउत्तो'' इत्यपि ।

पुष्यमित्रो हि प्रथमं मौर्यस्य देवभूतेः सेनापतिरासीत् । स हि तं हत्वा स्वयमेव राज्यं बुभुजे । तेन हि स तदा सेनापतिशब्देनैव ज्ञातो व्यवहृतश्चासीत् । स हि नीचगिरौ शिलावेश्ममात्राणि जानाति । तथैव स विदिशा दशार्णानां राजधानीत्वेन स्मरति, यद्धि शुङ्गकाले एवाऽऽसीत् । स हि शुङ्गवंशीयं त्रैपुरुषिकं जानाति । यदि नाम कालिदासः शुङ्गशासनानन्तरकालिकः स्यात्तदा स तथाविधमनतिप्रसिद्धं युवराजमग्निमित्रं नैव नायकीकुर्यात् । किन्तु पक्षस्यास्य सिद्धाववि सन्त्यनेका विप्रतिपत्तयः। कालिदासो हि रघुवंशे षष्ठसर्गे इन्दुमतीस्वयंवरप्रसङ्गे राजवर्णनक्रमे प्रथमं मगधेश्वरमेव गृह्णाति वर्णयति च तदुत्कर्षं यथा स मागध एव स्यात्, किन्तु तत्सम्मतः परन्तपो नाम मागधो राजा न कुत्रापि पुराणेष्वपि श्रुयते । रघुवंशे एवं चतुर्थसर्गे मगधं वा पुष्पपुरं पुनर्नामतोऽपि न

Scanned with CamScanner

देशास्थितिकालनिर्णयः । अतो विक्रमपूर्वद्वादशशतकमारभ्य विक्रमानन्तरषष्ठशतकपर्यतं समालोचकाः तत्स्थितिकालपूर्वपरसीमां मन्यन्ते। तेषु हि ये खलु कालिदासं विक्रमानन्तरषष्ठशतकभवं मन्यन्ते फर्युसनमहाशयोऽग्रणीः । स हि रघुवंशे हूणपराजयवर्णनमवलोक्य तद्विक्रमानन्तरैकोत्तरषट्शतवर्षघटितोज्जयिनीनरेशयशोधर्मकृतहूणपराजयेन संयोज्य कालिदासं तस्यैव राज्ञः सभापण्डितं मन्यते । इतिहासे हि घटनैषा कारूरसङ्ग्रामनाम्ना ख्याता । फर्ग्युसनानुसारेण अनेनैव राज्ञा हि हूणाः पराजित्य विक्रमादित्योपाधिधारणं कृतमासीत् प्रवर्तितश्च तेन विक्रमशको यस्य प्राचीनत्वसिद्धये षट्शतवर्षाणि तत्र योजितानीति । किन्तु मतमिदं नैव निर्दोषं यतो हि तत्पूर्वमेव शकोऽयं मालवनाम्ना प्रचलित आसीदिति -

मालवानां गणस्थित्या याते शतचतुष्टये।
त्रिनवत्यधिकेऽब्दानाम्रितौ सेव्यघनस्तने।।
सहस्यमासशुक्लस्य शिस्तेऽह्नि त्रयोदशे ।
मङ्गलाचारविधिना प्रासादोऽयं निवेशितः।।

इति बन्धुवर्मणो मन्दसोरशिलाभिलेखतस्तथैव

Scanned with CamScanner

षट्शतवर्षपूर्वभवमनतिख्यातयशसमग्निमित्र नायकीकरोतीति तर्कः कुतर्क एव मन्यते। अपरञ्च रघुवंशेऽ१४.समुपवर्णितस्य पाण्ड्यराज्यस्य यस्योरगाख्यं पुरं राजधानी आसीत् गुप्तकाले नामाऽपि न श्रूयते स्वतन्त्रराज्यरूपेण । तदस्तित्वं तु शुङ्गकाल एवासीत्।

सङ्क्षेपतः कालिदासविषये वासुदेवमहोदयेन कतिपयानि तथ्यानि सङ्कलितानि तेषां विचारणया एतदेव सिध्यति यत्कालिदासः शुङ्गकालीन एव विशेषतोऽग्निमित्रसभासद् वैदिशः।

शुक्लकालीनत्वेन सम्मतासु 'भीट' मुद्रासु मृगमनुधावमानः कश्चिन्नृपः श्चित्रितो दृश्यते । अनेन मन्यते यदभिज्ञानशाकुन्तलस्य शुङ्गकाले एव रचना सम्मताऽऽसीत् । तादृशी घटनाऽभिज्ञानशाकुन्तले एव वर्णिताऽस्ति नान्यत्र । कालिदासस्य नैसर्गिकी शैली तमाचार्ययुगस्य प्रतिनिधित्वेनोपस्थापयति न तु पण्डितयुगीनत्वेन । तस्य हि रचनायां नैव कुत्रापि पाण्डित्यप्रदर्शनप्रयासः, न हि तत्र शब्दानामाडम्बरः, न चित्रता, नालङ्कारप्राचुर्यं न हि वर्णनस्यातिमात्रविस्तरः न च दुरूहत्वं कुत्रापि । उक्तमेव -

अस्पृष्टदोषा नलिनीव दृष्टा हारावलीव प्रथिता गुणौघैः।

प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी।।

Scanned with CamScanner

शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः।।

अनेन कालिदासस्य पण्डितयुगात्प्रागेव सम्भवः मन्यते। कालिदासस्य अमरसिंह-वराहमिहिरादिसमकालिकत्वं यदुच्यते तदपि सत्याद् दूरमेव मन्यते। यतो हि कालिदासः पेलवशब्दं कोमलेऽर्थे प्रयुनक्ति यथा कुम्मारसम्भवे - पदं सहेत भ्रमरस्य पेलव शिरीषपुष्पं न पुनः पतत्रिणः। इति । अमरसिंहस्तु 'पेलवं विरलं तनु' इति पठति । एवमेव कालिदासो हि परमेष्ठिपदेन विष्णुं जानाति । 'अमरसिंहस्तु तत्पितामहपर्यायवाचकं मन्यते'। कालिदासो हि छन्दोमात्रैकगोचरानपि शब्दान् यत्र कुत्र प्रयुनक्ति यथा वेदेषु - 'आ नो भद्राः कृतवो यन्तु विश्वतः ।' कालिदासोऽपि - तं पातयां प्रथममास पपात पश्चात् । संयोजयां बिधिवदास समेतबन्धुः इति।

अनन्तरकालिकेषु कविषु नेदृशी प्रवृत्तिः दृश्यते । तेन हि कालिदासेन वैदिकलाकिकसंस्कृतसन्धि-कालभवेन भाव्यम् इति मन्यते। कालश्चायं विक्रमपूर्वचतुर्थशतकादारभ्य विक्रमोदयं यावदभ्युपगतः । कालिदासो हि परशुरामं केवलं मुनिरूपेणैव जानाति । स हि अधिकांशतः साकेतनिमित्तमयोध्याशब्दमेव प्रयुनक्ति वाल्मीकिवत् । यथा -

पुरमविशदयोध्यां, आलोकयिष्यन् मुदितामयोध्यां, गृहवर्जमयोध्यया, सैन्यैरयाध्याभिमुखः प्रतस्थे, अयोध्यादेवताश्चैनं। साकेतशब्दस्य प्रयोगस्तु स्वल्प एव । यथा रघुवंशे - जनस्य साकेतनिवासिनस्तौ,साकेतोपवनमुदारमध्युवास इति । अनेनापि कालिदासस्य आचार्ययुगीनत्वं सिध्यति । पतञ्जलिरपि साकेतस्यैव बहुधा प्रयोगं करोति । 'अरुणधवनः साकेतम्' इत्यादौ । यद्यपि अभिज्ञानशाकुन्तलस्य कासुचित्प्रतिषु प्रस्तावनायां 'रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्य अभिरूपभूयिष्ठा परिषद्' इत्युक्तं दृश्यते तथैव नैतावदेव पर्याप्तं प्रमाणं कालिदासस्य विक्रमादित्यसभापण्डितत्वस्य ।

प्रथमं तु विक्रमादित्यशब्दो वस्तुतः संज्ञा उत उपपदमित्यप्यद्यावधि नैव निर्णीतम् । अत्रत्यं हि 'रसभावविशेषदीक्षागुरोः' इति विशेषणमपि साभिप्रायमेव दृश्यते । किं शकारिर्हि विक्रमादित्याख्यो नृपः कालिदासस्य रसभावविशेषदीक्षागुरुः सम्भवति ? यदि तथा तर्हि का तस्य वैशिष्टयसमर्थनपरा कृतिः ? सम्भवतो नैव । तेन हि पदमिदमुपपदमेव कस्यचित्तादृशयोग्यतासम्पन्नस्य राज्ञः । तर्हि कोऽसौ नृप इत्यपेक्षायामुच्यते सम्भवतः स हि मृच्छकटिकस्य कर्तृत्वेन सम्मतः शूद्रक एव । तथ्यमेवेदं समुद्रगुप्तप्रणीते कृष्णचरिते समुद्घाटितमस्ति । यदि शुदकः कालिदाससमकालिको वा तदाश्रयस्तदा स यदा भास-

Scanned with CamScanner

तस्याभवन्नरपतेः कविराप्तवर्णः श्रीकालिदास इति योऽप्रतिमप्रभावः।

दुष्यन्तभूपतिकथां प्रणयप्रतिष्ठा रम्याभिनेयभरितां सरसाञ्चकार।। इति ।

अग्निमित्रकाले एव सिन्धोः दक्षिणरोधसि यवनानां प्राबल्यमासीदिति मालविकाग्निमित्रतो ज्ञायते । सम्भवति पुष्पपुरं प्रत्यागतेऽग्निमित्रे शूद्रको हि विशालां शशासेति । शूद्रकोऽपि ब्राह्मण एव । तेनाग्निमित्रशूद्रकयोः यौनसम्बन्धोऽपि सम्भवति । शुद्रकस्य पुत्रो देवमित्रो यथाऽग्निमित्रस्य वसुमित्रः । शूदकस्य अग्निमित्रसद्योऽनन्तरकालिकत्वमैतिह्यासकदृष्ट्याऽपि सम्भवति । सम्भवति अग्निमित्रे पुष्पपुरं प्रति प्रस्थिते कालिदासः शूद्रकं समाश्रितवान् । यतो हि तस्य मालविकाग्निमित्रं प्रथमा कृतिरिति तस्यैव प्रस्तावनायाः 'पुराणमित्येव न साधु सर्वम्' इति वचनात् सिध्यति । विक्रमोर्वशीयं हि त्रोटकमवान्तरचना । अभिज्ञानशाकुन्तलञ्च नाटकेषु चरमम् । शुङ्गाः सर्वेऽपि माहेश्वरी यथा कालिदासः । शूद्रकोऽपि परमशैवः ज्ञात्वा शर्वप्रसादाद् इति तत्रोक्तेः । एवमेव तस्य श्रव्यकाव्येऽपि ऋतुसंहारं प्रथमा कृतिः, कुमारसम्भवं मेघदूतं रघुवंशञ्च ततः क्रमेण प्रणितानि ।

शूद्रको हि जीवनकाले एव पुत्रं देवमित्रं राज्येऽभिषिच्य वनं प्रविष्ट आसीत्तपसे । शुङ्गा हि १३९ वर्षाणि भुवं बुभुजुर्यत्र पुष्यमित्र एक एव षष्टिवर्षाणि महीं शशास । ततश्चाग्निमित्रः केवलं सप्तवषाण्येव डकालिदासस्य हि अग्निवर्णाग्निमित्रावभावेव विलासिनावल्पायुषौ च .ततश्च वसुमित्रो दशवषणि । वसुमित्रानन्तरं शुङ्गा हि क्षीणबला

Scanned with CamScanner

कविमूर्धन्यः, स्वकीयकुलकेतनः, सर्वतन्त्रस्वतन्त्रः, सकलशास्त्रासारानश्यन्दः, काव्यकोशविकासविभाकरः, वैदर्भीरीतिसभाजनसभ्यः, प्रसादगुणालम्बनः, उपमासीमन्तिनी-सीमन्तसिन्धूरदानसरसः, कविताकामिनीविलासः, काव्यरचनाविक्रमादित्यः, श्रीविक्रमादित्य कविकादम्बकदम्बसमाराधितपादपद्मः, मुकुटालङ्करणारहितोऽपि सार्वभा-

Scanned with CamScanner

वादप्रसङ्गो नाटकं रञ्जयति विशेषेण । स्त्रीप्रधानमिदं नाटकं नाटिकाप्रकृतिकम्।

विक्रमोर्वशीयम्

विक्रमोर्वशीयं हि पञ्चस्वङ्केषु विभक्तं त्रोटकम् । अत्र हि पुरुरवस ऊर्वश्याश्च प्राधान्येन प्रेमव्यापारो वर्णितः। केशिदैत्येन पीड्यमानोर्वशी पुरुरवसा विक्रम्य रक्ष्यते । परस्परावलोकनेन तौ हि स्नेहाद्रचित्तौ भवतः। नायके नितान्तमनुरक्तोर्वशी नाटकाभिनयानन्तरे पुरुषोत्तमेति वक्तव्ये पुरूरवा इत्युच्चरति । तेन 'भुवं गच्छ' इति भरतेन शप्ता पुरूरवसा सह परिणीता भवति । अथ च प्रणयकुपितोर्वशी निषिद्धस्त्रीप्रवेशां कार्तिकेयवनीं प्रविष्टा लतायां परिणता भवति । पुरूरवा अपि तां कथञ्चित्तत्र पूर्वभावं प्रत्यावर्तयति । पश्चाच्च यावज्जीवमेव पुरन्दरेण तयोः संयोगेऽनुमते त्रोटके समाप्नोति ।

अभिज्ञानशाकुन्तलम्

दुष्यन्तं पश्यन्ती शकुन्तला, राजा रविवर्मा

Scanned with CamScanner

विलोक्य नूनं भृशमुत्सुकाश्चिरं निशाक्षये याति ह्रियेव पाण्डुताम्।।

वर्षावर्णनं यथा -

निपातयन्त्यः परितस्तटदुमान्प्रवृद्धवेगैः सलिलैरनिर्मलैः।

स्त्रियः सुदुष्टा इव जातिविभ्रमाः प्रयान्ति नद्यस्त्वरित पयोनिधिम्।।

पयोधरैर्भीमगभीरनिस्वनैस्तडिद्भिरुद्वेजितचेतसो भृशम्।

कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम्।।

शरद्वर्णनं यथा

Scanned with CamScanner

वलम्बनार्थो स्वकुशलमयमुदान्तं प्रियायै प्रेषयितुमिच्छन् तन्निमित्तमुदगुच्चलितं बलाहकं प्रार्थयते निदशति च मार्गं रामगिरितः आरभ्यालकापर्यन्तम् । तदनुसारेण रामगिरितः आम्रकूटस्ततश्च नर्मदा ततो वेत्रवती ततश्च विदिशा ततश्च वामेन विशाला तदनु कुरुक्षेत्रं ततः कनखलं ततः कैलाशस्तदनु मानसं ततोऽलकेति गन्तव्यमार्गः । ततश्च अलकायां गृहपरिचयानन्तरं सन्देशकथनं ग्रथितमस्ति । सन्देशश्च नितान्त एव मार्मिकः। यथा -

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्। अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिराप्यते मे क्रूरस्तस्मिन् न सहते सङ्गमं नौ कृतान्तः।।

समालोचकाः ह्यत्र वाल्मीकीयरामायणस्य वर्षावर्णनस्य हनुमतो दौत्यस्य च प्रभावं पश्यन्ति । काव्यस्याय वैदर्भी रीतिः कवेरपूर्ववर्णननिपुणता प्रस्फुटन्ती पदे पदे प्रतिभा च काव्यमिदं सर्वोत्कृष्टकोटौ स्थापयन्ति । एतच्च पश्चादनेकेषां दूतकाव्यानामुपजी-व्यमप्यभूत् । यथा हि विक्रमस्य नेमिदूतं, वादिचन्द्रस्य पवनदूतं, व्रजनाथस्य मनोदूतं,

Scanned with CamScanner

द्रवयाः स पुरन्दरप्रेरणया तारकासुर निहन्ति । सर्वतोभावेन कमनीयतमेऽस्मिन् काव्य सर्वेऽपि श्लोका भाव-भावस्वभाव नवनवत्वनयन्ति । दिङ्मात्रमुद्धरणं यथा -

यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किम्पुरुषाङ्गनानाम्।

अवचित बलिपुष्पा वेदिसम्मार्गदक्षा नियमविधिजलानां बर्हिषाञ्चोपनेत्री।

गिरिशमुपचचार प्रत्यहं सा सुकेशी नियमितपरिवेदातच्छिरश्चन्द्रपादैः।।

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिः निक्षेपणाय पदमुद्धृतमुद्वहन्ती।

मार्गाचलव्यतिकराकुलितेव सिन्धुः, शैलाधिराजतना न ययौ न तस्थौ ।

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी लीलाकमलपत्राणि गणयामासे पार्वती।।

नवपरिणयलज्जाभूषणां तत्र गौरी वदनमपहरन्तीं तत्कृताक्षेपमीशः ।

Scanned with CamScanner

आवहति । कालिदासेन अन्यानि काव्यानि नाटकानि ग्रथितानि चेदपि संस्कृतग्रन्थकाराः तं रघुकविः इति प्राशंसन् । तस्मात् अस्य काव्यस्य उत्कृष्टता अवगम्यते । दशम-सर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता । तदुत्तरं रामवंश्यानां तत्तन्नृपाणां चरितानि उपन्यस्तानि । अन्तिमः सर्गो गर्भान्धस्याग्निवर्णस्य अभिषेकेण समाप्यते –

तपस्यास्तथाविधनरेन्द्रविपत्तिशोकादुष्णैर्विलोचनजलैः प्रथमाभितप्तः ।

निर्वापितः कनककुम्भमुखोज्झितेन वंशाभिषेकविधिना शिशिरेण गर्भः ।।

कालिदासः अग्निवर्णपरवर्तिनां राज्ञामपि वर्णानं चिकीर्षति स्म । परमसौ कालेन कवलीकृतः। अन्ये पुनः कालिदासेन परतोऽपि रघुवंशस्य सर्गाः लिखिताः परन्तु ते न प्राप्यन्ते इत्याहुः । बहवः तु कालिदास-अग्निवर्णसमकालिकतया ग्रन्थस्य तत्पर्यन्तां समर्थयन्ते । रघुवंशः येषां राज्ञां वर्णनानि सन्ति, येषां रामायणवर्णितनृपैः सह भेदः आपतति, परन्तु वायुपुराणवर्णितरामवंशावल्या सह रघुवंशवर्णितरामवंशावली भूयसा सामञ्जस्यं धारयति ।

रघुवंशं हि कालिदासस्य प्रौढतमं काव्यं मन्यते । अस्य हि सम्प्रति एकोनविंशति-सर्गाः प्राप्यन्ते । विश्वस्यते हि काव्येऽस्मिन् ततोऽप्यधिकाः सर्गाः सम्भवन्तीति यतस्तत्र ग्रन्थसमाप्तिसूचकं नैव पद्यं लभ्यते । काव्यमिदं वागर्थरूपपरमेश्वरयुगलवन्दनया प्रारभ्यते । सश्रीकोऽपि कोशलेन्द्रो दिलीपोऽनपत्यतया तदर्थं वसिष्ठाश्रमं गच्छति । कुलगुरुस्तदर्थं सुरभीशापं निवारकं विज्ञाय तन्निमित्तं नन्दिनीसेवनायादिशति । स्वरक्षार्थं समर्पितदेहाय तस्मै नन्दिनी पुत्रप्राप्तिरूपवरं ददाति । दिनेषु गच्छत्सु सुदक्षिणा रघुं प्रसूते। रघोरपि अजस्तस्य दशरथाख्यः सुतः क्रमेण पृथिवीं पालयतः । दशरथस्य सम्पादितपुत्रेष्टियज्ञस्य राम-भरत-लक्ष्मण-शत्रुघ्नाख्याश्चत्वारः पुत्राः भवन्ति । रामो हि धनुःषणं विजित्य ज-

Scanned with CamScanner

जलाविहारवर्णनञ्च, सप्तदशे राज्याभिषेकवर्णनमतिथेः, एकोनविंशेऽग्निवर्णस्य कामकेलिवर्णनं काव्यस्यास्य समुल्लेखनीया विषयाः ।

केचिदस्य काव्यस्य सप्तदशसर्गे एवावसानं मन्यन्ते । तदवसानपद्यमपि तथासूचकमेव दृश्यते नैव च तदनन्तरवर्तिनोरध्याययोः कालिदाससम्मता चमत्कृतिरपि। एवं मन्यते यदत्र द्वौ पक्षौ सम्भवतः । प्रथमस्तु काव्यमिदं सप्तदशसर्गे एव विरचितं सम्भवति अपरश्च यदि न तथा तदाऽस्य एकोनविंशतिसर्गानन्तरमपि आसन्नन्येऽपि कतिपये सर्गाः ये खलु कालेन कवलिताः । अथवा एदन्तराले एव कवि पार्थिवं विग्रहमत्यजदिति । अथवा हि प्राच्यसंस्कृतिसमुन्नायको हि कविर्न तथाऽप्रशस्ते प्रसंगे स्वं काव्यं समापयिष्यति ।

स्तोत्राणि

कालीस्तोत्रं, गङ्गाष्टकं, चण्डिकादण्डकं, श्यामलादण्डकं, मकरन्दस्तवः, अम्बास्तवः, लक्ष्मीस्तवः, लघुस्तवः, कल्याणस्तवः, शृङ्गारतिलकप्रभृतीनि च ।

महाकवेः कालिदासस्य विद्वत्तायाः व्यक्तित्वस्य विषये च तस्य ग्रन्थाः एव निरूपयन्ति । तस्य त्रिषु नाटकेषु च आदौ शिवस्तुतिः विद्यते । कुमारस्कन्दस्य जननं वर्णयित्वा किञ्चित् काव्यमेव अलिखत् । रघुवंशस्य आरम्भे पार्वतीपरमेश्वरं च सम्प्रार्थितवान् । अभिज्ञानशाकुन्तलस्य अन्तिमभागे नीललोहितः मुक्तिं मे ददातु इति शिवं प्रार्थयामास । एतैः कारणैः कालिदासः शिवभक्तः इति स्पष्टं भवति । परम् अन्यत्र सः ब्रह्माणं विष्णुं च अस्तौत् । एतत् अस्य सौहार्दपूर्णव्यक्तित्वस्य निदर्शनम् । तस्य कृतिषु वैदिकयज्ञयागादिनाम् उच्चस्थानम् अस्ति । उपनिषदां तत्वानि जीवनदृष्टेः आधारभूतानि इति परिदृश्यते ।

नाटकानि

मालविकाग्निमित्रम्-एतत् राज्ञः अग्निमित्रस्य कथा अस्ति। सः मालविका नाम सेविकाम् अकामयत्। एतं विषयं ज्ञात्वा स्वराज्ञी अक्रुध्यत् मालविकाम् आसेधयत् च। परन्तु मालविका राजपुत्री आसीत्। तस्याः जन्म ज्ञात्वा राज्ञ्याः अनुमत्या अग्नि-

Scanned with CamScanner

रघुवंशम्-रघुवंशम्' महाकविना कालिदासेन विरचितमेकं महाकाव्यमस्ति। महाकाव्येऽस्मिन् राज्ञः रघोः वंशस्य पूर्णं वर्णनमस्ति। सूर्य-प्रभवस्यास्य वंशस्य मन्-
ु-दिलीप-अज-दशरथ-रामादीनां सर्वेषां नृपाणां विस्तृतं वर्णनमस्ति।

कालिदासस्य काव्यवैशिष्टयम्

कविकुलगुरुः कालिदासः संस्कृतवाङ्मये स्वप्रकृते प्रथमोऽन्तिमश्च कविः । कथितं हि -

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।

अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।। इति ।

स हि वैदर्भरीतेः कविः । स्वल्पसमासा स्वभावसरला च तस्य शैली सर्वानिव सद्य आकर्षयति इति तस्य कलापक्षापेक्षया हृदयपक्षस्य प्राधान्यं काव्येषु । मूलतः स अभिधायाः कविः किन्तु तस्य काव्यं ध्वनिप्रधानम् । स हि गूढमप्यर्थं सरलतया व्यनक्ति । तत्र हि रसस्य तथा प्राञ्जला सिद्धिर्यया कमनीयता तत्रैव कृतनिवासा दृश्यते । स हि न कुत्रापि पश्चाद्वर्तिकविरिव पाण्डित्यं प्रदर्शयति । तस्य हि सर्वाण्यपि पात्राणि नैव विचारवाहकान्यपि तु स्पष्टव्यक्तिकानि कथानुकूलानि च । सर्वोऽपि पात्रवर्गः स्वे स्वे स्थानेऽनुकूलत्वेन निबद्धोऽस्ति । तस्य काव्ये समय-स्थानक्रियाणां समन्वितिः स्पष्टं दृश्यते । प्रसादगुणसमुज्ज्वला तस्य कृतिनितराञ्चमत्कारातिशयं बिभर्ति । यथा हि -

Scanned with CamScanner

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।

आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः।।

तस्य हि उपमाचमत्कारस्तु सर्वानेवातिशेते । यद्यपि तत्कृतौ यमकोत्प्रेक्षाऽर्थान्तरन्यासादीनाम् अप्यलङ्काराणां कमनीयः प्रयोगो दृश्यते, तथापि स हि उपमानिपुणः प्रतिभाति सर्वत्र । स हि प्रायः पूर्णोपमामेव प्रयुनक्ति काव्ये चमत्कारोत्कर्षाय । यथा हि -

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।

नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः।।

रघुवंशे हि नवमे सर्गे तेन हि यमकप्रयोगोऽपि तथैव विहितः । यथा हि -

परिचयं चललक्ष्यनिपातने भयरुषोश्च तदिङ्गितबोधनम्।

श्रमजयात्प्रगुणाञ्च करोत्यसौ तनुमतोऽनुमतः सचिवैर्ययौ।।

Scanned with CamScanner

मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ ।।ड५०.

एभिरन्यैश्च वैशिष्ट्यैः कालिदासः कविकुलगुरुः, स्मृतोऽनुकृतश्च पश्चाद्वर्तिभिः कविभिः ।

उद्धरणानि

वागर्थाविव सम्पृक्तौ वागर्थः प्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

-रघुवंशम्

**अश्वघोषः**

संस्कृतसाहित्यस्य सुप्रसिद्धः कविः। साकेतनगरम् अस्य जन्मस्थानम् । साकेतनगरम् अधुनातनम् अयोध्यानगरमेव । एष आर्यसुवर्णाक्ष्याः पुत्र इति अस्य सौन्दरानन्दकाव्यान्ते आर्यसुवर्णाक्षीपुत्रस्य साकेतकस्य भिक्षोराचार्यभदन्ताश्वघोषस्य महाकवेर्महावादिनः कृतिरियम् । इत्यस्मात् वाक्यादवगन्तुम् शक्यते । अस्य काल ईशायाः प्रथमशताब्दीति स्वीकृयते जिज्ञासुभिः । अयं सम्राजः कनिष्कस्य समकालिकः आसीत् । अश्वघोषः कनिष्कराजस्य गुरुः इति, सः जन्मना ब्राह्मणः आसीदिति, वेदादिशास्त्रेषु निष्णातः प्रतिवादिभयङ्करः महापण्डित आसीत् इत्यपि ज्ञायते। पश्चात् अश्वघोषः बुद्धस्य उपदेशैः आकृष्टः बुद्धसङ्घाध्यक्षात् वसुमित्रात् बौद्धदीक्षां प्राप्य बौद्धमतमङ्गीकृतवान् । अयम् सङ्गीतेऽपि परिणतः आसीत् । अस्य गायनसमये अश्वाः अपि गानश्रवाणपरवशाः भूत्वा तत्समये तृणादीनि न सेवन्ते स्म । अत एव ठअश्वघोषठ इति अस्य नाम जातम् इति विचिन्तकाः वदन्ति ।

अश्वघोषः स्वर्णाक्षीपुत्रः पार्श्वस्य शिष्यश्च कथ्यते । स हि मगधराजाश्रितः आसीत् । उत्तरभारतशासकः कनिष्को मगधाधीशम् आक्रमणेन नमयित्वा राज्यस्य परिवर्त्ते वस्तुद्वयं दातुमादिष्टवान् – १. बुध्दस्य पात्रम् २. अश्वघोषञ्च । राजा मगधानां पात्रं दातुमुद्यतोऽपि कविमश्वघोषं दातुं नैच्छत् मन्त्रिणस्तं तथाऽवलोक्य चिन्ताग्रस्ता अजायन्त । राजा मन्त्रिणां बोधनाय उपायमेकं कृतवान् । स हि स्वाश्वशालास्थितेभ्योऽश्वेभ्यो दिनमेकं यावत् ग्रास् प्रदानं न्यषेधत् । दिनान्तरे सर्वेषां हयानामग्रे ग्रासं प्रदाय अश्वघोषाय स्वसङ्गीतिं कर्तुं

Scanned with CamScanner

नाटिका खण्डितावस्थायां लभ्यते । एतेषां ग्रन्थानां समाप्तिवाक्येषु स्वमातरम् सुवर्णाक्षीं स्मरत्येषः । वेदं, रामायणं, महाभारतम्, आर्हतं, सांख्यं, वैशेषिकादिदर्शनानि च एषः सम्यक् जानाति स्म । अश्वघोषस्य नाटकानि लक्षणशास्त्रानुगुणानि एव सन्ति । अश्वघोषस्य कालिदासस्य च काव्येषु साम्यं दृश्यते । आचार्यपार्श्वेन अभिधम्मपिटकम् नाम्नः ग्रन्थस्य महाविभाषानामकम् व्याख्यानम् रचयितुं साहाय्यार्थम् अश्वघोषः काबूल्नगरं प्रति आहूतः आसीत् । इदं व्याख्यानं कनिष्कराजस्य काले विलिखितमिति ज्ञायते । अयं स्वस्य ’सूत्रालङ्कारशास्त्रग्रन्थे’ आश्रयदातारम् कनिष्कम्, आचार्यम् पार्श्वम्, महाभाषाव्याख्यान-कर्तारम् वसुमित्रम् च स्तौति । एतान् ग्रन्थान् अतिरिच्य वल्लभदेवस्य सुभाषितावलौ अश्वघोषस्य पञ्च श्लोकाः दृश्यन्ते ।

अश्वघोषस्य साहित्यिकं पाण्डित्यं बौध्दर्शनज्ञानंचातीव गभीरमासीत् । स हि दार्शनिकमपि तथ्यं सरससरलशैल्यां समुपस्थापयति । अश्वघोषः पूर्वं ब्राह्मण आसीदतो ब्राह्मणसाहित्यस्यापि गाढं ज्ञानं रक्षति स्म । तत्कालप्रचलितानां नीतिशास्त्रकौटिल्यार्थ-शास्त्रवैद्यकादीनां ज्ञानेन सह व्याकरणस्य विस्तृतं ज्ञानं तेन रक्ष्यते स्म । तदीयं बा-ध्ददर्शनज्ञानं तु नितान्तसबलमासीत्, असौ योगाचारमतस्यास्थापक आसीत् । अश्वघोषेण शब्दानां विशिष्टेऽर्थं प्रयोगः कृतो योऽन्यत्र नासाद्यते, यथा ग्रन्त्री’ शब्दो यानार्थे ‘धर्मन्’ शब्दश्च व्यवहारार्थे ।

### काव्यशैली

आश्वघोषः शैल्या कालिदासम् अनुकरोति इति भासते । कालिदासः यं शब्दं

Scanned with CamScanner

४.:ततो नृपस्तस्य निशम्य भावम्, पुत्राभिधानस्य मनोरथस्य ।

स्नेहस्य लक्ष्म्या वयसश्च योग्याम् आज्ञापयामास विहारयात्राम् ।। बुद्धच. ३-३

५.:तां सुन्दरीं चेन्नलभेत नन्दः, सा वा न सेवेत नतं नतभ्रूः ।

द्वन्द्वं ध्रुवं तद्विकलं न शोभेतान्योन्यहीनाविव रात्रिचन्दौ ।। सौन्दरा.

६.:नावजानामि विषयान् जाने लोकं तदात्मकम् ।

अनित्यं तु जगन्मत्वा नात्र मे रमते मनः ।। बुद्धच. ४-८४

**भवभूति**

संस्कृतनाटककर्तृषु कविषु अतीव प्रसिद्धः । बहूनां संस्कृतकवीनां यथा तथैव भवभूतेरपि जीवनचरितम् नातीव ज्ञायते । अयम् महावीरचरिते नाटके स्वस्य विषये किञ्चिदिव विवृणोति; यथा- तत्र केचित् तैत्तरीयिणः काश्यपाश्चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिन उदुम्बरनामानो ब्रह्मवादिनः इति । तत्र स्वपरिचयं वदता भव-भूतिना भट्टगोपालस्य पौत्रः पवित्रकीर्तेः नीलकण्ठस्य आत्मसम्भवः श्रीकण्ठपदलाञ्छनो जातुकर्णीपुत्रः इति अभिहितम् । भवभूतेः प्रथमं नाम ठश्रीकण्ठःठ इति श्री एम्.आर्. तेलङ्गमहाशयः स्वग्रन्थे मालतीमाधवस्यसंस्कृतभाषाकथानुवादे लिखितवान् । अयं भवभूतिनामा कविः वेदान्तशास्त्रे, न्यायशास्त्रे, व्याकरणशास्त्रे ब्रह्मविद्यायां च निष्णातः आसीत् इति अस्य कवेः कृतिभिः ज्ञायते । एष काश्यपगोत्रजः । आपस्तम्बसूत्रस्य उदुम्बरब्राह्मणशाखायाम् जनिम् अलभत । अस्य माता जातुकर्णी । पिता नीलकण्ठः । पितामहः भट्टगोपालः । ज्ञाननिधिः भवभूतेः गुरुः । एष दाक्षिणात्यः । विदर्भदेशे

Scanned with CamScanner

तर्क-व्याकरण-पूर्वोत्तरमीमांसादीनि शास्त्राणि । अस्य पितृकृतं नाम श्रीकण्ठ इति ।ठ अपि च सः भवभूतिरिति नाम्नः कारणं निरूपयति यथा-

तपस्वी कां गतोऽवस्थाम् इति स्मेराननाविव ।

गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ ।।

तथा च

साम्बा पुनातु भवभूतिपवित्रमूर्तिः इति परशिवम् अस्तौत् इति तस्यैव भवभूतिरिति नामान्तरं जातम्ठ इति । एष स्वस्य शाखाया आपस्तम्बशाखाया एतदर्हविजानीयाद् अहर्भार्यामावहते । त्रिरात्रमुभयोरधश्शय्या ब्रह्मचर्यं क्षारलवणवर्जनं च । एतद् वाक्यं ठमालतीमाधवेठ नाटके उल्लिखति । एतेन कवेः स्वाभिमानिता द्योतते ।

**कालः**

भवभूतिः कुमारिलभट्टस्य शिष्य इति पण्डिताः त्रिपाठीमहोदयाः स्वस्य ठ कविता-कौमुदीठ इति पुस्तके व्यलिखन् । कुमारिल भट्टाश्च क्रि.श.८मे शतमाने आसन् । अतः भवभूतेः कालः अष्टमशतकम् । तथा च कन्याकुब्जे श्रीहर्षवर्धनात्(द्वितीयशिलादित्यात्) अनन्तरम् राजसु मुख्यः ठयशोवर्माठ एषः क्रि.श.६९३ तः ७२९ पर्यन्तम् राज्यभारम् अकरोत् । यशोवर्मा क्रि.श.७३० तमे वर्षे चीनदेशं प्रति राजप्रतिनिधिं प्रेषितवान् आसीत् । ततः दशवर्षानन्तरम् काश्मीरराजात् ललितादित्यमुक्तापीडात् पराजितः । अयं यशोवर्मा एव भवभूतेः आश्रयदाता आसीत् । इममेव विषयं ठराजतरङ्गिण्याःठ एतेन श्लोकेन अवगन्तुम् शक्यते । यथा-

कविवाक्पतिराजश्रीभवभूत्यादिसेवितः ।

जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ।।

Scanned with CamScanner

क्रमशः वीरश्रृङ्गारकरुणरसाः प्राधान्य वहन्ति।

**बिरुदावलिः**

वश्यवाक्यं कवेर्वाक्यम् इति महावीरचरिते अनेनैव उक्तत्वात् ठवश्यवाक्' कविरिति अस्य बिरुदम् भवति । व्याकरणन्यायमीमांसादिषु शास्त्रेषु परिणतः इति हेतोः ठपदवाक्यप्रमाणज्ञठ इति चतुश्शास्त्राभिज्ञत्वात् ठभट्टठ इति नामभिः भवभूतिम् आह्वयन्ति । महाव्याख्यानकर्ता ठजगद्धरःठ श्रीकण्ठ इति भवभूतेः पाण्डित्येन प्राप्तम् बिरुदम् इति स्पष्टतया वदति ।

नाटकानि

मालतीमाधवम्

महावीरचरितम्

उत्तररामचरितम्

चतुशशास्त्रपारङ्गतस्य भवभूतेः मनसि स्त्रीषु महानादरः । तेषु दिवसेष्वेव अयं महाकविः स्त्रीशिक्षां प्रोत्सहते स्म । अयं विषयः तस्य रचनासु दृश्यते । यथा-

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता । यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ।।

अस्य करुणरसपप्रधानम् उत्तररामचरितनाटकं न केवलं भारते देशे किन्तु प्रपञ्चेऽस्मिन् विशिष्टं स्थानमलभत । शाकुन्तलनाटकेन कालिदास इव उत्तरर-

Scanned with CamScanner

अत्र द्विजमुख्यतमः इति पदस्य क्षत्रजातिश्रेष्ठः इति [illegible] शिवप्रसादेन अस्मै दृष्टिर्लब्धा, तथा च अयम् अश्वमेधयज्ञं चकार, दशादिकैशतवर्षम् उषित्वा स्वपुत्राय राज्यं दत्त्वा स्वर्गलोकं जगाम।

ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां

ज्ञात्वा शर्वप्रसादाद्व्यपगततिमिरे चक्षुषी चोपलभ्य ।

राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा

लब्ध्वा चायुः शताब्दं दशदिनसहितं शूद्रकोऽग्निं प्रविष्टः ।।

अस्यैव नाटकस्य प्रस्तावनायाः तृतीयश्लोके अयं 'द्विजमुख्यतमः कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः इति दत्तमस्ति। पुनः पञ्चमश्लोके 'क्षितिपालः किल शूद्रको बभूव' इति पठ्यते शूद्रक इति नाम अभीरराजस्य इन्द्रगुप्तस्य पिकनिकरः अपि आसीत्।

**काल**

अस्य कालनिर्णये बहवो मतभेदाः –

स्कन्दपुराणमतेन विक्रमादित्यात् पूर्ववर्त्ती नृपोऽयम् ।

अनेके विद्वांसो राज्ञा शिमुकेनान्ध्रभृत्यकुलोत्पन्नेन सहास्याभेदं कल्पयन्तोऽस्य समयं विक्रमप्रथमशतकं कल्पयन्ति ।

वामनः स्वग्रन्थे शूद्रकं स्मरति । वामनपूर्ववर्त्ती दण्डी स्वीये काव्यादर्शे 'लिम्पतीव तमोऽङ्गानीति शूद्रकपद्यमुध्दरति । एतेन सप्तमशतकपूर्ववर्त्तित्वमायाति।

मृच्छकटिकस्य नवमेऽङ्के बृहस्पतिर्मङ्गलविरोधितया स्मर्थते, वराहमिहिरश्च तयोमैत्रीमाह । एतेनास्य ग्रन्थस्य वराहमिहिरकालपूर्वभवत्वे सिध्दे वराहमिहिरस्य षष्ठशातकोत्पन्नतायां प्रतीतायां शूद्रकस्य तत्पूर्वकालिकत्वं मन्तव्यम् ।

चन्द्रबली पाण्डेयोऽमून्याश्रीत्य शूद्रकं वसिष्ठीपुत्रं श्रीपुलुमाविनाऽभिन्नं प्रतीत्य १३०-१५५ ख्रीष्टाब्दकालिकं प्रमापयति ।

Scanned with CamScanner

अर्थात् क्रि.श.१९०तमे जनिम् अलभत इति महाराष्ट्रभाषायाः ठसंस्कृतकविचरित ग्रन्थे निर्दिष्टम् । किन्तु अयं कस्य पुत्रः ? का पुनः एतस्य माता इत्यादिविचाराः न लभ्यन्ते ।

निदर्शनोक्तय

काव्यालङ्कारसूत्रवृत्तिकर्ता वामनः वदति यत्- शूद्रकादिरचितप्रबन्धे अस्य भूयान् प्रपञ्चो दृश्यते । इति । मृच्छकटिकनाटकस्य चतुर्थेऽङ्के यथा-

विषादस्त्रस्तसर्वाङ्गी सम्भ्रमभ्रान्तलोचना ।

नीयमाना भुजिष्या त्वं कम्पसे नानुकम्पसे ।।

**भट्टनारायणः**

'वेणीसंहार'नामकस्य प्रसिद्धस्य नाटकस्य रचयिता भट्टनारायणः। एषः अष्टमे शतके आसीत् इति पण्डिताः अभिप्रयन्ति । एषः कान्यकुब्जप्रदेशे जातः इत्यत्र तु न कस्यापि विमतिः ।

स्वीयेन एकमात्रेण वेणीसंहारनाम्ना नाटकेन भट्टनारायणः संस्कृतसाहित्येऽतितरां प्रख्यातः । किंवदन्ती प्रसिध्दा यद् गौडदेशशासकेन आदिशूरेण ब्राह्मणधर्म्मुत्रेतुं कान्य-कुब्जदेशादानीय निवासितेषु ब्राह्मणेष्वयमत्येक इति । आदिशूरः पालवंशोत्थानतः पूर्व-वर्त्ती राजेति तस्य समयः सप्तमशताब्द्या उत्तरार्धमास्थातुं युक्तम् । दशमशतकोत्पन्नओ

Scanned with CamScanner

उषित्वा वङ्गीयब्राह्मणानां मूलपुरुषो बभूवेति इति । वेणीसंहारस्य भूमिकयापि अयमेवार्थः प्रतिपाद्यते । एते राजकुलीनाः भागवतसम्प्रदायम् अनुसरन्ति स्म ।

कविकालविचार

पाश्चात्यानां प्राच्यानां च पण्डितानाम् अभिप्रायेण भट्टनारायणः क्रि.श.८मे शतमाने अवर्तत । तथा च अष्टमशतकस्य अन्त्यभागे लब्धकीर्तिः वामनः भट्टनारायणकवेः वेणीसंहारात् कांश्चन श्लोकान् उदाहरति । अतः अयं कविः अष्टमशतकस्य पूर्वार्धे आसीदिति निश्चयेन वक्तुं शक्यते ।

वेणीसंहारम्डसम्पादयतु.

इयं भट्टनारायणस्य कृतिः । वीररसप्रधानं नाटकम् । अस्मिन् षट् अङ्काः विद्यन्ते । कथावस्तु तावत् महाभारते सभापर्वणि यदा दुश्शासनः द्रौपदीम् प्रधृष्य राजसभाम् आनयति, तदा तस्याः वेण्याः बन्धः श्लथते । तदैव भीमसेनः वनवासान्ते युद्धे दुश्शासनस्य शोणितेन द्रौपद्याः कचान् आसिच्य, तस्य अन्त्रेणैव द्रौपद्याः वेणीबन्धम् करिष्यामि इति राजसभायां प्रतिज्ञां करोति । ततः स्वप्रतिज्ञानुगुणं भीमः दुर्योधनस्य ऊरुभङ्गम् कृत्वा तद्रक्तैः आर्द्रीकृत्य पाञ्चाल्याः वेणीं स्वहस्ताभ्यां बध्नाति । ततः युधिष्ठिरस्य राज्याभिषेकेण सह नाटकस्य मङ्गलान्त्यम् करोति । आत्मश्लाघाम् अकुर्वाणः, गम्भीरः, क्षमाशीलः, महासत्वः, धीरोदात्तश्च युधिष्ठिरः अस्य कथानायकः । अप्रगल्भादिलक्षणवती द्रौपदी एव अस्याः कथायाः नायिका । अपि च भीमः, दुर्योधनः, भानुमती, अश्वत्थामा, कर्णः, धृतराष्ट्रः, गान्धारी, चार्वाकिश्च अत्र पात्राणि भवन्ति । हास्यरसम् शान्तरसं च हित्वा अन्ये सर्वे रसाः अत्र अङ्गत्वेन समावेशिताः दृश्यन्ते । द्वितीयेऽङ्के शृङ्गारः, तृतीयेऽङ्के करुणः, बीभत्सः, रौद्रश्च, चतुर्थेऽङ्के भयानकः, षष्ठेऽङ्के अद्भुतश्च रसाः निरूपिताः ।

वेणीसंहारः भट्टनारायणस्य कृतिरत्नम्। नाटकेस्मिन् षडङ्काः भवन्ति। वेणीसंहारः महाभारतस्य कथाम् आधारीकृत्य लिखितः । संहारः = संहरणम् = एकत्रानयनम् । दुर्योधनादीनां संहारं कृत्वा द्रौपद्याः केशान् भीमः वेणीरूपेण बध्नाति इत्यतः एतस्य नाटकस्य नाम 'वेणीसंहारः' इति ज्ञातम् । एतत् नाटकं वीररसप्रधानम् । समग्रं नाटकं नाटकलक्षणानुगुणम् एव रचितम् अस्ति । अतः लक्षणनिरुपणावसरे बहवः लक्षणकाराः

Scanned with CamScanner

काव्येषु पञ्चमहाकाव्यानि प्रसिद्धानि। पञ्चमहाकाव्येषु अन्यतमस्य नैषधीयचरितस्य प्रणेता श्रीहर्षः अस्ति। सः कविः श्रीहीरपण्डितान्मामल्लदेव्यां समजनीति तस्य काव्यस्य प्रतिसर्गस्य समाप्तिश्लोकतः ज्ञायते।

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफले श्रृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ।।

श्रीहर्षः कन्याकुब्जस्य नृपस्य विजयचन्द्रस्य आस्थानविद्वान् आसीत् । विजयचन्द्रस्य पुत्रस्य जयन्तचन्द्रस्य आस्थाने अपि सः आसीत् इति श्रूयते । तस्य पिता श्रीहरिः । माता

Scanned with CamScanner

2.अर्णववर्णनम्

3.गौडोर्विकुलप्रशस्तिः चण्डीप्रशस्तिश्च

4.शिवभक्तिसिद्धिः

5.साहसाङ्कचरितचम्पू

परन्तु ते सर्वे न उपलभ्यन्ते । खण्डनखण्डखाद्यम् इति एकः ग्रन्थः उपलभ्यते । तस्मिन् ग्रन्थे तार्किकमतस्य खण्डनं कृतं दृश्यते ।

**विशाखदत्तः**

विशाखदत्त संस्कृतकविः नाटककारः च आसीत् । एतस्य पिता महाराजः पृथुनामा, पितामहः वटेश्वरदत्तः च आस्ताम् इति ज्ञायते मुद्राराक्षसम् नाटकस्य सूत्रधार वचनादस्मात्, यत् आज्ञापितोऽस्मि परिषदा यथाद्य त्वया सामन्तवटेश्वरदत्तपौत्रस्य महा-राजपदभाक्पृथुसूनोः कवेः विशाखदत्तस्य कृतिः, अभिनवं मुद्राराक्षसम् नाम नाटकं नाटयितव्यमिति। अस्य पितुः भास्करदत्त इत्यपि नाम आसीत्, अपि च सः वत्सदे-शस्य सामन्तराजः आसीत् । क्रमेण सः महाराजपदम् आरुरोह । स्वयं विशाखदत्तः राजपुत्र आसीदिति कारणतः राजनीतिं सम्यगधीतवान् । एवम् प्रकृत्या अध्ययनेन च राजनीतिपारङ्गतः सन् विशेषतः कौटलीये अर्थशास्त्रे निष्णातो बभूव । जन्मना राजापि स्वभावेन कविः विशाखदत्तः स्वाधीतविद्यानुगुणम् निजप्रतिभाम् राजनीतिप्रख्यापनपरासु दृश्यकाव्यकृतिषु वितस्तार । एवं च एतेन विरचितानि त्रीणि नाटकानि श्रूयन्ते । तानि च देवीचन्द्रगुप्तम् मुद्राराक्षसम् अभिसारितवञ्चितकम् चेति । तेषु मुद्राराक्षसमेकम् एव अस्माभिः लब्धम् ।

संस्कृतमहानाटककारेषु अन्यतमः विशाखदत्तः कल्पनालोकम् विहाय वास्तवम् चरित्रम् चित्रम् इव व्यलिखत् । अयम् पाटलिपुत्रे आसीत् । पाटलिपुत्रम् गङ्गाशोणानद्योः सङ्गमस्य दक्षिणे दिशि अवर्तत । अस्य कुसुमपुरम् इति नामान्तरमपि विद्यते । पूर्वस्मिन् काले यत्र मुद्राराक्षसनाटकस्य कथा प्राचलत्, तत्रैवायं कविः जनिम् अल्भत । अयम् क्रि.श.५ तमशतमाने पूर्वार्धे आसीत् बहवो विमर्शकाः मन्नते । यतः पञ्चमशताब्दस्य उत्तरभागे विद्यमानः वराहमिहिरः एनम् अस्तौत् । पाट्लिपुत्रम् अस्य वासस्थानं कार्यस्थानं च अभवत् ।

क्रिस्तात् पूर्वकाले घटितस्य मगधानां महापतनस्य चन्द्रगुप्तोदयस्य चाणक्यतन्त्राणां कथाविस्तरस्य रूपकम् मुद्राराक्षसम् । एषा चाणक्यस्य कथा, चन्द्रगुप्तः अस्य नायकः । विष्णुपुराणेऽपि उक्तं यथा-

नव चैतान्नन्दान्कौटल्यो ब्राह्मणः समुद्धरिष्यति । कौटल्य एव चन्द्रगुप्तं राज्येऽ-



Scanned with CamScanner

भिषेक्ष्यति । अतः परं शूद्राः पृथिवीं भोक्ष्यन्ति । इति ।

बृहत्कथायाम् एवमुक्तम् -

चाणक्यनाम्ना तेनाथ शकटारगृहे रहः ।

कृत्यां विधाय सप्ताहात् सपुत्रो निहतो नृपः ।।

योगानन्दे यशःशेषे पूर्वनन्दसुतस्ततः ।

चन्द्रगुप्तः कृतो राज्ये चाणक्येन महौजसा ।।

अस्मिन् नाटके चाणक्यस्य प्रधानं पात्रम् । चणकः चाणक्यस्य जनकः । चाणक्यः साङ्गवेदाध्यायी, ज्योतिश्शास्त्रे नीतिशास्त्रे च पारङ्गतः आसीत् । एतस्य विष्णुगुप्तः, कौटल्यः इति च नामान्तरे आस्ताम् । एषः अर्थशास्त्रम् इति ग्रन्थम् अलिखत् । अस्य अर्थशास्त्रस्य प्रसारमाध्यमम् इव इदम् नाटकम् भासते । पुरा पाटलिपुत्रम् अथवा कुसुम-पुरम् नाम्नि नगरे चन्द्रवंशीयः सर्वार्थसिद्धिः नाम राजा राज्यं शासति स्म । तस्य सुनन्दा नाम्नी पट्टमहिषी, शूद्रकुलसञ्जाता मुरा प्रियमहिषी च इति द्वे पत्न्यौ आस्ताम् । कस्यचन मुनेः अनुग्रहेण सुनन्दायां नव पुत्राः, मुरायाम् एकश्च तनयः इति दश पुत्राः अजायन्त । वृद्धाप्ये राज्ञा राज्ञ्याः ज्येष्ठपुत्रे राज्यं विनिक्षिप्य मुरापुत्रं (मौर्यम्)सेनाधिकारिणम् नियोजमास । कालक्रमेण मौर्यस्य शतम् पुत्राः समभवन् । एतेषु सर्वेभ्यः कनीयानेव चन्द्रगुप्तः ।

नन्दानां नाशाय, चन्द्रगुप्तस्य अभ्युद्याय च हेतुभूतं अमात्यराक्षसस्य मुद्राङ्गुलीयकम् । अतः कविः स्वनाटकम् मुद्राराक्षसम् इति अभिधत्ते ।

## ५.३ प्रश्न

१. नाट्यशास्त्रम् व्याख्याति करोति।

२. भासः अश्वघोषःविवृणोति करोति।

३. शूद्रक भट्टनारायणःविवृणोति करोति।

४. श्रीहर्षः आलोचयति करोति।

५.विशाखदत्तः व्याख्याति करोति।



Scanned with CamScanner

**अध्याय : 6**

# संस्कृतगद्यवाड्.मयपरिचय:

एतत् अध्याय उत्तर अध्यायिन् विद्यार्थिन् समर्थ

संस्कृतगद्यवाड्.मयपरिचय:;

चम्पूकाव्य: ;

जयदेव , विष्णुशर्मा परिचय: ;

## ६.१ संस्कृतगद्यवाड्.मयपरिचय:

गद्यपद्ययो: प्रचलनं लेखने तदाऽप्यासीद् यदाऽनयोर्लक्षणमपि न केनाऽपि श्रुतम्। समस्तोऽपि ऋग्वेदश्चन्दस्येव राजते। कालांतरे तु छंदशशब्दो वेदपर्याय एव संजात:। महावय्याकरण: पाणिनिस्तु वेदं छंदोनाम्नैव स्मरित, तद्यथा-बहुलं छन्दसि इति सूत्रे। ऋग्वेदे नैकच्छन्दसां प्रयोगोऽवलोक्यते यथाऽनुष्टुप्, गायत्री, विराट्स्थाना, जगतीत्यादि।

परंतु तत्रैव यजुर्वेदेच्छन्दोविरहितमपि लेखनं सन्दृश्यते, यत् तावत् परवर्ति गद्यमनुहरति। तद्यथा रुद्राष्टाध्याय्याम्।

एका च मे तिस्रश्च मे, तिस्तश्च मे पंच च मे, पंच च मे सप्त च मे, सप्त च मे नव च मे, नव च मे एकादश च मे, एकादश च मे त्रयोदश च मे, त्रयोदश च मे पंचदश च मे, पंचदश च मे सप्तदश च मे, सप्तदश च मे नवदश च मे, नवदश च मे एकविंशतिश्च मे, एकविंशतिश्च मे त्रयोविंशतिश्च मे, त्रयोविंशतिश्च मे पंचविंशतिश्च मे, पंचविंशतिश्च मे एकत्रिंशच्च मे, एकत्रिंशच्च मे त्रयस्त्रिंशच्च मे यज्ञेन कल्पन्ताम्।- यजु १८.२४

एवं हि गद्यपद्यमयी उभय्यपि लेखनशैली वेदेष्ववलोक्यते। वेदाअंगभूतं ब्राह्मणवाड्.मयं गद्यपद्योभयमिश्रितं समवलोक्यते। क्वचित् पद्यबाहुल्यम् - यथा कठोपनिषदि। क्वचित् गद्यबाहुल्यम्, यथा बृहदारण्यकोपनिषदि। अन्यत्र द्वयो: समप्राधान्यम्। उपनिषद्गद्यमतीव सरलं ललितंच प्रतीयते। यथा-

ना वाऽरे पत्यु: कामाय पति: प्रियो भवत्यात्मनस्तु कामाय पति: प्रियो भवति। न वा पुत्रस्य कामाय पुत्र: प्रियो भवत्यात्मनस्तु कामाय पुत्र: प्रियो भवति। आत्मा वाऽरे श्रोतव्यो, मन्तव्यो निदिध्याासितव्यश्च। आत्मनि ज्ञाते सर्वं ज्ञातं भवति। वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। -बृहदा.



Scanned with CamScanner

वेदवाङ्.मयप्रयुक्तेयमेव गद्यपरंपरा परवर्तिनि काले साहित्यसंरचनां श्रितवती। ख्रिस्तपूर्वचतुर्थशतकोत्पन्नो नाट्यशास्त्रकारो भरताचार्य: सर्वप्रथमं चूर्णनिबद्धशीर्षकाभ्यां बन्धं ??? द्विधाा विभाजितवान्। चूर्णबंध एव अनियताक्षरबंधोऽपि समुच्यते यत्खलु गद्यनाम्ना ख्यातं जातम्। तथैव निबद्धबन्धोऽपि नियताक्षरबन्धपर्याय: संजात:। अयमेव बन्ध: पश्चात् पद्यनाम्ना ख्यातिं भेजे।

गद्यस्वरूपसमीक्षा-

नियताक्षरबंधशब्दस्तु पद्यस्य स्वरूपमेव प्रकाशयते। नियतानि अक्षराणां स्थानानि (संख्या च) यस्मिन् स बंधो भवत्येव नियताक्षरबंध:। यथा-अलं महीपाल तव श्रमेण-इत्यत्र अक्षराणां स्थानं गणमहिम्ना नियतं वर्तते। पादेऽस्मिन् उपेन्द्रवज्राख्यं वृत्तं प्रयुक्तं वर्तते यल्लक्षणम्-उपेन्द्रवज्रा जतजास्ततो गौ। अर्थात् यस्मिन् पादे जगण- (1ऽ1) तगण - (ऽऽ1) जगण (1ऽ1) गौ-(ऽऽ) क्रमेणाक्षराणि प्रयुज्येरन् तद्भवति उपेन्द्रवज्राख्याम् एवं हि पद्येऽस्मिन् तुरीयेष्वपि पादेषु अक्षराणां गुरुत्व-लघुत्वविधानं, संख्या चाप्यक्षराणां नियतैव वर्तते। प्रतिपादमेकादशाक्षराण्येव वर्तन्ते, न तावद्दश न चापि द्वादश। तद्यथा-

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।

न पादपोन्मूलनशक्तिरंह: शिलोच्चये मूर्च्छति मारुतस्य।।

यतो हि चतुर्भि: पादैर्नियम्यतेऽयं बंध इत्यस्मात् कारणादेव पद्यमित्युच्यते।

परंतु द्वितीयप्रकारके बंधेऽनियताक्षरनाम्ना प्रसिद्धे पद्यवत् न तावदक्षराणां प्रयुक्तानां संख्या नियता भवति, न चापि तेषां लघुत्वगुरुत्वविधानम्। सर्वथा स्वच्छंदोऽयं बन्ध:। लघ्वाकारोऽपि भवितुं शक्नोति (यथा चूर्णकगद्ये) दीर्घाकारोऽपि (यथा उत्कलिकाप्रायग-द्ये) अस्मिन् बंधे केवलमभिप्रायस्य प्रकटनमेव महीयते। अतएवाऽयं गद्यमित्युच्यते-गद् व्यक्तायां वाचि धातोर्यत् प्रत्यये कृते गद्यम्। गद्यते समुच्यत इति गद्यम्।

भरतस्य परवर्तिनावाचार्यौ भामहदण्डिनौ स्फुटरूपेण पद्यगद्यशब्दौ प्रयुक्त:। तयो: काव्यशास्त्रे चूर्णनिबद्धयो:, नियताक्षराऽनियताक्षरयोर्वा प्रयोगो नाऽवलोक्यते। द्वावपि पद्यगद्यसंज्ञामेव प्रयुक्त:। तद्यथाऽऽचार्यो दण्डी-

गद्यं पद्यंच मिश्रंच त्रिधा काव्यं व्यवस्थितम्। परवर्तिनस्सर्वेऽप्याचार्या: पद्यगद्यशब्दौ प्रयुंजन्ति तस्य भेदचतुष्टयं च समुदाहरन्ति। यथा-

गद्यं चतुर्विधं प्रोक्तं मुक्तकं वृत्तगंधि च।

ततश्चोत्कलिकाप्रायं चूर्णकंचान्तिमं मतम्।।

असमस्तपदं मुक्तं पद्यांशि वृत्तगन्धि च।



Scanned with CamScanner

मुक्तम् असमस्तपदं भवति। सरलसरलैः लघुवाक्यैरिदं लिख्यते। यथावलोक्यते कादम्बर्यां शुकनासोपदेशे, लक्ष्मीनिन्दायां वा। तद्यथा-

एवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत्-

अपनयतु नः कुतूहलम् आवेदयतु भवानादितः प्रभृति आस्तां तावत्सर्वम्।

कार्त्स्न्येनाऽत्मनो जन्म कस्मिन् देशे, भवान्कथं जातः ?

केन वा नाम कृतम् ? का ते माता ? कस्तेपिता ? कथं वेदाना-

मागमः ? कथं शास्त्राणां परिचयः ? कुतः कला आसादिताः ?

वृत्तगन्धि गद्यं पद्यांशि भवति। अर्थात् गद्यात्मकस्यापि तस्य बंधस्य कश्चिदंशः पद्यात्मको भवति। वृत्तस्य गंधस्तत्र परिलक्ष्यते। तद्यथा-खंडितानि दाडिमबीजानि नलिनीदलहरिन्ति द्राक्षा-इत्यत्र मात्रिकगीतगंधः वर्तत एव।

यथा वा-

समुपजातविस्यस्याभून्मनसिमहीपतेः।

अहो विधातुरस्थाने सौंदर्यनिष्पादनप्रयत्नः।।

इत्यात्राऽपि अनुष्टुप् गंधः परिलक्ष्यत एव।

उत्कलिकाप्रायं गद्यं भवति दीर्घसामासाढ्यम्।।

यथा हि-

तस्य च राज्ञः कलकालभयपुंजीभूतकृतयुगानु-

कारिणी त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मा-

लवविलासिनीकुचतटास्फालनजर्जरितोर्मिमालया

Scanned with CamScanner

परंतु प्रक्तग्रंथेषु विशुद्धगद्यलेखनस्यापि प्रामाण्यमुपलभ्यते। तत्र महर्षिपतंजलिप्रणीते महाभाष्य एव भैमरथीति सुमनोत्तरेति च कथयो: समुल्लेख: समवाप्यते। इदमेव गद्याश्रितं रचनाद्वयं कालक्रमदृष्ट्या प्राचीनतमं मन्तव्यम्।

अपरतश्च दृश्यते शिलालेखीयगद्यपरंपराऽपि। सम्राजोऽशोकस्य 160 मिता:

Scanned with CamScanner

कायामपि कदाचिद्वक्ता नायकेतर एव जनो भवति। हर्षचरितेऽपि हर्षदेवो न तावद् वक्ता। वस्तुत: आचार्यदण्डी कथामाख्यायिकांच संकीर्णभेदामेकरूपांचैवाऽवगच्छति। तद्यथा-

अपि त्वनियमो दृष्टस्तत्राऽप्यन्यैरुदीरणात्।

अन्यो वक्ता स्वयं वेति कीदृग्वा भेदकारणम्।

तत्कथाख्यायिकेत्येका जाति: संज्ञाद्वयाकिंता।।

-काव्यादर्श: 2.26-28

गद्यसाहित्यस्य विपुलता-

भवतु नाम। गद्यवाड्.मयं न केवलं कथाख्यायिकयो: सीमितम्। सत्यमिदं प्रमाणयति स्वयमेव दण्डी-अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातय: इति प्रोच्य। अनेनैव स्पष्टं जायते यद् दण्डियुगेऽपि कथाख्यायिकेतरा: काश्चन आख्यानजातय: (गद्यभेदा:) प्रचलिता आसन्। काश्चासन् ता आख्यानजातय इति जायत एवोत्कंठा। तत्र समुपलभ्यते प्रमाणमग्निपुराणे (336.18)

आख्यायिका कथा खंडकथा परिकथा तथा।

कथानिकेति मन्यन्ते गद्यकाव्यं च पंचधा।। अग्नि 337.12

आचार्यभोजदेव: श्रृंगारप्रकाशे गद्यस्य बहून् भेदान् परिगणयति। तद्यथा-आख्यायि-

Scanned with CamScanner

भोजानन्तरं काव्यानुशासनकार आचार्यहेमचन्द्रोऽपि गद्यकाव्यस्य द्वादशभेदान् गणयति-आख्यायिका, कथा, खंडकथा (इन्द्रमत्यादि) परिकथा (शूद्रककथादि) आख्यानम्, उपाख्यानम् (पंचतंत्रम्) प्रवह्लिका, मणिकुल्या, वृहत्कथा (नरवाहनदत्तकथा) सकलकथा (समरादित्य) उपकथा (चित्ररेखा) क्षुद्रकथा।

अत्र तावदाचार्यानन्दवर्धनस्यापि मतं ग्राह्यं प्रतीयते वस्तुतस्तन्मतमभिनवगुप्तसमर्थितं मतमिति विशेषः। ध्वन्यालोकस्य चतुर्थोद्योते ध्वनिकारः कथयति यद् विशिष्टकाव्यभेदाश्रयेणैव काव्यसंघटनाया वैशिष्ट्यं समायाति। इमे काव्यभेदा यथा पद्यस्य तथैव गद्यस्यापि भवितुं सम्भवन्ति। पद्यभेदाः सन्ति-मुक्तकम् सन्दानितकम्, विशेषकम्, कलापकम्, कुलकम्, पर्यायबंधश्च।

गद्यस्यापि भेदाः सन्ति-परिकथा, सकलकथा, खंडकथा, आख्यायिका, कथा चेति। सर्गबंधाऽभिनेयौ चाऽन्यौ। कथयति आनंदवर्धनः-

यतः काव्यस्य प्रभेदाः - मुक्तकं संस्कृतप्राकृताऽपभ्रंशनिबद्धम्। संदानितकविशेषककलापककुलकानि पर्यायबन्धः परिकथा सकलकथा खंडकथा सर्गबंधोऽभिनेयार्थ आख्यायिका कथेत्येवमादयः। तदाश्रयेणाऽपि संघटना विशेषवती भवतीति। - ध्वन्या.3.3 (वृत्तिः)

विस्तृतोऽयं प्रसंगोऽत्रैव परिहीयते। परंतु ध्वनिकारो मन्यते यत् काव्यभेदविशेषश्रयेणाऽपि कवेः प्रतिभा परां काष्ठामधिरोहति। गद्याश्रयेणैव बाणभट्टो वश्यवाणीचक्रवर्तितामवाप। चम्पूभेदसमाश्रयेणैव त्रिविक्रमभट्टोऽसाधारणोजातः। नाटकरचनयैव कालिदासोऽजरोऽमरो बभूव। मुक्तकसमाश्रयेणैवाऽप्रतिमो जातोऽमरुक इति। एवं हि कविप्रतिभाकाव्यभेदयोर्मध्येऽपि भवति कश्चिद् विलक्षण एव संबंधः।

परंतु आश्चर्यमिदं यदेतेऽग्निपुराणध्वनिकारभोजदेवहेमचन्द्रप्रोक्ताः गद्यभेदाः नाऽद्य समुपलभ्यन्ते। हेमचन्द्रस्तु स्वयुगोपलब्धान् गद्यग्रंथान् विविधान् नाम्ना समुदाहरत्यपि। तथापि नेदानीमवाप्यते कथाख्यायिकेतरा काऽपि गद्यकृतिः। तत्र किन्नु कारणम्? किं काव्यभेदास्ते प्रणष्टाः तुरुष्काक्रमणकारिभिः समाचरितैग्रन्थलयाग्निदाहैः? अन्यैर्वा कारणैस्ते नष्टाः?

भवतु। साम्प्रतिकं संस्कृतगद्यवाङ्.मयं केवलमाख्यायिकाकथा-संवलितम्। तत्र कथायां प्राप्यन्ते-सुबन्धुप्रणीता वासवदत्ता, बाणभट्टप्रणीता, कादम्बरी, दण्डिप्रणीतं दशकुमारचरितम्, अवन्तिसुंदरीकथा च। सोड्ढलप्रणीता उदयसुंदरीकथा, धनपालप्रणीता तिलकमंजरीति। आख्यायिकाश्चापि वर्तन्ते-बाणभट्टप्रणीता हर्षचरितम्, वामनभट्टबाणकृतं वेमभूपालचरितम्, अम्बिकादत्तव्यासप्रणीतः शिवराजविजयः। एते तावत् प्रमुखा ग्रंथा अत्र नामभिरुल्लिखिताः। अन्यथा तेषां संख्या भूयसी परिलक्ष्यते।



Scanned with CamScanner

सैव पांचालीरीतिर्बाणभट्टेन स्वगद्यलेखनेषु प्रयुक्ता। तत्पूर्ववर्ती सुबंधुस्तु गद्यलेखने प्रत्यक्षरश्लेषपक्षधर आसीत्-

सरस्वतीदत्तवरप्रसादश्चक्रे सुबंधुस्सुजनैकबंधुः।

प्रत्यक्षरश्लेषमयप्रपंचविन्यासवैदग्ध्यधिया प्रबंधम्।।

बाणभट्टस्य परवर्ती दण्ड्यपि स्वगद्यादर्शं निश्चिन्वानोऽकथयत्-ओजस्समासभूयस्त्वमेतद्गद्यस्य जीवितम्।

बाणभट्टः स्वकीये गद्ये न प्रत्यक्षरश्लेषप्रपंचं वरयामास न चापि निरंतरमोजोगुणं समासभूयस्त्वमेव। स स खलु मध्यममार्गं चिन्वानोऽकथयत्-

Scanned with CamScanner

कीचकशताकुला........अपरिमितबहलपत्रसंचयापि सप्तपर्णोशोभिता, क्रूरसत्त्वाऽपि मुनिजनसेविता, पुष्पवत्यपि पवित्रा विन्ध्याटवी नाम।

अर्वाचीनं संस्कृतगद्यम्-

पृथ्वीराजपराजयानन्तरमेव (1192 ई) भारते सल्तनमसाम्राज्यं स्थापितं जातम्। आदौ गुलामवंशीयाः पश्चाच्च खिलजिनस्तुगलकाः लोदिनः सूरिणो मुगलाश्च क्रमेण भारतं शासितवन्तः। अस्मिन् शासने संस्कृतस्य वर्चस्वमपचितं पारसीकभाषाया वर्चस्वंचोपचितम्। तथापि संस्कृतस्य रचनाधर्मिताऽक्षुण्णऽवतस्थे। शतसहस्रलक्षमिता ग्रंथाः प्रणीताः संस्कृतज्ञैः सल्तनतकालेऽपि। पारसीकभाषायाः प्रयोगः केवलं शासनकार्येष्वेव प्रावर्तत, न तावत्साहित्यसंरचनायाम्। परंतु 1756 मितख्रिस्ताब्दे, यदा नवाबसिराजुद्दौला प्लासीयुद्धे समुच्छिन्नो जातः, औगलानांच शासनं जातं बिहार-बंगालराज्ययोस्तदा स्थितिः परिवर्तिता जाता। प्रारंभे तावत् वारेन हेस्टिंग्ज-प्रयासैः संस्कृतस्य प्रतिष्ठा जाता, संस्कृतभाषा राजभाषा घुष्टा। चार्ल्स विल्किन्समहोदयो हेस्टिंग्जप्रेरणयैव श्रीमद्भगवद्गीताया आंग्लभाषान्तरं विदधे। मधुसूदनर्कालंकारः वोलास्टन्नप्रणीतस्य आंग्लभाषाव्याकरणस्य

Scanned with CamScanner

गद्यैर्विद्योतितं यस्मात् गद्यकाव्यं तदीरितम्।

ग्रंथरूपम् तदेवात्र श्रव्यं किंचन्निरूप्यते।।

उपन्यासपदेनापि तदेव परिकल्प्यते।

यथा कादम्बरी यद्वा शिवराजजयो मम।।

अत्र तावत् व्यासमहोदयः कथामाख्यायिकामुपन्यासंचेति त्रितयमपि अभिन्नमेव मन्यते।

आंग्लभाषायां शार्टस्टोरी-लांगस्टोरी-स्टोरीनामभिः ख्याता ये गद्यभेदास्त एव संस्कृतभाषायां लघुकथादीर्घकथा-कथानिकासंज्ञाभिश्च प्रतिष्ठिता जाताः। अर्वाचीन-संस्कृतगद्यवाङ्.मये एते सर्वेऽपि भेदाः सम्प्रति परिभाषिताः प्रतिष्ठिता, प्रयुक्ताश्च वर्तन्ते। एतेषा समेषां काव्यभेदानां लक्षणानि अभिराजयशोभूषणेऽभिनवकाव्यशास्त्रे समुपलभ्यन्ते।

अयं तावन्निष्कर्षः। साम्प्रतिकं गद्यं त्रिधा चतुर्धा वा व्यवस्थितं दृश्यते-

1. लघुकथा (एप्दी एूदीब)

2. दीर्घकथा (थ्दहु एूदीब)

3. कथानिका (एूदीब/इग्मूदह)

4. उपन्यासः (प्राचीना कथा/आख्यायिका च)

लघुकथाविषये मिश्रोऽभिरराजराजेन्द्रः स्वोपज्ञलघुकथासंग्रहस्य चित्रपर्ण्याः भूमिकायां लिखति-

परंतु लघुकथायां वर्णितं वृत्तं विस्तृतं न भवति। तत्र पात्राणामनेकेषामपि प्रस्तुतिर्न दृश्यते। प्रायेण लघुकथा भवति एकपात्रपर्यवसायिवृत्ता। लघुकथा भवति विद्युदुन्मेष-कल्पाऽकस्मादेव निखिलपरिवेषप्रकाशयित्री। लघुकथा भवति मर्मोद्घाटनमात्रपर्यव-सायिनी। कामं लघुकथायाः कलेबरं कदाचित् पृष्ठमितं स्यात् पृष्ठद्वयमितं वा। परंतु मूललघुकथा तु एकवाक्यमितैव भवति।

पुनश्च कथानिकायां भवन्ति अनेकपात्राणि। तेषां समवेतवृत्तवर्णनमेव कथाया विस्तारं सृजति। परंतु लघुकथायामेकपात्रतानिर्वहणनिवार्यमिति मन्मतम्। मनोभावस्य

Scanned with CamScanner

नूनं लघुकथेयं स्यादेकपात्रावसायिनी।।

अकस्माद्धि परीहारश्चिरसंस्तुतवत्र्मनः।

असंस्तुतसरणेश्चाऽप्यंगीकारो ह्यतर्कितम्।।

सुग्रहणमग्राह्यस्य गृहीतस्याप्युपेक्षणम्।।

कस्यचन संकलपस्य झटित्येव समुद्भवः।।

भावोन्मेषो विवर्तो वा भावानां समयोचितः।

चिरुरूढमनोभावस्यापि द्राक्परिवर्तनम्।।

उल्कापिण्डसदृक्षाभा हृत्तन्त्रीझङ्.कृतिक्षमा।

अल्पाक्षराऽल्पपात्रापि कथा लघ्वी महीयते।।

-अभिराजयशो. 4.113-116

अर्वाचीनसंस्कृते विशुद्धलघुकथानां संकलनानि प्रायशो नगण्यान्येव वर्तन्ते। प्रायेण कथाकारा लघुकथास्वरूपविषये संदिग्धमानसा एव वर्तन्ते। ते प्रणयनित कथानिकाम्। परंतु संबोधयन्ति तां लघुकथाम्। एतत्खलु भाषान्तरतुल्यवाङ्.मयाऽनध्ययनस्य दुष्फलम्-्। लघुकथा हिन्द्यां भूयस्त्वेन लिख्यन्ते परंतु ताश्चैव न जातु पठ्यन्ते संस्कृतकथाकारैः। तत एवेयं सर्जनाविषयिणी भ्रान्तिः। दिल्लीसंस्कृताकादम्या लघुकथासंग्रहः कश्चित्प्र-काशितो यस्मिन्नैकाऽपि कथा लघुकथा। सर्वाः कथानिका एव वर्तन्ते।

हिंदीकहानीशब्दः संस्कृतकथानिकाया एव तत्समरूपमित्यत्र न कश्चन संदेहः। वस्तुत आंग्लभाषाभिमता कथैव स्टोरीपदवाच्या, हिन्द्यामपि लोकप्रिया सम्प्रति संस्कृतेऽपि तद्वदेव प्रचलिता वर्तते। अत्र कथानिकाया षड्बिन्दवः प्राधान्यं भजन्ते, तद्यथा-कथावस्तु, पात्रं पात्रचरित्रचित्रणंच, संवादः (कथनोपकथनम्) वातावरणम्, भाषाशैली, उद्देश्यंच।

कथानिकां लक्षयति आचार्यो राधावल्लभस्त्रिपाठी-जीवनस्यैकदेशनिरुपणपर-माख्यानं कथा (अभिनवकाव्यालंकारसूत्रम् 3.1.12)

मिश्रोऽभिराजराजेन्द्रः विस्तृततरं लक्षयति-

प्रतिष्ठाधुरमध्यास्ते कथाभेदो हि कश्चन।

अभीष्टा सर्वभाषासु प्रोच्यते सा कथानिका।।



Scanned with CamScanner

क्षमारावमहोदया पुष्कलं कथासाहित्यं प्रणीतवती। आधुनिककथाकारेषु महीयन्तेऽभि-राजराजेन्द्रराधावल्लभत्रिपाठि-प्रभुनाथद्विवेदी-वीणापाणिपाटनी-प्रमोदभारतीय-प्रशस्मित्र-शास्त्रि-देवर्षिकलानाथशास्त्रि-वनमालीविश्वाल-अशोकपुरनाट्टुकरप्रभृतयः कथाकाराः।

इक्षुगन्धा-रांगडा-चित्रपर्णी-पुनर्नवा-छिन्नमस्ता-अभिनवपंचतन्त्रम्-कान्तारकथेति सप्त कथासंकलनानि प्रकाशितानि राजेन्द्रमिश्रस्य। तत्रेक्षुगन्धा साहित्याकादमीपुरस्कृता (1988) कथाकृतिः यस्या बंगभाषासंस्करणमपि प्रकाशितं जातम्। कथासु एतासु साम्प्रतिकभारतीयसमाजसमस्याः समुत्थापिताः समाहिताश्च। तत्र यौतुकसमस्या, विषमोद्वाहसमस्या, बहुकन्याजन्मसमस्या, विधवाविवाहसमस्या, दाम्पत्यनिष्ठासमस्या महीयन्ते।

शिल्पदृष्ट्याऽपि संस्कृतकथा महीयन्ते। क्वचित्तावत् पूर्वोन्मेष पद्धतिः प्रभवति,

Scanned with CamScanner

परंतु साहित्यिकं गद्यं प्रारभ्यते शिलालेखैरशोकस्य। यद्यपि तेषां शिलालेखानां भाषा पाली वर्तते, परंतु खारवेलस्य लेखे प्राकृतस्यप्रयोगो वर्तते, समुद्रगुप्तस्य च शिलालेखे संस्कृतस्य प्रयोगो वर्तते। तदनन्तरमेव समायाति कालः स्वतंत्रसाहित्यिकगद्यप्रयोगस्य। महाकविः सुबंधुर्वासवदत्तां लिलेख, दण्डी दशकुमारचरितम् अवन्तिसुंदरीकथां च प्रणिनाय। महाकविर्बाणभट्टश्चापि कादम्बरीं हर्षचरितंच प्रणीतवान्।

संस्कृतगद्यमतीव समृद्धं वर्तते शैलीदृष्ट्या। तद्धि चतुर्विधं वर्तते-उत्कलिकाप्रायम्, वृत्तगंधि, चूर्णकं, मुक्तकंच। तत्र तावत् उत्कलिकाप्रायं गद्यमेवाऽतीव जटिलं कठिनंच प्रतीयते समासभूयस्त्वात् दैर्घ्याच्च। अस्य गद्यस्य एकैकं वाक्यं पृष्ठपरिमितमपि भवितुं शक्नोति। तद्यथा कादम्बर्याम्-

तस्य च दृढमुष्टिनिष्पीडननिष्ठ्यूतधाराजलबिन्दुदन्तुरेण कृपाणेनाकृष्यमाणा सुभटोरः

Scanned with CamScanner

ठचमत्कृत्य पुनाति सहृदयान् [illegible]
पद्ययोः युक्ता काव्यस्य चम्पू इत्याख्या विशिष्टाशैली, या पाठकानां हृदये चमत्कारम् उत्पाद्य विस्मियेन सह पवित्रताम् उत्पादयति ।

द्वादशशताब्दस्य जैनमतानुयायी हेमचन्द्राचार्याख्यः काव्यविद् स्वस्य काव्यानुशासनाख्ये ग्रन्थे उदलिखत् यत्, अङ्कः तथा उच्छवासः च चम्प्वाः अभिन्नाङ्गे स्तः इति । परन्तु कतिपयेषु चम्पूकाव्येषु अङ्कोच्छवासयोः अपेक्षया विभाजकत्वेन अध्यायस्य उपयोगः प्राप्यते । अतः एतावता चम्पूकाव्यस्य कापि स्थिरपरिभाषा न प्राप्यते ।

" गद्यपद्यमयं श्रव्यं, सम्बन्धं बहुवर्णितम् । सालङ्कृतैः रसैः सिक्तं चम्पूकाव्यमुदाहृतम् ।।"

अर्थात् गद्यपद्यमिश्रितं, श्रव्यं, वर्णनप्रधानम्, अलङ्कारबहुलं, सरसं, प्रबन्धकाव्यम् एव चम्पूकाव्यत्वेन परिगण्यते । पञ्चतन्त्रसदृशाः रचनाः गद्यपद्यमये सत्यपि चम्पूकाव्यत्वेन न परिगण्यते । यतो हि तादृश्यः रचनाः प्रबन्धकाव्येषु न, अपि तु मुक्तकाव्येषु अन्तर्भवन्ति ।

**चम्पूकाव्यस्य इतिहासः**

गद्यपद्यमिश्रितानां काव्यानां रचना तु वैदिककाले एव आरब्धा आसीत् । कृष्णयजुर्वेदस्य तैतरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता च चम्पूशैल्याः उत्तमानि उदाहरणानि सन्ति । ऐतरेयब्राह्मणस्य त्रयस्त्रिंशत्तमे (३३) अध्याये उल्लिखितः हरिश्चन्द्रोपाख्यानः मिश्रशैल्यां रचितः अस्ति । उदा. हरिश्चन्द्रो ह वैधस, ऐक्ष्वाको राजाऽपुत्र आस । तस्य शतं जाया बभूवुः । तासु पुत्रं न लेभे । तस्य ह पर्वतनारदौ गृहम् ऊषतुः । स ह नारदं पप्रच्छ इति ।

उपनिषत्सु पश्नोपनिषद्, मुण्डकोपनिषद्, कठोपनिषद् च मिश्रशैल्या एव उपस्थापिताः सन्ति ।

" ॐ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ । तस्य ह नचिकेता नाम पुत्र आस ।। १/१/१ ।। कठोपनिषद्"



Scanned with CamScanner

अभवत् । ततः रचितानि चम्पूकाव्यानि अद्यापि उपलभ्यन्ते । यतो हि त्रिविक्रमभट्टस्य नलचम्प्वः अनन्तरं चम्पूकाव्यरचनायां वेगः अवर्धत । अतः त्रिविक्रमभट्टादेव चम्पू-काव्यानां विधिवत् आरम्भः अभवत् इति इतिहासविदां मतम् ड१.।

चम्पूकाव्यानां कालाधारितः विभागः

कालक्रमानुसारं चम्पूकाव्यानि चतुर्षु भागेषु विभज्यन्ते ।

१. दशमाब्दात् पञ्चदशमाब्दपर्यन्तम्

२. षोडशमाब्दात् सप्तदशमाब्दपर्यन्तम्

३. सप्तदशमाब्दस्य उत्तरार्धात् अष्टमाब्दपर्यन्तम्

४. एकोनविंशतितमाब्दात् वर्तमानकालपर्यन्तम्

चम्पूकाव्यस्य प्रकाराणि

१. नीत्युपदेशात्मकं चम्पूकाव्यम्

२. पौराणिकं चम्पूकाव्यम्

३. दृश्यकाव्यात्मकं चम्पूकाव्यम्

**चम्पूकाव्यानि**

Scanned with CamScanner

प्रसिद्धमेव यदसौ विक्रमपूर्वकालेऽपि लब्धप्रचार आसीत् इति। प्रथमम् अस्य रूपं स्मरति आद्यकाव्यशास्त्राचार्यो भामहः । ततश्च रुद्रदाम्नो गिरिनाराभिलेखेऽनेकेषु गुप्तकालीनाभि-ालेखेषु चास्य स्वरूपमुच्यते । दण्डी तु - 'गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते' इति नामत एव स्मरति काव्यभेदमिमम् । तथापि चम्पूकाव्यस्य स्वतन्त्रग्रन्थरूपेण त्रिविक्रमभट्टस्य नलचम्पूरेव प्रथममुदेति । ततश्च सोमप्रभसूरेः यशस्तिलकचम्पूः, हरिश्चचन्द्रस्य जीवन्धरचम्पूः, भोजस्य रामायणचम्पूश्च केचन प्राचीनाश्चम्पूग्रन्थाः।

एवमेव भागवतं महाभारतञ्चाश्रित्याऽप्यनेके चम्पूग्रन्थाः प्रणीताः सन्ति। एवमेव वरदाम्बिकापरिणयचम्पूः, नीलकण्ठविजयचम्पूः, विश्वगुणादर्शचम्पूः, मुक्ताचरित्रचम्पूः, आनन्दवृन्दावनचम्पूः, गोपालचम्पूः, आनन्दकन्दचम्पूः, चितचम्पूः, अवन्तिसुन्दरी-कथाचम्पूः, पारिजातहरणचम्पूः, उषापरिणयचम्पूः, गजेन्द्र चम्पूः, भरतेश्वराभ्युदयचम्पूः, पुरुदेवचम्पूः, अमोघराघवचम्पूः, यतिराजविजयचम्पूः, विरूपाक्षवसन्तोत्सवचम्पूः, रुक्मिणीपरिणयचम्पूः, आचार्यविजयचम्पूः, वेङ्कटेशचम्पूः, धर्मविजयचम्पूः, शङ्क-रचेतविलासचम्पूः, गङ्गावतरणचम्पूः, रामचन्द्रचम्पूः, आनन्दचम्पूः, सुदर्शनचम्पूः, सिन्देविजयविलासचम्पूः, द्रौपदीपरिणयचम्पूः, नवरत्नावली चैवमाद्याः सन्ति प्रकाशिता अप्रकाशिताश्च सार्धद्विशताधिकाश्चैम्पूग्रन्थाः ।

**नलचम्पूः**

अद्यावधि ज्ञातेषु चम्पूकाव्येषु त्रिविक्रमभट्टस्य नलचम्पूरेव प्रथमत्वेन गृह्यते । त्रिविक्रमः शाण्डिल्यगोत्रस्य श्रीधराऽऽख्यस्य पौत्रो देवादित्यस्य पुत्रः ९७२ मितवैक्र-माब्दमभितः स्थितिमान् । सः बाणभट्टं स्मरति-

Scanned with CamScanner

। तेन अयमेव कालस्त्रिविक्रमस्य पूर्वसीमा स्थितिकालस्य । एवमेव विक्रमैकादश-शतकोत्तरार्द्धभवो भोजो नलचम्पूं स्मरतीतीयमेव तस्य स्थितिकालस्यावरसीमा। तथैव सः राष्ट्रकूटवंशीयस्य तृतीयेन्द्रराजस्य समये आसीदिति उल्लेखः प्राप्यते -

श्रीत्रिविक्रमभट्टेन नेमादित्यस्य सूनुना।

कृता शस्ता प्रशस्तेयमिन्द्रराजाङ्घ्रिसेविना ।।इति।

कथनमिदं ९७२ मितवैक्रमाब्दे समुट्टङ्कित्ताभिलेखे विद्यते । तेन ९७२ मितवै-क्रमाब्दमभितस्तस्य स्थितिकाल इति । केचित्तु -

कैलाशायितमद्रिभिर्विटपिभिः श्वेतातपत्रायितं

मृत्पङ्केन दधीयितं जलनिधौ दुग्धायितं वारिभिः।

मुक्ताहारलतायितं व्रततिभिः शङ्खायितं श्रीफलैः

श्वेतद्वीपजनायितं जनपदैर्जाते शशाङ्कोदये।।

एवमेव -

मदनमिति युवानं यौवराज्येऽभिषिञ्चन्

कृतकुमुदविकासो भासयन् दिङ्मुखानि ।

इमममृततरङ्गैः प्लावयञ्जीवलोकं

गगनमवजगाहे मन्दमन्दं मृगाङ्कः।।

इति कथनेन श्लेषबलात्कमपि शशाङ्कसंज्ञितं नृपं स्मरतीति तर्कयति। तदनुसारेण कवेरस्य शशाङ्कसमकालिकत्वं मन्यते । शशाङ्को वै हर्षसमकालिकस्तत्प्रतिद्वन्द्वी गौडनरेशो वैक्रमसप्तमशतकोत्तरार्द्धस्थितिमान् । किन्तु कथनमिदं न तथा युक्तियुक्तं यतस्तथा सति तस्य बाणपूर्ववर्तित्वं मन्यते यद्धि तस्यैव 'शश्वबाणद्वितीयेन नर्मदाकार धारिणा इति कथनस्य विरोधः सञ्जायते ।श्रीहर्षेण शशाङ्कवधानन्तरमेव बाणस्तत्सभायां प्रविष्ट आसीत् ।

नलचम्पूः दमयन्तीकथाप्युच्यते । ग्रन्थोऽयं सप्तोच्छ्वासेषु विभक्तोऽस्ति यत्र आर्यावर्तवर्णनमारभ्य नलदमयन्तीपरिणयपर्यन्ता कथा वर्णितास्ति । कथ्यते एकदाऽस्य पिता कार्यवशाद्दूरदेशं गतः आसीत् । तदैव कश्चिदपरः पण्डितस्तं तत्रागत्य शास्त्रार्थाय समाहूतवान् । स तु भीतभीतः सरस्वतीमस्तौषीत् । साऽपि तत्पितृप्रत्यागमनपर्यन्तं तज्जिह्वावासं स्वीकृतवती । ततः शास्त्रार्थे तं पण्डितं पराजित्य गृहं प्रत्यागत्य ग्रन्थमिमं लिखितुमारब्धवान् । एतदन्तरे तत्पिता प्रत्यागतो गृहम् । ततो भारती तं त्यक्तवती येन



Scanned with CamScanner

ग्रन्थेऽस्मिन्नर्थालङ्कारापेक्षया शब्दालङ्कारस्यैव प्राधान्यं दृश्यते । तथाऽप्यस्य सरसा रमणीयार्था चमत्कारपूर्णा च । यथोक्तम् -

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविलक्षणाः ।

भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ।।

वस्तुतस्तु तस्य कृतिरपि सदूषणाऽपि निर्दोषा सखराऽपि सुकोमला विद्यते रामायण कथेव। श्लेषस्य दुर्बोधत्वं स्वीकुर्वन् कविः स्वयमेव कथयति -

वाचः काठिन्यमायान्ति भङ्गश्लेषविशेषतः।

नोद्वेगस्तत्र कर्तव्यो यस्मान्नैको रसः कवेः ।। इति ।

अस्य यमकच्छटा निभालनीया दृश्यते यथा -

धृतकदम्बकदम्बकनिष्पतन्नवपरागपरागममन्थराः।

हृततुषारतुषाररतिरागिणां प्रियतमा मरुतो मरुतो वधूः।।इत्यादि ।

स हि भावनिबन्धनेऽपि पटुर्दृश्यते । भर्तृहरेः -

व्यतिसजति पदार्थानन्तरः कोऽपि हेतुर्न खलु बहिरुपाधी प्रीतयः संश्रयन्ते ।

Scanned with CamScanner

हरिचन्द्राख्यः कश्चिज्जैनजीवन्धराख्यस्य मुनेश्चरितमाश्रित्य जीवन्धरनामकचम्पूग्रन्थं प्रणीतवान् । ग्रन्थोऽयं गुणभद्रेण ९०७ मितवैक्रमाब्दमभितः सङ्कलितमुत्तरपुराणमुपजीवति । तेनास्य प्रणयनकालो वैक्रमदशमशतकोत्तरार्द्धमभितोऽनुमितः । एवन्तु स्पष्टमेव यदसौ भट्टारहरिचन्द्राद्, यं बाणभट्टोऽपि सादरं स्मरति, भिन्न एव किन्तु सम्प्रत्यपि नैतत्स्पष्टं यदसौ हि शर्मधर्माभ्युदयकाव्यस्य प्रणेता एव वा तद्भिन्न इति । असौ माघे बाणभट्टञ्च सुस्पष्टमेवानुकरोति भावभाषादिकमधिकृत्य ।

यशस्सिलकचम्पूः

Scanned with CamScanner

'भोजेन दूतो राघवे विसृष्ट' इति रघुवंशेऽपि । धारानगरीशः परमारवंशीयः सिन्धुराज-पुत्रोऽपि भोजशब्देन व्यपदिश्यते । भारतीया परम्परा धारानगरीशभोजमेव ग्रन्थस्यास्य प्रणेतृत्वेन गृह्णाति । अपरञ्च, भोजप्रबन्धादावपि स एव विद्वन्मूर्धन्यत्वेन गृहीतोऽस्ति । सम्भवति कोऽपि लिपिकारः भोजं हि वैदर्भं मत्वा तथाविधं पुष्पिकावाक्यं पश्चात्संयोजितं स्यात् । ग्रन्थगौरवदृष्ट्या त्वयं ग्रन्थो धारानरेशस्यैव भवितुमर्हति । गन्थस्यास्य सद्यः पञ्च काण्डानि भोजप्रणीतानि युद्धकाण्डे तु लक्ष्मणभट्टनाम्ना विदुषा प्रणीय पूरितम् । तथैव वेङ्कटराजाख्येन कविना उत्तरकाण्डमपि विरच्य पूरितमिति कथ्यते ।

ग्रन्थेऽस्मिन् वैदर्भीरीति सर्वातिशयित्वेन विलसति । वर्णनेऽत्र प्रयुक्ता कल्प-ना नितान्तोच्चकोटिका । अत्र अनुप्रासयोपमायाश्च वैचित्र्यं कुमारदासं स्मारयति । अस्योत्प्रेक्षाऽपि निभालनीया। दिङ्मात्रमुदाहरणं यथा -

Scanned with CamScanner

राज-कोङ्कणनरेश-वत्सराज-प्रभृतयोऽपि स्मृतास्तथैव लाटमहीपश्चालुक्य आश्रयदातृत्वेनाल्लिखितः । यथा हि -

'वागीश्वरं हन्त भजेऽभिनन्दमर्थेश्वरं वाक्पतिराजमीडे।

रसेश्वरं स्तौमि च कालिदासं बाणं तु सर्वेश्वरमानतोऽपि।।'

'बाणस्य हर्षचरिते निशितामुदीक्ष्य।

शक्तिं न केऽत्र कवितास्वमदं त्यजन्ति।।'

सोड्ढलः पदे पदे बाणमनुसरति । तथाप्यस्य शैली मौलिकी सरसा च विद्यते । असौ क्षक्-झम्पप्रभृतिनितान्ताप्रचलितान् शब्दान् अपि प्रयुनक्ति। ग्रन्थस्य प्रथमाध्याये कवेरात्मकथा दत्तास्ति ।

कीतिकौमुदी

१२९७ मितवैक्रमाब्दमभितः स्थितिमतः सोमेश्वरदेवस्य कीर्तिकौमुदी अपि

Scanned with CamScanner

सरसशैल्यां प्रणीतेऽस्मिन् ग्रन्थे विशिष्टाद्वैतमतप्रवर्तकस्य रामानुजस्य जीवनचरितं वर्णितमस्ति । अस्य प्रणयनकालः १६६० मितवैक्रमाब्दमभितोऽनुमितः ।

वरदाम्बिकापरिणयचम्पूः

तिरुमलाम्बायाः वरदाम्बिकापरिणयचम्पूश्चम्पूकाव्येषु भावभाषादिदृष्ट्या नृपायते । अत्र हि अच्युतरायस्य वरदाम्बिकायाश्च प्रणयपरिणयौ मनोहारिण्या शैल्या वर्णितौ स्तः।

कवीयत्र्यसौ १५८६ मितवैक्रमाब्देऽभिषिक्तस्य राज्ञोऽच्युतरायस्यैव धर्मपत्न्यासीत् । अतोऽस्याः स्थितिकालः १५१०-१५५० मितवैक्रमाब्दानभितोऽनुमितः । ग्रन्थोऽयं भङ्गश्लेषेऽसाधारणः । निभाल्यतामस्य वर्णनासौष्ठवम् -

तदनु धरणिपालो धावता चेतसाऽग्रे सरभसमिव कृष्टः सरभगौर्याः प्रविश्य।

तडित इव घनौघे तत्र तत्र स्फुरन्तीः परित इह पुरन्ध्रीः पर्यटन्तीरपश्यत्।।

एवमेव नारायणभट्टेन (१६६० वै०) द्रौपदीस्वयंवरकथामधिकृत्य पाञ्चालीस्वयंवरचम्पूः श्लेषजालमुक्ता दृश्यते । समरपुङ्गप्रणीते यात्राबन्धे नवाश्वासाः सन्ति । अत्र सर्वाण्यपि तीर्थानि वर्णितानि सन्ति मुख्यानि । ग्रन्थोऽयं १६८० मितवैक्रमाब्दमभितः प्रणीतोऽनुमीयते । १६८० मितवैक्रमाब्दमभितः स्थितिमता मित्रमिश्रेण भङ्गश्लेषमाधृत्य

Scanned with CamScanner

तत्सुतस्तर्कवेदान्ततन्त्रव्याकृतिचिन्तकः।

व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरी।। ३ ।।

अनेनैतत् मन्यते यदसौ अप्पयदीक्षितस्य पौत्र आसीदिति । तेनाऽस्य समयः १७०७ मितवैक्रमाब्दमभितो मतः । स कथयति -

पद्यं यद्यपि विद्यते बहुसतां हृद्यं विगद्यं न तद्

गद्यं च प्रतिपद्यते न विजहत्पद्यं बुधास्वाद्यताम्।

आदत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयं

सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः।।४।।

ग्रन्थस्य कथावस्तु पृष्ठभूमिश्चेत्थम् -

विश्वावलोकस्पृहया कदाचिद्विमानमारुह्य समानवेषम्।

कृशानुविश्वावसुनामधेयं गन्धर्वयुग्मं गगने चचार।। ५ ।।

तौ हि क्रमशः सूर्यलोक-भूलोके, भूलोके अयोध्या-गङ्गानदी-काशीसमुद्र-जगन्नाथक्षेत्र-गुर्जरदेश- यमुनानदी-महाराष्ट्र-आन्ध्रप्रदेश-कर्णाटकदेश-वेङ्कटगिरि-वन-घटिकाचल-दीक्षारण्य-रामानुज-चन्नपट्टण(मद्रास)-काञ्ची-श्रीमद्वेदान्तदेशिकाचार्य-कामासिकानगरवासि-नृसिंह-त्रिविक्रम-कामाक्षीदेवी-एकाम्रेश्वर-क्षीरनदी-वाहानदी-तुण्डीरमण्डल-चञ्जीपुरी-यज्ञवराह-कावेरी-रङ्गनगरी-जम्बूकेश्वर-चोलदेश-शार्ङ्गपाणि-राजगोपाल-सेतु-ताम्रपर्णी-शठकोपमुनि-वेदान्ति-ज्योतिषिक-भिषक्कवि-तार्किक-मीमांसक-वैयाकरण-वैदिक-राजसेवक-दिव्यक्षेत्र-प्रभृतीनां वर्णनं सुनिपुणं कृतमस्ति । कविवर्णनं यथा -

माघश्चौरो मयूरो मुररिपुरपरो भारविः सारविद्यः

श्रीहर्षः कालिदासः कविरथ भवभूत्याह्वयो भोजराजः ।

श्रीदण्डी डिण्डिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः

Scanned with CamScanner

स्योत्तरकाण्डगता कथोपवणताऽस्ति ।श्रीनिवासचम्प्वादशीध्यायाः सन्ति यत्र तिरुमलयस्थितदेवतानां वर्णनं दृश्यते । एवमेव बाणेश्वरस्य चित्तचम्पूग्रन्थे रोज्ञश्चित्रसेनस्य जीवनं चित्रितमस्ति यो हि १८०१ मितवैक्रमाब्दे मृतः। कवेरस्य समयो वैकमैकोनविंशतिशतवपूर्वार्द्धमभितः ।अस्य स्थितिक सम्प्रत्यपि नैवं निर्णीतः।द्वितीयसर्कोजोतिख्यातस्य तञ्जोरनृपस्य कुमारसम्भवचम्पूः (१८७५ वै०)।

अज्ञातकर्तृका सर्वदेवविलासचम्पूर्मद्रदेशस्य तात्कालिकॉमवस्था-वर्णयति । षडाश्वासात्मकोऽयं ग्रन्थोऽपूर्ण एवं दृश्यते ।वर्तमानकाले शिवप्रसादद्विवेदिनी, नवरत्नावलीयमितिः चैम्पूग्रन्थः प्रणीतोऽस्ति ।अत्रं रवनत्नानि सन्ति ।तुलसीदासजीवनसम्बद्धकथाऽत्रं वणता ।ग्रन्थोऽयं २०४० मितवैक्रमाब्दे प्रकाशितः ।इत्थं हि रामायणश्रिताः, महाभारताश्रिताः, भगवताश्रितश्चे संम्त्यनेकै शताधिकांश्चम्पू ग्रन्थाः येषां विवरणमंत्र विस्तरंभिया नवोपस्थाप्यते । भगवती तिचम्पूषु चिदम्बरस्य, रामभद्रस्य, राजनाथस्य च भागवतचम्पूः, केशव भट्टस्य नृसिंहचम्पूः, दैवज्ञसूर्यस्यं नृसिंहचम्पूः, संङ्कर्षणस्य नृसिंहचम्पूः शेषसंस्कृतसाहित्येतिहासः कृष्णस्य पारिजीतहरणञ्च ।मैहाभारताश्रितचम्पूषु अनन्तभट्टस्य भारतचम्पूः प्रसिद्धी ।। - संस्कृतजगति प्रसिद्धाश्चम्पूकारा यथा कालक्रमानुसारेण 'त्रिविक्रमश्च सोमश्च हरिचन्द्रस्तथैव च ।भोजश्च सोड्ढलश्चैव राज्ञी तिरुमलाह्वया ।।नारायणस्तथा चीसन वेङ्कटाध्वरिसूरयः ।शेरोऽपि चे विख्याताश्चम्पूकाव्यविधायकाः ।।' इति ।

**गीतकाव्यं**

गीतकाव्यं संस्कृतसाहित्यस्य नितरां रमणीयः प्रकारः वर्तते । इदं मुक्तकरूपेण प्रबन्धरूपेण च उपलभ्यते । अनेन प्रकारेण रमणीनां रूपहृदययोः सुन्दरं चित्रणं कृतं दृश्यते ।अस्मिन् शृङ्गाररसस्य विभिन्नाः अवस्थाः मार्मिकरूपेण वर्णिताः दृश्यन्ते ।एतेन नारीप्रेम्णः उदात्तता विशुद्धता च ज्ञाता भवति । प्रकृतिवर्णनम् अपि अत्र प्रमुखं स्थानम् आवहति । प्राकृतिकसौन्दर्यम् आन्तरिकसौन्दर्यस्य अनावरणाय कल्प्यते । सङ्गीतसयोजनम् अस्य प्रकारस्य वैशिष्ट्यं वर्तते । नृत्ययोजनस्य साध्यताः अपि अत्र विद्यन्ते । सङ्गीतमपि साहित्यञ्च सरस्वत्या स्तनद्वयम् इत्येषा उक्तिः प्रसिद्धा । एतेषु गीतकाव्येषु सङ्गीतसाहित्यानां समागमः दृश्यते । अत्रत्यं सङ्गीतं भवति आपातमधुरम् । साहित्यं भवति आवलोचनामृतम् । अतः एव जनसामान्यैः अपि अयं प्रकारः आनन्ददायकः भवति । अत्रत्य प्रेम लौकिकप्रेमपरिधिम् अतिरिच्य भक्तिभावं प्रति प्रवहति । अस्य

Scanned with CamScanner

ास्सु माधुर्यभाव जनयन्त्येव । तत्रापि जयदेवस्य शब्दरचनोत दुग्धशर्करायोगोऽयं संजातः ! गीतगोविन्दस्यानुवादाः प्रायः सर्वासु भारतीयभाषासु जाताः । आङ्ग्ल-लेटिन-जर्मनभ-ाषास्वपि तस्यानुवादा अभवन् । जयदेवस्य जन्म १२तमे शतके वङ्गप्रान्ते केन्दुलाख्ये ग्रामेऽभवत् । दुर्दैववशाद्बाल्ये एव तस्य मातापितरौ दिवङ्गतौ । जयदेवो जगन्नाथपुरीमागत्य न्यवसत् । कतिपयदिवसानन्तरं स तीर्थयात्रायै प्रस्थितः । ततोऽनन्तरं तस्य विवाहः सम्पन्नः । पत्न्या सह भ्रमन् स गीतगोविन्दं व्यरचयत् । इतोऽपि तस्य दुर्दैवं न समाप्तम् । यौवने एव तस्य भार्या मृता । अतीव खिन्नः स यशोदानन्दनस्य शिष्यत्वमङ्गीकृतवान् । मृत्योः पूर्वं स स्वग्रामं प्राप्तः । तत्रैव कतिपयदिवसानन्तरं तस्य देहान्तोऽभवत् । अस्मिन्ग्रामे तस्य समाधिस्थानं पूज्यते । तत्र प्रतिवर्षं मकरसङ्क्रान्तिदिने यात्रा भवति ।

परिचयः संस्कृतसाहित्यशृङ्गारगेयकाव्यस्य रचयिता जयदेवः । नादभावयोः माधुर्यार्थं प्रसिद्धस्य जगद्विख्यातस्य गीतगोविन्दकाव्यस्य कर्ता अस्ति अयम् । अस्य माता रामादेवी, पिता च श्रीभोजदेवः । इमम् अंशं सः स्वस्य २४ तमे गीते प्रकाशयति -

श्री भोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।

पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ।।

जयदेवस्य भार्या भवति पद्मावती । स्वयं जयदेवः पद्मावतीचारणचक्रवर्ती इति वाग्देवताचरितचित्रितचित्तसद्मा इति च गीतगोविन्दे कथयामास ।

**जन्मस्थानम्**

Scanned with CamScanner

राजस्य सभामन्दिरस्य द्वारशिलापटे उल्लिखितश्लोकोऽयम् अत्र प्रमाणम् । यथा -

गोवर्धनश्च शरणो जयदेव उमापतिः ।

कविराजश्च रत्नानि समितौ लक्ष्मणस्य च ।।

जीवनम्

बाल्यकालतः मथुरा-बृन्दावनादिषु पुण्यस्थलेषु अटतः तस्य मनसि राधामाधवयोः कथायाः महान् प्रभावः जातः । जगन्नाथपुर्यां तस्य जीवनस्य महत्त्वपूर्णप्रसङ्गः जातः । तस्मिन् स्थले स्थितस्य कस्यचित् ब्राह्मणस्य पुत्री पद्मावती जगन्नाथप्रभोः अनुग्रहात् प्राप्ता आसीत् । तस्य ब्राह्मणस्य स्वप्ने कदाचित् जगन्नाथेन सूचितं यत् पुत्री वृक्षस्य अधः सुप्तवते जयदेवाय दातव्या इति । नेच्छन् अपि सः ब्राह्मणः स्वपुत्रीं जयदेवाय अयच्छत् । गत्यन्तरेण विना जयदेवेन सा परिणीता । उभयोः गुणशीलेषु सामञ्जस्यम् आसीत् इत्यतः तयोः दाम्पत्यं सुखमयं जातम् ।

वाग्देवताचरितचित्रितचित्तसद्मा

पद्मावती चरणचारणचक्रवर्ती ।

श्रीवासुदेवरतिकेलिकथासमेतं

एतं करोति जयदेवकविः प्रबन्धम् ।।

यत्र तेन गीतगोविन्दकाव्यं रचितं सः ग्रामः जयदेवपुरमिति ख्यातं जातम् । तेन रचितम् इदं काव्यं लोकमान्यं जातम् । बहवः तदीयशिष्याः जाताः । सः क्रि श १ २ ० ० तमे वर्षे दिवङ्गतः इति श्रूयते । पुष्यशुक्लसप्तम्याम् अद्यत्वे अपि जयदेवस्य जयन्ती आचर्यते । राजा प्रतापरुद्रदेवः देवालयेषु गीतगोविन्दं गातव्यम् इति आदिष्टवान् ।

कवित्वम्

जयदेवः प्राचीनभारतीयकविषु अन्तिमः आधुनिककविषु आदिमः इति कथयितुं शक्यम् । संस्कृतकाव्यशैल्यां तेन बहवः नूतनाः आविष्काराः कृताः । भक्तिसाहित्यस्य उगमः अत्र दृश्यते । अयं कविः काव्यरचनायाः सर्वान् नियमान् न अपालयत् । अतः गीतगोविन्दकाव्यं शास्त्रीयकाव्यं न । अस्मिन् तेन नूतनशैली आधृता अस्ति या च तदीयकालानुगुणा अस्ति ।

गीतकाव्यमिदं भगवतः आराधनायै उद्दिष्टम् आसीत् । हरिस्मरणे मनो निरतं भवेत् । मनोनिरतिः आन्तरधर्मः आध्यात्मिकश्च । तत्स्मरणमेव शरणम् । ततोऽपि अवश्यं स्पृहणीयम् । कुतूहलं तु बाह्यमिति भौतिकम् । तदपि मनोधर्म एव । एवं स्मरणकुतूहलयोः साम्यं परिलक्ष्यते । एतत्सर्वमपि भावं मनसि निधाय निसर्गरमणीयं नितान्तं



Scanned with CamScanner

तादृशस्य अतिप्रसिद्धस्य पञ्चतन्त्रस्य रचयिता विष्णुशर्मा । विष्णुशर्मा काश्मीरदेशीयः । ब्राह्मणोऽयं श्रुतिस्मृतिपुराणेतिहासेषु कृतभूरिपरिश्रमः आसीत् । तस्य विषये श्रूयमाणः श्लोकः कश्चन एवमस्ति -

मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।

चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः ।।

सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम् ।

तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम् ।।

कालविचारः

क्रि.श. पञ्चमशतमाने विद्यमानस्य भर्तृहरेः सुभाषितेषु विद्यमानाः अनेके श्लोकाः द्वित्रपदभेदेन पञ्चतन्त्रे दृश्यन्ते । क्रि श ५३१ तः - ७९पर्यन्तं पर्षियादेशं शासितवान् खुस्त्रु अनुशरिवान् इत्येतस्य आज्ञानुसारं आगैपेह्लविभाषया अयं ग्रन्थः अनूदितः अस्ति । एतैः कारणैः विष्णुशर्मा अपि पञ्चमशतमाने भर्तृहरेः अनन्तरकाले आसीदिति वक्तुं शक्यते ।

फलश्रुतिः

Scanned with CamScanner

मम्मटरुय्यकानन्तर अलङ्कार शास्त्रातिहास विश्वनाथस्य स्थानमस्ति । संस्कृतप्राकृतभाषा तिरिक्तमनेकेषां भाषाणां विदुषा विश्वनाथेन कविजागत्यपि ख्यातिरर्जिता । आलंकारिक-ापेक्षया विश्वनाथः श्रेष्ठः कविरप्यासीत् । उत्कलवशोत्पन्नः कवेश्चन्द्रशेखरस्यात्मज आसीत कविराजः । यथा स्वयमेव संकेतितम्

श्रीचन्द्रशेखरमहाकविन्द्रसूनुः श्रीनारायणोऽस्य प्रपितामह आसीत् यथा तत् प्राणत्वं च वृध्दिपितामह श्रीनारायणपादैरुक्तम् परं काव्यप्रकाशस्य भूमिकायां वामनाचार्येण काव्यप्रकाशदर्पणटीकायां श्रीनारायणः कविराजस्य पितामहः संकेतितः । यथा ज्यदाहु श्री कलिङ्गभूमण्डलाखण्डल महाराजाधिराज श्री नरसिंहदेव सभायां धर्मदत्तं स्थगयन्तः सकत्नहृदय गोष्ठी ख्रगरिष्ठ कविपण्डितास्मद्पितामह श्री नारायणदासपादाः ।

अनेन प्रतीयते यत् विश्वनाथस्य पितामहः नारायणदासः महाराजनरसिंहदेवस्य सभायां बहुसम्मानितः आसीत् । विश्वनाथेन स्वं स्वजनकं च सन्धिविग्रहकौ संकेतितम् । अतः पितापुत्रौ कलिङ्गदेशस्य राजमन्त्रिणौ स्याताम् । काव्यप्रकाशस्य दीपिकाटीकाकारः चण्डीदत्तोऽस्य पितामहस्यानुजः आसीत् । कविराज उत्कलनिवासी प्रतीयते । यतोहि

Scanned with CamScanner

विश्वनाथस्य प्रकाशमाधंकृतालोचनाया: प्रत्यालोचना कृता दृश्यते । यस्यकाल: १६०० तमे रिव्रष्टाब्दे स्वीक्रियते । कुमारस्वामिना रत्नार्पणे विश्वनाथस्य नामोल्लेख: कृत: । यस्य काल: पंचदश शताब्धा मासीत् । अतो विश्वनाथ: पंचदशशताब्धद्व पूर्ववर्ती खलु । अनेन प्रकारेण कृते विचारे विश्वनाथस्य स्थिति काल: त्रयोदशशता०द्या: उत्तरार्धे चतुर्दशशताब्धा: पूर्वाध्दे निश्चीयते समालोचकै: ।

## ६.६ संस्कृत साहित्य में ओरिसन विद्वान

संस्कृत साहित्यक्षेत्रे ओरिसनस्य विदषां योगदान निन्दनीय: वर्तते। ते ज्ञानस्य विभिन्न शाखा: अर्थात् व्याकरणम् राजनीति शास्त्रम्, अर्थशास्त्रम्, काव्यशास्त्रम्, ज्योतिषशास्त्रम्, खगोल विज्ञानम् तन्त्रम, नृत्यम् संगीतम् वास्तुकला, अरिथमेटिक, भूगोलशास्त्रम व्यापार मार्ग: भोगप्रथा: इत्यादिषु स्वस्थ्य उत्कृष्टताया: प्रदर्शनम् अकुर्वन्। ते एतस्य अतिसृमद्धम् अकुर्वन। हलधर मिश्र: ओडिसाया: प्रख्यात: संस्कृत कवि: आसीत् ये खुर्धाया: गजपति नरसिंहदेव: (1623-1647) तस्य समये वर्धन गौरवं च सञ्जातम्। बसन्तोत्सव महाकाव्येम् एवञ्च संगीता कल्पबलता अनयो: काव्ययो रचना तै: कृता। वसन्तोत्सव महाकाव्ये कारस्य वर्णनमस्ति। वसन्त वातावरणस्य समये भगवत: जगन्नाथस्य उत्सव: य: कारोत्सवेन सह गजपति: नरसिम्हा देवेन प्रस्थापितम्। य: पारम्परिकरूपेण चन्द्रमासस्य आषाठोज्जवलं पखवाडस्य द्वितीय दिवसे मन्यन्ते। कृते: आरम्भे कवि: स्वसंरक्षक प्रिवारस्य एक: संक्षिप्त विवरण गजपति: रामचन्द्र

Scanned with CamScanner

कविर्दिदिमा जीवदेवाचार्य: भक्ति भागवत महावाक्यं लिखितवान्। स: वत्स गोत्रस्य आसीत्। महाकाव्यस्य प्रारम्भे ते पुरूषोत्रमदेव: पर्यन्तं चोदगंगादेवत: उडीसाया: सम्राज: संक्षिप्त विवरण दत्रम् तस्य भक्ति वचनं कृष्ण मिश्रस्य प्रबोध चन्द्रोदयवत एक: रूपक: अस्ति। स: नायिकाया: नाम्नि शउषावतीश् नामक: एक नाटकमयि लि खितवान्। य: युधिष्ठिरस्य बल्यश्वस्य सुरक्षायाम् अर्जुन बाधा प्रापितवान् एवञ्च य: अन्ते नारद: एवञ्च श्री कृष्णस्य उपस्थितो अर्जुनेन सह विवाह: अभवत। जीवदेव: राजगुरू: त्रिलोचनाचार्य: एवञ्च रत्नावली अनयो: पुत्रमासीत्।

## ६.६ अभ्यास प्रश्न

१. संस्कृतगद्यवाङ्.मयपरिचय: व्याख्याति करोति।

२. चम्पूकाव्य: विवृणोति करोति।

३. जयदेव विवृणोति करोति।

४. विष्णुशर्मा व्याख्याति करोति।

❖❖❖



Scanned with CamScanner

Scanned with CamScanner